[redacted]

anra
1-1-2004

Salitya

निबन्ध

बृहत्संस्कृतनिबन्धकलिका

by

आचार्य शिवप्रसाद द्विवेदी

RGCSLIB
04350

1998

15

4350

दो शब्द

बृहद्-संस्कृत-निबन्ध-कलिका के अध्ययन हेतु सभी विश्वविद्यालयों के पाठ्यक्रम के अनुसार यह पुस्तक तैयार की गई है, जिसमें विद्यार्थियों के लिए सरल भाषा का प्रयोग किया गया है। साथ ही I. A. S., P. C. S. के कम्पटीशन के परीक्षा की तैयारी के लिए निबन्धों को ध्यान में रखकर लिखा गया है, जिससे छात्रों को लाभकारी सिद्ध होगा।

प्रकाशक

रु. 150/-

1558 ई.

1998

[redacted]

Redue.

निवन्धानुक्रम

क्र. सं. निबन्धाः

१. उपमा कालिदासस्य
  (क) दीपशिखाकालिदासः
  (ख) कालिदासो विलासः १

२. भारवेरर्थगौरवम् ३

३. दण्डिनः पदलालित्यम्
  (क) कविर्दण्डी न संशयः
  (ख) कवयस्त्वयि दण्डिनि
  (ग) आचार्यदण्डिनो वाचामाचान्तामृतसम्पदाम् ।
  विकासो वेधसः पत्न्या विलासमणिदर्पणम् । ५

४. माघे सन्ति त्रयो गुणाः ।
  (क) मेघे माघे गतं वयः ।
  (ख) नवसर्गगते माघे नवशब्दो न विद्यते ।
  (ग) काव्येषु माघः ।
  (घ) मुरारिपदचिन्ता चेत्तदा माघे रतिं कुरु ।
  (घ) तावद्भा भारवेर्भाति यावन्माघस्य नोदयः । ८

५. नैषधं विद्वदौषधम्
  (क) नैषधमहाकाव्यस्य काव्यात्मकं सौष्ठवम् ।
  (ख) उदिते नैषधे काव्ये क्व माघः क्व च भारविः । ११

६. बाणोच्छिष्टं जगत् सर्वम्
  (क) बाणस्तु पञ्चाननः ।
  (ख) गद्यं कवीनां निकषं वदन्ति ।
  (ग) बाणः कवीनामिह चक्रवर्ती
  (घ) हृदयवसतिः पञ्चबाणस्तु बाणः ।
  (ङ) रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति ।
  सा किं तरुणी ! नहि नहि वाणी बाणस्य मधुरशीलस्य ॥ १३

७. वेदानां महत्त्वम्
  (क) वेदोऽखिलो धर्ममूलम् । १५

८. गीता सुगीता कर्तव्या

क्र. सं. निबन्धाः पृष्ठाङ्काः

(क) एकं शास्त्रं देवकीपुत्रगीतम्। १७
(ख) दुग्धं गीतामृतं महत्।

९. किं किं न साधयति कल्पलतेव विद्या
(क) विद्याधनं सर्वधनप्रधानम्
(ख) उत्तमं हि धनं विद्या दीयमानं न हीयते। २२

१०. संस्कृतभाषायाः महत्वम्
(क) संस्कृतमेव भाषाविवादं समाहितिः
(ख) संस्कृतं राष्ट्रभाषा स्यात्
(ग) संस्कृतं सर्वभेषजम् २५

११. उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
(क) उद्यमेन हि सिद्धयन्ति कार्याणि न मनोरथैः २६

१२. आचारहीनं न पुनन्ति वेदाः
(क) आचारः परमो धर्मः
(ख) शीलं परं भूषणम्
(ग) सदाचारः २९

१३. अहिंसा परमो धर्मः ३१

१४. परोपकारः
(क) परोपकारः पुण्याय पापाय परपीडनम्
(ख) परोपकाराय सतां विभूतयः ३२

१५. आर्जवं हि कुटिलेषु न नीतिः
(क) व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः।
(ख) शठे शाठ्यं समाचरेत्।
(ग) कण्टकेनैव कण्टकम् ३४

१६. छात्राणामध्ययनं तपः ३५

१७. सत्संगतिः कथय किं न करोति पुंसाम्
(क) सतां तु संगः सकलं प्रसूते।
(ख) सतां सद्भिः कथमपि हि पुण्येन भवति॥ ३७

१८. योगः कर्मसु कौशलम्
(क) योगश्चित्तवृत्तिनिरोधः।
(ख) समत्वं योग उच्यते। ३८

१९. पण्डितास्समदर्शिनः ४०

क्र. सं.	निबन्धाः	पृष्ठाङ्काः
२०.	अयोध्यावर्णनम्	४१
२१.	सरयूवर्णनम्	४२
२२.	नौकाविहारः	४३
२३.	वाराणसीवर्णनम्	४५
२४.	महर्षि दयानन्दः	४६
२५.	महात्मा गाँधी	४७
२६.	गोमहिमा:	४९
२७.	बुद्धिर्यस्य बलं तस्य (क) बुद्धिर्यस्य स जीवति (ख) दीर्घौ बुद्धिमतो बाहू ।	५०
२८.	क्षमा खड्गः करे यस्य दुर्जनः किं करिष्यति	५१
२९.	सहसा विदधीत न क्रियामविवेकः परमापदां पदम् (क) विवेकभ्रष्टानां भवति विनिपातश्शतमुखः । (ख) अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः ॥	५३
३०.	मुखं व्याकरणं स्मृतम् (क) व्याकरणशास्त्रस्य महत्वम् । (ख) तेषां हि सामग्र्यंजुषां पवित्रं महर्षयो व्याकरणं निराहुः ।	५४
३१.	वक्रोक्तिसम्प्रदायः	५८
३२.	अलङ्कारसम्प्रदायः	६०
३३.	रीतिसम्प्रदायः	६३
३४.	रससम्प्रदायः	६६
३५.	वेदाङ्गानां महत्वम् (क) षडङ्गो वेदोऽध्येयो ज्ञेयश्च। (ख) षट्शास्त्राणि	७०
३६.	उपनिषदाः उपासनाः मोक्षविद्याः	७४
३७.	मन्त्रब्राह्मणयोर्वेदनामधेयम् (क) वेदा विज्ञानराशयः ।	८०
३८.	सर्वोपनिषदो गावः (क) वेदान्तानामुपनिषत् प्रमाणम् (ख) उपनिषदाम् महत्वम् (ग) उपनिषदामवदानम्	८४

क्र. सं. निबन्धाः पृष्ठाङ्काः
३९. राष्ट्रीयैकता ८९
४०. साधनसप्तकानुगृहीतमनाः परमात्मानमुपासीत
(क) भक्तेः साधनानि
(ख) अनुविद्यविजानाति ९१
४१. पंचवर्षीययोजनाः ९५
४२. तत्त्वत्रयम्
(क) भोक्ता भोग्यं प्रेरितारश्च मत्वा । ९७
४३. ध्वनिसम्प्रदायः १०१
४४. औचित्यसिद्धान्तः १०४
४५, काव्यहेतुः १०७
४६. काव्यलक्षणम् ११०
४७. संस्कृतसाहित्ये राष्ट्रीयभावना ११४
४८. कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
(क) कर्मणैव हि संसिद्धिमास्थिताः जनकादयः ।
(ख) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन । ११८
४९. काव्यस्यात्मा ध्वनिः १२१
५०. आदिकविर्वाल्मीकिः
(क) वन्दे वाल्मीकिकोकिलम् ।
(ख) रम्या रामायणी कथा । १२४
५१. महाभारतम् ज्ञानपरम्परायाः विश्वकोशः
(क) वेदानध्यापयामास महाभारतपञ्चमान् ।
(ख) यन्न महाभारते तन्न भारते । १२८
५ . पुराणानां महत्त्वम्
(क) इतिहासपुराणाभ्याम् वेदं समुपबृंहयेत् ।
(ख) वेदार्थो निश्चेतव्यः इतिहासपुराणैः १३१
५३. विद्यावताम् भागवते परीक्षा १३५
५४. पुराणं पञ्चलक्षणम्
(क) पुराणं दशलक्षणम् १३७
५५. नास्ति सांख्यसमं ज्ञानम्
(क) सांख्यतत्त्वविवेचनम् १४१
५६. योगान्नास्ति परं बलम्

क्र. सं. निबन्धाः पृष्ठाङ्काः

(क) योगदर्शनस्य तत्त्वनिरूपणम्
(ख) योगेन चित्तशोधनम् १४४

५७. सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः
(क) एकं सांख्यं च योगं च पश्यति स पश्यति ।
(ख) सांख्योगयोः सम्यङ्निरूपणम् । १४८

५८. दर्शनं लोकदर्शनम्
(क) भारतीयदर्शनान्येव भारतस्य निधयः ।
(ख) भारतीयदर्शनानां महत्त्वं वैशिष्ट्यं च । १५१

५९. चार्वाकदर्शनम्
(क) यावज्जीवेत् सुखं जीवेत् ।
(ख) भस्मीभूतस्य देहस्य पुनरागमनं कुतः । १५४

६०. जैनदर्शनम्
(क) स्याद्वादः ।
(ख) सप्तमङ्गीनयः । १५७

६१. वौद्धदर्शनस्य विहङ्गावलोकनम् १६०
६२. मीमांसादर्शनम् १६३
६३. काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् वैशेषिकदर्शनम् १६६
६४. अद्वैतदर्शनम् १६९
६४. काश्मीरीयशैवदर्शनम् १७२
६६. विशिष्टाद्वैतदर्शनम् १७४

६७. धन्यासि वैदर्भिगुणैरुदारैः
(क) वैदर्भी ललितक्रमा ।
(ख) समग्रगुणसम्भिन्ना वैदर्भी रीतिः । १७८

६८. वृत्तयो नाट्यमातरः १८०
(क) सर्वेषामेव काव्यानां वृत्तयो मातृकाः स्मृताः ।

६९. भाषायाः स्वरूपम् १८५
७०. भाषोत्पत्तिविषयकाः वादाः १८८
७१. भाषा परिवर्त्तनस्य हेतवः १९१
७२. भारतीयविदुषां भाषाविज्ञानेऽवदानाम् १९५
७३. वैदिकलौकिकसंस्कृतयोः साम्यं वैषम्यं च १९८
७४. पालिभाषायाः स्वरूपनिरूपणम् २००

क्र. सं. निबन्धाः पृष्ठाङ्काः
७५. भाषावैज्ञानिकमर्थविज्ञानम् २०१
७६. भाषावैज्ञानिकम् व्युत्पत्तिशास्त्रम् २०४
७७. शब्दशक्तयः
(क) अभिधादिकानां शक्तीनां स्वरूपनिरूपणम् २०६
७८. शाकुन्तलं सेव्यताम्
(क) कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् २१०
७९. संस्कृतगद्यकाव्यविकासः
(ग) संस्कृतगद्यकाव्यपरम्परा २१३
८०. संस्कृतरूपकाणाम् विषये प्रचलितमतानाम् समीक्षणम्
(क) नाटकोत्पत्तिविषयकाणाम् मतानाम् विश्लेषणम् २१७
८१. भासस्य नाटकचक्रम् २२१
८२. उत्तरे रामचरिते भवभूतिर्विशिष्यते २२१
८३. जनतन्त्रवादः
(क) लोकतन्त्रम् २२६
८४. अधिनायकवादः २३०
८५. साम्राज्यवादः २३३
८६. संयुक्तराष्ट्रसंघ २३६
८७. लक्षणा तेन षड्विधा
(क) लक्षणाशक्तिः २३७
८८. व्यञ्जनाशक्तिः २४०
८९. ध्वनिकाव्यम् २४२
९०. गुणीभूतव्यंग्यकाव्यम् २४४
९१. काव्यगुणाः २४७
९२. काव्यदोषाः २५०
९३. काव्येषु शब्दालङ्काराः २५३
९४. काव्येष्वर्थालङ्काराः
(क) अर्थालङ्काराः २५५
९५. महाकविकालिदासस्य परिचयः २५८
९६. मम्मटस्य परिचयः २६०
९७. अभिनवगुप्तस्य परिचयः २६२
९८. अश्वघोषस्य परिचयः २६४

[redacted]

क्र. सं.	निबन्धाः	ष्ठाङ्काः
९९.	दण्डिनः परिचयः	२६६
१००.	भरतमुनेः परिचयः	६७
१०१.	भामहस्य परिचयः	२६८
१०२.	रुय्यकस्य परिचयः	२७०
१०३.	पण्डितराजस्य जगन्नाथस्य परिचयः	२७१
१०४.	आनन्दवर्द्धनस्य परिचयः	२७३
१०५.	राजशेखरस्य परिचयः	२७४
१०६.	विश्वनाथस्य परिचयः	२७६
१०७.	अम्बिकादत्तव्यासस्य परिचयः	२७८
१०८.	बाणभट्टस्य परिचयः	२७९
१०९.	भारवेः परिचयः	२८१
११०.	माघस्य परिचय	२८२
१११.	भासस्य परिचयः	२८४
११२.	श्रीहर्षस्य परिचयः	२८६
११३.	भट्टेः परिचयः	२८८
११४.	मयूरस्य परिचयः	२८९
११५.	भट्टनारायणस्य परिचयः	२९०
११६.	शूद्रकस्य परिचयः	२९१
११७.	सुबन्धोः परिचयः	२९३
११८.	गुणाढ्यस्य परिचयः	२९४
११९.	रसनिष्पत्तिः	
	(क) विभावानुभावसंचारिसंयोगाद्रसनिष्पत्तिः	२९५
१२०.	अष्टौ नाट्ये रसाः स्मृताः	
	(क) शान्तोऽपि नवमः रसः	३००
१२१.	काव्यप्रयोजनम्	३०४
१२२.	ऋग्वेदपरिचयः	३०६
१२३.	यजुर्वेदपरिचयः	३०८
१२४.	सामवेदपरिचयः	३०९
१२५.	अथर्ववेदपरिचयः	३११
१२६.	हर्षचरितपरिचयः	३१३
१२७.	कादम्बर्याः परिचयः	३१५
१२८.	विक्रमाङ्कदेवचरितस्य परिचयः	३१६

क्र. सं. निवन्धाः पृष्ठाङ्काः

१२९. तरङ्गिण्याः परिचयः ३१८

१३०. वासवदत्तायाः परिचयः ३२०

१३१. शिवराजविजयपरिचयः ३२२

१३२. कौटिल्यार्थशास्त्रपरिचयः ३२४

१३३. भरतनाट्यशास्त्रपरिचयः ३२९

१३४. संस्कृतभाषया चिकित्साशास्त्रम् ३३१

१३५. निरुक्तम् ३३४

१३६. वेदाङ्गम् छन्दःशास्त्रम् ३३७

१३७. वेदाङ्गम् ज्योतिषम् ३३९

१३८. वेदाङ्गम् शिक्षाशास्त्रम् ३४१

१३९. वेदाङ्गम् कल्पः ३४५

१४०. षोडश संस्काराः

(क) संस्काराः ३४८

१४१. विवाहसंस्कारः ३५०

१४२. न्यायदर्शनस्य स्वरूपनिरूपणम् ३५४

१४३. न्यायदर्शनानुसारेण प्रमाणनिरूपणम् ३५७

१४४, न्यायदशनानुसारेण प्रत्यक्षप्रमाणविवेचनम् ३६०

१४५. न्यायदर्शनानुसारेण अनुमानप्रमाणविवेचनम् ३६४

१४६. व्याप्तेः निरूपणम् ३६७

१४७. शब्दप्रमाणविवेचनम् ३६९

१४८. न्यायदर्शनस्य द्वादशविधानि प्रमेयाणि ३७४

१४९. देहात्मवादसमालोचनम् ३७८

१५०. इन्द्रियात्मवादसमालोचनम् ३८१

१५१. मन-आत्मवाद समालोचनम् ३८२

१५२. प्राणात्मवादसमालोचनम् ३८४

बृहद्-संस्कृत-निबन्ध-कलिका

उपमा कालिदासस्य

अथवा-दीपशिखा कालिदासः ।
अथवा-कालिदासो विलासः ।

संस्कृतसाहित्यस्य कविताकामिन्या विलासनाम्ना प्रथितस्य कविकुलगुरोः कालिदासस्य प्रातिभी कविता समेषु विपश्चिदपश्चिमेषु विदिततमा । भाषासारल्यसरसतयोः प्रतीकभूतस्य कवेः कालिदासस्य प्रतिभा चतुरस्रा आसीत् । सोऽयं कविः कवितायाः सर्वाण्यङ्गानि पूर्णसफलतया पस्पर्श । अनेन महाकाव्य–खण्डकाव्य–नाटकानि प्रणीतानि । अस्य महाकवेः रघुवंश–कुमारसम्भवाख्ये द्वे महाकाव्ये; मेघदूत–ऋतुसंहारौ द्वे खण्डकाव्ये विक्रमोर्वशीय–अभिज्ञानशाकुन्तले द्वे नाटके, इत्थमाहत्य षट् काव्यानि सन्ति । अस्य महाकवेरिमानि सर्वाणि काव्यानि सूक्ष्मेक्षिकया सम्पन्नानि काव्यात्मकसौन्दर्येण च परिपूर्णानि सन्ति । महाकविकालिदासं संस्मरन् महाकविर्बाणभट्टो 'हर्षचरिते' प्रावोचत्—'निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु । प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ॥'

उपमाया विषये महाकविः कालिदासः सर्वान् कवीनतिशेते । उपमां लक्षयन् साहित्यदर्पणकारो विश्वनाथो वक्ति—'साम्यं वाच्यमवैधर्म्यं वाक्यैक्य उपमाद्वयोः' । इति । अयमाशयः—यत्रैकस्मिन्नेव वाक्ये द्वयोर्वस्तुनोः वैषम्यं विहाय केवलं साम्यमेवोच्यते तत्रोपमालंकारो भवति । इयमुपमा विश्वस्मिन् वाङ्मये विद्युदिव विद्योततेतराम्; करोति च काव्येष्वतिशयाधानम् । उपमायाः प्रयोगे कालिदासस्याद्भुतं वैशारद्यं विभाति । कालिदासीयोपमासु लिङ्गवचनयोस्साम्यम् औचित्यम्, रम्यता, पूर्णता, यथार्थता चोपलभ्यन्ते । तथाहि—हस्तयोर्वरमालामादाय पतिं वृणीतुं कामनया राज्ञां समक्षं गच्छन्त्याः इन्दुमत्या वर्णनं कुर्वन् कविर्वक्ति यत्—स्वयंवरस्थले उपविष्टा राजानः नरेन्द्रमार्गाट्टा इव वर्तन्ते । इयमिन्दुमतिश्च सञ्चारिणीदीपशिखेव भाति । यस्य राज्ञस्समक्षमियं याति सो राजा मामियमवश्यं वरिष्यतीति देदीप्यमानो भवति । यं राजानमतिक्रम्येयमग्रे याति स राजा आशया निराशान्धकारे निमग्नो भवति । तथाहि—

सञ्चारिणी दीपशिखेव रात्रौ, यं यं व्यतीयाय पतिंवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ॥

अत्र कालिदासस्योपमानोपमेययोः प्रयोगचातुर्यस्य काष्ठां चुम्बति । तन्मनाङत्र विव्रियते—

महाकविना स्त्र्यैकवचने विद्यमानायाः पतिंवरायाः इन्दुमत्याः प्रथमा स्त्र्यैकवचने विद्यमानया दीपशिखया, पुंस्येकवचनस्य भूपालस्य पुंस्येकवचवेन नरेन्द्रमार्गाट्टेन च सहोपमां प्रादात् । अस्या एवोपमाया विच्छित्तिः विशेषं दर्शं दर्शं समालोचका एनं महाकविं 'दीपशिखा कालिदासः' इति विरुदेनालमकार्षुः । एतादृशा एव वैचित्र्यविशिष्टाः काश्चनोपमा अत्र प्रस्तूयन्ते ।

१—नित्यमिलितौ भगवन्तौ पार्वतीपरमेश्वरौ शब्दार्थाविवाभिन्नौ वर्तेते—इत्याह महाकविः रघुवंशमहाकाव्ये—

'वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥'

२—दिलीपसुदक्षिणयोर्मध्ये विद्यमाना रक्तवर्णा नन्दिनी दिनारात्र्योर्मध्ये समागता सन्ध्येवाभाति—

'पुरस्कृता वर्त्मनि पार्थिवेन, प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥'

३—श्रुतीनामेवार्थानामुपबृंहणं कुर्वन्ति स्मृतय इति श्रुतेरर्थानुगामिनो भवति स्मृतिः । सुदक्षिणाऽपि नन्दिनीं श्रुतेरर्थं स्मृतिरिवानुजगाम—

'तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥'

४—तव गीतरागेण तथैव बलादाकृष्टं मे चेतो यथाऽतिशयवेगवता मृगेण राजा दुष्यन्तः समाकृष्टोऽभूत्—

'तवास्मि गीतरागेण हारिणा प्रसभं हृतः ।
एष राजेव दुष्यन्तः सारङ्गेणातिरंहसा ॥'

५—यथा ययातेः प्रियतमा शर्मिष्ठाभूत् तथैव त्वमपि दुष्यन्तस्य प्रियतमा भव । 'ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।'

६—महर्षे कण्व ! जगतः कल्याणाय राज्ञा दुष्यन्तेनाहिततेजोवती अन्तर्वत्नी शकुन्तला, साम्प्रतम् अग्निगर्भां शमीमिव वर्त्तते इत्यवगच्छतु भवान्—'दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः । अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥'

इत्थं कालिदासस्य काव्येषूपमानां सौन्दर्यं सर्वत्र विराजतेतराम् । ऽयं कविः क्वचनोपमाया माध्यमेन वैदिकानां रहस्याणाम् उन्मीलनं करोति । यथा—'आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।' इत्यत्र; क्वचन दार्शनिकाणां विषयाणां यथा—'ब्राह्मं सरः कारणमाप्तवाचो बुद्धेरिवाव्यक्तमुदाहरन्ति ।' इति । क्वचन च यज्ञीयानां विषयाणां विवेचनं करोति । यथा—'श्रद्धेव साक्षाद्विधिनोपपन्ना ।' इदमेव नहि अनेकेषां विषयाणामुपमा उपलभ्यन्ते महाकवेः कालिदासस्य काव्येषु । तथाहि—यथो-

परागानन्तरं रोहिणी चन्द्रमसमुपैति तथैव शकुन्तलापि दुष्यन्तमुपजगाम–'उपरागान्ते शशिनः समुपगता रोहिणीयोगम् ।' अत्र ज्योतिश्शास्त्रविषयिण्युपमा; समुदिताः प्रभुमन्त्रोत्साहशक्तयः अक्षय्यं धनं सूते तथैव सुदक्षिणापि रघुनामानं पुत्रमजीजनत्–'त्रिसाधनाशक्तिरिवार्थमक्षयम् ।' अत्र राजनीतिविषयिण्युपमा; दुष्यन्तेनोद्वाहिता शकुन्तला सुशिष्याय प्रदत्ता विद्येवाशोचनीयतां गता–'सुशिष्यपरिदत्ता विद्येवाशोचनीयाऽस्ति संवृत्ता ।' अत्राध्ययनविषयिण्युपमा यथोत्सर्गनियमोऽपवादनियमेन वाध्यते तथैव लवणासुरं ववाधे शत्रुघ्नः—'अपवाद इवोत्सर्गं व्यावर्तयितुमीश्वरः ।' अत्र च व्याकरणविषयिण्युपमा वर्तते ।

सोऽयं महाकविः मूर्तममूर्तरूपेणोपमिमीते क्वचन । यथा—मूर्तो दिलीपः अमूर्तक्षात्रधर्मेवाभूत्–'क्षात्रधर्मैरिवाश्रितः ।' रथं मनोरथामिवास्ते 'स्वेनैव पूर्णेन मनोरथेन ।' सूर्यचन्द्रवृक्षादि प्राकृतपदार्थैस्सम्वद्धा अपि उपमाः कालिदासस्य प्राकृतानुरागमभिव्यञ्जयन्ति ।

इत्थं कालिदासस्योपमाः उपमानोपमेयाणां प्रयोगविषये लिङ्गवचनानां विपर्यासविरहिताः सर्वथा निरवद्याः मनोहराश्च वर्तन्ते, याः दर्शं दर्शं समालोचकानां चेतांसि समाकृष्टानि भवन्ति । इत्थम्भूतानामुपमानां विच्छितिवैशिष्ट्यं विलोक्य सहसैव निस्सरति मुखात् सहृदयानाम्–'उपमा कालिदासस्येति' ।

भारवेरर्थगौरवम्

महाकविर्भारविः संस्कृतसाहित्यस्य महाकविष्वन्यतमं स्थानं बिभर्ति । अनेन महाकविना प्रणीतं 'किरातार्जुनीयं महाकाव्यम्' वृहत्त्रय्यामन्यतमं वर्तते । 'किरातार्जुनीयम्' महाकाव्यस्य सर्वैः गुणैः सम्पन्नमास्ते । महाकविर्भारविः महाकाव्यप्रणयनशैल्यामेकामेतादृशीं कलात्मिकां प्रवृत्तिमङ्गीचकार यया वैदेशिका अपि सहृदयाः प्रभाविता अभूवन् । अयं महाकविः 'किरातार्जुनीये' अर्थगौरवस्य सन्निवेशं वैपुल्येनाकार्षीत्; तस्मादेवेदं महाकाव्यमर्थगौरवदृष्ट्या प्रख्याततममभूत् । ओजगुणसमन्वितेऽस्मिन् महाकाव्ये अष्टादश सर्गास्सन्ति । अत्र महाकाव्ये किरातवेषाङ्गीकृतस्य भगवतश्शंकरस्य अर्जुनेन साकं युद्धमुपवर्णितम् । अस्य महाकाव्यस्य वीर एव रसोऽङ्गीरसः तद्व्यतिरिक्ता सा गैणास्सन्ति । अस्य महाकाव्यस्योपक्रमः 'श्रीः' शब्देन भवति । सर्वेषां सर्गाणामन्तिमे श्लोके श्रीशब्दस्याथवा तस्य पर्यायवाची 'लक्ष्मीः' शब्दस्य प्रयोगः कृतो वर्तते ।

येन प्रकारेण महाकविकालिदासस्य काव्येषु सत्स्वप्यन्येषु अर्थान्तरन्यासप्रभृतिष्वलंकारेषूपमायाः प्राधान्यं दृश्यते तथैव 'किरातार्जुनीये' महाकाव्येऽपि काव्योत्कर्षोपयोगिषु, व्याकरणशास्त्रस्य प्रौढानुशीलनम्, नीतिशास्त्रस्य नैपुण्यम् अलंकारशास्त्रस्य प्रौढानुशीलनम्, नीतिशात्रस्यनैपुण्यम् अलंकारशास्त्रस्य नैपुण्यम् प्रभृतिषु पदे-पदे सन्निविष्टेष्वपि; अर्थगौरवस्य भूम्ना महिम्ना महितमास्ते इदं महाकाव्यम् ।

किरातार्जुनीयमहाकाव्यस्य महान् टीकाकारो मल्लिनाथो लिखति भारवेः प्रशस्तिरूपेण—"नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते । स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यदीप्सितम् ॥"

किरातार्जुनीये प्रकृतिवर्णनस्य प्रसंगे महाकवेः अनेकेषामलंकाराणाम् प्रयोगः व्याकरण–काव्यशास्त्र–नीतिशास्त्र-कामशास्त्रप्रभृतेः पाण्डित्यम् च परिलक्ष्यते। चित्रालंकाराणां प्रयोगप्रसंगेऽयं कविः कुत्रचित् तु एकाक्षरात्मकमेव श्लोकं लिखति । तथा च—

न नोननुन्नो नुन्नोनो नाना नानानना ननु।
नन्नोऽनुन्नो ननुन्नोनो नानेना नुन्ननुन्ननुत् ॥ (कि० १५।१४)

क्वचित्तु श्लोकस्य चतुर्षु पादेषु समानाक्षरात्मकानां पदानां प्रयोगो दृश्यते । तथाहि—

विकासमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ।
विकाशमीयुर्जगतीशमार्गणा विकाशमीयुर्जगतीशमार्गणाः ॥
(१५।१५)

अत्रेदमत्यावश्यकं विवेचनीयमास्ते–किं नामार्थगोरवम् ? कथमिदलंकरोति च काव्यमिति । तद्यथा–अत्यल्पेषु शब्देषु अधिकाधिकानामर्थानां भावात्मकालंकृतशैल्यां वर्णनमेवार्थगाम्भीर्यमित्युच्यते । भारवेरनुसारेण सततं पुण्यकर्मसु व्यापृतस्यैव कवेर्वाणीष्विदं गाम्भीर्यमायातीति—"प्रवर्तते नाकृतपुण्यकर्मणां प्रसन्नगम्भीरपदा सरस्वती ।" स्वमनोगतभावनां परि-क्रियामेदुरया गिरा प्रकाशने समर्थ एव समाजे समादृतो भवति वाग्मिताञ्च लभते—'भवन्ति ते सभ्यतमा विपश्चिता मनोगतां वाचं निवेशयन्ति ये । नयन्ति तेष्वप्युपपन्ननैपुणा गभीरमर्थं कतिचित् प्रकाशताम् ॥' (१४।४) प्रेम्णां महत्त्वं प्रतिपादयन् कविरयं वक्ति—गुणानामाश्रयः प्रेम्णाम्प्राचूर्यं भवति न तु सौन्दर्यातिशयम् । 'वसन्ति हि प्रेम्णि गुणा न वस्तूनि'। (८।३७) सांसारिकाणां वस्तूनां स्वरूपयाथात्म्यं प्रतिपादयन्–कविरयमभिधत्ते विषयाणामाकर्षणं दुःखोदर्कमापातरमणीयश्च भवति । 'आपातरम्या विषया पर्यन्तं परितापिनः । (११।१२) योग्यवस्तूनां सेवनं भागिभोगसेवनमिव भाविनो विपत्तेः कारणं भवतीति तेषां त्यागोऽनिवार्यः–भोगान् भोगन्निव हेयान् अध्यास्यापन्नदुर्लभाः'। (११।२३) स्वगुणैरेव कश्चन कस्यापि प्रेमास्पदो भवति न तु परिचयेन–'गुणाः प्रियत्वेऽधिकृता न संस्तवः ।' अखिलं जगद् गुणानाम् वंशवर्ति भवितुमर्हति–कमिवेशते रमयितुं न गुणाः । (६।२४)

स्वीयं नीतेर्नैपुण्यं प्रकटयता महाकविना प्रोक्तम्—महत्त्वाकांक्षिणा पुरुषेण तेजस्विना भाव्यम् । तस्यावमानना कर्तुं सहसा न प्रभवति कश्चन । 'ज्वलितं न हिरण्यरेतसं चयमास्कन्दति भस्मना जनः' । प्रथमे सर्गे वनेचरो वक्ति यत्

स्वामिभिः सेवकानां कटुसत्यमपि वचः श्रोतव्यम् प्रियहितयोस्संयोगो हि दुर्लभो भवति ।

हितं मनोहारि च दुर्लभं वचः ।' दुर्जनैस्सह कृतया मैत्र्याः अपेक्षया सज्जनैस्सह कृतो विरोधोऽपि श्रेयान् भवति । 'समुन्नयन् भूतिमनार्यसंगमाद् वरं विरोधोऽपि समं महात्मभिः ।'' तस्यैवोदारपुरुषस्य सर्वत्र समादरो भवति यस्य क्रोधः कदापि निष्फलो नहि भवति । सर्वथा क्रोधशून्यः पुरुषः न तु मित्रेण न वा शत्रुणा समाद्रियते—

"अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना, न जातहार्देन न विद्विषादरः ॥"

कस्मिश्चिदपि कार्ये प्रवृत्तेः प्राक् गभीरो विचार आवश्यको भवति । अविचार्यैण सहसा कार्ये प्रवृत्तिर्भाविन्या विपत्तेः कारणं भवति । विचार्य कार्यं कुर्वन्तं पुरुषं लक्ष्मीः स्वयमेव वृणोति—'सहसा विदधीत न क्रियामविवेकः परमापदां पदम् । वृणुते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः—'।। 'वलवता पुरुषेण सह कृतो विरोधोऽतिदुःखदो भवति । 'अहो दुरन्ता वलवद्विरोधिता ।'

इत्थं राजनीत्यादिविषयिण्यः वह्व्यः सूक्तयः सम्पूर्णेऽस्मिन् महाकाव्ये समुपलभ्यन्ते येनार्थगौरवस्य समावेशो मणिकाञ्चनसंयोगलक्ष्मीं बिभर्ति । शठैः शाठ्यं समाचरेत् आर्जवगुणान्वितस्तु शठैः पराकृतो भवतीत्याह भारविः—'व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।' इत्थं किरातार्जुनीये महाकाव्ये पदे-पदे अर्थगौरवस्य चारुतामवेक्ष्यैवावितथमाह कश्चन—'भारवेरर्थगौरवमिति ।

दण्डिनः पदलालित्यम्

अथवा—कविर्दण्डी न संशयः ।
अथवा—कवयस्त्वयि दण्डिनि ।
अथवा—आचार्यदण्डिनो वाचामाचान्तामृतसम्पदाम् ।
विकासो वेधसः पत्न्या विलासमणिदर्पणम् ॥

× × × × × ×

महाकविर्दण्डी स्वजनुषा कदा भारतभुवमलञ्चकार इति निश्चितरूपेण वक्तुं न शक्यते । समालोचकानामस्य महाकवेः कालविषये मुख्यरूपेण द्विप्रकारकं मतं समुपलभ्यते । केचन विद्वांसो दण्डिनः जनिकालं ख्रीष्टाब्देः षष्ठशत्या अन्तिमेचरणे स्वीकुर्वन्ति अन्ये ख्रीष्टाब्दे सप्तमशताब्द्या उत्तरार्द्धे स्वीकुर्वन्ति । 'त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः । त्रयो दण्डिनो ग्रन्थाश्च त्रिषु लोकेषु विश्रुताः ।' इति राजशेखरसूक्तिः समर्थयति यद् दण्डिनस्त्रयो ग्रन्थास्सन्ति । तत्र—काव्यादर्शम् दशकुमारचरितञ्चेति ग्रन्थद्वयं, दण्डिनः इति सर्वे स्वीकुर्वन्ति । तृतीयस्य ग्रन्थस्य विषये विवेचकानां विवादो वर्तते । केचन 'अवन्तिसुन्दरीकथाम्' अस्य कवेः कृतिं स्वीकुर्वन्ति । केचंश्च—'छन्दोविचितिम्' ।

अस्य महाकवेस्सत्स्वपि त्रिषु ग्रन्थेषु 'दशकुमारचरितमे'वाश्रित्य यशो वर्द्धते । नूनमिदं गद्यकाव्यं पदलालित्यस्य प्रकृष्टं निदर्शनं वर्तते । अत्र प्रसादगुणगम्भीरा अर्थावगतिप्रतिबन्धकीभूतश्लेषालंकारादिविरहिता मनोहरा सरस्वती प्रवाहपूर्णावलोक्यते । अस्यैव गद्यकाव्यस्य मनोभिरामां शैलीं प्रेक्षं-प्रेक्षं प्रेक्षावन्तः प्रशंसयामासुः—'दण्डिनः पदलालित्यमिति ।'

तत्रेदं सर्वप्रथमं विमृश्यते—किं नाम पदलालित्यम् ? कथञ्चायंमुपकरोति गुणः काव्यम् ? अस्मिन् दशकुमारचरिते केन-केन प्रकारेण महाकविना गुणस्य सन्निवेशः कृतः ? इति । अत्रेदमुच्यते—पदं परिभाषयता भगवता पाणिनिना प्रोक्तम्—'सुप्तिङन्तं पदम्' (१।१।१४) इति । सुप्तिङ्विभक्तिविशिष्टम् एव शब्दस्वरूपं पदमित्यभिधीयते । ललितस्य भावो हि लालित्यमिति प्रोच्यते । पदानां लालित्यमिति पदलालित्यम् । इति हि पदलालित्यपदस्य व्युत्पत्तिः । समासतः—कटुवर्णविनिवेशविरहितानां, श्रुतिसुखदवर्णनसन्निवेशसहितानां पदानां प्रयोगेण माधुर्यगुणमयी रचना पदलालित्यवती भवति । तथा चोक्तं काव्यप्रकाशकारै काव्यप्रकाशस्याष्टमे उल्लासे—

'मूर्ध्नि वर्गान्त्यगा स्पर्शा अटवर्गा रणौ लघू ।
अवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ।।'

(का० प्र० का० ७४)

इति कारिकाया वृत्तौ—"टठडढवर्जिताः कादयो मान्ताः शिरसि निजवर्गान्त्ययुक्ताः तथा रेफणकारौ ह्रस्वावन्तरिताविति वर्णाः समासाभावो मध्यमः समासावेति समासः तथा माधुर्यवती पदान्तरयोगेन रचना माधुर्यस्य व्यञ्जिका ।"

(का० प्रकाश)

पदलालित्यगुणगुम्फितायाः रचनायाः अध्ययने कदापि नोद्विजते पाठकस्य चेतः । एतद्गुणयुक्तस्य काव्यस्य रसास्वादने पाठकस्सदा समुत्साहेन युक्तो भवति । तस्य मोमोदते चेतः । अनेन गुणेन संयुक्तमेव दशकुमारचरितं दृष्ट्वा कैश्चिदुक्तम्—'कविर्दण्डी कविर्दण्डी कविर्दण्डी न संशयः' इति । केचन तु महाकविमेनमेव व्यासानन्तरं तृतीयं कविं मन्यन्ते । "जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत् । कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ।" गंगादेव्यनुसारेण तु दण्डिनो वचांसि सरस्वत्या मणिदर्पणमिव सन्ति । तथाहि—'आचार्यदण्डिनो वाचामाचान्तामृतसम्पदाम् । विकासो वेधसः पत्न्या विलासमणिदर्पणम् ।।'

'दशकुमारचरितम्' पूर्वोत्तरपीठिकयोर्विभक्तमास्ते । अस्य काव्यस्य नायको मगधाधिपते राजहंसस्य पुत्रः राजवाहनो वर्तते । अन्ये च नवसंख्याकाः कुमाराः—सोमदत्त—पुष्पोद्भव—अपहारवर्म—उपहारवर्म—अर्थपाल—प्रमिति—मित्रगुप्त—मन्त्रगुप्त—विश्रुतनामानो वर्तन्ते । एतेषामेव दशकुमाराणां चरितस्य वर्णनमतीवरोचकशैल्या कविना कृतम् । कविना तत्र-तत्र चौर्यविद्या, रमणीहरणम् , युद्धवर्णनम् , रह-

स्यप्रणय'–वसन्तवर्णनम्–नायिकावर्णनम्–दूतीप्रेषणम् प्रभृतीनां विषयाणामत्र काव्ये स्थाने सन्निवेशः कृतः। उपमारूपकादीनामलंकाराणां चारुविन्यासेन काव्यस्याद्भुतता दार्ढ्यं गता वर्तते। अस्मिन्नेवालोके नीचैः कानिचन पदलालित्यस्योदाहरणानि प्रस्तूयन्ते यानि दर्शं-दर्शं सहृदयानां हृदयान्यतीव मोदन्तेतराम्—

मगधदेशस्य शेखरीभूताया पुष्पपुर्या नगर्याः "रचितदिगन्तरालपूर्त्या कीर्त्याऽभितः सुरभितः, स्वर्लोकशिखरोरुरुचिररत्नरत्नाकरवेलामेखलायितधरणीसौभाग्यभोगभाग्यवान्, अनवरतयागदक्षिणारक्षितशिष्टविशिष्टविद्यासम्भारभासुरभूसूरनिकरः, विरचितारातिसंतापेन सतततुलितवियन्मध्यहंसः राजहंसो नाम घनदर्पकन्दर्पसौन्दर्यहृद्यनिरवद्यरूपो भूपो वभूव"।

रोषरूक्षेण निटिलाक्षेण भस्मीकृतचेतने मकरकेतने राजहंसस्य पत्नीं वसुमतिं अनवद्यां वनितां मत्वा कामदेवस्योपकरणानि तस्यास्तानि तान्यङ्गान्यभूवन्। तथाहि— "तस्य रोलम्वावली केशजालम्, प्रेमाकरो रजनीकरो विजितारविन्दं वदनम्, जयध्वजायमानो मीनो जायायुतोऽक्षियुगलम्, सकलसैनिकाङ्गवीरो मलयसमीरो निःश्वासः, पथिकहृद्दलनकरवालः प्रवालश्चाधरविम्वम् जयशंखो वन्धुरा लावण्यधरा कन्धरा···· ····समभूवन्निव।"

त्रिकालज्ञस्य तपोभिर्विभ्राजमानस्य महर्षेर्वामदेवस्याज्ञामवाय राजा शुभे मुहूर्ते यदा सपरिवारं कुमारं दिग्विजयाय विससर्ज तदा—"कुमारा माराभिरामा रामाद्यपौरुषा रुषा भस्मीकृतारयोपहसितसमीरणारणाभियानेन यानेनाभ्युदयाशंसं राजानमकार्षुः।"

पुष्पोद्भवः स्वप्रेयस्यास्तमेवानुचिन्तयन्त्याः—"ससंभ्रमप्रेमलज्जाकौतुकमनोरमं लीलाविलोकनसुखमनुभवन्सुदत्या वदनारविन्दे विषण्णभावं मदनकदनखेदानुभूतं ज्ञात्वा तन्निमित्तं ज्ञास्यँल्लीलया तदुपकण्ठमुपेत्य–" अवोचत्।

राजवाहनः पुष्पोद्भवेन सह स्वकान्तया अवन्तिसुन्दर्याः दर्शनाभावजन्यं विरहविनोदनाय प्राक् यस्मिन्नुद्याने तामद्राक्षीत्तस्मिन्नेव गत्वा—"चकोरलोचनावचितपल्लवकुसुमनिकुरम्वमहीरुहसमूहं शरदिन्दुमुख्या मन्मथसमाराधनस्थानं च नतांगीपदपंक्तिचिह्नितं शीतलसैकततलञ्च सुदतीभुक्तमुक्तं माधवीलतामण्डपान्तरपल्लवतल्पं च विलोकयंल्ललनातिलकविलोकनवेलाजनितशेषाणि स्मारं-स्मारं मन्दमारुतकम्पितानि नवचूतपल्लवानि मदनाग्निशिखा इव चकितो दर्शं-दर्शं मनोजकर्णजपानामिव कोकिलकीरमधुकराणाम् क्वणितानि श्रावं श्रावं मारविकारेण क्वचिदप्यवस्थातुमसहिष्णुः परिवभ्रामः।"

एतेषु सर्वेषूदाहरणस्थलेषु महाकविः पदलालित्यसंरक्षणे सततं जागरूको वर्तते। अनुप्रास–यमकादीनां शब्दालंकाराणां समवायेऽपि नहि क्वाप्यर्थावगतौ काठिन्यमनुभूयते। पदानाँ तथाविधः सुष्ठुविन्यासः कृतो वर्तते येन नृत्यन्तीव पदानि श्रुतिसुखनिनादमाविष्कुर्वन्तीवाभान्ति।

अस्य काव्यस्यैतन्महद्वैचित्र्यं वर्तते यदुत्तरपीठिकायास्सप्तमे उच्छ्वासे महाकविना एकस्यापि ओष्ठ्यवर्णस्य प्रयोग एव नहि कृतः अथापि क्वापि नापह्रीयते पदलालित्यम्, तन्मनाङ्वलोकयन्तु सुधियः—"आर्य ! कदर्यस्यास्य कदर्थनान्न कदाचिन्निद्रायातिनेत्रं ।" 'सखे सैषा सज्जनाचरिता सरणिः, यदणीयसि कारणेऽनणीयानादरः संदृश्यते ।' 'चिरं चरितार्था दीक्षा ।' 'न तस्य शक्यं शक्तेरियत्ताज्ञानम् ।' 'वहुश्रुते विश्रुते विकचराजीवसदृशं दृशं चिक्षेप देवो राजवाहनः ।' 'न मां स्निग्धं पश्यति न स्मितपूर्वं-भाषते, न रहस्यानि विवृणोति, न हस्ते स्पृशति, न व्यसनेष्वनुकम्पते नोत्सवेष्वनुगृह्णाति···· ····।'

इत्थमखिले दशकुमारचरिते अनुभूयते—शब्दसमायोजनसौष्ठवम्, अनुप्रासस्य माधुर्यम्, यमकस्य मनोज्ञता, वर्णनस्य वैशारद्यम्, ओष्ठ्यवर्णप्रयोगं विनापि नैसर्गिकतयार्थाऽभिव्यक्तिसारल्यसंरक्षणम्, युक्तियुक्तं प्रशस्तं सहृदयहृदयापवर्जकं पदलालित्यञ्च पदे-पदे ।

(क) माघे सन्ति त्रयो गुणाः ।

(ख) अथवा–मेघे माघे गतं वयः ।
(ग) अथवा–नवसर्गगते माघे नव शब्दो न विद्यते ।
(घ) अथवा–काव्येषु माघः ।
(ङ) अथवा–मुरारिपदचिन्ता चेत्तदा माघे रतिं कुरु ।
(च) अथवा–तावद्भा भारवेर्भाति यावन्माघस्य नोदयः ।

संस्कृतसाहित्यवियनमध्यहंस इव माघो नैजेनातुलितेन प्रतापेन विद्योततेतराम् । अस्य महाकवेर्जनिकालविषये विवेचकानां नैकमत्यं विद्यते । केचन ख्रीष्टाब्दे: सप्तमशताब्द्या उत्तरार्धमस्य कालमाकलयन्ति, केचंश्चाष्टमशताब्द्या मध्यभागम् । केचन तु—'अनुत्सूत्रपदन्यासा सद्वृत्तिः सनिवन्धना । शब्दविद्येव नो भाति राजनीतिरपस्पशा ॥' (शि० व० २।११२) इति श्लोके वृत्तिपदन्यासशब्दं प्रेक्ष्य पाणिनिसूत्रयोः काशिकावृत्तिन्यासकर्त्रोः वामनजयादित्ययोरुत्तरकालिकं ख्रीष्टाब्देस्सप्तमशताब्द्यां भवमिमं मन्वान आतिष्ठन्ते ।

महाकवेर्माघस्य रचना 'शिशुपालवधम्' महाकाव्यम् वर्तते । भगवान् श्रीकृष्णः, युधिष्ठिरस्य राजसूययज्ञे सर्वेषां समक्षं सुरारिं शिशुपालमवधीदिति कथा सोपष्टम्भमुपवर्णिताऽस्मिन् महाकाव्ये । इतरश्चैतन्महाकाव्यं नैकधा श्लाघितमेतदनुशीलयद्भिः। पाश्चात्यालोचकः 'गेथे' त्वस्य काव्यस्य भाव्यया भाववल्याः रसास्वादनानदे संमग्नो वक्ति–'मेघे माघे गतं वयः ।' इति ।

काव्यस्यास्य विपुलं शब्दकोषं दर्शं-दर्शं कैश्चिदुक्तम्—'नवसर्गगते माघे नव शब्दो न विद्यते ।' अयमाशयः—यदि अस्य महाकाव्यस्य सावधानतया नवसर्ग-

पर्यन्तमेवाध्ययनं कृतं स्यात् तर्हि सम्पूर्णे संस्कृतसाहित्ये अज्ञातः कश्चनापि शब्दो नोपलभ्येत ।

अस्य महाकाव्यस्य प्रसादगुणपूर्णतां प्रेक्ष्य केनचिदुक्तम्—'काव्येषु माघः' इति ।

महाकवेर्मुरारेः पाण्डित्यं प्रसिद्धमास्ते । मुरारेः पदानामवगाहनं न सारल्यं विभर्ति । मुरारेः = भगवतः पदानां प्राप्तिः सुदुर्लभा; तथैव मुरारेः पदानां = सुप्तिङ्मतां शब्दानामर्थावगतिः सुदुष्कुरा भवति, परञ्चैतदुभयं सिद्धयेन्माघमहाकाव्यस्यध्यायनादेवेति प्राह कश्चित्—'मुरारिपदचिन्ता चेत्तदा माघे रतिं कुरु ।'

सोऽयं महाकविः भारविं सर्वथाऽतिशेते एतदाह कश्चन—'तावद्भा भारवेर्भाति यावन्माघस्य नोदयः ।' केचनालोचयता तूक्तम्—'उपमा कालिदासस्य भारवेरर्थगौरवम् । दण्डिनः पदलालित्यम् माघे सन्ति त्रयो गुणाः ।।' अस्यालोचकस्याशयो विद्यते यत् महाकवेः कालिदासस्य काव्येषूपमायाः प्राधान्यं भवति सर्वापेक्षया । भारवेः किरातार्जुनीये अर्थगौरवस्य वैपुल्यं वर्तते, दण्डिनो दशकुमारचरिते च पदलालित्यमेव सचेतसां चेतांसि समाकर्षति; परन्त्वस्मिन् 'शिशुपालवध' नाम्नि महाकाव्ये तु उपमार्थगौरवपदलालित्यानां त्रयाणामेव समानरूपेण समावेशो दृश्यते । तद्यथा नीचैः एतेषां त्रयाणाम् निपुणं परीक्षणं क्रियते—

(i) उपमायास्तावत् सौन्दर्यमवलोकयन्तु सुधियः शिशुपालवधे महाकाव्ये–पीतयज्ञोपवीतधारिणो देवर्षेः नारदस्याङ्गनामाभा वैद्युतीं विभामातनोति विहायसि । "कृतोपवीतं हिमशुभ्रमुच्चकैर्धनं घनान्ते तडितां गणैरिव ।" गौराङ्गस्य देवर्षेः अङ्गप्रभाभिः संवलिताः भगवतः श्रीकृष्णस्य शरीरप्रभा तथैव व्यराजत यथा ज्योत्स्ना पूर्णायां रात्रौ वृक्षस्य चञ्चलपत्रान्तरगोचरा चन्द्रज्योत्स्ना पृथिव्यामापतति—"रथाङ्गपाणेः पटलेन रोचिषामृषित्विषः संवलिता विरेजिरे । चलत्पलाशान्तरगोचरास्तरोस्तुषारमूर्तेरिव नक्तमंशवः ।।" मेघश्यामलशरीरस्य भगवतः श्रीकृष्णस्य शरीरोपरि पीताम्बरं तथैव विरराज यथा वाडवाग्नेश्शिखाभिः समालिङ्गितः समुद्रो भवेत्—'संतप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः । विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भस निधिः ।।' वर्द्धमानस्य शत्रोस्तथैवोपेक्षा नहि कर्तव्या यथा वर्धमानस्य व्याधे यत उभावेव दुःखदौ भवतः—'उत्तिष्ठमानस्तु परो नोपेक्ष्यः पथ्यमिच्छता । समौ हि शिष्टैराम्नातौ वत्स्यंन्तावामयः स च ।। (२।१०) अत्यल्पैरेव वर्णैः ग्रथितं सम्पूर्णं वाङ्मयं तथैव वैचित्र्यं विभर्ति यथा अल्पैरेव स्वरैः संयुक्तं संगीतशास्त्रम् वैचित्र्यावहं भवति । "वर्णैः कतिपयैरेव ग्रथितस्य स्वरैरिव । अनन्ता वाङ्मयस्याहो स्वरैरिव विचित्रता । (२।७२) यथा सत्कविः शब्दार्थयोरुभयोरेव समानरूपेण समादरं करोति तथैव विद्वान्नपि दैवपुरुषार्थयोरुभयोरेव समानरूपेण माहात्म्यं स्वीकरोति—"नालम्बते दैष्टिकतां न निषीदतिपौरुषे । शब्दार्थौ सत्कविरिव द्वयं विद्वानपेक्षते ।।"

सायंकाले सूर्यं अस्तमेति रैवतकपर्वतस्यैकस्मिन् भागे, अपरे च भागे उदेति चन्द्रमाः;इदं दृश्यं तथैवाभाति यथा कश्चन विशालकायो गजो भवेत् तस्योभयोः पार्श्वयो काञ्चने घण्टे द्वे आलम्बमाने भवतः। अत्र रैवतकपर्वतस्योपमा गजेन सह, सूर्यचन्द्रमसोः घण्टाभ्यां सह सूर्यचन्द्रमसोः रश्मीनां कनकशृंखलाभिः सह च दत्ता वर्तते—"उदयति विवतोर्ध्वरश्मिरज्जावहिमरुचौ हिमधाम्नि याति चास्तम्। वहति गिरिरयं विलम्बिघण्टाद्वयपरिवारितवारणेन्द्रलीलाम् ॥' अनयैवोपमया महाकविर्माघः घण्टामाघनामना प्रसिद्धोऽभूत्। इत्थं सम्पूर्णेऽस्मिन् महाकाव्ये मनोज्ञानामुपमानां सौन्दर्यमवलोक्यते।

(2) इदानीं माघकाव्यस्यार्थगौरवविषये किञ्चिन्निवेद्यते। महात्मनां गृहे आगमनं पुण्यातिशयादेव भवति, पापिनां गृहे ते प्रेम्णा कदाचिदपि नहि गच्छन्ति—'गृहानुपैतुं प्रणयादभीप्सवो भवन्ति नापुण्यकृतां मनीषिणः।' यस्य भगवत उदरे प्रलयकाले सम्पूर्ण जगत् सविकासं शेते तस्यैव भगवतश्शरीरे देवर्षेरागमनजन्यमानन्दसन्दोहं न संभूतम्—'युगान्तकाले प्रतिसंहृतात्मनो जगन्ति यस्यां सविकाशमासत। तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागसभवाः मुदः ॥' रात्र्या अन्धकारं सूर्यमृते न प्रभवति कश्चिदपाकर्तुम्—'ऋते रविं क्षालयितुं क्षमेत् कः क्षपातमस्काण्डमलीमसं नभः'। मानिनः सर्वं विहाय स्वाभिमानस्यैव रक्षां कुर्वन्ति—"सदाभिमानैकधना हि मानिनः।" दुरतिक्रमत्वात् स्वभावो भवान्तरेष्वपि सतीयोषिदिवान्वेति—"सती च योषित् प्रकृतिश्च निश्चला पुमांसमभ्येति भवान्तरेष्वपि।" यत् प्रतिक्षणं नवमिवाभाति तदेव भवति वास्तविकी रमणीयता—"क्षणे-क्षणे यन्नवतामुपैति तदेव रूपं रमणीयतायाः।" कट्वप्यौषधं रोगघ्नं भवति—'अरुच्यमपि रोगघ्नं निसर्गादिव भेषजम्।' दुष्टानां विनाशकरणं सतां कर्तव्यमेव—'शुभेतराचारविपक्त्रिमापदो निपातनीया हि सतामसाधवः।' महतां साहाय्यं समवाप्य क्षुद्रोऽपि जनः कार्यसिद्धिमवाप्नोति—'वृहत्सहायः कार्यान्तं क्षोदीयान्नपि गच्छति।' इत्थमस्मिन् महाकाव्ये अर्थगौरवसमन्वितानां श्लोकानां भूयसी संख्या वर्तते अत्र तु दिङ्मात्रनिर्देश कृतः।

(3) अस्य महाकाव्यस्य तृतीयं वैशिष्टयं पदलालित्यं वर्तते यस्य सम्पूर्णे महाकाव्ये साम्राज्यमिवाभाति। विशेषतः षष्ठस्य सर्गस्य अधिकांशतः श्लोकाः माधुर्यगुण–पूर्णाः सन्ति। निदर्शनार्थमत्र कानिचनोदाहरणानि प्रस्तूयन्ते। तथाहि—भगवतः सेवायां समागते वसन्ततौं' सरांसि कमलश्रिया सम्पन्नानि सञ्जातानि वनेषु पलाशपुष्पाणां मनोहरो विकासोऽभूत्; समे वृक्षाश्च नवपल्लवपेशला अभूवन्—'नवपलाशपलाशवनं पुरः, स्फुटपरागपरागतपंकजम्। मृदुलतान्तलतान्तमलोकयत् ससुरभिं सुरभिं सुमनोभरैः ॥" (२।६) वसन्ततौं विकसितायाः माधवीलतायाः परागपानेन प्रमत्ता मधुकरी उच्चैर्जुगुञ्ज—"मधुरया मधुवोधितमाधवी मधुसमृद्धसमेधितमेधया। मधुकराङ्गनया मुहुरुन्मदध्वनिभृतानिभृताक्षरमुज्जगे ॥" इत्थमस्य षष्ठसर्गस्य प्रायः सर्वे श्लोकाः पदलालित्यप्रसङ्गे उदाहर्तव्या वर्तन्ते।

नैषधं विद्वदौषधम्

अथवा-नैषधमहाकाव्यस्य काव्यात्मकं सौष्ठवम् ।

अथवा-उदिते नैषधे काव्ये क्व माघः क्व च भारविः ।

श्रीहीरतनुजन्मा महाकविः श्रीहर्षः सकलेषु संस्कृतसाहित्यस्य दिक्षु नैजीं हैरिकीं कान्ति वितनोति । खण्डनखण्डखाद्याभिधस्य दर्शनग्रन्थस्य प्रणेता महाकविः श्रीहर्षः नैषधीयचरितनाम्नि महाकाव्ये समानरूपेण प्रस्तौति दर्शनशास्त्रस्य दुर्दान्ततां, व्याकरणशास्त्रस्याप्रतिमं परिचयम्, कोशग्रन्थानामभ्यासं, सहृदयहृदयापवर्जिकां काव्यकलायाः प्रकृष्टाँ प्रौढिञ्च । श्रीहर्षस्य नैषधीयचरितमवेक्ष्यैव भारवेरर्थगौरवस्य व्यामोहः माघस्य च गुणत्रयावधारणा पाठकस्य हृदयात्सहसा व्यपगता भवति । इदं महाकाव्यं प्रेक्षं प्रेक्षं सहसैव मुखान्निःसरति—'उदिते नैषधे काव्ये क्व माघः क्व च भारविः ?'

महाकाव्यस्य सर्वैर्गुणैः समन्वितमपीदं महाकाव्यं प्रौढानामेव मनः प्रह्लादनं करोति; न तु "काव्यकोशव्याकरणदर्शनादिज्ञानविहीनानां पण्डितम्मन्यानाम्, यतो हि महाकविना सप्रयासमत्र ग्रन्थग्रन्थिनिहिता, अतएव श्रद्धाराद्धगुरव एवास्य काव्यस्याध्ययने क्षमाः । 'ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासिप्रयत्नान्मया, प्राज्ञंमन्यमना हठेन पठिती मास्मिन् खलः खेलतु ।। श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादयत्वेतत् काव्यरसोर्निमज्जनं सुखव्यासज्जनं सज्जनः ।। (नै० च० २२।१५२) यदि कमनीयां रमणीं प्रेक्ष्यापि कस्यचनानुद्भूतयौवनस्य कुमारस्य हृदयं नोद्वेलितं भवति, तेन तस्याः प्रकामभोग्यत्वम् अपहीयते किम् ? परमरमणीयायाः युवत्या आस्वादनरसं तु कश्चन युवैव जानाति । अतएव नैषधीयचरितस्यास्वादने समर्थस्तु कश्चन विद्वान्नेव भविष्यति, नहि आत्मानं प्राज्ञं मन्यः कश्चन । "यथा यूनस्तद्वत् परमरमणीयापि रमणी कुमाराणामन्तःकरणहरणं नैव कुरुते । मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः, किमस्या नाम स्यादरसपुरुषानादरभरैः ।।" (नै० च० २२।१५०)

महाकविः श्रीहर्षः, काव्य–व्याकरण–सांख्य–योग–न्यायवैशेषिक–पूर्वमीमांसा–वेदान्त–बौद्धदर्शन–जैनदर्शन–चार्वाकदर्शनप्रभृतीनां नैकेषां विषयाणामसमो विद्वान्नासीत् । अतएवास्मिन् नैषधीयचरितमहाकाव्ये एतेषां समेषां सन्निवेशमकार्षीत् । परञ्च सर्वापेक्षया एतन्महद्वैचित्र्यमास्ते यत्पाण्डित्यपुटप्रतिकाशभूतेऽस्मिन् महाकाव्ये पदलालित्यवतां श्लोकानां प्राचूर्यमवलोक्यते । तथाहि—'अधारि पद्मेषु तदंघ्रिणा घृणा, क्व तच्छयच्छायलवोऽपि पल्लवे । तदास्यदास्येऽपि गतोऽधिकारितां न शारदः पार्विकशर्वरीश्वरः ।।" 'चलन्नलकृत्यमहारयं हयं स्ववाहवाहोचितवेषपेशलः ।' 'दिने दिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूर्च्छ च तापमृच्छ च ।।' 'मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।' 'धन्यासि वैदर्भिगुणैरुदारैः यया समाकृष्यत

नैषधोऽपि'। 'मुहूर्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम।' पदलालित्यप्राचूर्यं वीक्ष्यैव कश्चिदुक्तम्—'नैषधे पदलालित्यम्।' इति।

पदवाक्यप्रमाणादिविविधविद्यापारंगतस्य श्रीहर्षस्य काठिन्यकाष्ठामेवावलोक्य 'नैषधं विद्वदौषधमित्याभाणकः प्रसिद्धः। अस्य महाकाव्यस्योपक्रम एव श्लिष्टैः श्लोकैर्भवति। प्रथमसर्गस्य प्रथम दशश्लोकाः अनेकार्थकत्वायात्यन्तप्रसिद्धाः सन्ति। नैषधीयप्रकाशव्याख्यायां श्रीमन्नारायणाचार्याः एतेषां श्लोकानां बहूनर्थान् लिखन्ति।

'चेतानलंकामयते मदीयम्' इतीयं दमयन्त्याः सूक्तिः अर्थचतुष्टयं बिभर्ति। (१) मदीयं चेतः नलं कामयते, (२) मदीयं चेतः लङ्कां न अयते। (३) मदीयं चेतः अनलं = नलभिन्नं नलसदृशं वा कमपि नहि कामयते। (४) मदीयचेतः नलाप्राप्तौ शरीरमिदं भस्मसात्कर्तुमनलम् = अग्नि कामयते। त्रयोदशसर्गस्य सर्वेश्लोकाः द्वित्रानर्थान् बिभ्रति।

इत्येव नहि क्वचन क्वचन तेषां तेषां शास्त्राणां सिद्धान्तवर्णनादपि महाकाव्यमिदं काठिन्यमगात्। यथा—'अपवर्गे तृतीये'ति भणतः पाणिनेरपि। क्रियेत् चेत्साधु विभक्तिचिन्ता व्यक्तिस्तदा सा प्रथमाभिधेया। या स्वौजसां साधयितुं विलासैः' इत्यादिषु श्लोकेषु व्याकरणविषयाणां निवेशः कृतः कविना। 'नास्ति जन्यजनकव्यतिभेदः' इत्यत्र सांख्यदर्शनस्य सत्कार्यवादः उपवर्णितः। विश्वरूपकलनादुपपन्नं, तस्य जैमिनिमुनित्वमुदीये। विग्रहं मखभुजामसहिष्णुः—' 'श्रुतिं श्रद्धत्थं विक्षिप्ता ग्रन्थ च स्वयम्। मीमांसामांसलप्रज्ञास्तां यूपद्विपदापिनीम्'। इत्यादिषु मीमांसादर्शनस्य वर्णनमास्ते। 'द्विधोरितैः षोडषभिः पदार्थैः' इत्यत्र न्यायदर्शनस्य पदार्थानाम् वर्णनं कृतम्। 'मुक्तये यः शिलात्वाय शास्त्रमूचे सचेतसाम्। गोतमं तमवेक्ष्यैव यथा वित्थ तथैव सः॥' इत्यत्र न्यायदर्शनाभिमतां मुक्तिमुपहसति महाकविः। वेदान्तशास्त्राभिमतं ब्रह्मसाक्षात्कारमुपश्लोकयन् वक्ति—'प्रापुस्तमेकं निरूपाख्यरूपं ब्रह्मेव चेतांसि यतप्रतानाम्।' 'या सोमसिद्धान्तमयाननेव, शून्यात्मातावादमयोदरेव! विज्ञानसामस्त्यमयान्तरेव, साकारतासिद्धिमयाखिलेव॥' इत्यस्मिन् श्लोके बौद्धदर्शनस्य शून्यवादो, विज्ञानवादः साकारतावादश्च चर्चितः।

इत्थमनेकेषां दर्शनानां विषयाणां सन्निवेशात्, तेषु तेष्वर्थेष्वपरिचितानामपि शब्दानां सक्षमप्रयोगात्, समकालमेव दर्शनकार्कश्यकाव्यकमनीयतयोरुपयोगिन्याः भाषायाः समाकलनात्, काव्येष्वतिशयाधानकारिणां प्रसादौजोमाधुर्यगुणानां सम्यक् समवाशात्, अस्य महाकाव्यस्याङ्गीरसस्य शृङ्गारस्य तस्याङ्गभूतानामन्येषामपि सम्यक्सम्वर्द्धनात् च महाकाव्यमिदं विद्वद्भ्यो निकषस्वरम् वर्तते।

बाणोच्छिष्टं जगत् सर्वम्

अथवा–बाणस्तु पञ्चाननः।

अथवा–गद्यं कवीनां निकषं वदन्ति।

अथवा–बाणः कवीनामिह चक्रवर्ती ।
अथवा–हृदयवसतिः पञ्चबाणस्तु बाणः ।
अथवा–रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति ।
सा किं तरुणी ! नहि नहि वाणी बाणस्य मधुरशीलस्य ॥

शैलीदृष्ट्या संस्कृतकाव्यानां प्रकारत्रयमवाप्यते । गद्यकाव्यम्, पद्यकाव्यम् चम्पूकाव्यञ्च । विभिन्नेषु छन्दस्सु निवद्धा काव्यरचना पद्यकाव्यमित्यभिधीयते, केवलं गद्येषु निवद्धा रचना गद्यकाव्यम्; गद्यपद्ययोः कृता च काव्यरचना चम्पूरित्यभिहिता भवति । परञ्चैतेषु त्रिषु प्रकारेषु गद्ये काव्यरचनाया प्रकारः अतीवकठिनः। यतोहि पद्येषु छन्दसां निवन्धनत्वात् समागतमपि स्खलनं तत्रैवान्तर्हितं भवति । पद्यानां गेयात्मकत्वात् तत्राकर्षणमपि सुकरम् । परञ्च गद्ये तु तथाविधं किमपि वन्धनं नास्ति । सर्वेषां भावानां प्रकाशनाय यथेप्सितपदानां प्रयोगस्य स्वातन्त्र्यं भवति । गेयात्मकतायाश्चाभावात् गद्ये सहृदयहृदयाकर्षणस्यैकमेव साधनमास्ते यत्—कविः रसभावपात्रानुसारिण्याः, मनोगतसकलभावप्रकटनसमर्थायाः पदावल्याः प्रयोगेण तथाविधं वाक्यं विन्यसेत्, येन सहसा सचेतसां समाकर्षणं स्यात् । आत्मनि एतस्य गुणस्याधानाय कवेः काव्य–कला–कोश–व्याकरणादिविषयाणां गुणदोषालंकाररसरसाभासभावादीनाम् दृढ़परिचयेन सह शक्तिनिपुणताभ्यासानाञ्चावश्यकता भवत्यपेक्षिता । एतस्मादेव कारणात् संस्कृतगद्यकाव्यस्य प्रणेतारः अंगुलिगण्याः वाणसुवन्धुदण्डचम्विकादत्तव्यासप्रभृतयः पञ्चषा एव कवयः सन्ति, यदा च संस्कृतपद्यकाव्यप्रणेतॄणां कवीनां सख्या भूयसी वर्तते । गद्यकाव्यप्रणयनकाठिन्यमेव वीक्ष्य केनचिदुक्तम्—'गद्यं कवीनां निकषं वदन्तीति ।'

एतेषु समेषु गद्यकाव्यकविषु वाणस्स्वव्यतिरिक्तानन्यान् सर्वान् कवीन् रचनाचातुर्येण, कल्पनावैचित्र्येण, विविधविषयविषयकविज्ञानभूम्ना महिम्ना, भूयिष्ठयाभावाभिव्यक्तया, श्रेष्ठया मृद्वया च शैल्या, अद्भुतचरित्रचित्रणस्य भङ्ग्या, स्वाभाविकया सूक्ष्मेक्षिकया, वस्तूपस्थापनक्षमया नवनवोन्मेषशालिन्या प्रज्ञया चातिशेते । अतोऽवितथमेवाह—'सोड्ढलः'–'वाणः कवीनामिह चक्रवर्ती ।'

धर्मदासस्तु वाणस्य वाणीमभिरूपयौवनां तरुणीमिवास्वादयति—'रुचिरस्वरवर्णपदारसभाववती जगन्मनोहरति । सा किं तरुणी ! नहि नहि वाणी वाणस्य मधुरशीलस्य ॥' महाकविः जयदेवो महाकविः वाणं कविताकामिन्याः विषमवाणेन कामेनोपमिमीते—"हृदयवसतिः पञ्चवाणस्तु वाणः ।"

वाणभट्टो गद्यकाव्यस्याप्रतिमो लेखको वर्तते । अस्य महाकवेः हर्षचरितम् कादम्वरी चेति काव्यद्वयमतिप्रसिद्धं गद्यकाव्येषु विद्यते । हर्षचरितम् गद्यकाव्यस्याख्यायिकाकोटावाटीकते, कादम्वरी च कथाकोटौ । यद्यपि हर्षचरितस्यापि—'राजवर्णनम्' वैधव्यदुःखमपाकर्तुं सतीत्वमाश्रयन्त्याः यशोवत्या वर्णनं प्रभृतीनि

वर्णनानि सचेतसां चेतोऽपवर्जकानि सन्ति तथापि कादम्वरीमेवाश्रित्य बाणभट्टस्येयमसदृशी ख्यातिरभूत्। रसभर्याः कादम्वर्याः वर्णनानि संस्कृतसाहित्येऽनुपमेयानि सन्ति। कादम्वर्याः शूद्रकवर्णनम्, चाण्डालकन्यावर्णनम्, विन्ध्याटवीवर्णनम्, प्रभातवर्णनम्, शवरसेनापतिवर्णनम्, हारीतवर्णनम्, जावाल्याश्रमवर्णनम्, जावालिवर्णनम्, उज्जयिनीवर्णनम्, इन्द्रायुधवर्णनम्, राजकुलवर्णनम्, शुकनासोपदेशवर्णनम्, अच्छोदसरोवरवर्णनम्, महाश्वेतावर्णदम्, कादम्वरीवर्णनम् प्रभृतयो विषयाः अतीवरमणीयाः वर्तन्ते।

कादम्वरीयं सारस्वतरसास्वादचणपानां कादम्वरीव मदमत्तकारिणी, सकलैश्शब्दार्थालंकारैरलंकृता, प्रथमदर्शन एव हठाद्धरति मनांसि विपश्चिदपश्चिमानाम्। तदत्र कादम्वर्यां तेषां तेषामलंकाराणां सन्निवेशचातुर्यं किञ्चिद् विचार्यते—उपमा—यथा शूद्रकवर्णने—

'आमोदितमालतीकुसुमशेखरम् उषषि शिखरपर्यस्ततारकपुञ्जमिव पश्चिमाचलम्, आभरणप्रभापिशङ्गितोऽङ्गतया लग्नहरहुताशमिव मकरध्वजम्।'

तत्रैव विरोधाभासो यथा—"अपरिमितपरिवारजनमप्यद्वितीयम्, अनन्तगजतुरगसाधनमपि खड्गमात्रसहायम्, उत्सादिताशेषद्विषदिन्धनमपि ज्वलत्प्रतापानलम्, आयतलोचनमपि सूक्ष्मदर्शनम् ....।"

परिसंख्यालंकारो यथा शूद्रकवर्णन एव—'यस्मिश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसंकराः; रतेषुकेशग्रहाः, काव्येषु दृढ़वन्धाः शास्त्रेषु चिन्ताः, स्वप्नेषु विप्रम्भाः, छत्रेषु कनकदण्डाः, ध्वजेषु प्रकम्पाः, गीतेषु रागविलसितानि ....न प्रजानामासन्।'

जात्युत्प्रेक्षा यथेन्द्रायुधवर्णने—"जवप्रतिपक्षमिव गरुत्मतः, त्रैलोक्यसञ्चरणसहायमिव मारुतस्य, अंशावतारमिवोच्चैःश्रवसः, वेगसब्रह्मचारिणमिव मनसः।"

एकावली यथा महाश्वेतावर्णने—'क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन नवयौवनेन पदम्।'

वाणभट्टस्य रीतिः पाञ्चाली वर्तते। 'शब्दार्थयोस्समो गुम्फः पाञ्चाली रीतिरिष्यते।' इत्यालंकारिकाणां सूक्तचनुसारेण पाञ्चाल्यां अर्थानुरूपाणामेव शन्दानां प्रयोगो भवति। वाणभट्टः अस्य नियमस्य निर्वाहः कादम्वर्यां सर्वत्र करोति। यथा विन्ध्याटवीवर्णना ओजःसमासभूयिष्ठा वर्तते। तथाहि—'शुककुलदलितदाडिमीफलद्रवार्द्रीकृततलैरतिचपलकापिकुलकम्पित-कम्पिल्ल-च्युतपल्लवफलशकलैः अनवरतनिपतितकुसुमरेणुपांसुलैः.... ...." किन्तु कादम्वर्या वर्णनप्रसंगे समासवहुलाऽपि भाषा मसृणतामावहति—तद्यथा—"इन्दुमूर्तिमिवोद्दाम-मन्मथ-विलास-गृहीत-गुरुकलत्राम्, वनराजिमिव पाण्डुश्यामलवलीलतालंकृतमध्याम् दिनमुखलक्ष्मीमिव भास्वन्मुक्तांशुभिन्नपद्मरागप्रसाधनाम्.... ....कादम्वरीं ददर्श।"

महाकवेर्वाणभट्टस्य कादम्वरी वाक्यानां दीर्घत्वाय प्रसिद्धा वर्तते। परञ्चेदमपि नो विस्मर्तव्यम् यद् वाणभट्टो दीर्घवाक्यात्मकानुच्छेदानन्तरं नियमतः लघुवाक्यानाप्यनुच्छेदं करोति, यत्र प्रसादगुणयुक्तानिभवन्ति वाक्यानि। यथा हारीतवर्णने—"वरुण इव कृतोद्वासः, हरिरिवापनीतनरकभयः, प्रदोपारम्भ इव सन्ध्यापिङ्गलतारकः।" कन्यापुरोदन्तवर्णने च—"लवङ्गिके। विक्षिपचकोरपञ्जरेषु पिप्पलीतण्डुलशकलानि। मधुकरिके ! विरचय कुसुमाभरणकानि। मयूरिके ! संगीतशालायां विसर्जय किन्नरमिथुनम्।"

एवं दृश्यते यद् वाणभट्टः वर्णनाचातुर्येण स्वेतरगद्यकवीनतिक्रामति। वाणस्य वर्णना सर्वातिशायिनी वर्तते तद्वयक्तिरिक्तैः कविभिः कृता वर्णना तदुच्छिष्टमिवाभातीति सत्यमेवैतत्—"वाणोच्छिष्टं जगत् सर्वमिति।"

वेदानां महत्त्वम्

अथवा–वेदोऽखिलो धर्ममूलम्।

ज्ञानार्थकाद् 'विद्' धातोः घञि प्रत्यये कृते वेदशब्दो निष्पन्नो भवति। विद् सत्तायामि'त्यपि धातोः वेदशब्दस्य सिद्धिर्भवति। अतएव ह्युच्यते ज्ञानराशिर्हि वेदः। भगवता मनुना वेदानां महत्त्वमसकृदुक्तम्। तथाहि–"वेदोऽखिलो धर्ममूलम्" (मनु० २।६) इति वाक्ये मनुः वेदानामखिलधर्ममूलत्वं प्रतिपादयति। वेदानां सर्वज्ञानमयत्वं प्रतिपादयता मनुना प्रोक्तम्—'यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः। स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।' (मनु० २।७) सृष्टेरादौ परमात्मा वेदमेवाश्रित्य सूर्यचन्द्रतारकपृथिव्यादीनां सर्वेषां वस्तूनां पूर्वकल्पानुसारेण नामरूपयोर्विभागं करोति। 'सर्वेषां तु स नामानि रूपाणि च पृथक् पृथक्। वेदशब्दे एवादौ पृथक् संस्थाश्च निर्ममे।' (मनु० १।२१) विप्रैः सदा वेदानामभ्यासः कर्तव्यः, तदपेक्षया विप्राय नास्ति परमं तपः।—'वेदमेव सदाभ्यस्येत् तपस्तप्यन् द्विजोत्तमः। वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते॥' (मनु० २।१६६) इत्थम् महर्षिणा मनुना श्लाघितो वेदो भारतीयानां परमं धनम् विद्यते।

तस्यैतस्य वेदस्य भागद्वयम् विद्यते–मन्त्रभागो ब्राह्मणभागश्च। अनयोरुभयोरेव वेदत्वम् समानरूपेणं प्राचीना महर्षयः स्वीचक्रुः। तथाहि–भगवतो कात्यायनापस्तम्वयोरनुसारेण 'मन्त्रब्राह्मणयोर्वेदनामधेयम्'। महर्षिः वोधायनो वक्ति–'मन्त्रब्राह्मणमित्याहुः' इति। 'तच्चोदकेषुमन्त्राख्या' 'शेषे ब्राह्मणशब्दः' (मी० २।१।३२–३३) इत्थम् मन्त्रब्राह्मणयोरुभयोरेव भागयोः समानरूपेण वेदत्वं स्वीकर्तव्यम् न तु केवलस्य मन्त्रभागस्यैव। इमं वैदिकं विज्ञानमेवावेक्ष्य भारतीयानां समादरं वैदेशिका अपि कुर्वन्ति अध्यात्मज्ञानविषये। अस्य वेदस्य चत्वारो विभागाः कृताः–ऋग्यजुस्सामाथर्वाख्यास्सन्ति ऐतेषामपि ऋग्यजुस्सामाथर्वणां शाखानाँ विषये पस्पशाह्निके

महाभाष्यकारः पतञ्जलिर्वक्ति–'सहस्रवर्त्मा सामवेदः, एकशतमध्वर्युशाखाः, एकविंशतिधा वह् वृचः, नवधा अथर्वाणः।' इत्थमाहत्य ११३१ शाखा भवन्ति वेदस्य। यद्यपि आसां सर्वासां शाखानामुपलब्धिस्साम्प्रतं नो भवति' अथापि काश्चन शाखा तु उपलभ्यन्त एव।

एतस्य सकलशाखासमेतस्य वैदिकवाङ्मयस्य केषाञ्चन महत्त्वानां नीचैः निर्देशः क्रियते।

(१) भाषायाः प्राचीनतमता––पौरस्त्याः पाश्चात्याश्च समे विद्वांस इदं तथ्यं समानरूपेण स्वीकुर्वन्ति यद्वैदिकं वाङ्मयं विश्वसाहित्ये प्राचीनतमम्। वैदिकी भाषा च विश्वस्य भाषासु प्राचीनतमा। (२) वैदिकी संस्कृतिर्विश्वस्य प्राचीनतमा संस्कृतिः–वेदेषु वैदिकस्य समाजस्य, वैदिकानाम् पुरुषाणाम्, वैदिक्या राजनीतेश्च वर्णनम् उपलभ्यते। वेदमन्त्राणां साक्षात्कर्तॄणामृषीणां मानसिकी स्थितिः काऽऽसीत् इति वेदानाम् अध्ययनेनैव ज्ञायते। ऋग्वेदे अग्न्यादिविभिन्नानां देवानां प्रार्थनां कुर्वन्ति ऋषयः। तेषां सूक्तानामध्ययनेनैव ज्ञायते यत् तदात्वे भारतवर्षस्य समृद्धिः परां काष्ठामचुम्वत्। ऋषीणां मनस्सु क्षुद्राणां विषयाणां स्थानमेवनासीत्। वेदेषु या संस्कृतिर्वर्णिताऽस्ति सैव विश्वस्य प्रथमासंस्कृतिरिति। 'सा संस्कृतिः प्रथमा विश्वारा।' इति यजुर्वेदस्य मन्त्रेणैव ज्ञायते।

वैदिकसमाजवर्णनम्––वैदिके काले समाजस्य का स्थितिरासीदिति वेदानामध्ययनेनैव ज्ञायते। ब्राह्मणक्षत्रियवैश्यशूद्राणां वर्णानां विभागः वैदिकमन्त्रेषूपलभ्यते। 'ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः। उरूतदस्य यद् वैश्यः पद्भ्यां शूद्रोअजायत।' इति मन्त्रेण प्रतिपादितो भवति यद् भगवतः तेभ्यः तेभ्यः अङ्गेभ्यः तेषां तेषां वर्णानामुत्पत्तिर्जाता। चतूर्णामाश्रमाणामपि विभागः तदात्वे आसीत्। तथाहि–"ब्रह्मचर्येण तपसा देवामृत्युमुपाघ्नत" इति मन्त्रे ब्रह्मचर्याश्रमस्य वर्णनमुपलभ्यते। 'गृभ्णामिते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः' इत्यस्मिन् मन्त्रे पाणिग्रहणसंस्कारस्य वर्णनमुपलभ्यते।

वेदा अध्यात्मज्ञानस्य मूलम् सन्ति–यजुर्वेदस्यान्तिमोऽध्यायाः अध्यात्मज्ञानस्य प्रतिपादनं करोति। अस्याध्यायस्य प्रथमे मन्त्रे जगद् व्यापकस्येश्वरस्य वर्णनमुपलभ्यते–"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।" (यजु० ४०।१) द्वितीये मन्त्रे अकर्मण्यतां विहाय आजीवनं कर्मानुष्ठानस्योपदेशं करोति श्रुतिः। 'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।'

वैदिकं प्रजातन्त्रम्–वैदिके कालेऽपि भारते वर्षे जनतन्त्रस्य स्थितिरासीदिति वेदानामध्ययनेनैव ज्ञायते। 'राजानः सत्यस्समितिरियानाः' (ऋ० सं० ९।९२।६) 'समिर्ति गच्छन् राजैव सत्यः' (ऋ० सं० १०।९७।६) इत्यनयोः ऋचोः परिशीलनेनाभाति यदृग्वेदकालेऽपि समितिशब्दवाच्या जनानां संघटना आसीत्। राजाऽपि समितिं प्रत्यागच्छति। ऋग्वेदे समितौ वक्तव्या इयं प्रार्थना समुपलभ्यते–

संगच्छध्वं संवदध्वं संवो मनांसि जानतां देवा भागं यथापूर्वे सञ्जानाना उपासत। समानो मन्त्रः समितिः समानी। समानं मनः सहचित्तमेषाम्। समानं मन्त्रमभिमन्त्रये वः। समानेन वो हविषा जुहोमि। समानी व आकूतिः। समाना हृदयानि वः।' समानमस्तु वो मनः। यथा वः सुसहासति।''

वैदिकी प्रार्थना—एकस्यां श्रुतौ प्रार्थयिता प्रार्थनां करोति—'तमसो मा ज्योतिर्गमय। असतो मा सद्गमय मृत्योर्मामृतं गमय।' अस्यां प्रार्थयिता आत्मने प्रकाशम्, सन्मार्गगामित्वममृतत्वं च कामयते।

मोक्ष एव परमः पुरुषार्थः—यद्यपि वेदेषु चतूर्णां पुरुषार्थानां धर्मार्थकाममोक्षाणाम् वर्णनमुपलभ्यते तथापि शाश्वतसुखावाप्तिरूपः मोक्ष एव परमः पुरुषार्थः। अतएवास्यैव प्राप्तये सर्वेषां ऋषीणां महान् प्रयासो दृश्यते। तथाहि—'तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय।' 'भोक्तामोग्यं प्रेरितारञ्च मत्वा जुष्टस्ततस्तेनामृतत्वमेति।' इत्यादिषु श्रुतिषु मोक्षाधिगमस्योपायाः प्रतिपादितास्सन्ति।

वेदानामखिलजगद्धितानुशासनकरत्वम्—'भिन्नं मतिर्हिलोकः' इत्यनुसारेण लोके जनानां रुचिर्भिन्ना भिन्ना भवति। वेदेष्वेतत् सर्वं विज्ञायैव तेषां–तेषा विषयाणां प्रतिपादनं कृतं वर्तते। अतएव हि अथर्ववेदे लौकिकानां विषयाणामभिचारकर्मणाञ्च वर्णनमुपलभ्यते। परञ्च वेदाः तेषां–तेषां विषयाणां प्रतिपादनं कृत्वा तेषां फलशंसनमपि कुर्वन्ति। पुण्यकर्मणां प्रशंसनम् अशुभकर्मणां निन्दनं–च कुर्वन्ति वेदाः। एतेन अभिचारादिगर्हितकर्मसु प्रवृत्ताः पुरुषाः स्वानुष्ठाने साफल्यमधिगम्य तेषां फलं ज्ञात्वा तेभ्यः कर्मभ्यो विरताः सन्तः साधुपथगन्तारो भवन्तीति सुतरां वेदानामखिलजगद्धितानुशासनकरत्वं सिद्धयति।

गीता सुगीता कर्तव्या

अथवा–एकं शास्त्रं देवकीपुत्रगीतम्।
अथवा–दुग्धं गीतामृतं महत्।

श्रीमन्महाभारतस्य सर्वस्वभूता भगवतः श्रीकृष्णस्य श्रीमुखवाणीस्वरूपा श्रीमद्भगवद्गीता संस्कृतसाहित्यस्येकं भास्वरं रत्नम्। "अस्थानस्नेहकारुण्यं धर्माधर्मभियाकुलम्। पार्थं प्रपन्नमुद्दिश्य'' ....' भगवता परमपुरुषेणाध्यात्मशास्त्र्यावतरणं कृतम्। वेदस्य सर्वस्यार्थं विशदं प्रकाशयितुमेव स भगवान् गीतामगासीदिति निश्चप्रचम्। वेदश्च ब्रह्मकर्मकाण्डात्मना द्वेधा विभक्तः। तदर्थसर्वस्वमत्रस्थितमिति कृत्वैव कथ्यते—'गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः। या स्वयं पद्मनाभस्य मुखपद्मनाभस्य मुखपद्माद्विनिस्सृता।' उभयभागात्मकस्य वेदस्य सारत्वादेव वेदोपबृंहणभूतानां स्मृतीतिहासपुराणानामपि सारभागत्वमप्यस्यां सुतरां समायाति।

अतएव हि वेदार्थव्यासकारेण महर्षिणा व्यासेन उक्तम्–'एकं शास्त्रं देवकीपुत्रगीतम्। वादरायणेन तु प्रोक्तम्–धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु परमपुरुषार्थस्य मोक्षस्य अधिगमस्य साक्षात्साधनभूता उपनिषद् एव गावः, भगवान् श्रीकृष्ण एव दोग्धा अर्जुनश्च वत्सः, सुधियः भोक्तारः दुग्धामृतञ्चेयम् श्रीमद्भगवद्गीता। तथाहि–'सर्वोपनिषदो गावः दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्।' इत्थं भगवता वेदव्यासेनैवासकृदनेकधा सुश्लोकिता गीता सर्वैः पौरस्त्यैः पाश्चात्यैश्चापि विद्वद्भिः समानरूपेण समादृता।

अस्यां गीतायां श्लोकानां सप्तशती (७००) वर्तते। तत्र कृष्णलोकाः पञ्चसप्तत्युत्तरपञ्चशती (५७५) अर्जुनश्लोकाः चतुरशीति (८४) संजयश्लोकाः चत्वारिंशत् (४०) धृतराष्ट्रश्लोकस्त्वेक एव। 'पञ्चसप्तति युक्तानि श्लोकानां प्राह केशवः शतानि पञ्चपार्थस्तु, चतुरोशीतिमेव च। चत्वारिंशत् संजयोक्ता राज्ञैक इति तन्मितिः।' इत्याहुः उत्तमूरवीरराघवाचार्याः। इयं गीता त्रिषु षट्केषु अष्टादशाध्यायेषु च विभक्ता वर्तते। तत्र प्रथमो हि षट्कः आदिमाना षण्णामां ध्यायानां विद्यते। अस्मिन् षट्के भगवान् योगावाप्तिपुरस्सरं आत्मानुभूतिसिद्धयर्थं कर्मयोगं ज्ञानयोगश्चोपादिशत्। तथा चाहुः यामुनाचार्याः—

"ज्ञानकर्मात्मिकेर्निष्ठे योगलक्ष्ये सुसंस्कृते।
आत्मानुभूतिसिद्धयर्थं पूर्वषट्केन चोदिते।"

सप्तमाध्यादारम्भ्य द्वादशाध्यायपर्यन्तं गीताया मध्यमः षट्को विद्यते। ज्ञानयोगकर्मयोगाभ्यां लभ्यस्य भक्तियोगस्योपदेशः कृतो भगवत्तत्त्वस्य यथार्थं ज्ञानं सम्पद्येत। "मध्यमे भगवतत्त्वं यथात्म्यावाप्तिसिद्धये। ज्ञानकर्मभिर्निर्वर्त्यो भक्तियोगः प्रकीर्तित।' (गी० सं० ३) तृतीयः षट्कः त्रयोदशाध्यायात् अष्टादशाध्यायपर्यन्तमास्ते। अस्मिन् षट्के पूर्वोक्तयोरुभयोरेव षट्कयोः प्रोक्तानां विषयाणाम् प्रकृति, जीव-महदादि-ईश्वराणाम्, कर्मयोग–ज्ञानयोग–भक्तियोगानाञ्च स्वरूपाणां स्पष्टीकरणं कृतम्'। तथा चाहुः गीतार्थसंग्रहकाराः श्रीमद्यामुनाचार्याः—'प्रधानपुरुषव्यक्तं सर्वेश्वरविवेचनम्। कर्मधीभक्तिरित्यादि पूर्वशेषोन्तिमोदितः।

इदानीं गीतायाः अध्यायक्रमेण वेदार्थसारस्वरूपत्वं विचारचर्चापदं क्रियते। गीतायाः प्रथमोऽध्यायः शास्त्रस्योपक्रमरूपेण वर्तते। कुरुक्षेत्रस्य संग्रामभूमौ योद्धुकामानवस्थितान् स्वजनान् वीक्ष्य अर्जुने अस्थाने एव स्वजनमोहसंचारः संजातः! अर्जुनः अस्य युद्धस्य स्ववंशविनाशरूपं फलमनुमीय जातवेपथुः सन् युद्धात् पराङ्मुखो भूत्वा सशरं चापं विसृज्य रथोपस्थ उपाविशत्। 'तं तथा विधं कृपयाविष्टं 'यच्छ्रेयः स्यान्निश्चितं ब्रूहि तन्मे, शिष्यस्तेहं शाधि मा त्वां प्रपन्नम्' इति उक्तवन्तं पार्थमुद्दिश्य भगवान्–'नत्वेवाहं जातुनाशम्' (गी० २।१२) इत्यारम्य 'अहम् त्वां सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः।' (गीं० १८।६६) इत्येतदन्तम् गीताशास्त्रमुपादिक्षत्।

अस्मिन् अध्याये भगवान् आत्मनो नित्यत्वं प्रत्यपीपदत्–'न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।' (२।२०) 'नैनं छिन्दन्ति शास्त्राणि' (२।२३) 'अच्छेद्योऽयमदाह्योयम्०' (२।२४) 'अव्यक्तोऽयमचिन्तयोयम्०' (२।२५) इमे सर्वे श्लोकाः आत्मनो नित्यत्वं प्रतिपादयन्ति। उपनिषत्स्वपि आत्मनो नित्यंत्वमसकृदुक्तम्। तथाहि—'न जायते म्रियते वा विपश्चित् (क० उ० २।१८) ज्ञाज्ञौ द्वावजावीशनीशौ (श्वे० १।९) 'नित्यो नित्यानां चेतनश्चेतनानाम्।' (श्वे० ६।१३) अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे।' (कठ० २।१८) इमाः सर्वाः श्रुतयः - जीवस्य नित्यत्यं प्रतिपादयन्ति। योगशास्त्रीयस्थितप्रज्ञतां लक्षयता भगवता क्रमशः पूर्वपूर्वोत्कृष्टानाम् योगिनाम् वशीकार-एकेन्द्रिय-व्यतिरेक-मतमानाख्यानाम् चतुर्णामवस्थानां वर्णनम्—'प्रजहाति यदाकामान्० (२।५५) 'दुःखेष्वनुद्विमग्नाः०' (२।५६) 'यः सर्वमानभिस्नेह०' (२।५७) 'यदा संहरते चाय' (२।५८) इत्येतेषु चतुर्षु श्लोकेषु अवरोहक्रमेण कृतम्। गीतायाः द्वितीयतृतीयाध्याययोः निष्कामकर्मयोगस्योपदेश उपलभ्यते। तथाहि—'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। माकर्म फलहेतुर्भूर्मतिसंगोऽस्त्वकर्मणि (२।४७)।

गीतायाः तृतीयेऽध्याये तु कर्मयोगस्यैव वर्णनमास्ते। न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।' (३।४) 'नहिं कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत्' (३।५) नियतं कुरु कर्मत्वं कर्मज्यायो ह्यकर्मणः। (३।८) उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्। (३।३४) यदिह्यहं न वर्तेयं जातु कर्माण्यतन्द्रितः। (३।२३) कर्मणैव हि संसिद्धिमास्थिता जनकादयः (३।२०) तस्मादसक्तः सततं कार्यं कर्म समाचर (३।१९) वेदेष्वपि निष्कामकर्मयोगस्योपदेश उपलभ्यते। तथाहि—'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे।' (यजु० ४०।२) गीतायाः तृतीये एव अध्याये यज्ञानामवश्यंकर्तव्यता निरुप्यते। 'सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः। अनेन प्रसविष्यध्वमेषवोऽस्त्विष्टकामधुक्।' (३।१०) 'देवानभावतानेन' (२।११) 'इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः (३।१२) यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्व किल्विषैः (३।१३) 'यज्ञः कर्म समुद्भवः' ब्रह्मनित्यं यज्ञे प्रतिष्ठितम् (३।१५)।

गीतायाश्चतुर्थे अध्यायेऽपि—दैवमेवापरे यज्ञं योगिनः पर्युपासते। ब्रह्माग्नावपरे यज्ञं यज्ञेनैवोपजुह्वति।' (४।२५) द्रव्य यज्ञास्तपोयज्ञायोगयज्ञास्तथापरे। स्वाध्यायज्ञानयज्ञाश्च यतयः शंसतिव्रताः।' (४।२८) 'सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः' (४।३०) 'यज्ञशिष्टामृतभुजो यान्ति ब्रह्मसनातनम्। (४।३१) इत्थमेव यजुर्वेदेऽपि बहूनां यज्ञानां वर्णनमुपलभ्यते। तथाहि—'यज्ञो वै श्रेष्ठतमं कर्म' '[श० ब्र० १।७।१।५] पाहि यज्ञं पाहि यज्ञपतिं पाहि मां यज्ञन्यम्।' (यजु०

२।६) 'आयुर्यज्ञेनकल्पताम् प्राणो यज्ञेन कल्पताम्०' (यजु० ९।२१) 'तस्माद्यज्ञात् सर्वहुतः सम्भृतं पृषदाज्यम्' (यजु) तस्माद्यज्ञात् सर्वहुतऋचः सामानि जज्ञिरे [यजु०] 'यज्ञेनयज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन् [३१।१६]।

गीतायाः पञ्चमोऽध्यायः कर्मसन्यासयोगस्य नाम्नांभिधीयते। कृतानां कर्मणां फलाभिसन्धिरहितत्वमेव कर्मसन्यासयोगस्याभिप्रायः।

गीतायाः षष्ठे अध्याये आत्मसंयमस्योपायाः वर्णिताः सन्ति। नूनमत्र योगदर्शनोक्तानां 'यमनियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधीनां संक्षिप्तं रूपं सारभूतञ्च वर्ण्यते। 'मन. एव मनुष्याणां कारणं वन्धमोक्षयोः' इति नियमानुसारेण मोक्षावाप्त्यनुकूलस्य योगस्य सिद्ध्यर्थं मनसः वशीकरणमावश्यकमस्ति। परन्तु चञ्चलं हिं मनः कृष्ण प्रमाथि बलवद् दृढ़म्। तस्याहं निग्रहं मन्ये वायोरिव सुदुष्करम्' [६।३४] इति श्लोकानुसारेण मनसोवशीकरणमतीवदुष्करमास्ते। किन्तु तस्यापि निग्रहः अभ्यासवैराग्याभ्यां कर्तुं शक्यते। 'अभ्यासेन तु कौन्तेय वैराग्येण च गृह्यते।' [६।३५] मनसि वशे कृते सति शमदमादीना सम्पतिः शीघ्रम् सम्पद्यते, येनावाप्तयोगः पुरुषः वासुदेवात्मकं जगत्' पश्यति। छान्दोग्योपनिषदः 'ऐतदात्म्यमिदं सर्वम्' इति श्रुतिः, अन्तर्यामिब्राह्मणस्य सर्वाः श्रुतयः, सुवालोपनिषच्च जगतः परमात्मकत्वं प्रतिपादयन्ति।

सप्तमे अध्याये भगवान् प्रतिपादयति यदखिलं जगत् त्रिगुणात्मिकया मायया आच्छनं वर्तते, अतएव स स्वपरयोः स्वरूपं नहि जानाति। अस्या मायाया अतिक्रमणं अतीव दुष्करं वर्तते। भक्तियोगयुक्त एवोपासक अस्या अतिक्रमणे समर्थो भवति—'दैवीह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।' भक्तियोगस्य माहात्म्यम् उपनिषत्स्वपि वर्णितमास्ते—'तमेव विदित्वातिमृत्युमेति' (श्वे० ३।८) 'तमेव विद्वानमृत इह भवति' (नृ० पू० ता० १०।६) 'आत्मानमेव लोकमुपासीत (वृ० उ० १।४।१५)।

गीतायाः अष्टमेऽध्याये अक्षरब्रह्मणो विवेचनमुपलभ्यते। 'अक्षरं ब्रह्म परम स्वभावोऽध्यात्ममुच्यते।' (८।३) सुवालोपनिषद्यपि—अव्यक्तमक्षरे लीयते अक्षरं नमसिलीयते।' (सु० उ० २) इत्युक्तम्। अत्रैव देवपितृमार्गयोः वर्णनमुपलभ्यते। अग्निर्ज्योति रहः शुक्लः (८।२४) इति श्लोके अर्चिरादिमार्गस्य वर्णनं वर्तते। 'धूमोरात्रिस्तथाकृष्णः०' (८।२५) इत्यस्मिन् श्लोके धूमादि मार्गस्य वर्णनम् वर्तते। छान्दोग्योपनिषदः पञ्चमाध्याये उभयो मर्गियोः वर्णना समुपलभ्यते। तथाहि—'तद् य इत्थं विदुर्ये चेमे श्रद्धातपं इत्युपासते तेऽर्चिषमभिसम्भवन्ति। (छा० उ० ५।१०।१) 'अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति (छा० उ० ५।१०।३)।

नवमे अध्याये उपास्यस्य परमपुरुषस्य माहात्म्यम् ज्ञानिनाञ्च विशेषं विशोध्य भक्तिरूपस्योपायस्य स्वरूपमुक्तम्—भगवान् सर्वत्रव्यापकरूपं स्वकीयं माहात्म्यं—

मया ततमिदं सर्वं जगदव्यक्तमूर्तिना। मत्स्थानि सर्वभूतानि न चाहं तेष्ववस्थितः।' (९।३) इत्यस्मिञ्छ्लोके प्रावोचत्। 'यः पृथिव्यां तिष्ठन्… …यं पृथिवी न वेद।' (बृ० उ० ३।७।३) 'य आत्मनि तिष्ठन्… …यमात्मा न वेद' (श० प० ब्रा० १४।६।५।३०) इत्यादिषु श्रुतिष्वपि परमात्मनो जगद् व्यापकत्वमुक्तम्।

दशमे विभूतियोगाख्ये अध्याये सम्पूर्णस्य जगतः कारणत्वं परमात्मनः प्रतिपाद्य जगतः तद्विभूतित्वं प्रतिपादितमास्ते। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति' (तै० उ० ३।१) इति श्रुतावपि ब्रह्मणो जगत्कारणत्वं प्रतिपादितं भवति।

गीतायाः एकादशेऽध्याये विश्वरूपं प्रदर्शनं नैवं कृतं भगवता। 'यजुर्वेद एकत्रिंशदध्यायेऽपि 'सहस्र शीर्षा पुरुषः' इत्यादिषु मन्त्रेषु भगवतो विश्वरूपस्य वर्णनमुपलभ्यते। छान्दोग्योपनिषदः वैश्वानरविद्यायाः प्रकरणेऽपि विश्वरूपस्य वर्णनम् सोपष्टम्भमुपलभ्यते।

गीताया द्वादशेऽध्याये भगवदुपासनायाः सरलं रूपमुपदिष्टमास्ते। तैत्तिरीय नारायणोपनिषद्यप्ययं प्रकारो वर्णितोऽस्ति।

त्रयोदशेऽध्याये क्षेत्रक्षेत्रज्ञयोः विभागोऽस्तिऽवर्णितः। तत्र सांख्योक्ततत्त्वानामेव वैपुल्यमास्ते। चतुर्दशेऽध्याये गुणानां बन्धहेतुताप्रकारो गुणनिवर्तनप्रकारश्चोच्यते। अस्मिन्नप्यध्याये सांख्यदर्शनस्य प्रकृतेरविभाज्यांशभूतानां सत्त्वरजस्तमसां विवेचनं कृतमास्ते। [पञ्चदशेऽध्याये सनातनाश्वत्थस्य वर्णनमास्ते। 'ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्। छन्दांसि यस्य पर्णानि, यस्तं वेद स वेदवित्। (१५।१) श्रुतिष्वप्यस्याश्वत्थस्य वर्णनमुपलभ्यते—'ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्थः सनातनः। (क० उ० २।३।१) 'उर्ध्वमूलमवाक्शाखं वृक्षं यो वेद सम्प्रति।' (आरण्य० १।११।५) इत्यादिषु। एतदनतरं पुरुषोत्तमविद्यायाः वर्णनं कृतम्।

षोडशेऽध्याये दैवासुरसम्पदो वर्णनमास्ते। सप्तदशेऽध्याये अशास्त्रविहितस्य कर्मानुष्ठानस्य आसुरत्वेनाफलत्वं शास्त्रविहितस्य च गुणतः त्रैविध्यं शास्त्रसिद्धस्य च लक्षणमुक्तम्। गीताया अष्टादशेऽध्याये मोक्षसाधनभूतयोः 'योगसंन्यासयोः ऐक्यं त्यागस्य संन्यासस्य च स्वरूपम्, सर्वेश्वरे सर्वकर्मणां कर्तृत्वानुसन्धानम्, सत्त्वरजस्तमसां कार्यवर्णनेन सत्त्वगुणस्यावश्योपादेयत्वम्, स्ववर्णोचितानां कर्मणाम् परमपुरुषाराधनभूतानां परमपुरुषप्राप्तिनिर्वर्तनप्रकारः कृत्स्नस्य गीताशास्त्रस्य सारार्थो भक्तियोगश्चोक्तः।

इत्थमेकमेव गीताशास्त्रं वर्तते यस्याध्ययनेन सर्वेषां शास्त्राणां सारार्थो ज्ञातो भवति। अतः—दुग्धं गीतामृतं महत्।

किं किं न साधयति कल्पलतेव विद्या

अथवा–विद्याधनं सर्वधनं प्रधानम् ।

अथवा–उत्तमं हि धनं विद्या दीयमानं न हीयते ।

जगति जनिमतां जीवानां सुखमधिगन्तुमेव अनादिकालिकी प्रवृत्तिः । सुखमेव लब्धुं जीवः सर्वाणि कर्माणि करोति। परन्त्विदं सुखं किं रूपम् ? कथञ्चेदमुपलभ्यते ? इत्यादिका अनुयोगा अत्रोपस्थिता भवन्ति । सुस्वादुमधुरं भोजनं, सूक्ष्माणि दृष्टिमनोहराणि चिक्कणानि वस्त्राणि विपुलं वैभवं, रम्या रामा, शारीरिकं वलम् इमानि सर्वाणि वस्तूनि नहि भवितुमर्हन्ति सुखस्वरूपाणि अन्यथेमानि सर्वदा सुखरूपेण प्रतीयेरन् । न च भवति तथा प्रतीतिः सर्वदा सर्वेष्वेतेषु सुखस्य । पित्तोपहताय न रोचते मधुरं भोजनम् । अतीवमनोहरवस्त्रधरोऽपि मृतिं याति कष्टमयं जीवनं यापयित्वा । विपुलवैभवसम्पन्नोऽपि व्याधिग्रस्तोखिलां सम्पत्तिं विपत्तिमिव मनुते, क्षयादिरोगग्रस्तो जनो रम्यामपि रामां राक्षसीमिवानुभवति । शारीरिकमपि वलम् वैयर्थ्यं भजते विपत्तौ। अतएव एतेभ्यस्समस्तेभ्यो वस्तुभ्यो भिन्नमेव किञ्चित्सुखशव्दाभिलपनीयमास्त इति निश्चप्रचम् । तदिदं सुखम् निर्दिशन्तो ज्ञानैकचक्षुषो वंदन्ति—"सुखं हि नाम अनुकूलं ज्ञानम् ।" अनुकूलस्य ज्ञानस्य सुखरूपता नहि क्वाप्यपहीयते तदिदं सुखमात्मनोऽसाधारणेन गुणे ज्ञाने निवसति । परञ्च यथा कृष्णसारमृगो स्वस्मिन् विद्यमानां कस्तुरीं वाह्येषु वस्तुष्वन्विषन् पक्वकस्तूरिमृगलक्षणज्ञैर्हन्यते तथैवाजीवनं वाह्येषु धनजनशक्तिसंघटनसैन्योपकरणवलेषु सुखमन्विषन् मनुष्यो वलिना कालेन व्यापाद्यते ।

तदिदं ज्ञानं तदाश्रितं सुखं कथं समधिगतं स्यादित्याकांक्षा यां वक्ति विष्णुशर्मा—'विद्या ददाति विनयं विनयाद्याति पात्रताम् पात्रत्वाद्धनमाप्नोति धनाद्धर्मंस्ततस्सुखम्' इति ! यद्यपि विद्या–ज्ञानमित्यनर्थान्तरम् । अथाप्यत्र विद्याशव्दोऽध्ययनार्थकः । अध्ययनमेव मूलम् । अध्ययनेव विदितवेदितव्ये मनुष्ये विनयस्याधानं भवति, तेन तस्मिन् मनुष्ये योग्यता आयाति योग्यो मनुष्यः सर्वैः सर्वत्र समादृतस्सन् सुखो लभते । विद्यां विना विनययोग्यताभ्यां विहीनोऽनादृतो भवति सर्वत्र मानवः सर्वसम्पद् युक्तोऽपि ।

अस्याः विद्याया महत्त्वं नैकधा वर्णितं मनीषिभिः । लोके त्रिविधो हि प्रकर्षो प्रख्यातोऽस्ति उत्तरोत्तरप्रकृष्टः–वलप्रकर्षः, धनप्रकर्षः, विद्याप्रकर्षश्च । एतेषु वलप्रकर्षस्तु विद्यमानो धनं विना स्वाश्रयं नोपकरोति । वार्द्धक्ये च समागतेऽपक्षीयते स्वयमेव । सदपि सर्वदाऽविवेकसहकृतत्वादनर्थभूयस्त्वमेवाविष्करोति प्रायेण, येन वलाश्रयस्सर्वदा सन्तप्त एव भवति। धनप्रकर्षश्च सत्यापायापाये आजीवनमुपकरोत्याश्रयम्; परञ्च तस्यापि रक्षणायधनिकस्सर्वदा चिन्तित एव भवति। विद्याप्रकर्षस्तु सदा स्वाश्रयं सुखिनमेव करोति। ज्ञान–विज्ञानभूम्ना महिम्ना विद्वान्

यत्र कुत्रापि विद्यमानः सुखमेव लभते । उक्तञ्च केनापि—'स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ।' वैदुष्यमेतादृशं भवति यत्संकोचस्य नामापि नहि जानाति । तस्य यशो वर्द्धते एव तथाहि—

"वार्ता च कौतुककरी विमला च विद्या, लोकोत्तरोपरिमलश्च कुरंगनाभेः ।
तैलस्य बिन्दुरिव वारिणि दुर्निवारमेतत् त्रयं प्रसरति स्वयमेव भूमौ ।।"

अधिगतविद्यस्य सर्वेषां शास्त्राणां ज्ञानं सम्पद्यते, स्वभावत एव सदसतोर्विवेक उत्पद्यते, सर्वेषां शास्त्राणामभ्यस्तत्वाद् वाण्यां प्रागल्भ्यमायाति, येन सः देशकालानुरूपं सर्वं करणीयमकरणीयञ्चावैति । इत्थं विदुषः क्रियासु इमे सर्वे गुणा आयान्ति । तथाचोक्तम्—

"शास्त्रेषु निष्ठा सहजश्च बोधः, प्रागल्भ्यमभ्यस्तगुणा च वाणी ।
कालानुरोधः प्रतिभानवत्त्वमेते गुणाः कामादुधाः क्रियासु ।।"

यद्यपीयं विद्या एकैव वर्तते तथापि स्वाश्रिता सा संसारे जायमानानां सर्वेषां सम्वन्धिनां–भूमिकां निर्वहति, इयम् जीवनयापनानुकूलानां सर्वेषां वस्तूनामधिगमस्य द्वाराण्युद्घाट्य सर्वथा मातेव रक्षति । यथा पिता हितानुशासनं कुरुते तथैवेयं विद्या सद् सद्विवेकरूपं ज्ञानमुत्पाद्य आत्मकल्याणकारिणि पथि प्रवर्तयति विद्वांसम् । जगति जनिमतां जीवानामसत् सङ्कल्पवत्वम् नैसर्गिकं भवति, तज्जन्यं खेदान्वितत्वमपि स्वाभाविकमेव । अस्य खेदस्येवापनुत्यै जीवस्स्वप्रियकारिणां पुत्रमित्रकलत्रादिकानां संयोगं कांक्षते, एतेषु समेषु खेदापनोदकेषु रम्या रामा स्वीयैर्मधुरललितैर्वचोभिः पुरुषस्य खेदान्वितं हृदयं हृत्वा कस्मैचन कालाय मानवं व्यपगतविषादं करोति; इयं विद्या तु ततोऽप्यधिका सुखदायिनी, यस्या अङ्के सुखं शयानः नोवेत्ति खेदगन्धमपि । इत्थं विद्यां सर्वेषां लौकिकानां सम्वन्धिनां भूमिकां निर्वहितुं क्षमाऽस्ति । तया विदुषः पुरुषस्य लक्ष्म्या अपि वृद्धिर्भवति, यशश्च तस्याभिवर्द्धते । इत्थं विद्या स्वर्गीय कल्पतरुरिवास्ते उक्तमपि—

"मातेव रक्षति पितेव हिते नियुक्ते,
कान्तेव चापि रमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं,
किं किं न साधयति कल्पलतेवविद्या ।।''

अज्ञानान्धकारविनाशिन्याः ज्ञानप्रकाशकारिण्या विद्यायाः वलेन मनुष्योऽऽत्यन्तरहस्यमयान्यपि तत्त्वान्यधिगच्छति । विद्यावलेनैवावगन्तुं शक्यते पापानि पुण्यानि च । विद्याविहीनः कथं ज्ञातुमर्हति वेदेषु तदुपबृंहणेषु पुराणेतिहासादिकेषु अस्माकं अध्यात्मतत्त्ववेत्तारो महर्षयः किमवोचन् ? विद्याहीनः पुरुषः न तु क्वचन सार्वकारीयकार्यशालासु, नवा कुत्रचित् पाठशालासु, नवा कस्मिंश्चिन् सार्वजनिके कर्मणि

नवा कुत्रचिदत्यन्तमहत्त्वपूर्णे कार्यें व्यापृतिमन्वेति। स्वकीयाः परकीयाश्च सर्वे जनाः विद्याविहीनं जनमुपेक्षन्ते। एतादृशः पुरुषः सम्यग्रूपेणधर्माधर्मविवेकमपि नहि कर्तुं प्रभवति। सर्वेषु लौकिकेषु महत्त्वपूर्णकार्येषु विद्यावतामेव यतो नियोगो भवति, तस्मादवश्यमध्येतव्या विद्या। उक्तमपि केनचन--

सर्वेऽपि लोके विधयो यथोक्ता ज्ञातादृते नैव भवन्ति सम्यक्।
अनात्मनीयं परिहर्तुकामाः विद्यार्थिनो ज्ञानमतः श्रयन्ते॥

किञ्च—ज्ञानं तृतीयं पुरुषस्य नेत्रं समस्ततत्त्वार्थविलोकदक्षम्।
तेजोनपेक्षं विगतान्तरायं प्रवृत्तिमत् सर्वजगत्त्रयेऽपि।"

विद्यायाः प्रशंसां कुर्वता केनाप्युक्तंविद्या एता दृशं धनं वर्तते येन लौकिकं पारलौकिकं च सुखं लब्धुं शक्यते;यतोहि विद्यायुक्तस्य पुरुषस्यैवतेषु तेषु सर्वेषु कार्येषु गौरवमण्डितेषु पदेषु च व्यापृतिर्भवति। तेनैव सः सर्वं लौकिकंसुखं लभते। यदि च विद्यामहिममण्डितः पुमान् धर्माधर्मादिकं सर्वं ज्ञानचक्षुषाविलोक्य पुण्यादृष्टजनकानि कार्याणि करोति तदा सः तेनैव कृतेन कर्मणा स्वर्गीयमपिसुखमवाप्नोति। 'सा विद्या या विमुक्तये' इति नियमानुसारेण 'द्वे विद्ये वेदितव्ये परा चापरा च' इति मुण्डकोपनिषत्श्रुत्यरोधेन च; समधिगतायांपराविद्यायां 'तद्विष्णोः परमं पदं सदा पश्यन्ति सूरयः' इति श्रुतौ प्रोक्तो मोक्षोऽप्युपलभ्यते।

तथाहि—'इहामुत्र सुखक्षेत्रमाहुर्विद्याधनं धनम्। विद्यायामालया युक्तो मुक्तिं याति संयमी।" सेय सर्वकामदुधा विद्या नैजीमुपमां नो विभर्ति—'सर्वकामदुधा विद्या सर्वदा सर्वसम्मता। सा केन मीयते यस्याः कोपि लोके समो नहि॥'

इत्थं भूतायाः विद्यया दानस्य महात्म्यं सर्वदानापेक्षया महत्। उक्तमपि—यत्पुण्यं तीर्थयातृणां यत्पुण्यं यज्वनां नृणाम्। तत् पुण्यं कोटिगुणितं विद्यादानान्न संशयः।

अपि च—

"वाजपेयसहस्रस्य सम्यगिष्टस्य यत्फलम्।
तत्फलं समवाप्नोति विद्यादानान्न संशयः॥"

अस्याः विद्ययाः एतादृशं वैचित्र्यमास्ते यत् सर्वाणि तु धनानि व्ययिते सति अपचीयन्ते; परञ्चेयं विद्या व्ययिता सति अनुकालमेवोपाचिता भवति। अतएव सरस्वत्या अपूर्व एव कोशो विद्यते।

यस्या विद्याया; अधिष्ठातृदेव्याः सरस्वत्याः कृपाकटाक्षतारताम्यवशादेव लोके—वनस्पतिवृहस्पत्योः तारतम्यमवलोक्यते तस्या विद्यायाः माहात्म्यमिदमित्थन्तया को नाम लोके वक्तुं प्रभवेत्। यत्किञ्चिदप्युच्यते तदखिलमल्पमेव।

संस्कृतभाषायाः महत्त्वम्

अथवा—संस्कृतमेव भाषाविवादं समाहितिः

अथवा—संस्कृतं राष्ट्रभाषा स्यात्

अथवा—संस्कृतं सर्वभेषजम्

विश्वस्य प्राचीनतमा हृद्या, निरवद्या, सकलैरपेक्षितैः संस्कारैस्सम्पना, साहित्य-काव्य-कोष-व्याकरणादि सर्वाङ्गैस्समन्विता अनादिकालतः काले–काले परमात्मनावतीर्य संरक्षिता महोभिर्गौरवैर्मण्डितास्ति संस्कृतभाषा। अस्यामेव भाषायां 'सहस्रवर्त्मा सामवेदः एकविंशतिधाह्वृचः, एकशतमध्वर्युशाखा नवधाऽथर्वाणः' इति महाभाष्योक्ताभिः ११३१ शाखाभिः समन्विताः ऋग्यजुः सामाथर्वाणो वेदाः शिक्षाकल्पनिरुक्तछन्दोज्योतिर्व्याकरणाख्यैः षड्भिरङ्गैस्समेधिता विराजन्तेतराम्। संस्कृतभाषाया एव वेदानाम् वामदेववशिष्ठविश्वामित्रवृहस्पतिगृत्समदप्रभृतयः क्रान्तदर्ष्टारो महर्षयः वेदमन्त्राणां द्रष्टारोऽभूवन्। ब्राह्मणारण्यकोपनिषद् गृह्यसूत्रधर्मसूत्र-श्रौतसूत्र-प्रातिशाख्य-वृहद्देवता-प्रभृतयः सर्वे वैदिकवाङ्मयेन सम्बद्धा ग्रन्थाः वेदार्थानामेव स्पष्टीकरणं कुर्वन्ति। 'इतिहासपुराणाभ्यां समुपवृंहयेत्।' इति सूक्तयनुसारेण मनुपराशरवसिष्ठविश्वामित्रमार्कण्डेयजावालिहारीत-वृद्धहारीत-महर्षिभिः प्रणीतास्तास्ताः स्मृतयः वेदार्थानामेवोपवृंहणे प्रवृत्तास्सन्ति। संस्कृतभाषायामेव आदिकविर्वाल्मीकिः चतुर्विंशतिसहस्रश्लोकात्मकं वाल्मीकीयं रामायणमादिकाव्यं व्यरचत्। अष्टादशपुराणैस्साकं सपादलक्ष श्लोकात्मकस्य महाभारतस्य भारतीयैतिह्यस्य प्रणयनमकार्षीत् व्यासः। संस्कृभाषायामेव महाकविकालिदासः रघुवंश-कुमारसम्भवे-मेघदूतऋतुसंहार-विक्रमोर्वशीय-अभिज्ञानशाकुन्तलाख्यानां महाकाव्य-खण्डकाव्य-नाटकग्रन्थानां प्रणयनमकरोद् यान् पाठं-पाठं पौरस्त्याः पाश्चात्याश्च विद्वांसः काव्यानन्दसन्दोहे सम्मग्नाः समानरूपेणाप्रीयन्त। भासाश्वघोष भामह रुय्यकरुद्रट-वामन-विश्वनाथ-अभिनवगुप्त-जगन्नाथ-श्रीहर्ष-आनन्दवर्धन-भारवि-माघ-वाणभट्टसुवन्धु अम्बिकादत्तव्यासप्रभृतयः प्रवन्धकाव्यानां प्रणेतारः प्रवन्धकाव्यानामालोचकाश्च परस्सहस्रसंख्याकाः कवयस्स्वीयैः कृतिभिः संस्कृतसरस्वतीम् एव तैस्तैर्मण्डनोपकरणैरलमकर्षुः। पाणिनि-पतञ्जलि-कपिल-काणाद–गौतम-जैमिनि-व्यासाः तेषां-तेषां शास्त्राणामाद्यदर्शकाः संस्कृतभाषामेव व्यरचयन् व्याकरण–योग–सांख्य–वैशेषिक–न्याय–पूर्वमीमांसा–शारीरिकमीमांसाख्यानां दर्शनानां सूत्रग्रन्थान्। व्यास–वोधायन–भर्तृहरि–टङ्क–गुहदेव–भारुचि–शंकराचार्य-श्रीनाथमुनि–यामुनाचार्य-रामानुजाचार्य–वल्लभाचार्य–निम्बार्काचार्यप्रभृतयो वेदान्तसूत्रभाष्यकाराः संस्कृतभाषायामेव स्वकीयानि भाष्याण्यलैखिषुः।

इत्थं साहित्यस्य विशालेन भण्डारेण संयुक्ता संस्कृतभाषा विक्रमादित्यभोज प्रभृतीनां भारतीयभूभुजां राजभाषासीत्। तदा नासीत् कश्चन यः संस्कृते नो

वदेत् । राज्यस्य सकलाः प्रजाः संस्कृतभाषाया एव माध्यमेन व्यावहारावकार्षीत् । प्राचीनतमे काले अस्या एव भाषाया आलोके विश्वं विश्वं स्व-स्व चरित्रस्य शिक्षामग्रहीत् । तथाहि—"एतद्देशप्रसूतस्य सकाशादग्रजन्मनः । स्वं-स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ।" कौटिल्यार्थशास्त्र-कामन्दकीयनीतिप्रभृतीनां अर्थशास्त्र-राजनीति-इतिहास-कामकला-प्रभृतीनां लोकोपयोगिनां सर्वेषां विषयाणां ग्रन्थान् प्राणैषुः संस्कृतभाषायामेव मनीषिणः । इत्थं भूतायाः संस्कृतभाषायाः महत्त्वं प्रतिपादयन्तः केचनावोचन्—

'सर्वाषामपि भाषाणां जनानां जीवनं यतः ।
भासते संस्कृतं तेन शरीरस्य यथासवः ।

यस्यां मुनीनां विदितं निबद्धं, यस्यां च बद्धं गदितं मुनीनाम् ।
ज्ञानञ्च विज्ञानमयं विशेषात् सा संस्कृता वाग्भुवि पूजितास्ति ॥

अपि च—

गीर्वाणवाणी जगति प्रसिद्धा, दिव्या सुबोधा सरलातिरम्या ।
महाकवीनामखिलोत्तमा सा, सरस्वती भारतभूसुराणाम् ॥

इत्थं भूतायाः संस्कृतभाषायाः महात्म्यं वयं समे भारतीयाः स्वपूर्वजानां ऋषिमहर्षीणां ज्ञानविज्ञानाद्वैदेशिकाः 'मातृदेवोभव, पितृदेवो भव, आचार्यदेवो भव, सत्यं वद, धर्मं चर, 'प्रभृतीनुद्घोषान् तिरस्कृत्य वैदेशिकविज्ञानसभ्यतयोश्चाकचिक्ये दिग्भ्रान्ताः स्म, यस्यैवफलमास्ते यत् अन्तेवसत्सु इदानीं तनिकी वैदेशिकी शिक्षा-अविनयम्-आयोग्यताम् अधनताम्-अधार्मिकताम्-असुखानिच प्रादुर्भाव्य तेषां स्वबुद्धि स्वसंस्कृतिश्च तिरोभावयति येन, सम्पूर्णे भारतवर्षे अनाचार-भ्रष्टाचार-दुराचाराणामेव साम्राज्यमेधते ।

साम्प्रतम् स्वदेशीयशास्त्रविधिमुत्सृज्य कामकारतः प्रचरताम् सुखसिद्धिविरहितानाम् एम० ए०, वी० ए०, पदवीं गृहित्वाऽपि इतस्ततः जीविकायै भ्रमतां यूनां प्रणाशात् परित्राणाय साम्प्रतम् संस्कृतमेव शरणमास्ते । दिव्यं देवव्याहृतमिदं संस्कृतं भारतीयाया संस्कृतेः स्वरूपमास्ते यत्र अस्मिन्नपि अर्थसंकटप्राये कराले काले अध्यापयन्तोऽन्तेवसन्तश्च धर्मात्मानः सत्यसन्धाः शान्ताः दान्ताः सज्जनाश्च भवन्ति ।

सेयं संस्कृतभाषा नहि केवलं भारतवर्षस्यापितु सम्पूर्णस्य विश्वस्य मार्गदर्शनस्य क्षमतां विभर्ति । सर्वेषां भाषाविदामिदं निश्चिन्तं मतमास्ते यत् नास्ति विश्वस्य काचिदपि भाषा यस्याः प्रभवः संस्कृतम् न स्यात् । भारतीयानां तु सर्वासामेव भाषाणामुद्गमस्थलं संस्कृतभाषा वर्तत एव ।

इदानीं राज्यभाषायाः राष्ट्रभाषायाश्च प्रश्नाः तेषु तेषु प्रदेशेषु काले-काले विजृम्भन्ते । यदि 'संस्कृतम्' स्यान्निवेशितम् तस्मिन् पदे, तदा कस्यापि प्रदेशस्य

विमर्तिर्नो भवेत् । नास्ति भारतस्य कश्चनापि प्रदेशः यत्र संस्कृतवेत्तारो नहि सन्ति । इयमेवास्ते भाषा यस्यां विद्वांसो यवनैर्द्वारा भारतविध्वंसनस्य, आंग्लानां भारते आगमनस्य, भारतीयसंस्कृतसंस्कृतिप्रणाशाय बद्धपरिकराणां केषाञ्चनाधुनिकानां आपादचूडप्रयासस्यानन्तरमपि सर्वेषु प्रदेशेषु समुपलभ्यन्ते । इदानीमपि सर्वेषां हिन्दूपदवाच्यानां गृहे सर्वाणिधार्मिकाणि कृत्यानि संस्कृतमन्त्राणामेव माध्यमेन सम्पद्यन्ते । इदानीमपि विश्वस्य नास्ति काचिदपि भाषा यस्या सर्वाण्यंगानि तथा सुसमृद्धानि स्युः यथा सन्ति संस्कृतस्य । इयम् भाषा यदि सौभाग्यवशात् भवेद् भारतस्य राष्ट्रभाषा तदा निश्चितरूपेण भारतः पुनरपि विक्रमादित्यकालिकीं समृद्धिमियात् । पुनरपि भारते रामकृष्ण-भरत-मनुसदृशा प्रशासका उत्पद्येरन् ।

यत्र—सर्वे भद्राणि पश्येयुर्मा काश्चिद् दुःखभाग् भवेत् ।
काले वर्षेतु पर्जन्यः पृथिवी स्यात् सस्यशालिनी ।
देशस्स्यात् क्षोभरहितः प्रजा स्यात् निरुपद्रुता ।
लोभमोहादिरहिता शास्तारस्स्युः सुधार्मिकाः ।
विप्लवो हठतालो (हड़ताली) वा माभवेत्कर्णगोचरः ।
वेदवेदान्तविद्यानां सर्वदोषप्रमोषकः ।
देशव्यापी प्रचारस्स्यात् विश्वविश्वप्रकाशकः ।
छात्राः सर्वे अधीयेरन्, भारतीं सुरभारतीम् ।
सत्यसन्धाश्च भूत्वा ते लभेरन् सुखसम्पदाम् ।

अतएव—

'आबालवृद्धास्समुपेत्य नित्यम् शालामधीध्वं खलुदेववाणीम् ।
गृहेषु कन्या गृहिणीजनास्संस्कृतं पठित्वा कृतिनो भवेयुः ॥

यतः—यद्भूतं यच्चभाव्यं हि लोकेऽस्मिन् यद् ग्रहेलिमम् ।
यद्भूत्यै भारतस्यास्ते तत्सर्वं संस्कृते स्थितम् ।

फलतः—संस्कृतस्यानुरागाद्धि शास्तृणां समनुग्रहात् ।
अनुरोधात् संस्कृतज्ञानां संस्कृतम् वृद्धिमेष्यति ॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः ।

अथवा—उद्यमेन हि सिद्धयन्ति कार्याणि न मनोरथैः ।

जगति जायमानाः समे जीवाः सुखं समीहन्ते । परश्च सुखस्य रहस्यं तु उद्योग एव वर्तते । उद्योगं विना सुखस्य प्राप्तिर्नहि भवितुमर्हति । उद्योगो जीवनस्य प्रतीको वर्तते । निरुद्योगश्च मृतेः साधनम् । यावत्कालपर्यन्तं जीवति मानवस्ता-

कालपर्यन्तं सः कमप्युद्योगमवश्यमेव करोति। उद्योगमकृत्वा स किमपि कार्यं कर्तुं नहि क्षमते। जीवनस्य सर्वं अध्ययनाध्यापनगमनागमनादिकं उद्यमाधीनमेव भवति। इदं सर्वमालोच्यैव केनचिदुक्तम्—'उद्योगः पुरुषलक्षणम्।' इति

सर्वेषु कार्येषु साफल्यमवाप्तुं, यशोधिगन्तुम्, श्रियं समधिगत्य विहायदुःखनिकरम् समाजे सर्वसौख्यपूर्वकं जीवनं यापयितुम्, लौकिकानां पारलौकिकानाम्, नित्यनैमित्तिकप्रायश्चित्तरूपाणाम् तेभ्यस्तेभ्यः वर्णेभ्यः शास्त्रैः समनुज्ञातानां कर्मणामनुष्ठानं विनोद्योगं नहि भवितुमर्हति। इदमेव नहि—छात्रावस्थायां सोत्साहं सोद्योगं पठित्वैव छात्रः कक्षायां प्रथमं स्थानमवाप्नोति। उद्योगं विना नहि कश्चिन् सर्वान् सब्रह्मचारिणोऽतिक्रम्य प्रथमं स्थानमाप्तुमर्हति। भाग्यं तु उद्योगिन एव पुरुषस्य साहाय्यं करोति। पुरुषार्थं विहाय केवलं भाग्यमेव प्रतीच्छन्तो जीवने साफल्यम् नाधिगच्छन्ति। अतएवाहयुक्तं—

'उद्योगिनं पुरुषसिंहमुपैतिलक्ष्मीं
देवेन देयमिति का पुरुषा वदन्ति।
'दैवं निहत्य कुरु पौरुषमात्मयोगात् यत्ने
कृते यदि न सिद्ध्यति कोऽत्रदोषः'॥

उद्योगी पुरुषस्तु भाग्यं तिरस्कृत्य स्वशक्त्यनुसारेण प्रयतते। सत्यपि कृते प्रयासे यदि कार्यं न सिद्ध्यति तदा सः स्वोत्साहेन प्रेरितः सन् तस्मिन् प्रयासे विद्यमानं दोषं वीक्ष्य स्वलक्ष्यप्राप्तये पुनः प्रयासं कुरुते। उद्योगमेवाश्रित्य राष्ट्रपिता गान्धिमहाभागः आंग्लान् प्रशासकान् भारतवर्षाद्बहिष्कृत्य भारतीयायाः स्वतन्त्रतायाः प्राप्तौ सफलतामाध्यगात्। उक्तमपि "उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः।" महाराष्ट्रकेसरिणः शिवाजी महाभागस्य, महाराणाप्रतापस्य च अप्रतिमशौर्यवीर्ययोः गाथा उद्योगस्यैव महात्म्यं ख्यापयति। 'तद्दैवमिति संचिन्त्य त्यजेन्नोद्योगमात्मनः' इति पञ्चतन्त्रसूक्तिः प्रतिपादयति यत् कदाचिदपि भाग्याधीनमखिलं हानोपादानयशोलाभादिकं मत्वा भूतिमिच्छन् पुरुषः स्वकीयेन प्रत्यत्नेन नो विरमेत्।

उद्योगस्तु एतादृशं रसायनं वर्तते येन लौकिकं तु सर्वविधं सौख्यं समुपलभ्यत एव धर्मार्थकामाख्येभ्यः त्रिवर्गेभ्यः अत्यन्तोत्कृष्टो मोक्षोऽपि तेनैवोपलभ्यते। 'कर्मणैव हि संसिद्धिमास्थिताः जनकादयः' इति गीतोक्तिः इममेवार्थं प्रतिपादयति। भगवान् श्रीकृष्णः आत्मकल्याणमिच्छद्भ्यः समुपासकेभ्यः उद्योगरूपाणामेव कर्मयोग-ज्ञानयोग-भक्तियोगानुपादिक्षत्। स्वयमेव अर्जुनाय प्रावोचत् भगवान् यत् 'अकर्मण्यतायाः कर्मण्यतैव ज्यायान्। अतएव स्ववर्णाश्रमानुसारेण विहितानां कर्मणामनुष्ठानं नियतरूपेण कुर्विति—'नियतं कुरु कर्मत्वं कर्म ज्यायोह्यकर्मणः। ईशावास्योपनिषदः द्वितीया श्रुतिः आजीवनं कर्मकरणायोपदिशति—'कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः।' भगवान् स्वयमेवावतीर्य भूम्यां सर्वाणि विहितानि कर्माणि अतन्द्रितः सन् सम्पादयति। वक्त्यपि—'उत्सीदेयुरिमे लोकाः न कुर्यां कर्म चेदहम्। भारतीय-

विज्ञानस्य स्तम्भभूता वेदाः सम्पूर्णे वैदिकवाङ्मये विधिनिषेधमुखेन नित्यनैमित्तिकप्रायश्चित्तरूपाणां कर्मणां करणाय उपदिशन्ति । तथाह्याहुः—'सिद्ध्यन्ति कुत्र सुकृतानि बिना श्रमेण ।' महाभारतस्योद्योगपर्वणि उद्योगस्यैव महिमा गीयते । इदानीं धनिकानां विरला-टाटा-प्रभृतीनां या हि समृद्धि श्रीरवलोक्यते सापि उद्योगस्यैव माहात्म्यस्वरूपा वर्तते । सर्वेषां मनोरथानां पूर्तिः उद्यमेनैव भवति-इत्याह निदर्शनमुखेन पञ्चतन्त्रकारः—'उद्यमेन हि सिद्ध्यन्ति कार्याणि न मनोरथैः। नहि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः । अतएव ह्युक्तम्—'उद्योगादनिवृत्तस्य सुसहायस्य धीमतः। छायेवानुगता तस्य नित्यं श्रीः सहचारिणी । अतएव अकर्मण्यतां विहाय लौकिकाभ्युदयावाप्तये सततमुद्योगशीलेन भाव्यम् ।

आचारहीनं न पुनन्ति वेदाः

अथवा-आचारः परमो धर्मः

अथवा-शीलं परं भूषणम्

अथवा-सदाचारः

सतामाचरणमेव सदाचारशब्देनाभिधीयते । अस्मिन् भारत-भुवि संजातानाम्-मनु-इक्ष्वाकु-भगीरथ-हरिश्चन्द्र-दिलीप-रघु-दशरथ-शिवि-दधीचि-रन्तिदेवाम्वरीषप्रभृतयो भूपालानां वसिष्ठवामदेव-वाल्मीकि-व्यास-शुकदेव भृगु-पराशर प्रभृतीनां महर्षीणाम् श्रीरामकृष्णाद्यवताराणाम् आचरणमेव सदाचार शब्देनाभिलपनीयमास्ते । एभिः सन्दर्शितो पन्थाः जगतिजनिमतां जीवानां आत्मकल्याणायालम् । एतेषामाचरणम् लौकिकमखिलप्रकारकमभ्युदय प्रदाय पारलौकिकं परंनिःश्रेयसः प्रदानायाप्यलं भवति । कठोपनिषद्यपि मार्गद्वयस्य वर्णनमुपलभ्यते—श्रेयोमार्गस्य प्रेयोमार्गस्य च । तयोः सन्तः श्रेयोमार्गस्यैव वरणं कुर्वन्ति प्रेयोमार्गस्तु असद्भिरेव स्वीक्रियते । 'श्रेयश्च प्रेयश्च मनुष्यमेतत् तौ सम्परीत्य विविनक्ति धीरः ।'

(कठोपनिषद्)

सोऽयं सदाचारो द्विप्रकारको भवति-आभ्यन्तरो वाह्यश्च । सौशील्य-वात्सल्य-मार्दव-आर्जव-सौहार्द-साम्य-कारुण्य-माधुर्य-गाम्भीर्य औदार्य-चातुर्य-स्थैर्य-धैर्य-सत्यभाषित्व प्रभृतयो मानवोचिता गुणा एव आभ्यन्तराचारशब्देनाभिधीयन्ते । इमे समे गुणाः श्रीरामचन्द्रे समुपलभ्यन्ते । तथाहि—'वशी वदान्यो गुणावानृजुः शुचिः मृदुर्दयालुर्मधुरः स्थिरः समः । कृत्तीकृतज्ञस्त्वमसि स्वभावतः समस्तकल्याणगुणामृतोदधिः ।' इत्याहुः यमुनाचार्याः भगवतोगुणान् । इमे समे गुणाः सदाचारस्वरूपाः सन्ति । वशित्वादेव भगवान् रामः एकपत्नीव्रतधरो मर्यादापुरुषोत्तमश्चाभिधीयते । वदान्यत्वादेव सः विभीषणाय सुग्रीवाय च साम्राज्यं प्रायच्छत् । ऋजुः सो वक्ति 'आत्मानं मानुषमन्ये रामं दशरथात्मजम् । पवित्रस्सः ब्रह्मण्यतायाः परां कोटिं स्पृशति । मृदुः सः सर्वासां प्रजानां प्रियतमोऽभूव् । दयालुता तस्य गृध्र-

शवरीप्रभृतीनामुपरि कृपाकरणादेव प्रथिता । माधुर्यमेतादृशमासीत् श्रीरामस्य यत् तस्य समक्षं समागताश्शत्रव अपि सकृत् तं अंभ्यहन्तु नैच्छन् । एकाक्यपि भगवान् खरादीनां शत्रूणां वधे किञ्चिदपि वैयग्र्यं नानुभूतवान्; इत्यतुलं स्थैर्यमासीत् श्रीरामचन्द्रे । मनसा वचसा कर्मणा च समानाचरणशीलः सः समतायाः निदर्शनमेव । भगवान् निषादेन सह मैत्रीं चकार, गृधस्यान्त्येष्ठिक्रियां च सम्पादितवान् । इमे समे गुणाः सदाचाररूपास्सन्ति ।

भिन्नवर्णाश्रमवद्भ्यो जनेभ्यो भिन्नानां नित्यनैमित्तिकप्रायश्चितोपासनारूपेण वेदैर्विहितानां कर्मणामाचारत्वं प्रतिपादयता भगवता मनुना प्रोक्तम्—चतुर्णामपि वर्णानामाचारश्चैव शाश्वतः ।' (मनु० १।१०७) अस्य श्लोकस्य व्याख्यायां कुल्लूकभट्टो लिखति—'वर्णचतुष्टयस्यैव पुरुषधर्मरूपः आचारः शाश्वतः पारम्पर्यागतः ।' आचारस्यावश्यंपालनं कर्तव्यमित्याह मनुः—

'आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।
तस्मादस्मिन् सदा युक्तो नित्यं स्यादात्मवान् द्विजः । (मनु० १।१०८)
आचाराद्विच्युते न विप्रो वेदफलमश्नुते ।
आचारेण तु संयुक्तः सम्पूर्णफलभाग्भवेत् । (मनु० १।१०९)
एवमाचरतो दृष्ट्वा धर्मस्य मुनयो गतिम् ।
सर्वस्य तपसो मूलमाचारं जगृहुः परम् ॥ (मनु० १।११०)

आचारस्यैव माहात्म्यं सर्वापेक्षयाधिकमास्ते इति तैत्तरीयोपनिषदि शिक्षावल्ल्यां समावर्तनसंस्कारे आचार्यः शिष्यायोपदिशति । तथाहि—'वेदमनूच्याचार्योन्तेवासिनमनुशास्ति-सत्यं वद । धर्मं चर । स्वाध्यायान्माप्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्य देवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि नो इतराणि । यान्यस्माकं सुचिरतानि तानि त्वयोपास्यानि नो इतराणि । येके चास्मच्छ्रेयांसोब्राह्मणाः तानि त्वयोपास्यानि । श्रद्धया देयम् । अश्रद्धयाऽदेयम् । हृदयादेयाम् भियादेयम्···· ····एवमुचैतदुपास्यम् ।" (तै०० उ० १।१०।१–४) याज्ञवल्क्यस्मृतौ याज्ञवल्क्यः प्रथममध्यायमाचाराध्यायनामकमेवालेखिष्ट । अस्मिन् अध्याये महर्षिः ब्रह्मचारिणः आचाराणाम् उद्वाहसंस्कारस्याचाराणाम्, गार्हस्थ्याचाराणाम् दानाचाराणाम्, श्राद्धाचाराणाम्, औपासनाचाराणाम्, ग्रहशान्त्याचाराणाम्, राजधर्माचाराणाञ्च सन्निवेशमकार्षीत् । आचारविषये सर्वैर्मुनिभिः पृष्टो वाधूलस्मृतेः कर्ता वधूलो मुनिः सर्वेषां आह्निकानां कृत्यानामाचाररूपेण वर्णनं करोति । शाण्डिल्यमहर्षिः द्वादशभिश्श्लोकैः पृष्टो मुनिभिः सर्वासां भगवदुपासनविधीनामाचाररूपेण वर्णनां करोति । मनुः मनुस्मृति सम्पूर्णां मानवाचारवर्णनारूपेण प्रणिनाय ।

आसां स्मृतीनां दर्शनेन प्रतिभाति यत् वेदविहितानां सर्वेषां वर्णाश्रमाचाराणां सदाचारे अन्तर्भावो भवितुमर्हति । वेदविहितानि सर्वाणि लौकिकाभ्युदयपुरस्सरं निःसेयसप्रदाने समर्थानि भवन्ति । भगवान् श्रीकृष्णो गीतायां आभ्यन्तराचारस्य माहात्म्यं षोडशेऽध्याये वर्णयति दैवीसम्पन्नाम्ना ।

'अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥ (१६।१)
अहिंसा सत्त्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दयाभूतेष्वलोलुप्त्वं मार्दवं ह्रूरचापलम् ॥ (१६।२)
तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥ (१६।३)

वाह्याचाराश्च वाह्यशौचनाम्नाभिधीयन्ते स्नानादयः इत्थमुभयप्रकारकाचारविहीनं पुरुषं वेदा अपि पावने नो समथां भवन्ति । सदाचाराणां पालनमेव सर्वापेक्षया श्रेष्ठोधर्मो वर्तते । अयं सदाचार एव कदाचित् क्वचित् शीलशब्देनाभिधीयते । शीलशब्दाभिहितः सदाचार एव मानवजीवनस्य भूषणम् । सदाचारी मानव; सर्वैः स्वीयैः परकोयैश्च महद्भिर्जनैः समादृतस्सन् संसारे नैजं विपुलं यशोवितन्वन् सर्वविधानि सुखानि समवाप्नोति । अतएव सदाचाराणाचरणमावश्यकमास्ते जीवनोन्नयनाय ।

अहिंसा परमो धर्मः

मनसा वाचा कर्मणा हिंसायाः परित्यागस्य गुण अहिंसा शब्देन व्युपदिश्यते । जीवानां मारणं हिंसा सम्यक्सद्भिरुदाहृतम् । अस्या अहिंसायाः "सदाचरणे महत्तमं स्थानामास्ते । मानवधर्मशास्त्रस्य प्रणेता भगवान् मनुः धर्मस्य लक्षणेषु अहिंसा सर्वप्रथमस्थाने निवेशयति । तथाहि—अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।

एतं सामासिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥ (मनु० १०।६२)

योगदर्शनसूत्रकारः पतञ्जलिः अष्टाङ्गयोगविवरणे यमानां प्रथमं स्थानं ददाति । तद्यथा–'यमनियमासनप्रणायाम–प्रत्याहारधारणाध्यानसमाधयोऽष्टावङ्गानि ।' (यो० सू० २।२९) यमेष्वपि अहिंसाया प्रथमं स्थानमास्ते । तथा च—'अहिंसासत्य–ब्रह्मचर्यापरिग्रहाः यमाः ।' निश्चितरूपेण मनुप्रोक्ताः अहिंसा-सत्यादयः चातुवर्ण्यंकृते धर्मा एव योगदर्शने यमरूपेणाभिधीयन्ते । अस्या अहिंसायाः व्याख्याने योगदर्शनस्य भाष्यकारः व्यासो वदति—तत्राहिंसा सर्वथा सर्वदा सर्वभूतानामनभिद्रोहः उत्तरे च यमनियमास्तन्मूलाः तत्सिद्धिपरतयैव तत्प्रतिपादनाय प्रतिपाद्यन्ते । तदवदातरूपकरणायैवोपादीयन्ते ।' अत्र व्यासस्यायमभिप्रायो विद्यते यत् योगस्य सर्वेषामङ्गानां सिद्धिः अहिंसाधीनैव वर्तते । अहिंसाया सिद्धिं विना नियमासनादीनां योगाङ्गानां

सिद्धिर्नहि भववितुमर्हति । यमान्तर्गताः सत्य–अस्तेय–ब्रह्मचर्य–अपरिग्रहाः अपि अहिंसाया एव रूपं स्पष्टं सुदृढं च कुर्वन्ति । एतेषां सत्यादीनामाचरणेनैव अहिंसायाः स्थितिः सुदृढा भवति । यदा योगिनि अहिंसाया सुदृढा प्रतिष्ठा भवति तदा हिंसकानामपि जन्तूनां तस्य सविधे वैरत्यागो हि जायते । तस्य सविधे समागताः परस्परं विरोधवन्तः–अश्व–महिष–मूषक–मार्जार–सर्प–नकुलादयो जीवा पारस्परिकं वैरं विहाय सुखेन साकं सार्द्धं विचरन्ति, आवहन्ति च मैत्रीमुत्तमां पारस्परिकीम् । अतएव योगप्रासादे समारोहणाय अहिंसाप्रतिष्ठा–आवश्यिकी वर्तते । सत्यास्तेयब्रह्मचर्यापरिग्रहाणां सिद्धिभिरवदातायामहिंसायामकामेनापि सर्वेषां योगाङ्गानां सिद्धिः सपदि सम्पद्यते । अतएव योगिभ्यः 'अहिंसापरमो धर्मः ।'

अहिंसाया इयमेव गुणमवेक्ष्यश्रुतावप्युक्तं—'मा हिंस्यात् सर्वंभूतानि ।' भगवान् श्रीकृष्णः दैवीसम्पत्स्वपि अहिंसामजीगणत्—'अहिंसा सत्यमक्रोधः त्यागः शान्तिरपैशुनम् ।' (गी॰ १६।२) अस्या अहिंसायाः प्रतिष्ठा भगवत्कृपयैव सम्पद्यते इत्याह भगवान् गीतायाः 'अहिंसा समता तुष्टिस्तपो दानं यशोऽयशः । भवन्तिभावा भूतानां मत्त एव पृथग्विधाः (१०।५) इति श्लोके । मनुस्मृतिकारः स्थाने–स्थाने अस्या अहिंसाया चर्चा करोति । तद्यथा शिष्याणां शिक्षणप्रसंगेऽपि आचार्येण अहिंसाया पालनमवश्यं कर्तव्यम् पाठनकाले स्नेहमय्याः मधुराया वाण्याः प्रयोगः अपेक्षितो भवति । 'अहिंसयैव भूतानां कार्यं श्रेयोऽनुशासनम् । वाक्चैवमधुरा श्लक्ष्णा प्रयोज्या धर्ममिच्छता ॥ (मनु॰ २।१५९) मनुस्तु अहिंसाया मोक्षावाप्तेरपि साधनत्वं प्रतिपादयन् वक्ति––"अहिंसयेन्द्रियासंगैः वैदिकैश्चैव कर्मभिः । तपसश्चरणैश्चोग्रैः साधयन्तीह तत्पदम् ।" (मनु॰ ६।७५)

इत्थं भूताया अहिंसायाः महत्त्वं जीवनस्य सर्वेषु क्षेत्रेषु समानरूपेण भवति । अहिंसायाः पालनमतीवदुष्करमपि महत्फलप्रदं वर्तते । अहिंसाया महत्त्वं वयं वशिष्ठविश्वामित्रयोः जीवनप्रसंगे पश्यामः । सर्वेषामस्त्राणां प्रयोगवेत्तुर्विश्वामित्रस्य सर्वाण्यस्त्राणि अहिंसकस्य ब्रह्मदण्डमेवादाय जोषस्थितस्य वशिष्ठस्य समक्षं भस्मतामगुः । वशिष्ठस्य शतानां पुत्राणां वधं कृत्वा कोटिवर्षसहस्राणि तपांसि चरित्वाऽपि विश्वामित्रः, तावत्कालं नह्यवाप शर्म यावत्कालपर्यन्तं न स्वीचकार वशिष्ठस्य शिष्यताम् । महात्मा गान्धिः अहिंसाबलेनैव वर्षाणां द्विशत्या प्रशास्तृपदे रूढमूलानां वैदेशिकानां विपुलां वाहिनीं भारताद् बहिश्चकार हिंसामकृत्वैव । अहिंसकस्य प्रह्लादस्य सविधे हिंसकप्रवृत्तिमतो हिरण्यकशिपोः सर्वे प्रयासा विफला अभूवन् । स्वयमेव हिंस्रः खलः सः स्वपापेन विहिंसितः । साधुः प्रह्लादस्तु स्वसमतायुक्तया बुद्ध्यैव भयाद्विमुक्तोऽभूत् । अहिंसायाः पालनेनैव मानवः सर्वाणि कार्याणि यतो साधयति लौकिकान्यतिलौकिकानि च तस्मादेवोक्तम्—'अहिंसा परमोधर्मः ।' इति ।

परोपकारः

अथवा–परोपकारः पुण्याय पापाय परपीडनम् ।

अथवा-परोपयकाराय सतां विभूतयः ।

वेदान्तेषु श्रूयते—प्रलयकाले सर्वे जीवाः संहृतकरणकलेवराः स्व-स्व पूर्वकर्मानुरोधने दुःखादिकमनुभवन्ति । तान् सर्वान् तथाविधान् दृष्ट्वा अकारणकरुणावरुणालयो भगवान् स्वकीयेन सत्यसंकल्पेन नामरूपभागानर्हावस्थायामवस्थितं जगत् नामरूपविभागार्हं करोति । येन लब्धकरणकलेवरा जीवाः स्वजीवनोन्नयनं कुर्युः । इत्थं इयं सृष्टिः भगवतः परोपकारबुद्धया कृता वर्तते । परेषां-स्वेतरसमस्तजीवानाम् उपकारमेव कर्तुं भगवान् करोति सृष्टिम् ।

प्रकृतावपि पश्यन्तु भवन्तः अनुदिनं प्रवहमाना नदी स्वकीयं जलं स्वयमेव नहि पिबति । अन्ये एव तस्या जलं पिबन्ति । स्वकीयेन जलेन क्षेत्रादिकानां सिञ्चनं रूपं कार्यं कृत्वा परोपकारमेव विदधाति सा । तरवः फलानि स्वकीयानि स्वयमेव नहि खादन्ति अन्ये एव तेषां फलेन सन्तुष्टा भवन्ति । सूर्यंचन्द्रमसौ अनादि कालतः प्रकाशप्रदानेन उष्मा-शीतलता प्रदानेन च जीवानां कल्याणं कुर्वंतः । इत्थं कृते सति निपुणनिभालने सर्वाणि प्रकृतेरुपकरणानि परोपकाराय प्रवृत्तानि सन्ति इति प्रतीतिर्भविष्यति । राज्ञः शिवेः, दधीचस्य च कथा को नहि जानाति । इमौ परोपकाराय स्वशरीरमप्यदाताम् । पौराणिकेष्वाख्यनकेषु समुपवर्णिता नारद-पराशर-पर्वत-वामदेव-शुकदेव-व्यासादिकानां महर्षीणां सर्वाणि कृत्यानि परोपकारबुद्धि-प्रेरितान्यभूवन्निति नास्ति तिरोहितं विपश्चिदपश्चिमेभ्यः ।

अत्रायमनुयोगोऽतिष्ठते । इयं सर्वेषां परोपकारमयी प्रवृत्तिः कस्माद्विलोक्यत इति ? अत्रोच्यते-इमे सर्वे जीवाः जानन्ति यत् परोपकारेण सदृशं नास्ति लोकेऽपरो धर्मः । अनेन कृतेन परोपकारानुष्ठानेन जीवस्य अस्य कर्मबन्धनस्य प्रहाणं भवति । लोके सद्यो यशो वर्धते अन्ते च शाश्वच्छान्तिरूपाया मुक्तेर्द्वारमुपावृतं भवति । आह च कश्चन "परोपकारः पुण्याय" । परोपकारस्याक्षय्यपुण्यकरत्वमेव दृष्ट्वा साधवः सर्वां स्वकीयां विभूतिंपरोपकारे व्ययितां कुर्वन्ति । अत एव ह्युक्तं—'परोपकाराया सतां विभूतयः ।

तस्यैतस्य परोपकारस्यैव प्रचारम् कर्तुं भगवान् अस्यां भूमावतरति । देवा यदा रावणस्य अत्याचारेण पीडिता अभूवन् तदा—'वैकुण्ठे तु परे लोके श्रियासार्द्धं जगत्पतिः । आस्ते विष्णुरचिन्त्यात्मा भक्तैर्भागवतैस्सह ।" इत्यक्तेनुसारेण वैकुण्ठलोके सदा श्रीदेवीभूदेवीभ्यां; संसेवितः, नित्यमुक्तजीवैश्च सदापरिचर्यितोऽपि भगवान् अयोध्यायां दाशरथिरूपेणावातरत् । अत्रागत्य च धर्मस्य परित्राणं कुर्वन्, दुष्कृतां च विनाशं विधाय, सज्जनानां रक्षा व्यधात् । कंसस्यात्याचारेण दुःखितानां देवानामुद्धरणाय एव भगवतः कृष्णावतारोऽभूत् । हिरण्यकशिपोरत्याचारस्यान्तमेव कर्तुं भगवान नृसिंहो वभूव । वलेः अत्याचारानपाकर्तुमेव भगवान् वामनोऽभूत् ।

इदमेव नहि-भारतस्य स्वतन्त्रता संग्रामे ये हतकैः वैदेशिकैः व्यापादिता अभूवन्

तेषां कः स्वार्थः आसीत् ? ते तु परोपकारायैव न स्वजीवनस्य बलिदानमकार्षुः ! परञ्च परोपकार एतादृशो गुणो वर्तते येन प्रेरितः पुरुषः नामशेषोऽपि तथाविधः ख्यातो भवति येन सः स्वयशसा जीवति जगति स्मर्यते अनुकालं सद्भिः इतिहासस्तान् कदापि नो विस्मरति लभन्ते च ते योगिलभ्यां गतिम् । अतएव परोपकारो जीवनस्यापरिहार्यमंगं भाति ।

आर्जवं हि कुटिलेषु न नीतिः

अथवा—व्रजन्ति ते मूढधियः पराभवं भवन्ति मायादिषु येन मायिनः।

अथवा—शठे शठ्यं समाचरेत् ।

अथवा—कण्टकेनैव कण्ठकम् ।

आर्जवं, अजिह्मता, सारल्यम्, कपटरहितता, प्रभृतयश्शब्दास्समानार्थकाः । मनसा वाचा कर्मणा च समानरूपेण व्यवहरणमेवार्जवमिति कथ्यते। अनेन गुणेन सम्पन्नो मानवः समाजे श्रद्धास्पदो भवति। सर्वे जनाः तस्य महामानवस्य समादरणं कुर्वन्ति । असंख्यकल्याणगुणाकरस्य भागवतः "वशीवदान्यो गुणवानृजुश्शुचिर्मृदुर्दयालुर्मधुरस्स्थिरस्समः । कृती कृतज्ञस्त्वमसि स्वभावतः समस्तकल्याणगुणामृतोदधिः ।" इत्यस्मिन् श्लोके प्रोक्तेषु द्वादशसंख्याकेषु प्रधानेषु गुणेषु एकोगुणोऽस्ति आर्जवम् । अतएवास्य गुणस्य अत्यन्तं महत्त्वमास्ते जीवने ।

परञ्च समाजे केचन जना भवन्ति येषां कापट्यमेव जीवनम्, वञ्चनमेव आह्निकम्, वाग्जालप्रसारणमेव जीवनस्य परमो ध्येयो भवति । स्वक्षुद्रस्वार्थस्यापूर्त्यै महदपि पापकर्मकरणे नो विरमन्ति । मानवीयानां गुणानां तेषु लेशोऽपि नहि जायते । इत्थं भूतैः जनैस्सह आर्जवेन व्यवहरणं नोचितं भवति । 'शठे शाठ्यं समाचरेत्' इति सूक्त्यनुसारेण तैरपि सार्द्धं कपटताया एव व्यवहारः उचितो भवति । दुर्योधनादयः कपटवटवः पाण्डवान् प्रति सदा कपटस्यैव व्यवहारमकार्षुः । विषमयभोजनप्रदानेन लाक्षागृहे प्रदहनप्रयासेन वा पाण्डवान् हन्तुं ते बहुधा अयतन्त । अन्तेऽसफलतामधिगत्य ते कपटमय्या द्युतक्रीडया पाण्डवान पराजित्य राज्यमधिजगृहुः । वनवासस्य पूर्णेऽपि त्रयोदशे वर्षे युधिष्ठिरस्य कौरवान् प्रति बान्धवजनोचित एव आर्जवमयो व्यवहार आसीत्। कौरवाणां जिह्मताप्रायं युधिष्ठिरस्य च ऋजुतामयं व्यवहारं विविच्य सावधानं कर्तुं द्रौपदी तमवोचत्—व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः । प्रविश्य हि घ्नन्ति शठास्तथाविधान् असम्वृताङ्गान् निशिता इवेषवः ॥' अयमाशयः—शठैः साकं शाठ्यपूर्ण एव व्यवहार उचितो भवति । मायया व्यवहारातान् प्रति सत्याचारेण व्यवहरन् मानवः पराकृतो भवति । अतएव भवताऽपि तैस्साकं तथैव भाव्यम् ।

द्रोपद्याः प्रेरणया सावधानः युधिष्ठिरः भगवन्तं श्रीकृष्णं दौत्यकर्मणे प्रैषयत् । भगवन्तं वञ्चयितुं दुर्योधनः यं मार्गं सुसज्जितमकार्षीत् तं मार्गमयहाय भगवान् अन्ये-

नैव पथा हस्तिनापुरमगात्। सभायां सन्धेः वार्ताकाले 'सूच्यग्रं नैव दास्यामि विना युद्धेन केशव' इत्युक्तवन्तं दुर्योधनं छलेन वलेन च व्यनाशयत् पूर्णरूपेण भगवान्। शिखण्डिनम् पुरस्कृत्य अर्जुनः अतिनिशितैर्बाणैः भीष्मं जघान। 'अश्वत्थामा मृतो नरो वा कुञ्जरो' इति उद्घोषयतः युधिष्ठिरस्योद्घोष समकालमेव भगवान् पाञ्चजन्यं तथा दध्मौ येन द्रोणः 'अश्वत्थामा मृतः' इत्यन्तमेव युधिष्ठिरवाक्यमश्रौषीत् अभच्च सशरं चापं विहाय शोकसंविग्नमानसः। तदनन्तरमेव द्रोणस्य वधः सुकरोभूत्। यदा अर्जुनस्यानुपस्थितौ चक्रव्यूहे एकाकिनं युद्धमानमभिमन्युं सप्तमहार्रथिनो मिलित्वा अवधिषु तदा भगवान्नपि सुदर्शनचक्रेण सूर्यमाच्छाद्य, कस्मैचन कालाय सन्ध्यां प्रदर्श्य अर्जुनस्य समक्षं समागते सूर्यं दर्शयित्वा जयद्रथस्य वधं कर्तुमर्जुनमादिशत्। भानुमत्याः स्थाने द्रौपदीं भीष्मस्य सविधे ब्रह्ममुहूर्ते प्रेषयित्वा श्रीकृष्णः भीष्मं विफलप्रतिज्ञं कारयित्वा द्रौपदीमेव सौभाग्यतीं चकार भानुमतिञ्च विधवाम्।

एतेषां प्रसङ्गानां दर्शनेन ज्ञायते यत् सर्वत्रार्जवमेव नहि भवति श्लाघितं, क्वचन कापटचमपि कपटपूर्णव्यवहाराय कानिचन स्थानानि निर्देशति। तानि च सन्ति प्राणसङ्कटापन्नावस्था विवाहः, सूरतप्रसंग इत्यादीनि। अतएवास्ते नीतिः 'शठेशाठ्यं समाचरेत्।' महाराष्ट्रकेसरी तु वराकं दुष्टम् 'औरङ्गजेबं नैकधा वञ्चयित्वा नवनवचातुर्ययुक्तया बुद्धया असकृदभिभूतं चकार।

प्रबुद्धा कूटनीतिज्ञास्तु एकं शत्रुमपरेण शत्रुणा साकं योधयित्वा तान् विनाशयन्ति अवशिष्टं वा एकमनुगृह्णन्ति। यथा अयोध्या राज्यस्य द्वावेव वैरिण आसन् वानराः रक्षासाश्च। भगवान् रामः प्रथमं छलेन वालिनं हत्वा सुग्रीवमनुगृह्य, वानराणां सैन्यसहायेन राक्षसान् समूलमुन्मूल्य, अवशिष्टान् वानरान् अनुजग्राह। इत्थमेव पृथिव्यां भारमपाकर्तुमवतीर्णो भगवान् श्रीकृष्णः कौरवान् विनाश्य, अपारं यादवं वंशमेव पृथिव्याभारभूतं विचार्य, प्रभासक्षेत्रे परस्परयुद्धेन तान् विनाश्य, आत्मानं कृतकृत्यं मेने। इत्थम् कण्टकेनैव कण्टकमिति कूटनीतिज्ञानां नीतिः।

छात्राणामध्ययनं तपः

भारतवर्षे वर्णानामाश्रमाणाञ्च माहात्म्यं वर्तते। सर्वाणि शास्त्राणि वर्णाश्रमाणां माहात्म्यं स्वीकुर्वन्ति। मनुस्मृतिः समाजं ब्राह्मण-क्षत्रिय वैश्य-शूद्राख्येषु वर्णविभागेषु जीवनञ्च ब्रह्मचर्य-गार्हस्थ्य-वाणप्रस्थ–संन्यासाख्येषु आश्रमेषु विभज्य तेषां आचाराणामुपदेशं करोति। तत्र ब्रह्मचर्याश्रमः जीवनस्य प्रथमम् चरणम् आस्ते। अस्यामवस्थायां जीवनमुन्नत्युन्मुखं भवति। शरीरं वर्द्धते। शरीरस्य सर्वे अवयवा वर्द्धन्ते। बुद्धिरतीव स्वस्था भवति। यादृशाः संस्काराः अस्यामवस्थायामाधीयन्ते तादृशमेव जीवनं सम्पूर्णं भवति। अतएव अस्यामवस्थायां बालकस्याभिभावकैः नूनं सावधानैः भाव्यम् येन बालः कुपथि प्रवृत्तो माभूत्। इयमेवा-

वस्थावर्तते यस्यां बालः अध्ययनं करोति। अतएव भारतीयैर्मनीषिभिः एका व्यवस्था सम्पादिता अध्ययनाध्यापनयोर्विधेः। तथा च श्रुतिः—'अष्टवर्षं ब्राह्मणमुपनयीत तमध्यापयेत्' मनुर्वक्ति-उपनीतो बालः।

'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधिः।
युक्तस्छन्दांस्यधीयींत मासान् विप्रोऽर्धपञ्चमान्। (मनु. ४।९५)
किञ्च–अत ऊर्ध्वं तु छन्दांसि शुक्लेषु नियतः पठेत्।
वेदाङ्गानि च सर्वाणि, कृष्णपक्षे स पठेत्। (मनु. ४।९८)

प्राचीने भारते सर्वेषां ब्रह्मचारिणां गुरोर्गृहे निवासस्य व्यवस्था आसीद्। उक्तमपि मनुना—चतुर्थमायुषो भागमुषित्वाद्यं गुरौ द्विजः। द्वितीयमायुषोभागं कृतदारो गृहेवसेत्। (मनु. ४।१)

वेदा अपि ब्रह्मचर्यावस्थायां अध्ययस्यावश्यकर्तव्यतां प्रतिपादयन्तो वदन्ति—'स्वाध्यायोऽध्येतव्यः' इत्थं शास्त्रास्यानुज्ञां जीवनस्य महति प्रत्यूषे काले पालयन् मानवः तपांस्येव तपति। भगवान् श्रीकृष्णस्य अध्ययस्य तपस्स्वरूपतां प्रतिपादयन् वक्ति—'स्वाध्यायभ्यसनं चैव वाङ्मयं तप उच्यते।' भगवती श्रुतिरपिवक्ति—'स्वाध्याय प्रवचानाभ्यांन प्रमदितव्यम्।' भगवान् मनुः द्विजानां परणं कर्तव्यं वेदानामभ्यसनमेवाह—

'योऽनधीत्य द्विजो वेदमन्यत्रकुरुते श्रमम्।
सजीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥

एतेन विवेचनेन ज्ञायते यत् छात्रावस्थायामध्ययनमेव परमं तपः। तपो हि नाम वाह्याभ्यन्तराणि सर्वाणीन्द्रियाणि संयम्य स्वलक्ष्यप्राप्तये कृतमनुष्ठानमेव। अनेन अध्ययनरूपेणानुष्ठानेनापि लक्ष्यभूतस्य ज्ञानस्यप्राप्तिर्भवति। अस्याध्ययनस्य आजीवनं आवश्यकता भवति। अध्ययनपराङ्मुखखानां विदुषां शस्त्राणि शनैः शनैः विस्मृतिं यान्ति। अतएवाध्ययनशीलानामेव सर्वत्र संमानो भवति। अध्ययनशीलैरेव विद्वद्भिः देशः समुन्नतिं याति। विद्वद्भिर्विना देशस्य माहात्म्यं नहि वर्द्धते। भारतो विश्वस्य गुरोः पदे आसीत् कदाचित्। विश्वस्य सर्वे जना अत्रैवागत्य संस्कृतेः शिक्षया शिक्षिता अभूवन्। मनुरपि लिखति—'एतद्देश प्रसूतस्य सकाशादग्रजन्मनः। स्वं-स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः। विश्वामित्र-वशिष्ठ-याज्ञवल्क्य-वामदेव-प्रभृतिभिः दृष्टानां वेदमन्त्राणां महत्त्वं वैदेशिका अपि स्वीकुर्वन्ति। अध्ययनादेव एषां महर्षीणां वाल्मीकिव्यास-पाणिनि-कात्यायन-पतञ्जलि-कालिदास-भारवि-माघ-वाणभट्ट प्रभृतीनां विदुषां गौरवो विश्वस्मिन् विश्वेविख्यातोऽस्ति। इत्थमध्ययनं छात्रजीवनस्य परमं तपो वर्तते, यस्य फलम् आजीवनं भुङ्क्ते छात्रः। अतएव छात्रैः सदा जागरूकतयाध्ययनं कर्तव्यम्।

सत्संगतिः कथय किं न करोति पुंसाम्

सतां तु संगः सकलं प्रसूते ।
सतां सद्भिः कथमपि हि पुण्येन भवति ॥

स्वकीयं स्वार्थमनपेक्ष्य सर्वदा लोकोपकारपरायणाः सततं तत्त्वहितपुरुषार्थानां पर्यालोचने संलग्नाः, सर्वेषां कल्याणगुणानामकरस्वरूपाः पुरुषाः हि सत् शब्देनाभिधीयन्ते । सतां संगतिः एव सत्संगतिः । इयम् सत्संगति एतादृशी भवति येन मनुष्ये स्वाभाविकरूपेण, आर्जवं, मार्दवं, शीलम्, गुरुषु भक्तिः माता-पित्रोस्सेवायाम् श्रद्धा, भगवद्भागवताचार्येष सुदृढानिष्ठा, शास्त्राणां वचस्सु अप्रतिमो विश्वासः, वशीत्वम्, वदान्यत्वम्, परोपकारः, अहिंसा समता, तुष्टिः प्रभृतीनां गुणानामाधानो भवति । स्वजीवनोन्नयनोपयोगिषु कार्येषु रुचिर्वर्द्धते । दुर्गुणेषु कदाचिदपि प्रवृतिर्नहि भवति । स्थाने उचितानां शौर्यवीर्यपराक्रमाणां अदृश उद्रेको भवति । अतएव आत्मकल्याणकामिनां कृते सत्सङ्गतेरावश्यकताऽनिवार्या भवति ।

शास्त्रेषु सत्सङ्गतेः कथा वह्व्यः विख्यातास्सन्ति । श्रीमद्भागवत महापुराणस्य प्रथमस्कन्धस्य षष्ठाध्यायनुसारेण सत्सङ्गतेरेव प्रभावात् दासीपुत्रो नारदो देवर्षित्वमगात्, यस्य वन्दनं मानवाः देवा; राक्षसाश्च समानरूपेण सादरमकार्षुः । सत्सगतेरेवप्रभावात् अनिर्भिन्नशुकाण्डगतोऽपि जीवः पश्चात् शुकदेव नाम्ना प्रथितोऽभूत् । देवर्षेः नारदस्यैव सङ्गमनात् लब्धज्ञानोपदेशो महर्षिर्वाल्मीकिः आदिकाव्यस्य श्रीरामायणस्य रचनां कृत्वा आदिकवेः पदवीमवाप । किमन्यत् स्वयं भगवान्नपि अस्यां पृथिव्यामवतीर्यं सत्सङ्गतिं करोति भगवान् रामो महर्षे विश्वामित्रस्य सङ्गादेव ताटकावधानन्तरं बलातिवलानाम्नीं विद्यामवाप । सिद्धाश्रमे महर्षे विश्वामित्रस्य कृपयैव सर्वासां विद्यानां प्राप्ति चकार याः याः विद्या अज्ञासीत् महर्षिः विश्वामित्रः । येन सः रावणादीनां वधे सफलोऽभूत् । भगवान् श्रीकृष्णोऽपि सन्दीपनिगुरोर्गृहे विद्यामध्येतुमगात् । भगवतो रामचन्द्रस्य पुत्रौ कुशलवौ महर्षेः बाल्मीके; सङ्गादेवबाणविद्यायां तथा पारङ्गतावभूताम् येन लक्ष्मण-भरत-शत्रुघ्ना अपि ससैन्यं पराकृता अभूवन् । भारतस्य झांसी राज्यस्य महाराज्ञी लक्ष्मीबाई बाल्यकाले स्वमातुलेनैव साकं निवसनात् तथा शौर्यपराक्रमवती अभूत् यस्याः समक्षं आग्लां अपि आश्चर्यचकिता अभूवन् पराभूवंश्च नैकेषु संग्रामेषु । सत्सङ्गतेः माहात्म्यं विद्वद्भिरसकृद् वर्णितम् । तथाहि—

'जाड्यं धियौ हरतिं वाचि सत्यम्
मानोन्नति दिशति पापमपाकरोतिं ।
चेतः प्रसादयति दिक्षु तनोति कीर्ति
सत्सङ्गतिः कथय किं न करोति पुंसाम् ॥'

सत्सङ्गतेरेव माहात्म्यं वर्तते यत् क्षुद्रः कीटोऽपि सुमनैः साकं देवानां शिरस्सु आरोहति। गोस्वामी तुलसीदासानुसारेण तु या पुरुषाणां बुद्धेः प्रकर्षः, उच्चपदस्य प्राप्तिः, यशसः प्रसारः, यः कश्चनाप्युपकारः ऐश्वर्यस्य वा वृद्धिः या काचन भवति, तत्र कारणं सत्सङ्गतिरेव भवति। अतएव—

'सतां सङ्गः सद्भिः कथमपि हि पुण्येन भवति।

किमधिकम्—

कल्पद्रुमः कल्पितमेव सूते, सा कामधुक् कामितमेव दौग्धि।
चिन्तमणिश्चिन्तितमेव दत्ते, सतां तु संगः सकलं प्रसूते॥

योगः कर्मसु कौशलम्

अथवा—योगश्चित्तवृतिनिरोधः।

अथवा—समत्वं योग उच्यते।

प्रवीण्यम्, नैपुण्यम्, अभिज्ञत्वम्, विज्ञत्वम्, निष्णातता, दक्षता, कृतमुखता, कृतित्वम् प्रभृतयः शब्दाः कौशलस्यैव वाचकाः कार्यसम्पादनस्य श्रेष्ठा या रीतिस्तस्यारीतेरभिज्ञो मानव-एभिश्शब्दैस्समलंकृतो भवति। गीताया द्वितीये अध्याये योगं द्वेधा परिभाषयति भगवान्। प्रथमं (गी० २।४८) श्लोके—

'योगस्थः कुरु कर्माणि संगं त्यक्त्वा धनंजय।
सिद्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥

अयमाशयः—अर्जुन! राज्यवन्धुप्रभृतिषु संगं त्यक्त्वा युद्धादीनि कर्माणि योगस्थः सन् कुरु। तदन्तर्भूतविजयादिसिद्ध्यसिद्ध्योः समो भूत्वा कुरु, सिद्ध्यसिद्ध्योः समत्वरूपं चित्तसमाधानमेव योगः इत्यभिधीयते। इममेवार्थमाह—पतञ्जलिरपि योगसूत्रे—'योगश्चित्तवृत्तिनिरोधः' इति। चित्तवृत्तेः समाधानमेव चित्तवृत्तिनिरोधः।

इममेवार्थमधिकं स्पष्टं कर्तुं भगवान् अग्रे प्रावोचत्—

'बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते॥
तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्॥

अयमाशयः—बुद्धियोगयुक्तः तु कर्म कुर्वाणः उभे सुकृतदुष्कृते अनादिकालसञ्चिते अनन्ते वन्धहेतुभूते जहाति। तस्मात् उक्ताय बुद्धियोगयुक्ताय युज्यस्व। योगः कर्मसु कौशलम्—कर्मसु क्रियमाणेषु अयं बुद्धियोगः कौशलम् = अतिसामर्थ्यम्। अतिसामर्थ्य-साध्य इत्यर्थः।

अयं योगः निष्कामकर्मयोगस्यैव वाचकोऽस्ति। योगे योगी फलाभिसन्धि-

रहितस्सन् सर्वाणि कर्माणि परमेश्वरप्रीत्यौपयिकानि मत्वा श्रेष्ठया श्रद्धया सम्पन्नः सन् सम्पादयति । एतद् दृब्धानामेव कर्भणां फलं मोक्षस्याप्तिर्भवति । तथाहि—

कर्मजं बुद्धियुक्तं हि फलं त्यक्त्वा मनीषिणः।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ (गी० २।५१)

फलाभिसन्धिरहितस्य पुरुपस्य बुद्धिः समाधानचलस्थितिर्भवतीत्याह भगवान् श्रीकृष्णः—"समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ।" योगप्रासादे आरुरूक्षोर्मुनेः स्थितप्रज्ञस्य चतस्रो दशा भवन्ति योगदर्शनानुसारेण, यतमानावस्था, व्यतिरेकावस्था, एकेन्द्रियावस्था, वशीकारावस्था च । आसां चतूर्णां दशानां वर्णनमकार्षीत् भगवान् कृष्णः । 'यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः । इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।' (गी० २।५८) इत्यस्मिन् श्लोके यतमानामवस्थां, 'यः सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम् । नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ।' (गी० २।५७) अस्मिन् श्लोके द्वितीयव्यतिरेकावस्थाम् 'दुःखेष्वनुद्विग्नमनाः सुखेपु विगतस्पृहः । वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते (२।५६) इत्यत्र तृतीयां एकेन्द्रियावस्थाम्; प्रजहाति यदा कांमान् सर्वान् पार्थमनोगतान् । आत्मनेवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते । (२।५५) इत्यस्मिंश्च श्लोके चतुर्थीं वशीकारावस्थां प्रावोचत् भगवान् ।

अस्यैव योगस्य विशदं वर्णनं गीतायाः पञ्चमे षष्ठे चाध्याययोः कृतमास्ते भगवता । योगदर्शनानुसारेणापि 'यमनियमासन प्राणायामप्रत्याहारधारणा–ध्यान समाधीनां माध्यमेन योगस्थ उपासकः परमां शान्तिमभ्युपैति । अस्मिन् भौतिके जीवनेऽपि चित्तवृत्तिनिरोधरूपस्य परमावश्यकता वर्तते । सर्वतो चित्तवृत्ति निरुद्धच अध्ययनमात्रे कृतावधानश्छात्रः परीक्षायां सर्वोत्तमां सफलतामधिगछति । क्रियमाणेषु कर्मसु सिद्ध्यसिद्ध्योः समतां गतः प्रयोगशालायां वैज्ञानिकं प्रयोगं कुर्वन्नेव पुरुषः एकदा एतद् दृब्धस्य यन्त्रस्य निर्माणं करोति यस्य कार्यकौशलेन सम्पूर्णं जगत् आश्चर्यातिशयमनुभवति । सर्वविषयेभ्यश्चित्तं सन्निरुध्य मत्स्याक्षिपुत्तलिकमेव पानीये पश्यन् अर्जुनः द्रौपद्यास्स्वयम्वरे मत्स्यवेधमकार्षीत् । आधुनिकानाम् योगस्थानामेव वैज्ञानिकानां कर्मणां फलानि विविधानि प्रक्षेप्यास्त्राणि, विविधानि शब्दस्यापि गतिभेदनसमर्थानि विमानानि च विश्वस्य विविधेपु देशेपु दृश्यन्ते ।

योयो वायुमिवाति चञ्चलं मनः पुनः पुनः कार्यसम्पादनरूपेणाभ्यासेन, भौमानां स्वर्गीयाणाम् च विपयाणां विरागरूपेण वैराग्येण स्ववंशे कृत्वा येपु विपयेषु सांसारिणः सततं सावधानाः भवन्ति तेभ्यो योगादिभ्यः सदा पराङ्मुखः सतत तैलधारावदविच्छिन्नेव स्मृति सन्तानेन-प्रलपन् विसृजन्-गृहणन्-श्वसंश्च स्वकीयं

लक्ष्यमेव चिन्तयन् अल्पेनैव कालेन कर्मसु कौशलरूपं योगसवाप्नोति; येन तस्य नाम्ना सम्पूर्ण जगत् परिचितो जायते।

पण्डितास्समदर्शिनः

संस्कृत भाषायाः पण्डितशब्दः—अस्ति पण्डा अस्य इत्यनेन रूपेण व्युत्पद्यते। पण्डा सदसद्विवेकिन्या बुद्धेर्नाम। सत्तावदेव वस्तु सदित्युच्यते। असच्च सत्ताविहीनं वस्तु प्रोच्यते। आह च भगवान् कृष्णो गीतायाम्—'नासतो विद्यते भावो नाभावो विद्यते सतः।' (गी० २।१६) इत्थम् उभयप्रकारकाणां सतामसतां च वस्तूनां तात्त्विकं ज्ञानं पण्डित एवावैति। 'उभयोरपि दृष्टन्तस्त्वनयोस्तत्त्वदर्शिभिः।' (गी० २।१६) सतामसताञ्च वस्तूनां स्वरूपयाथात्म्यवेत्ता एव पुरुषः पण्डितशब्दवाच्यो भवति।

अत्रायं प्रश्न उदेति—किं नाम सत् ? किं नामासत् ? कथञ्च तयोर्विवेकः ? अत्रोच्यते—श्रुतयः सतां वस्तूनां निर्देशं कुर्वन्ति—'भोक्ता भोग्यं प्रेरिताञ्च मत्त्वा' 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः।'—इत्यादिषु श्रुतिषु। आसां श्रुतीनां परमार्थ पर्यालोचनेन आभाति यत्–प्रकृतिः जीवः ईश्वरश्च इमानि त्रीणि तत्त्वानि सच्छब्दवाच्यानि। एभिर्व्यातिरिक्तानि प्रकृतेर्विकारभूतानि सर्वाणि विनाशस्वभावानि वस्तूनि असच्छब्दवाच्यानि सन्ति। यतो हि अविनाश स्वभावत्वमेव सत्त्वम्, विनाशस्वभावत्वमेव असत्त्वम् इति सदसतोर्निष्कृष्टं लक्षणं भवति। गीतायामपि—'अन्तवन्त इमे देहाः' (२।१८) 'अविनाशि तु तद्विद्धि (२।१७) श्लोकयोः आत्मनां सत्त्वम् प्रकृतिविकारभूतानाम् देहानामसत्त्वञ्चोक्तम्। श्वेताश्वरोपनिषदः 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः' (श्वे०१।९) भोक्तभोग्यं प्रेरितारञ्च मत्वा' (श्वे० १।१२) इत्यादिकाः श्रुतयः ईश्वरं नियामकं प्रतिपादयन्ति जीवप्रकृत्योः। किञ्च—'यः पृथिव्यां तिष्ठन्···· ···'यं पृथिवी न वेद' (बृ० उ० ३।७।३) 'य आत्मनि तिष्ठन्–यमात्मान वेद' (श० प० ब्रा० १४।६।५।५।३०) इत्यादिकाः श्रुतयः परमात्मानं जीवप्रकृत्योः अन्तर्यामीरूपेण प्रतिपादयन्ति। 'द्वासुपर्णा सयुजा सखायाः समानं वृक्षं परिषस्वजाते।' (श्वे० ४।६) इति श्रुतिः 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति' (गी० १८।६१) इति गीतोक्तिश्च सर्वेषु शरीरेषु ईश्वरस्य व्याप्तिं प्रतिपादयति।

आसां सर्वासां श्रुतीनां परमार्थं पर्यालोचनं कृत्वा पण्डिताः सर्वेषु जीवेषु ईश्वरस्थ व्याप्तिं मत्वा नहि क्वपि जुगुप्सितो भवति। इदं शरीर त्वौपाधिकम्। सर्वेषु शरीरेषु पपरंमात्मनाधिष्ठिताः स्वभावतः 'एष आत्मापहृतपाप्मा विजरो विमृत्यु रविशोको विजधत्सोऽपिपास सत्यकामः सत्यसंकल्पः' जीवा वर्तन्तेः। इति पण्डितानां मनीषा भवति। अतएव 'शुनि चैव श्वपाके च पण्डिताः समदर्शिन भवन्ति। अनेन ज्ञानेन युक्तत्वादेव ते न हि कस्मैचन द्रुह्यन्ति। तेनैव सर्वेषु जीवेषुो

तेषां समानो भावो भवति । सर्वेषु जीवेषु पण्डिताः अनसक्ताः सन्तः सर्वत्र द्वेषादराभ्यां विरहिता भवन्ति । पुत्रे शत्रौ च तेषां समान एव भावः । इत्थं भूताः सर्वत्र भगवतो व्याप्ति मन्वनः पण्डिताः भगवतः प्रियतमा भवन्ति । 'वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।' 'ज्ञानीत्वात्मैव मे मतम्' इत्यादिकं समदर्शिभ्यः पण्डितेभ्य एव प्रावोचन् भगवान् ।

अयोध्या वर्णनम्

अष्टचक्रा नवद्वारा देवानां पूरयोध्या
तस्या हिरण्ययः कोशः स्वर्गो ज्योतिषावृत (अथर्ववेद १०।२।३१)

अस्ति जगतीतलस्य तीर्थानाम् मथुरा-माया-काशीकाञ्चवन्तिका-पुरी-द्वारावतीनां शेखरीभूता, वेदेतिहासस्मृतिपुराणकाव्येषु प्रख्याततमा, सूर्यवंशोद्भूतानाम् आजन्मशुद्धानाम् आफलोदयकर्मणाम्, आसमुद्रक्षितीशानाम्, आनाकरथवर्त्मनाम्—यथाविधिहुताग्नीनाम् यथाकामार्चितार्थिताम्, यथापराधदण्डानाम्, यथाकालप्रबोधिनाम्, त्यागाय सम्भृतार्थानाम्, सत्यायमितभाषिणाम्, यशसेविजिगीषूणाम्, प्रजायैगृहमेधिनाम्, शैशवेऽभ्यस्तविद्यानाम्, यौवनेविषयैषिणाम्, वार्द्धक्ये मुनिवृत्तीनाम्, योगेनान्ते तनुत्यजाम्, मनु-इक्ष्वाकु मान्धाता-हरिश्चन्द्र-भगीरथ-दिलीप-अज-दशरथानाम् राज्ञां राजधानी लौकिकातिलौकिक समृद्धीनां सवित्री, सकल भुवनोत्तंस रत्नावलीका जनकतनंयाजानिजन्मस्थलीका, सर्वेषामनुष्ठितानां नित्यनैमित्तिकानां कर्मणां पुण्यपाकावनीका अयोध्या नगरी ।

अस्यामेवाऽयोध्यायां 'परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय' भगवान् रामचन्द्रः अवातरत् अकरोच्च कालेन राक्षसाधिपते रावणस्य विनाशव्याजेन सर्वेषां देवद्विजगवां पूर्णरूपेण रक्षा । श्रीमद्वाल्मीकीयरामायणानुसारेण जितजगति परिपालयति च महीं महाराजे दशरथे मानसरोवराम्भिः सरन्त्याः कलकलनिनादवत्या नद्या सरय्वापरिगतेयं कोशलराज्यस्य राजधानी द्वादशभिर्योजनैरायता त्रिभिश्च योजनैः विस्तीर्णा आसीत् । तथाहि—"आयता दश च द्वे च योजनानि महापुरी । श्रीमती त्रीणि विस्तीर्णा सुविभक्तमहापथा ॥ राजमार्गेण महता सुविभक्तेन शोभिता । मुक्तपुष्पावकीर्णेन जलसिक्तेन नित्यशः ॥ (वा० रा० १।५।७-८) तस्य राज्ञोदशरथस्य घृतिर्जयन्तो, विजयः सुराष्ट्रो राष्ट्रवर्धनः । अकोपो धर्मपालश्च सुमन्त्रश्चाष्टमोऽर्थवित् । (वा० रा० १।७।३) इत्यष्टौ मन्त्रिण अभूवन् । तदात्वे अयोध्या समृद्धेः परां काष्ठां पस्पर्श । 'कामी वा न कदर्यो वा नृशंसः पुरुषः क्वचित् । द्रष्टुंशक्यमयोध्यायां नाविद्वान् न चाधार्मिकः । (वा० रा० १।६।८) 'सर्वे नराश्च नार्यश्च धर्मशीलाः सुसंयताः । मुदिताः शीलवृत्ताभ्यां महर्षय इवामलाः ॥ ९ ॥ रामस्यराज्यकाले तु इयमयो-

ध्याऽपरवैकुण्ठमिवासीत् यत्र सर्वाः प्रजास्सुखीन्येवासीत् दुःखनामकमपि वस्तु भवतीति नह्यज्ञासिषत् ।

सेयं सृष्टेरादिकालतो भारतभुवमलंकुर्वन्ती कलौ युगे समागते स्वीयान्युच्चावच्चान्यपि दिनानि अपश्यत् विक्रमादित्यस्य काले पुनः समलंकृतेयम् औरंगजेवनामकस्य यवनशासकस्य शासनकाले अतीव दीनां दशामविन्दत । मन्दिराणां विनाशेन, धर्मस्य परिवर्तनप्रयासेन, वेदेतिहासपुराणानां विदीर्णनेन च हिन्दून् समूलमुन्मूलयन्तो यवनाः इमामयोध्यामपि 'खुर्दमक्का' रूपेण परिवर्तयितुं भृशमयतन्त, परन्तु अत्रत्याः साधवः तत्कालीनाः भारतीया राजानश्च यवनानामिमं प्रयासं व्यर्थमकार्षुः ।

इदानीमप्यस्यामयोध्यायां बहूनि तीर्थानि विराजन्ते । श्रीरामजन्मभूमिः गुप्तारतीर्थम्-यमस्थलम्, कनकभवनम्, हनुमानगढ़ी, लक्ष्मणकिला-लक्ष्मणघट्टः-राजघट्टः, कोसलेश सदनम् मणिरामदासजी महाराजस्य छावनी, दिगम्बर अखाड़ा–जैनमन्दिरम् प्रभृतीनि स्थानानि दर्शनीयानि वर्तन्ते । धनयक्षकुण्डम्, हनुमान् कुण्डम्, स्वर्णखनिकुण्डम्-विद्याकुण्डम्-वशिष्ठकुण्डम्-भरतकुण्डम्, दशरथकुण्डम् प्रभृतीनि कुण्डानि अद्यापि अत्यन्तजीर्णावस्थायां मवशिष्यन्ते । कार्तिकमासस्य अक्षय्यनवम्यां अयोध्यापरिक्रमायाः इदानीमपि मेलापको भवति । यस्मिन् आवालवृद्धाः दशलक्षतो–अन्यूना जनाः चतुर्दशक्रोशीम् परिक्रमां कुर्वन्ति । रामनवम्या अवसरे यादृशोऽत्र जनसम्मर्दो भवति तादृशो जनसम्मर्दो जगन्नाथपूर्य्यां रथयात्राया एवावसरे दृश्यते । अत्र सर्वेषां भारतेजातानां धर्माणां मन्दिराणि सन्ति । अयोध्यैवैका एतादृशी नगरी वर्तते यत्र हिन्दूनां सर्वेषां जातीनां भारतवर्षस्य सर्वेषां प्रदेशनाञ्च मन्दिराणि सन्ति । न भवति कश्चन कालः किमपिदिनं वा यदा अत्र बाह्यतो तीर्थयात्रिणो नागच्छेयुः । अस्या अयोध्यायाः स्वर्गद्वारस्य (मुहल्लानाम) माहात्म्यं एतादृशमद्यापि दृश्यते यत्र परिभ्रमन् उन्मत्तो जनस्स्वास्थ्यं लभते । रुद्रयामलतन्त्रस्य त्रिशत्संख्याकेष्वध्यायेषु, स्कन्दपुराणस्थवैष्णवखण्डस्य दशाध्यायेषु हरगौरीतन्त्रे, पद्मपुराणे विष्णुधर्मोत्तरे पुराणे च अयोध्यायाः विशदं वर्णनमुपलभ्यते ।

सरयू वर्णनम्

मानसरोवरान्निस्सरन्त्याः, कलकलनिनादं कुर्वन्त्याः-बाराहक्षेत्रे घर्घरनदेन संगम्य, सरभस प्रवहन्त्याः भगवतो रामचन्द्रस्यावतारस्थलीं, मखस्थलीं महाराजस्य दशरथस्य, मन्विक्ष्वाकुप्रभृतीनां राज्ञां धन्यां पुण्यां राजधनीमयोध्यां पश्चिमतोत्तरतः पूर्वतश्च संवेष्टय प्रवहन्त्याः सरय्वाः नामको भारतीयो नावैति ।

अयोध्यायामस्याः नद्याः दर्शनमतीव मनोहरं वर्तते । अयोध्यायाः पश्चिमे शिरसि सरय्वाः मञ्जुले तटे गुप्तारघट्टो नामकं तीर्थं वर्तते यस्य विषये स्कन्दपुराणे लिखितमास्ते 'गुप्तार सदृशं तीर्थं ब्रह्माण्डे नास्ति किञ्चन' अत्रैव भगवान्

भगवान् रामः स्वकीयां सम्पूर्णां प्रजा वैकुण्ठं प्रेषयित्वा स्वयमलक्षितोऽभूत् । गुप्तारघट्टानन्तरं यमस्थलतीर्थमायति यत्र यमो निहतप्रभावोऽभूत् । सरय्वास्तटे विद्यमानस्य सहस्रधारातीर्थस्य माहात्म्यं अद्यापि नहि विस्मरति कश्चन जनः आयोध्यिकः यत्र, भगवता रामचन्द्रेण परित्यक्तो लक्ष्मणो जहावसून् स्वीयान् ।

सरय्वास्तटे तैस्तैर्भारतवर्षीयै राजभिः निर्मितानां मन्दिराणामवली अद्यापि विराजते । राजघट्टे यादृशी शोभादृश्यते इदानीं प्राकृतिकी तस्याः वर्णनं तु कस्यचन समर्थस्यैव कवेर्विषयः । प्रातः काले परस्सहस्राः गृहस्थाः साधवः संन्यासिनः, मज्जनं कुर्वन्ति सरय्वान् । कुत्रचित् श्रूयते समकालमेवोच्चैरुच्चरतां विरक्तातां–'जयजयसी३ता-३रा३म३' 'श्रीरामनाम महाराज की जय' अन्तरिक्षशब्दयन्ती ध्वनिः । क्वचन नरा नार्यश्च सानन्दं सोल्लासं स्नानं कुर्वन्ति । केचन सरयूतट एव उपविश्य सन्ध्यामुपासन्ते । केचन सरय्वा अष्टकस्य पाठं कुर्वन्ति । सुदूरदेश पर्यन्तं दृश्यते सरय्वाः जलम्-कलकल निनादेन साकं प्रहमानम् ।

इयं सरयू स्वेन भूम्ना महिम्ना जनानां जन्मजन्मान्तरेर्ष्वर्जितान् पापान् दर्शन मात्रेणैवध्वंसयित्वा तेषां पावने समर्थास्ति । अस्या एव तटे उपविश्य गोस्वामी तुलसीदासः श्रीरामचरितमानसस्य रचनां वैक्रमाब्दस्य (१६३१) वत्सरे नवम्यां भौमवासरे प्रारब्धवान् । अत्रैव रामानन्दाचार्यः विशिष्टाद्वैतानुयायिनां सर्वेषां साधूनां विशिष्टाद्वैतदर्शनं उपादिक्षत् । सरय्वास्तटतः एवः मधुरकवि सूरिः अप्रतिमं प्रकाशं दृष्ट्वा रात्रावेवानुदिनं तं प्रकाशमनुसृत्य प्रचलन् दक्षिणभारतस्य श्रीनगर्यां महापूर्यां श्रीशठकोपसूरेः सकाशात् 'सहस्रगीतिनामकम्' अनर्घ्यं ग्रन्थमवाप यस्याऽद्यापि संस्कृतज्ञाः आनन्दसन्दोहमनुभूय परमानन्दस्यानुभवं कुर्वन्ति । इत्थं को नाम प्राज्ञो सरय्वाः सम्पूर्णं माहात्म्यं वक्तुं प्रभवेत् तथापि—

'मन्दं मन्दं बहति सरयू धीरगम्भीरनीरा,
तीरायातत्रिदशललनोल्लासहास प्रकाशा ।
दर्शं दर्शं सुभगसलिलं निर्मलीभूतचेता,
स्त्रेताकालं स्मरति मनुजः स्नार्तिपुण्योदकेषु ।।
"रम्यं तत्तटमाश्रिता वयमहो सौभाग्यवृद्धोद्धवाः
यत्र श्रीजनकात्मजाऽमरवधू वृन्दैः सदोपास्यते ।
नित्यं यच्च रहस्यकेलिरसिकः सीतासनाथः प्रभुः
श्रीरामः श्रूयते क्षणं न सरयू प्रेष्ठं तटं मुञ्चति ।।"

नौकाविहारः

अनुकालं तेषु–तेषु कर्मसु व्यापृतानां जनानां कृते कस्मैचन कालाय मनोरञ्जनमप्यत्यावश्यकं भवति । मनोरञ्जनेन पुनः कार्यसम्पादनोपयोगिनी नवीना

काच्चिच्छक्तिरायाति, यया युक्तो मानवः मनोरञ्जनान्ते स्वास्थ्यमुत्साह शक्तिश्चानुभूय, सपदिसफलतापूर्वकं कर्म करोति । अनयैव भावनया भावितोऽहं कदाचित्प्रागाम् स्व–सब्रह्मचारिणाम् । सविधे हरवंशः बी० ए० परीक्षायाः सविधे विद्यमानत्वात् बहोः कालात् मनोविज्ञानविषयस्य ग्रन्थानामध्ययने व्यापृतः आसीत् । आयान्तमेव मां प्रेक्ष्य हस्ताभ्यां हस्तौ गृहित्वा प्रावोचत्—'सखे ! इयं सायंकालस्य सार्द्धचतुर्वादनवेला, कालश्च वसन्तस्य वर्तते । मन्दं-मन्दं प्रवहति समीरणः । सर्वेजना आगामिन्या होलिकाया आनन्दोत्सवसम्माननै संलग्नाः सन्ति । वयम् सर्वपरीक्षाया एव विषयाणामध्ययने संलग्नाः स्मः । आगच्छ वयम् सब्रह्मचारिणः गंगायां नौकया विहारं कुर्याम् । तस्यायं प्रस्तावः मन्मनोकूल एवासीत् । पुनः छात्रावासस्य वयं पञ्चदश संख्याकाः सब्रह्मचारिणः सपद्येव गंगातटमागच्छामः नौकामेकामादाय वयं सर्वे धीरं प्रवहन्त्याः गंगायाः पावने जले नौकया विहरणं प्रारब्धवन्तः ।

तदात्वे धीरं मन्दं प्रवहन्त्याः भगवत्या भागीरथ्याः वायोर्मधुरेण सस्पर्शेन बीचनिकरेष्वेकमव्यक्तं निनादं श्रुत्वाहं प्रावोचम्—सखे ! महदिदमस्माकं भाग्यं वर्तते यत् समवेता वयम् अस्यां भगवत्यां भागीरथ्यां विहारं कुर्मः । पश्यन्तु भवन्तः कियन्तो भाग्यवन्तो जना अस्यां पुण्यायां नद्यामवगाह्य तटे उपविश्य सन्ध्यामुपासन्ते । इयं सन्ततप्रवहणशीला नदी अस्मान् उपदिशन्तीवाभाति यत् छात्रैः प्रथमे वयसि विद्यमानैः सर्वतो मनः संहृत्य सर्वदा अध्ययनैकपरायणैः स्वलक्ष्योन्मुखैर्भाव्यम् । हिमालयान्निसृत्य विस्तृतां भूमिं वनानि च विसृज्येयं स्वगम्भीरेण प्रवाहेन समुद्रमेव गच्छन्ती नदी जनान् प्रबोधयति यत् सर्वैस्स्वीयैः सर्वविधैः प्रयासैः अखिलानां कल्याणानां गुणानां सगरः सर्वेश्वर एव प्रापणीयः ।

तदात्वे एवापरोऽस्माकं सहचरो हंसराज अवादीत्—मित्र ! अस्यां नद्यां तु अहम् परमरमणीयायाः सुन्दर्या सौन्दर्यमवलोकयामि; याः सर्वविधैरलङ्कारैरात्मानमलंकृत्य महता विलासेन स्वकान्तस्य समक्षमुपयाति पश्यन्तु भवन्तः । साम्प्रतमस्तमेति अंशुमाली । सन्ध्यारागः अस्या नदीनायिकायाः जलमयं हरितं परिधानं रागरञ्जितं करोति । खगाः स्वकुलाय प्रतिनिवर्तन्ते । मन्ये अस्तगतः सूर्याः' इति ज्ञात्वेयं नायिका मोदमदान्वितैः बन्धुरविलसयुक्तैर्मन्दंमन्दमुपसर्पति स्वपत्युः पर्यङ्क सविधे । अस्याः आवर्त एव नाभिः वीचिक्वणितान्येव मणिनूपुरशिञ्जितानि । सन्ध्यारागरञ्जिता आप एव पत्युर्मनः प्रह्लादिका अभिनवा शाटिका । नूनमियं निशीथिन्यां अनेकतारकहीरकैरलंकृतस्य स्वच्छस्याम्बरतलस्य अधः पतिसमुद्रं गाढमालिङ्ग्य ससुखं शयिस्यते ।

तदनन्तरं आकाशे तारका उदिता अभूवन् । चन्द्रः अमृतमयैः किरणैः इमामिलां धवलितां कर्तुमारेभे । प्रायः जनाः स्नात्वा सन्ध्यां समुपास्य स्वगृहं

गन्तुमुद्युक्ता अभूवन् । अस्माकं नौका अपि अस्सीघट्टतः प्रचलिता दशाश्वमेध घट्टे आगात् । वयमपि—नौकातोऽवतीर्य स्वछात्रावासाभिमुखा अभूम ।

वाराणसी वर्णनम्

अस्ति अखिलकल्याणगुणगणालंकृतस्य, भवभयाभितप्तजनानां भयं शीघ्रं विदारणक्षमस्य, आशुतोषस्य सुरासुरैर्वंदितपादपंकजस्य पार्वतीपतेर्भगवतश्शंकरस्य नगरी वाराणसी नाम । यस्यां मरणकाले सर्वान् जीवान् भूतिभूषितसर्वाङ्गो भगवान् शंकरः तारकमन्त्रमुपदिशति, येन जीवाः पाञ्चभौतिकान् देहान् विहाय शिवलोक—माप्नुवन्ति । भगवती भागीरथी स्वजलस्य स्पर्शनेन तस्य दर्शनेन, तस्मिन् स्नानेन, तस्य पानेन च जीवान् त्रिविधतापविरहितान् करोति । त्रिपथगामिनी गङ्गा वाराणसी त्रिसृभ्यः दिग्भयस्समावृत्य मन्ये भगवतो विश्वनाथस्य सदासमागमलोभात् कदापि वाराणस्याः पार्श्वं नो विजहाति । पुराणेषु श्रूयते अत्र भगवान् शंकरः शीतल जलमयवसनैः, मन्दमन्दं विलासमयगमनैः, वीचिविक्षोभजन्यशब्दमयैर्नूपुरशिञ्जितैः शनैः—शनैः प्रचरन्त्याः कुत्रचित् गभीरावर्तव्याजेन नाभिं, दीर्घलहरिकामय त्रिवलीवन्धुरं मनोहरमुदरं च प्रदर्श्य निटिलाक्षं भूतभावनं भगवन्तं शंकरम् अकाममपि सकामम् योगिनमपि सोत्प्रासोद्योगिनम् कुर्वन्त्या सुरतटिन्याः कूलकटितटिं नो विजहाति ।

वाराणस्यां गंगयास्तटे अनेके घट्टाः सन्ति मनोहरास्तेषु प्रसिद्धतमास्सन्ति; अस्सीघट्टः, हरिश्चन्द्रघट्टः, दशाश्वमेघट्टः, मणिकर्णिकाघट्ट, सिन्धियाघट्टः-लालघट्टः-गौघट्ट-प्रह्लादघट्टः-राजघट्टश्च । एतेषु समेषु घट्टेषु विश्वस्य दिग्विदिभ्यः समागताः पर्यटकाः तीर्थयात्रिणश्च यान्ति, स्नान्ति च । वाराणस्यां भगवतो विश्वनाथस्य मन्दिरमतिप्रसिद्धमास्ते; यत्र प्रतिदिनम् परस्सहस्रसंख्याकाः दर्शनार्थिनः भगवतो विश्वनाथस्य अन्नपूर्णायाश्च मनोज्ञं दर्शनं कृत्वा लौकिकं सकलं मनोरथम् पारलौकिंश्चाक्षय्यदृष्टं विन्दन्ति । भगवत्याः अन्नपूर्णायाः दर्शनं कृत्वा मानवो लोके सर्वविधं दारिद्र्यं विहाय भगवतः शंकरस्य कृपापात्रतां भजते । विश्वविख्यातेन धार्मिकाग्रेसरेण विद्वच्चक्रचक्रवर्तिना श्रीमता करपात्रस्वामिना अत्रैव अपरस्यापि विश्वनाथमन्दिरस्य स्थापनं कृतमास्ते यत्र भगवतो विश्वनाथस्य अनुकालम् वैदिकेन विधिना वैदिकैरर्चकैः समर्चा प्रचलति । वारणास्यां भैरवमन्दिरम्, संकटमोचनस्य हनुमतो मन्दिरम्, भगवत्याः संकटादेव्याः मन्दिरम्, हिन्दूविश्वविद्यालयस्थं विश्वनाथमन्दिरम्, आदिकेशवमन्दिरम् वेदव्यासमन्दिरम् च दर्शनीयानि वर्तन्ते ।

वाराणस्या हिन्दूविश्वविद्यालयं को नहि जानाति, यस्य स्थापनां चकार महामना श्री पण्डित मदनमोहन मालवीयः । काशी विद्यापीठः अपरो विश्व-

विद्यालयो वर्तते यस्य स्थापनां श्रीमहात्मा गांधी चकार । सम्पूर्णानन्द संस्कृत विश्वविद्यालयः विश्वस्य संस्कृतविश्वविद्यालयेष्वन्यतमं स्थानं विभर्ति ।

वाराणसीं संस्कृतभाषायाः सर्वेषां विभागानां महान्तो विद्वासः अध्यासिषुः अध्यासन्ते च । अत्रैव शंकरस्यापरावतारभूताः शिवकुमारशास्त्रिणः; रामावतारशर्मणाः; दामोदरशास्त्रिणः, तात्याशास्त्रिणः; गंगानाथ झा, हरिहरकृपालु महाभागाः, महाशयजीमहाभागाः । पण्डित राजराजेश्वर शास्त्रिणः, सभापति उपाध्यायाः, रामानुज ओझा प्रभृतयः शास्त्रार्थमहारथिनः, शास्त्रतत्त्वावगन्तारः अवात्सुः ।

इत्थमियं वाराणसी नहिकेवलमुतरप्रदेशस्य अपितु सम्पूर्णस्य भारतवर्षस्य नागरीष्वन्यतमा, भारतस्य सप्तपुरीषु चैकं स्थानं विभर्ति ।

महर्षिं दयानन्दः

भारतवर्षे आर्यसमाजस्य जनकः, महर्षिः दयानन्दः एव । अस्य पिता सौराष्ट्र देशस्य काठियावाड़ प्रदेशस्थस्य टंकारानामकस्य नगरस्य वास्तव्य आसीत् । सामवेदाधीतिनः शंकरभक्तस्य श्रीकर्षणत्रिवेदिनः दयादाक्षिण्यादिगुणयुक्तायां पातिव्रत्यधर्मपरायणायां वैदिकधर्मानुसरणे सावधानायां, 'देवी' नाम्न्यां पत्न्यां खृष्टाब्दे १८८२ वत्सरे भाद्रपदमासस्य नवम्यां गुरुवासरे मूलर्क्षमुपगते च चन्द्रमसि दयानन्दः आजायत ।

'दशमे अहनि पिता नाम कुर्यात्' इति नियममनुसृत्य वेद वेदाङ्गानां ज्ञाता श्रीकर्षणः शुभे लग्ने समागते यतो भगवतः शंकरस्याराधनेनायं मदीयः पुत्रः संजातः, गार्हस्स्यधर्मनिर्वाहस्य मूलभूतः, मूलनाम्नि नक्षत्रे । स्वेषां परेषाञ्च समानरूपेणायं सुखस्य मूलं स्यादिति मनसि बहुधा विचार्यं पितास्य नाम मूलशंकरश्चकार ।

'अष्टवर्षं ब्राह्मणमुपनयीत् तमध्यापयेत्' इति श्रौतनियममनुसृत्य पिता 'श्रीकर्पणत्रिवेदी' वेदविहितविधिना वालकस्य मूलशंकरस्य यज्ञोपवीतसंस्कारेण संस्कृत्य 'श्रावण्यां प्रौष्ठपद्याम् वा उपाकृत्य यथाविधिः । युक्तश्छदांस्यधीयीत मासान् विप्रोर्धपञ्चमान्' इति मनुप्रोक्तनियमानुसारेण वेदाभ्यासे निर्युक्तेस्म ।

त्रयोदश वर्षवयस्के संजाते मूलशंकरे पिता एनं शिवरात्रि व्रतं कर्तुमादिदेश । पितुराज्ञापालनपरायणोऽयं वालः शिवरात्रि व्रतमुपोष्य रात्रौ प्रतिप्रहरं श्रीशंकर पूजयितुं जागरणं कुर्वन्, यदा सर्वे जनाः निशीथिन्यां निद्रिता आसन् तदा शंकराराधनैकपरायणः अक्षिपु निद्रादारिद्राणोऽयं वालको मूलशंकरः शिवस्य मूर्तौ परिचरन्तम् मूषकमेकमद्राक्षीत् । दृष्ट्वेदं दृश्यं तस्य वालकस्य मनसि मूर्तिपूजाविधेः वैरस्यमिवाजायत । यदीयं मूर्तिः स्वशरीरे परिचरन्तम् मूषकमेव नह्यपाकर्तुं प्रभवति

तवा अस्माकं त्रिविधानां दुःखानामपाकरणे कथं प्रभुर्भविष्यति, इति असकृत् तन्मनसि उदीयमानः तर्कः, तस्य तत्त्वस्य साक्षात्कर्तुं व्यग्रं चकार, यस्य वर्णनां विश्वविज्ञानप्रकाशकाः सकलजगद्धितानुशासने प्रवृत्ताः वेदाः कण्ठरवेण कुर्वन्ति। तस्यैव तत्त्वस्यान्वेषणे परायणामूलशङ्करः 'पूर्णानन्द सरस्वती महाभागानां शिष्यत्वं स्वीचकार। स च पूर्णानन्दः अस्य बालकस्य दयानन्द सरस्वती इति नाम चकार।

वैराग्यरागरसिको दयानन्दः वेदानां वेदाङ्गानां व्याकरण-न्यायमीमांसा-सांख्य-योग-साहित्यानां सर्वेषां भारतीयानां वैदेशिकानाञ्च धर्माणां पूर्णरूपेणाध्ययनं चकार। अधीतसकलशास्त्रो दयानन्दः धर्माणां परमार्थपर्यालोचनं कृत्वा 'सत्यार्थ-प्रकाश' नामकं ग्रन्थं व्यररचत्। अस्मिन् ग्रन्थेऽयं मनीषी सर्वेषां धर्माणां सम्यक् समीक्षणं चकार।

महर्षिः दयानन्दः वेदानां विशदप्रचार–प्रसाराय, तेषां हिन्द्यां व्याख्यां चकार। दयानन्दानुसारेण सर्वैः वेदानामध्ययनमवश्यं कर्तव्यम्। दयानन्दः भारतीये समाजे विद्यमानानां प्राचीनानां रूढीनां खण्डनं चकार। धर्मं नाम्ना समाजे याः निन्दिताः प्रथा आसन् तासां भवाय सुदृढं प्रयत्नमकार्षीत्। दयानन्दानुसारेण मूर्तीनां पूजनमनावश्यक वर्तते, विप्राणां तु एक एव तपो वेदानामभ्यसनं वर्तते। समाजे सन्ध्यावन्दनस्योपरि बलं ददौ अयम्। दयानन्दः स्वानुयायिनः 'आर्य समाज' नाम्ना उद्घोषयत्। सर्वे हिन्दवः आर्या वर्तन्ते। दयानन्दस्य मतानुसारेण आर्यधर्म एव श्रेयान् धर्मः। स्त्रियः अपि वेदानामध्ययनस्य, अग्न्यादि औपासनकर्मणाम् अधिकारिण्यः सन्ति।

इत्थं दयानन्दः समाजे विद्यमानानां सर्वासां कुरीतीनां सुधारकरूपेण, वेदानां श्रेष्ठप्रचारकरूपेण चागात भारतीये समाजे।

महात्मा गांधी

अस्मिन् भारतवर्षे देशे काले-काले, सत्यवादिनः, आदर्श स्वरूपाः सम्पूर्णस्य विश्वस्य हितैषिणी महापुरुषा अजायन्त। श्रीरामः, श्रीकृष्णः, बुद्धः, महावीरः इमे पुरुषा एतद्दृशा एव आसन्। यदा भारतवर्षः यवनानामनाचारेण अत्याचारेण च व्याप्तः अभूत् तदा महाराणाप्रताप-शिवाजी-प्रभृतयः महापुरुषा उत्पन्ना अभूवन्। यदा आँग्लानां कूटिनीतौ भारतः पराधीनोऽभूत् तदा भारतवर्षं स्वतन्त्रं कर्तुं काठियावाण प्रदेशस्य पोरबन्दरनाम्नि नगरे पुत्तलीबाई कर्मचन्द्रगांधि-नाम्नोः मातापित्रोः खीष्टाब्देः १८९६ अक्तूबर मासस्य द्वितीयायां तारिकायाम् अजायत एकोबालकः यस्य मातापितरौ 'मोहनदास कर्मचन्द्रगांधी' नाम अकुरुताम्।

बालकः कर्मचन्द्रगांधी स्वभावतो बाल्यकालादेव सत्यप्रियः आसीत् । समागतेऽपि काले अयं मृषां वक्तुं नैच्छत् । कदाचित् यदायं प्रारम्भिककक्षायाः छात्रः आसीत् तदा विद्यालये निरीक्षक अगमत् । कक्षायां छात्राणामध्ययनस्य स्थितिमवेक्षितुम् बालकं कर्मचन्द्रगांधिनमप्राक्षीत्-पृथिव्या आकारः किदृशोऽस्ति ? कर्मचन्द्रः अस्य प्रश्नस्य यथोचितमुत्तरं दातुं न प्राभवत् । तद् दृष्ट्वा अध्यापकः पृथिव्या आकारः वर्तुलो वर्तत इति निर्देशितुं स्वघटिका यन्त्रस्य आकारं निर्दिष्टिवान्, परन्तु पुनः तदुत्तरं दातुमनुचितं मत्वा जोषमेवासीत् कर्मचन्द्र गांधी ।

त्रयोदश वर्षदेशीयस्य कर्मचन्द्रस्य 'कस्तूरबाबाई नाम्न्या' पत्न्या सह विवाहसंस्कारः सम्पन्नोऽभूत् । सत्यबलमेवाङ्गीकृत्य कर्मचन्द्रः दशमकक्षामुत्तीर्य विधिशास्त्रमध्येतुं 'लन्दनं' जगाम यत्र वर्षं चतुष्टयं परिश्रमेणाध्ययनं कृत्वाऽयं वाक्कीलस्योपाधिं दधार । विदेशे चतुर्वर्षावधि, उषित्वा सः न तु मदिरां न वा वैदेशिकीं नारीम् स्पृष्टवान् । वाक्कील परीक्षामुत्तीर्य कर्मचन्द्रः भारतवर्षमगात् । पुनः राजकोटनगरे वाक्कीलतायाः अभ्यासं प्रारब्धवान् । यस्मात् कारणात् कार्यमिदं छलप्रवञ्चनामयं भवति तस्मादेव कारणत् साधुस्वभाववान् सत्यपालनपरायणः, सरलहृदयः कर्मचन्द्रः वाक्कीलतायाः कार्ये सफलतां न ह्यध्यगात् ।

एकदा दक्षिणी अफ्रिका देशे अत्यन्तं निरादृताः भारतीयाः कर्मचन्द्रगांधिनं स्ववादं न्यायालये उपस्थापयितुं आहूतवन्तः । भारतीयानां न्यायालये वादमुपस्थापयितुं अयम् अफ्रिका देशे प्रागात् । तत्र स्वयं कर्मचन्द्रगांधिनः अपि महान् निकारः सञ्जातः । इमां दीनां दशां तत्र निवसतां भारतीयानां दृष्ट्वा कर्मचन्द्रः गांधी भारतीयानां 'नेटाल इण्डियन कांग्रेस' नामकं संघटनं चकार ।

पुनः अफ्रिकादेशात् गांधी महाभागः भारतवर्षं प्रत्यागात् । अत्रागत्य आंग्लानां विरुद्धं 'असहयोग आन्दोलनस्य' प्रारम्भं चकार । अस्मिन् काले अहिंसा-सत्य-अस्तेयपूर्वकं अस्यान्दोलस्य प्रचालनात् श्रीकर्मचन्द्रगांधी महात्मनः पद्व्या विभूषितो भूत्वा महात्मागांधी नाम्ना प्रसिद्धोऽभूत् । महात्मनो गांधिन नेतृत्वे मोतीलाल नेहरू, जवाहरलाल नेहरू, राजेन्द्रप्रसादः, गोखले, टण्डन, बोस प्रभृतयः अनेके महान्तो विचारकाः भगतसिंह प्रभृतयः अनेके स्वजीवनोत्सर्गस्य कर्मण्यपि सोत्साहं व्यापृताः कार्यमकार्षुः । अयमान्दोलनस्य कार्यक्रमः तेन प्रकारेण सशक्तोऽभूत् भारते येन वहोः कालात् रूढमूला अपि आंग्लाः भारतवर्षस्य समृद्धं प्राज्यमपि राज्यं विहाय १९४७ ईस्वीये वर्षे भारतवर्षस्य प्रशासनं पूर्णरूपेण भारतीयानां हस्ते समर्प्य स्वदेशमगुः । अस्य स्वतन्त्रस्य भारतवर्षस्य प्रथमः भारतवर्षस्य प्रथमः राष्ट्रपतिः श्रीराजेन्द्रप्रसादोऽभूत्, प्रधानमन्त्री च श्रीजवाहरलाल नेहरू अभूत् । महात्मा गांधी राष्ट्रपितुः पद्व्या विभूषितः राजनीतेः पृथगेवाऽवर्तत । भारतवर्षस्यैव कश्चन 'नाथूराम गोडसे नामकः पुरुषः १९४८ ईस्वीयस्य जनवरी मासस्य त्रिंशत् तारिकायाम् महात्मनो गांधिनः हत्यां चकार ।

गोमहिमा:

गावो मे अग्रतस्सन्तु गावो मे सन्तु पृष्ठतः ।
गावो मे सर्वतस्सन्तु गवां मध्ये वसाम्यहम् ॥

गौः पूर्ववैदिककालत एव आर्याणामार्येतराणाञ्च संस्कृतेः सभ्यतायाश्च प्रतीकोऽस्ति । गोसम्पत्तिरेव भारतीयानामार्थिकव्यवस्थायाः मूलमास्ते । भारतीयेषु पुराणेषु सर्वदेवमयी गौरित्युद्घोषितमास्ते । 'तस्मादश्वा अजायन्त ये के चोभयादतः । गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः' । (शु० य० ३१।८) इति श्रुतेरनुसारेण मानवानां कल्याणं कर्तुमेव भगवान् सृष्टेरादौ गवां सृष्टिं चकार । सृष्टेरारम्भकालतः एव गोः मानवजीवनस्य विकासे संवर्द्धने च महत्त्वातिशयमास्ते । प्रसवित्र्याः मातुरनन्तरम् अस्माकं शरीरस्य संवर्द्धने यदि कस्यचनापि अस्मत्सूपकारो भवितुमर्हति तदा स उपकारो गोरेव । माता तु उत्पन्नस्य बालकस्य त्रिवर्षं पर्यन्तमेव दुग्धं पाययाति तदनन्तरं तु आजीवनं दुग्धं वयं गोरेव लभामहे । अतएव गौः मानवसमाजस्य धात्री वर्तते । गोवंशेनोत्पादितमन्नम् गोरेव लब्धं दुग्धं, घृतं, दधि च भुक्त्वा पित्वा अस्माकं पूर्वजाः भारतीयसभ्यतायाः संस्कृतेश्च स्थापनामकार्षुः ।

गोसम्पत्तिरेव भारतीयानां सभ्यता-संस्कृत्योर्जननी वर्तते । सभ्यतासंस्कृत्योः सर्जनविकासयोः कृते यादृश्याः मेधाया आवश्यकता भवति तादृश्याः मेधायाः निर्माणं गोदुग्धं गोघृतं गोदधि च विना न जायते । अतएव ह्युक्तं 'गावो विश्वस्य मातरः ।'

आर्यसमाजस्य जनकः स्वामीदयानन्दः 'गौः करुणानिधिः' इत्यस्मिन् पुस्तिकायां गोर्महत्त्वं व्यज्ञापयत् । सूर्यवंशीयो राजा दिलीपः महर्षेर्वशिष्ठस्य आज्ञानुसारेण एकविंशति दिनानि नन्दिन्याः सेवां कृत्वा रघोः सदृशस्य पुत्रस्य प्राप्तौ सफलोऽभूत् । यदा–यदा पृथिव्यां राक्षसानामत्याचारो वर्द्धते तदा पृथिवी अपि स्वकीयं भारम् अपनोदनाय प्रार्थनां कर्तुः भगवतः पुरस्तात् गोरूपधारिण्येव भूत्वा याति । भगवान्नपि गोब्राह्मणहितायैव पृथिव्यामवतीर्य जगद्धिताय भवति । भगवान् श्रीकृष्णः स्वयमेव वृन्दावने बहुकालपर्यन्तं गोचारणमकार्षीत् । भगवतः पुण्यकर्मषु गोचारणमप्येकमायाति । वृन्दावने निवसन् भगवान् आसूर्योदयादासायं गोचारणमनुदिनमकार्षीत् । आह च भगवान् बादरायणः श्रीमद्भागवत्महापुराणस्य दशमे स्कन्धे—"प्रातः व्रजाद् व्रजत आविशतश्च सायम्, गोभिः समं क्वणयतोऽस्य निशम्य वेणुम् ।" (श्रीमद्भागवतः) । यदा भगवान् गोचारणकाले दूरत एव मुरलीं वादयतिस्म तदा सर्वाः गावः, सर्वे वत्साः वृषभाश्च चरणादिकमखिलं कर्म विहाय तां मुरलीध्वनिं श्रुत्वा लिखिता इव अभूवन् ।

'वृन्दशो व्रजवृषामृगगावो वेणुवाद्यहृतचेतस आरात् ।
दन्तदष्टकवलाधृतकर्णानिक्षितानिखिलं चित्रमिवासीत् ।।

श्रीमद्भागवतामृतनाम्निग्रन्थे श्रीसनातनगोस्वामिनो वदन्ति यत् गोलोकेऽपि भगवान् नित्यं वयस्यैः साकं गोचारणं करोति ।

'प्रातर्विहर्तुं गहनं प्रविष्टो गोभिर्वयस्येन सहाग्रजेन ।
प्राणप्रदाता व्रजवासिनां नः सायं समायास्यति सोऽधुनैव ।।"

सूरदासः सूरसागरनाम्नि काव्ये भगवतः गोचारणलीलायाः विशदवर्णनम् करोति ।

छान्दोग्योपनिषदि तृतीयाध्याये एका आख्यायिका आयाति, यस्यामुक्तमास्ते यत् राजा जनकः परं तत्त्वनिर्णयकर्त्रे महर्षये याज्ञवल्क्याय सुसज्जितानां सहस्राणां गवां विस्राणनस्य निश्चयमकार्षीत् । गोदानकर्तुः महाराजस्य नृगस्य पुण्यां कथां को नहि भारतीयो जानाति । अद्यापि भारतीयाः सर्वेषु धार्मिकेषु कृत्येषु गवामेव दानम् कुर्वन्ति । अतएव गौः भारतस्य महत्त्वपूर्णा सम्पत्तिर्वर्तते । तस्या गोःसम्पत्तेः सुरक्षा भारतीयानामावश्यकं कर्तव्यं वर्तते ।

बुद्धिर्यस्य बलं तस्य

अथवा—बुद्धिर्यस्य स जीवति
दीर्घौ बुद्धिमतो बाहू ।

विचित्रमिदं जगत् । अत्र बहुप्रकारकाः जीवास्सन्ति । हस्ती, सिंहः, गौः; महिषः, शशकः, शृगलः, अहिः, नकुलः; मानवाः एतेषु समेषु जीवेषु भवत्स्वपि इमान् सर्वान् जीवान् मानवः स्ववशवर्तिनः करोति स्वबुद्धिबलेन । बुद्धेः नाम गणनाप्रसंगे अमरसिंहः अमरकोशे—बुद्धिर्मनीषा धीषणा धीः प्रज्ञा शेमुषी मतिः । प्रेक्षोपलब्धिश्चित्संवित् प्रतिपज्ज्ञप्ति चेतना' ।। इति । बुद्धेश्चतुर्दशनामानि पठति । यद्यपि पर्यायभूता इमे शब्दाः अथापि इमे अर्थभेदं सूक्ष्मं बिभ्रति । अयं बुद्धिशब्दः कार्यसम्पादनस्य दक्षतारूपं ज्ञानस्य प्रकर्षमेव वक्ति । बलशब्दोऽपि यद्यपि शारीरिकबलस्यैवार्थे साक्षात् प्रयुक्तो भवति । तथापि तस्य गौणार्थकोऽपि भवति प्रयोगः । यथा—बुद्धेर्बलं, शारीरिकं बलम्, धनबलम्, सैन्यबलम्, संघटनबलञ्च । एतेषु सर्वेषु प्रयोगेषु बलशब्दः उत्कर्षं पर एव भाति । धनबलेन धनस्योत्कर्ष एव ज्ञायते न तु धनं बलमुभयमेव । यतः शारीरिकबलेन विहीनस्यापि धनबलं भवति । प्रकृतस्य—'बुद्धिर्यस्य बलं तस्य' इत्युक्तेरयमाशयोऽस्ति यत् बुद्धिमान् मानवः अल्पबलेन संयुक्तोऽपि सर्वान् स्वव्यतिरिक्तप्रकारकान् बलिनः अतिशेते ।

बुद्धिबलेन युक्तत्वादेव मानवः करिणः, सिंहस्य, भल्लूकस्य अहेश्चापि नियामको भवति । बुद्धया युक्तत्वादेव मानवः शास्त्रैः धर्मार्थकाम-मोक्षाणां चतूर्णाम् पुरुषा-

र्थानामधिकारी भवति। बुद्धेः वैशिष्ट्यादेव वशिष्ठ–वामदेव–शुकदेव–वाल्मीकि–व्यास–कालिदास–भारवि–माघ–बाणभट्टप्रभृतयः समाजे महान्तं समादरं लभन्तेस्म। आधुनिकानि मोटर–रेल–वायुयान–राकेट–जेट–मिग–जैगुआर–एफ० १६ विमान–प्रभृतीनि साधनानि बुद्धिमद्भिरेव विनिर्मितानि। एतेषु भूतान्यपि साधनानि सन्ति यैः होरामात्रेण समुद्रस्य संतरणम्, पृथिव्याः परिक्रमा, चन्द्र–भौमादिग्रहेष्वपि गमनम् सुकरमास्ते।

चलचित्र–आकाशवाणी–दूरदर्शनप्रभृतीनि मनोरञ्जनस्य साधनानि, दूरभाष–वायरलेसप्रभृतीनि दूरतो वार्तालापस्य साधनानि। चिकित्सायाः एक्सरे–रेडियम् प्रभृतीनि चिकित्सासाधनानि आधुनिकानि बुद्धिमद्भिरेवाविष्कृतानि।

वेदेषु ब्रह्मास्त्र–ब्रह्मशिरः–आग्नेयास्त्र–वायव्यास्त्राणां बुद्धिरूपाणामस्त्राणां वर्णनम् श्रूयते। वाल्मीकीयरामायणस्य युद्धकाण्डे रामरावणयुद्धप्रसंगे वाल्मीकिः भगवतो रामचन्द्रस्य गान्धर्वास्त्रस्य वर्णनं कुर्वंल्लिखति—यदा भगवान् रामः गान्धर्वास्त्रस्य प्रयोगमकार्षीत् तदा स्वयं विनश्यमानाः राक्षसाः रामं न ददृशिरे। तथाहि—'न ते ददृशिरे रामं दहन्तमरिवाहिनीम्। मोहिताः परमास्त्रेण गान्धर्वेण महात्मना ॥' श्रीमद्भागवतमहापुराणानुसारेण भगवान् जृम्भकास्त्रस्य प्रयोगेण भगवतः शंकरस्य जृम्भणञ्चकार बाणासुराहवे। इमानि सर्वाणि अस्त्राणि ज्ञानस्वरूपाण्येवासन् येषां कल्पना अद्यापि कर्तुं न शक्यते।

अद्यापि बुद्धिमान् एव मनुष्यः लौकिकेषु कार्येषु ख्यातिं लभते। बुद्धिमत्वादेव महात्मा गाँधी विना रक्तपातमयं संग्रामं कृत्वा वैदेशिकान् बहिश्चकार भारतात्। राजेन्द्रप्रसादस्य प्रथमभारतीयराष्ट्रपतिपदे, श्रीजवाहरलालनेहरुमहाभागस्य स्वतन्त्रभारतस्य प्रथमप्रधानमन्त्रिणः पदे नियोगश्च तेषां बुद्धिवैशद्यमेव द्योतयति। अद्यापि श्रीमती इन्दिरागाँधी भारतवर्षस्य प्रधानमन्त्रिपदे स्वबुद्धिबलेनैव तिष्ठति। स्वबुद्धिबलेनैव विवेकानन्दमहाभागः विदेशेषु गत्वा भारतस्य विज्ञानभूम्नः प्रचारमकरोत्। बुद्धिबलसंयुक्तस्य एव मनुष्यः राजकीयेषु तेषु तेषु महत्सु पदेषु नियुक्तो भवति। स्वबुद्धिबलेनैव व्यापारिणः बिरला–टाटा–डालमिया–प्रभृतिभिरुपाधिभिर्विभूषिता भवन्ति। अतएव तथ्यमेवोक्तं 'बुद्धिर्यस्य स जीवति।'

बुद्ध्या विहीनः धनेन बलेन संयुक्तोऽपि मानवो स्वजाड्येन विनश्यति। धनबलाभ्यां विहीनोऽपि बुद्धिमान् सर्वत्र समादृतो भवतीति—'दीर्घौ बुद्धिमतो बाहू' सत्यमाभाणकम्।

क्षमा खड्गः करे यस्य दुर्जनः किं करिष्यति

मानवजीवनस्य द्विप्रकारकाः गुणाः भवन्ति—आभ्यन्तराः बाह्याश्च। आभ्यन्तरगुणेषु क्षमा अन्यतमा वर्तते। अनेन सम्पन्नो मानवः अपराधिनं जीवं समक्षं समागतं नतमस्तकं च प्रेक्ष्य तस्मै अभयदानं करोति। भगवतो रामचन्द्रस्य जीवने क्षमाया

अनेकान्युदाहरणान्यायान्ति । यथा इन्द्रपुत्रो जयन्तः भगवत्याः सीताया वक्षःस्थले चरणचञ्चूभ्यां तथा प्रहारमकरोत् येन तस्या वक्षःस्थलात् रुधिरप्रवाहः प्रावर्तत । श्रीजानक्या अङ्कादुत्थितो भगवान् रामः जयन्तस्य तथाविधं दुष्कर्म प्रेक्ष्यावोचत्—'कः क्रीडति सरोषेण पञ्चवक्त्रेण भोगिना । तदनन्तरं संस्तरात् कुशमादाय ब्राह्मेणास्त्रेणायोजयत् । तेन ब्रह्मास्त्रेण भयभीतो जयन्तः त्रिषु लोकेषु गतोऽपि कुत्रापि यदा शर्म नावाप तदा देवर्षिणा नारदेनोपदिष्टः सन् पुनः भगवतो रामचन्द्रस्यैव शरणं जगाम। पादयोः पतितं पूर्वकृतापराधमपि जयन्तं भगवान् तस्य प्राणानां रक्षां व्यधात्—'तं तथा पतितं दृष्ट्वा धरण्यां वायसस्तदा । तच्छिरः पादयोस्तस्य योजयामास जानकी ॥ पाहि पाहीति भर्तारमुवाच दयया विभुम् । ररक्ष रामो भगवान् दययैनमैक्षत ॥”

इत्थमेव लङ्कायां युद्धकाले योद्धुं समागतो रावणः प्रथमं शक्तेः प्रहारेण लक्ष्मणं विह्वलं चकार । भ्रातरं मूर्च्छितं दृष्ट्वा भगवान् क्रोधेन युक्तः सन् तथाविधानां बाणानां प्रहारमकार्षीत् येन रावणस्य रथं विनष्टमभूत्, सारथिश्च व्यापादितः। सर्वाणि धनूंषि विनष्टानि अभूवन्। भगवान् शरप्रहारेण विह्वलं रावणम् बाणैः सन्निरुध्य तेन प्रकारेण हन्तुमारेभे येन रावणः किञ्चिदपि कर्तुं प्रभुर्नाभूत्। रावणस्य मनसि आश्चर्यमासीत् यत् कस्मात् धर्मज्ञो भगवान् समरपराङ्मुखं मामित्थं निहन्ति। तदा तस्य दृष्टिः धनुषखण्डयुक्तेषु स्वहस्तेषु अगात् । सः सपद्येव धनुष्खडान् विहाय समराङ्गणात् पलायितुमारब्धवान् । तथाहि—

'यो वज्रपातासनिसन्निपातात् न चुक्षुभे नापि चचाल राजा ।
सो राम बाणाभिहतो भृशार्तः चचाल चापं च मुमोच वीर ॥'
(वा. रा. यु. का. ५९।१२९)

तथाविधं पलायन्तं रावणं प्रेक्ष्य रामचन्द्रः विहस्योवाच–रावण ! मन्ये अत्यन्तश्रान्तोऽसि । अद्य त्वां क्षमाम्यहं । ससुखं स्वराजधान्यां प्रविश । श्वः पुनर्मदीयं वलं द्रक्ष्यसि—

'कृतं महत्कर्म त्वया सुभीमं, हतप्रवीरश्च कृतस्त्वयाहम् ।
तस्मात् परिश्रान्त इव व्यवस्य न त्वां शरैर्मृत्युवशं नयामि ॥'
(वा. रा. यु. का. ५९।१५२)
गच्छानुजानामि रणार्दितस्त्वं प्रविश्य रात्रिश्च रराज लङ्काम् ।
आश्वास्य निर्याहि रथी च धन्वी तदा बलं द्रक्ष्यसि मे रथस्य ॥ (१५३)

इत्थमनेकानि निदर्शनानि क्षमायाः संस्कृतसाहित्यस्य ग्रन्थेषूपलभ्यन्ते । अस्माकं जीवने अस्य क्षमागुणस्य अनेके अवसरा आयान्ति वयं क्षमां कुर्मः । अत्यधिकापराधयुक्तमपि पुत्रं क्षमायै याचनां कुर्वन्तं माता वात्सल्यातिरेकात् क्षमा करोति । अनेन क्षमागुणेन युक्तामेव मातरं जगदम्बां वीक्ष्य श्रीस्वामी शङ्कराचार्यः तां स्तौति—'कुपुत्रो

जायेत क्वचिदपि कुमाता न भवति ।' वयं सर्वे मातुः पृथिव्याः पुत्राः अस्यां नानाविधान् अपचारान् अत्याचाराश्चाचरामः परम् सर्वंसहेयं भगवती धरित्री अस्माकमपचारान् क्षाम्यत्येव । अनुदिनमपराधमसकृत् कुर्वतोऽपि पुत्रान् मातापितरः क्षाम्यन्त एव ।

अतएव भगवान् श्रीकृष्णः गीतायाः षोडशेऽध्याये क्षमायाः गणना दैवसम्पत्तावकरोत् । क्षमागुणेन युक्तस्य पुरुषस्य समक्षं दुर्जना अपि सुजनान् इवाचरन्ति । तस्य जगति कश्चन शत्रुरेव न भवति । सर्वे जनाः तस्य समादरं कुर्वन्ति । अतएव ह्युक्तं 'क्षमा शस्त्रं करे यस्य दुर्जनः किं करिष्यति ।'

सहसा विदधीत न क्रियामविवेकः परमापदां पदम्

अथवा—विवेकभ्रष्टानां भवति विनिपातश्शतमुखः ।

अथवा—अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः ॥

भेदपूर्वकं ज्ञानमेव विवेकस्य नाम्नाऽभिधीयते । सदसदोः पुण्यापुण्ययोः, सदाचार–कदाचारयोः, उपादेय–त्याज्ययोः, धर्माधर्मयोश्च कियान् भेदः ? इति येन ज्ञानेन ज्ञायते तज्ज्ञानमेव विवेकशब्दस्य वाक्यार्थः । अस्य ज्ञानस्य विरोधिज्ञानमविवेकशब्देन प्रोच्यते । अविवेकेन जीवने दुःखानां बाहुल्यं भवति । विवेकेन च सुखानि समायान्ति मानवस्य गृहे । विवेकः समयमपेक्षते अनुष्ठेयस्य गुणागुणयोः परिशीलनाय । अतएव हि महाकविर्भारविर्वक्ति—

सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणुते हि विमृश्य कारिणं गुणलुब्धास्स्वयमेव सम्पदः ॥

(कि. २।३०)

जगति जनिमन्तो आपामरपण्डिताः, आकीटकरिणश्च सर्वे जीवाः सुखमेव समीहन्ते । दुःखं नहि कोऽपि कामयते । तस्यैतस्य दुःखस्य परिहारपूर्वकं सुखमवाप्तुं विवेकस्य समाश्रयणमावश्यकमास्ते । तदर्थं विधेयस्य गुणांश्च निपुणं परिशील्यैव कर्माणि कर्तव्यानि अन्यथा सहसा कार्ये प्रवृत्तिः दुःखस्य निमन्त्रणायैव भवति । अतएव हि दृश्यते लोके यत् असमीक्ष्यकारिण एव जनाः अनुचितेषु कार्येषु प्रायेण व्याप्रियन्ते । हितोपदेशेऽप्युक्तम्—'सुचिन्त्य चोक्तं सुविचार्य यत्कृतं सुदीर्घकालेऽपि न याति विक्रियाम्' ।

इतिहासेषु पश्यामो वयम् । रावणः असमीक्ष्यैव कार्याकार्यमकरोत् । सीतायाः हरणं तस्यैव फलमभूत् यत् देवैरप्यप्रकम्प्यः सः वानाराणां मानवानां च बलेन सान्वयो विनष्टोऽभूत् । अविवेकी कंसः श्रीकृष्णेन विनाशितः । राजा परीक्षितः धर्मप्राणोऽपि भूत्वा अविवेकमाश्रित्य ऋषेर्गले मृतमुरगं निदधौ यस्य फलमभूत्

यत् ऋषेः कुमारकस्य शापवलेन प्रेरितः स एव सर्पः सप्तमेऽहनि तक्षको भूत्वा तं ददंश । अविवेकः वलमेवाश्रित्य शिशुपालः युधिष्ठिरस्य राजसूययज्ञावसरे भगवन्तं श्रीकृष्णं निन्दयित्वा कालस्य कराले कण्ठे प्राविशत् । अविवेकिष्वग्रणी दुर्योधनः भगवतः श्रीकृष्णस्य समक्षं प्रावोचत्—'सूच्यं न दास्यामि विना युद्धेन केशव !' तस्यैव फलमभूत् यत् दुर्योधनस्य वंशे जलस्य प्रदाताऽपि कश्चन नह्यवशिष्टोऽभूत् । अविवेकस्य इममेव परिणामं दृष्ट्वा भर्तृहरिरवोचत्—"विवेकभ्रष्टानां भवति विनिपातः शतमुखः ।"

विवेकस्य फलं तु सदा मधुरमेव भवति । विवेकी प्रह्लादः राक्षसस्य हिरण्यकशिपोर्वंशे उत्पन्न अपि भक्तानामग्रणी वभूव । प्रह्लादस्यैव रक्षायै भगवान् नृसिंहरूपेणावातरत् । विवेकमङ्गीकृतो देवर्षिर्नारदः देवानां दानवानाञ्च समानरूपेण श्रद्धायाः पात्रमभूत् । विवेकमेवाभ्युपगम्य महात्मा गाँधी सर्वैः साधनैः विहीनोऽपि आंग्लान् भारताद् वहिश्चकार विना युद्धेनैव । अतएव विवेको जीवनस्य महान् गुणः । अविवेकेन क्रियमाणानां कर्मणां फलमाजीवनं तुदति, येन भृशं दूयते चेतः । आहापि—"अतिरभसकृतानां कर्मणामाविपत्तेर्भवति हृदयदाही शल्यतुल्यो विपाकः ।" इत्थं लोके जीवनस्योन्नयनमिच्छद्भिः सर्वदा विवेकपूर्वकाण्येव कार्याणि कर्तव्यानि । अविवेकस्याश्रणं कदापि नहि स्वीकरणीयम् ।

मुखं व्याकरणं स्मृतम्

अथवा—व्याकरणशास्त्रस्य महत्त्वम् ।

अथवा—तेषां हि सामर्ग्यजुषां पवित्रं महर्षयो व्याकरणं निराहुः ।

पदानां प्रकृतिप्रत्ययादिकानां विवेचनं क्रियते यस्मिन् शास्त्रे तद् व्याकरणमित्यभिधीयते । इत्थम् पदानां व्युत्पत्तिसाधनभूतं शास्त्रमेव व्याकरणमित्युच्यते । इत्थम् वेदपुरुषस्य मुखस्थानीयमिदं शास्त्रं वर्तते इति प्रतिपादयन् भगवान् पाणिनिराह—'मुखं व्याकरणं स्मृतम्' इति ।

व्याकरणशास्त्रस्यापरं नाम शव्दशास्त्रम् वर्तते । एतस्मादेव कारणात् भगवान् पतञ्जलिः महाभाष्यस्यादौ प्राह—'अथ शव्दानुशासनम् ।' इति । अतएव महाभाष्यस्य प्रथमे आह्निके पतञ्जलिराह यत् साधुशव्दोपदेश एवास्य व्याकरणशास्त्रस्य प्रयोजनम् । भगवान् पाणिनिरपि वर्णसमाम्नायोपदेशान्तरम् शव्दोपदेशमेव करोति । वस्तुतो व्याकरणशास्त्रस्योद्देश्यम्—वर्णपदवाक्यार्थानाम् ज्ञानप्रतिपादनपूर्वकं वेदानाम् सम्यग् ज्ञानप्रतिपादनमेव वर्तते ।

व्याकरणशास्त्रस्य प्रयोजनानामुपदेशं कुर्वन् महाभाष्यकारः पतञ्जलिराह—'रक्षोहागमलघ्वसन्देहाः' प्रयोजनम् । इमानि पञ्चसङ्ख्याकानि व्याकरणशास्त्रस्य मुख्यानि प्रयोजनानि सन्ति महाभाष्यानुसारेण । एतद्व्यतिरिक्तान्यानुषङ्गिकान्यपि प्रयोजनानि भवन्ति ।

वैयाकरण एव पदानां शुद्धाशुद्धत्वज्ञानस्य माध्यमेन वेदानां रक्षणे समर्थः। वेदेषु मन्त्राः न तु सर्वेषु वचनेषु न वा सर्वासु विभक्तिषु न वा सर्वेषु लिङ्गेषु पठितास्सन्ति। वैयाकरण एव आवश्यकतानुसारेण तेषां वचनविभक्तिलिङ्गपुरुषाणां विपर्यासकरणे समर्थो भवति नान्यः, अतएव चापि व्याकरणमध्येयम्। सम्पूर्णस्य वेदाख्यस्य शास्त्रस्य ज्ञानसम्पादनस्य लघुसाधनम् व्याकरणमेव विद्यते। अस्यैव शास्त्रस्य सामन्यविशेषनियमानां माध्यमेन अल्पेनैव प्रयासेन वेदार्थानां ज्ञानं सम्पादयितुं शक्यते। वेदानां ज्ञानलाभाय वैयाकरण एव कर्तुमर्हति नान्यः। पदानां प्रयोगाणां साधुत्वासाधुत्वविषयकस्य सन्देहस्य निवारणमपि व्याकरणशास्त्रस्यैव माध्यमेन कर्तुं शक्यते। अतएवापि असन्देहार्थमध्येयम् व्याकरणम्।

इमानि पञ्चप्रयोजनान्येव मनसि निधाय भगवता पतञ्जलिनाभिहितम्—'ब्राह्मणेन निष्कारणो धर्मः षडङ्गेन वेदोऽध्येयो ज्ञेयश्च प्रधानञ्च षडङ्गेषु व्याकरणम्' इति।

व्याकरणशास्त्रस्य महत्त्वम्—पदपदार्थयोर्ज्ञानम् हि वाक्यार्थज्ञानस्य द्वारम्। पदञ्च सविभक्तिकः शब्द एव। निर्विभक्तिकेषु शब्देषु पदत्वं नायाति। तथा चाह भगवान् पाणिनिः—'सुप्तिङन्तं पदमि'ति। सुबन्तं तिङन्तं च पदसंज्ञं स्यादिति। पदान्येवार्थबोधकानि भवन्ति न तु प्रातिपदिकानि मात्रम्। व्याकरणशास्त्रम् शब्दोच्चारणविषये, प्रकृतिप्रत्ययोः विवेचनविषये, सुबन्तानां तिङन्तानाम् साधुत्वासाधुत्वविषये, शब्दानाम् स्वरूपविषये चात्यन्तं जागरूकं विद्यते।

यद्यपि बहूनां व्याकरणानां नामानि श्रृण्वति तथापि तत्राष्टावेव व्याकरणानि प्रधानानि सन्ति। तथा चाभिहितम्—

"ब्राह्ममैशानमैन्द्रञ्च प्राजापत्यं बृहस्पतिम्।
त्वाष्ट्रमापिशलञ्चेति पाणिनीयमथाष्टमम्" ॥ इति।

वोपदेवेन त्वित्थमभिहितम्—

'इन्द्रश्चन्द्रः काशकृत्स्नः पिप्पली शाकटायनः।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ हि शाब्दिकाः' ॥

एतेषु सत्स्वपि व्याकरणेषु साम्प्रतिके काले पाणिनीयं व्याकरणमेव विजयतेतराम्। अस्मिन् व्याकरणे सर्वप्रथमम् वर्णोच्चारणविषयेऽभिहितम्—'ऊकालोज्झ्रस्वदीर्घप्लुतः।' अस्य सूत्रस्य विवरणे प्राह भट्टोजिदीक्षितः 'उश्च ऊश्च ऊ३श्च वः। वां काल इव कालो यस्य सोऽच् क्रमाद्ह्रस्वदीर्घप्लुतसंज्ञः स्यात्'। पुनरेतेषां त्रयाणाम् त्रीन् त्रीन् विभागानुपपादयन् प्राह महर्षिः पाणिनिः—'उच्चैरुदात्तः' इति—ताल्वादिषु सभागेषूर्ध्वभागे निष्पन्नोऽज् उदात्तसंज्ञः स्यात्। अनुदात्तस्वरम् निर्दिशता भगवता पाणिनिनाऽभिहितम्—'नीचैरनुदात्तः'। 'समाहारः स्वरितश्च' इत्थम् नवप्रकारकाणामचां अनुनासिकत्वाननुनासिकत्वभेदेनाष्टादशविधत्वमभिहितम्।

वर्णानां स्थानप्रयत्नविवेकप्रकरणे श्रीमता भट्टोजिदीक्षितेनाभिहितम् सिद्धान्तकौमुद्याम्—

'अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। ऋटुरषाणां मूर्धा। ऌतुलसानां दन्ताः। उपूपध्मानीयानामोष्ठौ। एदैतोः कण्ठतालू। ओदौतोः कण्ठोष्ठम्। वकारस्य दन्तौष्ठम्।

यत्नो द्विधा—आभ्यन्तरो बाह्यश्च। तत्राद्यं पञ्चधा—स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात्।

तत्र स्पृष्टं प्रयत्नं स्पर्शानाम्। ईषत्स्पृष्टमन्तःस्थानाम्। ईषद्विवृतमूष्मणाम्। विवृतं स्वराणाम्। ह्रस्वस्यावर्णस्य प्रयोगे संवृतं प्रक्रियादशायां तु विवृतमेव।

बाह्यप्रयत्नस्त्वेकादशधा—विवारसंवारनादघोषाघोषाल्पप्राणमहाप्राणोदत्तानुदात्तस्वरितभेदात्।' इति।

अनेनैव प्रकारेण महाभाष्यकारः शब्दानुशासनस्य लक्ष्यम् साधुशब्दोपदेशमुत्सर्गापवादन्यायेनाभिधत्ते। साधुशब्दज्ञानस्य महत्त्वम् निर्दिशन् भाष्यकारो वक्ति—'एकः शब्दः सम्यग् ज्ञातः सुष्ठु प्रयुक्तः स्वर्गे लोके च कामधुग्भवति।' इति। भगवता भर्तृहरिणाऽपि कथितम् वाक्यपदीये ग्रन्थे—'साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।' इति। अनेन वाक्येन शब्दसाधुत्वज्ञानाय व्याकरणशास्त्रस्यानिवार्यताऽभिहिता।

काव्यादर्शे महाकविर्दण्ड्यप्याह—

इदमन्धतमः कृत्स्नम् जायते भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥ इति।

एभिः सर्वैः वाक्यैरयमर्थः साधु प्रतिपादितो भवति यत् संस्कृतभाषायाः सम्यग् ज्ञानाय व्याकरणशास्त्रस्याध्ययनमनिवार्यं भवतीति। अतः केनचित्साधु अभिहितम्—

यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनः श्वजनो मा भूत् सकलं शकलं सकृत् शकृत्॥

मुखं व्याकरणम् स्मृतम्—येन प्रकारेण सत्स्वपि सर्वेष्वङ्गेषु विना मुखं मानवो जीवनधारणं कर्तुं क्षमो नहि भवति मुखस्य सर्वाङ्गेषु प्रधानत्वात्। तेनैव प्रकारेण व्याकरणशास्त्रमपि वेदपुरुषस्य मुखस्थानीयम् वर्तते। विना व्याकरणं वेदमन्त्राणाम् शुद्धमुच्चारणमसम्भवम्। अतएव पाणिनीयशिक्षायाम् तेषां तेषां शास्त्राणाम् वेदपुरुषस्याङ्गत्वकल्पनायाः प्रसङ्गे कथितम्—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।

ज्योतिषामयनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥ इति ।

व्याकरणस्य मुखस्थानीयत्वम् प्रतिपादयता शिक्षाकारेण तस्य वेदाङ्गेषु मुख्यत्वम् प्रतिपादितम् । येन प्रकारेण मुखेनैव द्वारा समग्रायाः वाण्या उच्चारणं सम्भवति तेनैव प्रकारेण व्याकरणशास्त्रेण शब्दानाम् शुद्धत्वज्ञानम्, तेषामुच्चारणस्य स्थानप्रयत्नयोर्विवेकश्च कर्तुं शक्यते ।

सकलजगद्धितानुशासनस्वरूपाणाम् सम्पूर्णं लौकिकालौकिकफलभोगस्याव्यभिचारिसाधनानामनुष्ठातृपुरुषस्य धर्मार्थकाममोक्षाख्यपुरुषार्थसम्पादकानां वेदानाम् शुद्धमुच्चारणमनिवार्यकार्यं वर्तते। वेदानामशुद्धोच्चारणस्यानिष्ठार्थप्रदत्वात् । तथा चोक्तम् महाभाष्यकारेण प्रथमाह्निके—

'मन्त्रो हीनः स्वरतो वर्णतो वा, मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

व्याकरणशास्त्रस्य विशालता—व्याकरणशास्त्रस्य प्राचीनता तु प्रशंसनीया वर्तते । सर्वप्रथमम् यदा हनुमतः सङ्गमोऽभूत् तदा हनुमद्वाक्शुद्धि वीक्ष्य भगवान् श्रीरामो लक्ष्मणं प्रत्याह—

'नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् ।
बहु व्याहरताऽनेन न किञ्चिदपशब्दितम् ॥' इति।

भगवतः श्रीरामस्य हनुमति महत्याः प्रीतेः कारणमासीत् व्याकरणशास्त्रस्य समुचितम् ज्ञानम्। अवैयाकरणस्तु बहु वार्तयन् नूनमशुद्धम् वक्ति । श्रीहनुमान् किम् व्याकरणमधीतवानिति तु अनुमानगम्यमपि नास्ति तथापि तस्मिन् काले किमपि व्याकरणम् नूनमासीत् प्रख्यातम् इति निश्चप्रचमेव ।

साम्प्रतम् येषां व्याकरणानाम् नामानि श्रूयन्ते तेषु व्याकरणेषु इमानि व्याकरणानि श्रूयन्ते—

'ब्राह्ममैशानमैन्द्रश्च प्राजापत्यं बृहस्पतिम् ।
त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टमम् ॥'

मतान्तरानुसारेण तु—

यस्मिन् व्याकरणान्यष्टौ निरूप्यन्ते महान्ति च ।
तत्राद्यं ब्राह्ममुदितं द्वितीयं चान्द्रमुच्यते ॥
तृतीयं याम्यमाख्यातं चतुर्थं रौद्रमुच्यते ।
वायव्यं पञ्चमं प्रोक्तम् षष्ठम् वारुणमुच्यते ।
सप्तमं सौम्यमाख्यातमष्टमं वैष्णवं तथा ॥ इति ।

वोपदेवस्त्वाह—

इन्द्रश्चन्द्रः काशकृत्स्नः पिप्पली शाकटायनः ।
पाणिन्यमरजैनेन्द्रा जयन्त्यष्टौ हि शाब्दिकाः ॥ इति ।

सारस्वतभाष्ये तु व्याकरणशास्त्रस्य विशालताया विषयेऽभिहितम्—

समुद्रवद् व्याकरणं महेश्वरे तदर्धकुम्भोद्धरणं बृहस्पतौ ।
तद्भागधेयाच्च शतं पुरन्दरे कुशाग्रविन्दूत्पतितं हि पाणिनौ ॥ इति ।

व्याकरणशास्त्रस्य महत्त्वम् प्रतिपादयता अभिहितम्—

'तद्द्वारमपवर्गाणां वाङ्मलानां चिकित्सितम् ।
पवित्रं सर्वविद्यानामधिविधं प्रकाशते ॥
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ।
अत्रातीतविपर्यासः केवलमनुपश्यति ॥' इति ।

अन्यत्राप्यभिहितम्—

नाङ्गीकृतव्याकरणौषधानामपाटवं वाचि सुगाढमस्ति ।
कस्मिंश्चिदुक्ते तु पदं कथंचित् स्वैरं वपुः स्विद्यति वेपते च ॥ इति ।

अतएव वाणीस्वरूपज्ञानाय, वर्णाभिव्यञ्जकस्थानज्ञानाय, प्रकृतिप्रत्ययज्ञानाय, कालज्ञानाय, प्रत्यभिवादने प्लुतकरणवर्णपदस्वनामाख्यातोपसर्गनिपातादीनां सम्यग् ज्ञानाय, अर्थज्ञानपूर्वकशब्दप्रयोगाय, अपशब्दप्रयोगजन्याधर्मनिवारणाय, वर्णस्वरदोषरहितशब्दप्रयोगाय, वेदार्थस्य सम्यग् ज्ञानाय चाध्येयम् व्याकरणम् ।

वक्रोक्तिसम्प्रदायः

संस्कृतवाङ्मये वक्रोक्तिशब्दस्य प्रयोगः अत्यन्तप्राचीनो वर्तते। अस्य शब्दस्य प्रयोगः अनेकेष्वर्थेषु कृतो वर्तते । वस्तुतो वक्त्रा उक्तिरेव वक्रोक्तिशब्दस्यार्थो वर्तते । साधारणानां जनानां कथनं प्रकारतो भिन्नः चमत्कारमयः कथनप्रकारो वक्रोक्तिरित्यभिधीयते । अस्याः वक्रोक्तेः सर्वप्रथमं कल्पना आचार्यो भामह अकार्षीत् । भामहमतानुसारेण वक्रोक्तिरतिशयोक्तेर्नातिरिच्यते । वक्रोक्तिरेव काव्यस्य मूलं वर्तत । तथा चाहाचार्यो भामहः काव्यालङ्कारे—

'सैषा सर्वत्र वक्रोक्तिरनयार्थो विभाव्यते ।
यत्नोऽस्यां कविना कार्यः कोऽलङ्कारोऽनया विना ॥' इति ।

काव्ये वक्रोक्तेरेवोपादेयतां स्वीकृत्य भामहः हेतु-सूक्ष्म-लेशाख्यानामलङ्कारान् नहि स्वीकरोति । तथाहि—

हेतुश्च सूक्ष्मो लेशोऽथ वालङ्कारतया मतः ।
समुदायाभिधानश्च वक्रोक्त्यनभिधानतः ॥

भामहोऽलङ्काराय वक्रोक्तेस्स्थितिमावश्यकीयां स्वीकरोति । तथाहि—

'वाचां वक्रार्थशब्दोक्तिरलङ्काराय कल्पते ।' इति

अभिनवगुप्तो भामहस्यैकं पदमुद्धृत्य वक्रोक्तेर्लक्षणमित्थं करोति—'शब्दस्य हि वक्रता अभिधेयस्य च वक्रता लोकोत्तीर्णेन रूपेणावस्थानम् ।'

आचार्यो दण्डी सम्पूर्णं वाङ्मयं द्वयोर्भागयोर्विभजति—स्वभावोक्तिः वक्रोक्तिश्च । स्वभावोक्तौ सर्वेषां वस्तूनां यथार्थकथनं क्रियते । आचार्यो दण्डी स्वभावोक्तिमेव जातिनाम्ना धम्मलङ्कारमभिधत्ते । वक्रोक्तौ चातिशयकथनं क्रियते । इत्यम् उपमादिका अर्थालङ्काराः रसवत्प्रेयादि रससम्बद्धाश्चालङ्काराः वक्रोक्तौ समाविशन्ति । दण्डीमतानुसारेण श्लेषस्य सत्तया वक्रोक्तिरतिशयचमत्कारयुक्ता भवति । तथाहि—

'श्लेषः सर्वासु पुष्णाति प्रायः वक्रोक्तिषु श्रियम् ।
भिन्नं द्विधा स्वभावोक्तिर्वक्रोक्तिश्चेति वाङ्मयम्' ।। इति ।

किन्तु भामहदण्डयोर्विचारेऽयम् भेदो विद्यते यत् भामहमतानुसारेण तु वक्रोक्तिः सर्वेषामलङ्काराणाम् मूलमस्ति किन्तु दण्डी स्वभावोक्तेश्क्षेत्रात् पृथक् स्वीचकार । यद्यपि वामनोऽपि वक्रोक्ति स्वीकृतवान् किन्तु वामनाभिमतायाः वक्रोक्तेः स्वरूपम् भासहाभिमतात् वक्रोक्तेर्नितराम् भिद्यते । भामहः वक्रोक्ति सर्वेषामलङ्काराणाम् मूलं स्वीकरोति किन्तु वामनः वक्रोक्तिम् अलङ्कारविशेषं स्वीकरोति । तन्मतानुसारेण वक्रोक्तिः सादृश्याश्रिता लक्षणा वर्तते । यद्यपि लक्षणाया अनेके आधाराः सन्ति किन्तु सादृश्यवशात् यत्र लक्षणा भवति तत्र वक्रोक्तिः भवतीति वामनाचार्यस्याभिप्रायः । तथाहि—

'सादृश्यलक्षणा वक्रोक्तिः ।
बहूनि हि निबन्धनानि लक्षणायाम् ।
तत्र सादृश्यात् लक्षणा वक्रोक्तिरसाविति ।
असादृश्य निबन्धना तु लक्षणा न वक्रोक्तिः ।।' इति ।

किन्तु रुद्रटः वक्रोक्तिम् शब्दालङ्कारविशेषं स्वीकरोति । कस्यचन वाक्यं श्रुत्वा श्रोता तस्य शब्दस्य भिन्नार्थं स्वीकृत्य यदाऽवांछितमुत्तरं ददाति, तदा तत्र वक्रोक्तिर्भवतीति प्राह रुद्रटः । रुटमतानुसारेण वक्रोक्तेर्निम्नांकितमुदाहरणं भवितुमर्हति—

'अहो केनेदृशी बुद्धिर्दारुणा तत्र निर्मिता ।
त्रिविधा श्रूयते बुद्धिर्न तु दारुमयी क्वचित्' ।। इति ।

किन्तु वक्रोक्तिसम्प्रदायस्य प्रवर्तकस्याचार्यस्य कुन्तकस्य तु वक्रोक्तिः सर्वेभ्यः रुद्रटादिभ्यो नितरां भिद्यते कुन्तकः वक्रोक्ति काव्यस्य जीवातुतत्त्वं स्वीकरोति । 'वैदग्ध्री भङ्गी भणितिः' इत्येव वक्रोक्तेर्लक्षणमस्ति इत्याह आचार्यः कुन्तकः ।

आचार्यः कुन्तकः काव्यस्यात्मारूपेण वक्रोक्ति स्वीचकार । अतएव तस्य ग्रन्थस्य

त्वप्राणाभूतस्यालङ्कारस्यैकं प्रकारमेव स्वीचक्रुः । रसवत्–प्रेयमूर्जस्विसमाहितेष्वलङ्कारेषु ते रसरसाभासादीनां सर्वाणि तत्त्वानि अन्तर्निविष्टानि कृतवन्तः । भामहः काव्येषु रसानाम् स्थितिमनिवार्यां स्वीकरोतिस्म । तथा चाह सः काव्यालङ्कारे—

युक्तं लोकस्वभावेन रसैश्च सकलैः पृथक् । इति ।

भामहो रसवत्प्रेयादिभिरलङ्कारैः रसस्य सर्वेषाम् विषयाणाम् स्वकीये ग्रन्थे उल्लेखमकरोत् । सः लिखति यत् शृङ्गारादिरसस्य स्पष्टरूपण प्रतीतिर्भवति तत्र रसवदलङ्कारो भवितुं नार्हति । तथाहि—

'रसवद् दर्शितस्पष्टः शृङ्गारादि रसं यथा ।
देवी समागमद् धर्ममस्करण्यतिरोहिता ॥' इति

काव्यादर्शकारो दण्डयपि रसवदलङ्कारान्तर्गतमेव अष्टानाम् रसानाम् अष्टानाञ्च स्थायिभावानाम् निर्देशमकरोत् । तथा चाह दण्डी—

'इह त्वष्ट रसायत्ता रसवत्ता स्मृता गिराम् ।
प्राक् प्रीतिर्दर्शिता ज्ञेयं रतिः शृङ्गारतां गता' ॥ इति ।

महाकविदण्डी माधुर्याख्ये गुणेऽपि रसस्यान्तर्भावं करोति । तथा चोक्तं दण्डिकविना—

मधुरं रसवद् काचि वस्तून्यपि रसस्थितिः ॥ इति ।

उद्भटः अपि रसवदलंकारस्य निरूपणावसरे स्थायिभावसंचारिभावप्रभृतीनाम् पारिभाषिकानाम् प्रयोगं कुर्वन् रसस्य नवप्रकारतां प्रत्यपीपदत् । तथा चोक्तं काव्यालङ्कारे उद्भटेन—

'रसवद् दर्शितस्पष्टः शृङ्गारादि रसादयम् ।' इति ।

रुद्रटोऽपि काव्यालङ्कारे लिखति यत् काव्ये रसस्य निवेशाय विशेषः प्रयासः कर्तव्य इति । तथाहि—

'तस्मात् तत् कर्तव्यम् यत्नेन महीयसा रसैर्युक्तम् ॥ इति ।

अनेन विवेचनेनायमर्थः स्पष्टो भवति यदलङ्कारवादिन आचार्याः स्वसिद्धान्तात् कथमपि च्युता नह्यभूवन् ।

अलङ्कारवादिनामाचार्याणां ध्वनिविषयकाः विचाराः—इमे आलंकारिकाः ध्वनेरपि अनभिज्ञाः नासन् । रुय्यकमतानुसारेण—भामहोद्भटप्रभृतयः आचार्याः प्रतीयमानम् (व्यङ्ग्यम्) अर्थम् वाच्यार्थस्य सहायकम् मत्वा तमलङ्कारान्तर्गतमेव स्वीचक्रुः । तथाहि—

'इह तावत् भामहोद्भटप्रभृतयश्चिरन्तनालङ्कारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतया मलङ्कारपक्षनिक्षिप्तं मन्यन्ते । इत्याह रुय्यकः अलंकारसर्वस्वे ।

एकावल्याः टीकाकारो मल्लिनाथः भामहादिकानाचार्यान् ध्वन्यभाववादिन आचार्यान् स्वीकरोति । परन्त्विदमनुचितमस्ति । यतो ध्वनिसिद्धान्तेन पूर्णतः परिचिताः सन्ति । यतस्तैः अप्रस्तुतप्रशंसा–समासोक्ति–आक्षेपान्तर्गतं प्रतीयमानस्यानेकान् प्रकारान् अन्तर्निवेशयामास ।

भामहः समासोक्त्यलङ्कारलक्षणे स्पष्टतया प्रतीयमानस्यार्थस्य सत्तां स्वीकुर्वन् प्राह—

'यत्रोक्ते गम्यतेऽन्योर्थस्तत्समानविशेषणः ।
सा समासोक्तिरुद्दिष्टा संक्षिप्तार्थतया यथा ॥' इति ।

पर्यायोक्तालङ्कारलक्षणेऽप्याह भामहः—

'पर्यायोक्तं यदन्येन प्रकारेणाभिधीयते ।
वाच्यवाचकवृत्तिभ्यां शून्येनावगमात्मना' ॥ इति ।

अलङ्कारसम्प्रदाये प्रतीयमानस्यार्थस्य विवेचनस्याभावमेव तीव्रतयाऽनुभूयैव रुद्रटः भावनामकस्यालङ्कारस्य नवीनतया कल्पनां चकार । भावस्योदाहरणञ्चास्ति—

'ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया' ॥ इति ।

अतएवालङ्कारसम्प्रदाये प्रतीयमानस्यार्थस्य सत्ता नूनमस्ति परन्तु तस्मिन् सम्प्रदाये प्रतीयमानस्यार्थस्य प्रधानतया स्थितिर्नास्ति, अपि तु स एवार्थो गौणो वर्तते ।

रीतिसम्प्रदायः

रीतिमतस्य प्रधानप्रतिपादकः आचार्यो वामनोऽस्ति । यद्यपि दण्डयपि रीतेः समर्थनम् विपुलम् चकार किन्तु भामहस्यैतस्मिन् विषये प्रयासः सर्वथा श्लाघनीयो वर्तते । वामनेन तु स्पष्टतया प्रतिपादनं चकार यत् रीतिरात्मा काव्यस्येति ।' तस्याः रीतेः स्वरूपं निरूपयन् वामनः प्राह—'विशिष्टा पदरचना रीतिः । विशेषो गुणात्मा ।' इति । एतस्मादेव कारणात् रीतिसम्प्रदायः गुणसम्प्रदायस्य नाम्नाऽप्यभिधीयते ।

गुणानां सर्वप्रथमं वर्णनं भरतमुनिरकार्षीत् । सः नाटचशास्त्रे दशप्रकारकाणां काव्यार्थगुणानां वर्णनमकरोत् । तथाहि—

'श्लेषः प्रसादः समता, समाधिः माधुर्यभोजः पदसौकुमार्यम् ।
अर्थस्य व्यक्तिरुदारुता च, कान्तिश्च काव्यार्थगुणाः दशैते ॥' इति ।

यद्यपि भरतमुनिनिर्दिष्टान् गुणान दण्डयपि स्वीचकार किन्तु तेषां स्वरूप-

निरूपणविषये दण्डि तम् भरतमताद्भिद्यते । दण्डी गुणेषु शब्दगतत्वरूपमथवाऽर्थगतत्वरूपम् भेदं नहि स्वीचकार। दण्डी इमान् गुणान् वैदर्भमार्गस्य प्राणभूतान् स्वीकृतवान् । तथा चाह आचार्यो दण्डी—

'इति वैदर्भमार्गस्य प्राणाः दशगुणाः स्मृताः ।
एषां विपर्ययः प्रायो दृश्यते गौडवर्त्मनि' ॥ इति ।

वामनोऽपि इमान् भरतमुनिप्रोक्तान् स्वीचकार । वामनमतानुसारेण गुणा द्विविधा भवन्ति—शब्दगता अर्थगताश्च । अस्मिन् विभाजने गुणानाम् नामसु तु भेदो नास्ति किन्तु तेषां स्वरूपकल्पनायां पर्याप्तं पार्थक्यम् वर्तते । यदा शब्दगताः गुणाः अर्थगताः भवन्ति तदा तेषां स्वरूपे महत् परिवर्तनं भवति । यथा—शब्दगतस्य माधुर्यस्य स्वरूपमस्ति पृथक् पदत्वमिति । तदेव यदि अर्थगतं भवति तदा तस्य स्वरूपमस्ति—उक्ति वैचित्र्यमिति । अर्थगतस्य माधुर्यस्योदाहरणमस्ति निम्नांकितम्—

'रसवदमृतं कः सन्देहो मधून्यपि नान्यथा,
मधुरमधिकं चूतस्यापि प्रसन्नरसं फलम् ।
सकृदपि पुनर्मध्यस्थः सन् रसान्तरविद् जनो,
वदतु यदिहान्यत् स्वादु स्यात् प्रियदशनच्छवत् ॥'

गुणानाम् विषये वामनस्य मतम् अन्येभ्य अलङ्कारिकेभ्यो मान्यं नह्यभूत् । भामहः वामनात् पूर्वमेव दशगुणानाम् स्थाने त्रीन् गुणान् स्वीचकार । मम्मट-हेमचन्द्र-विश्वनाथादिकाः अपि त्रीन् गुणान् स्वीचक्रुः । ओजःप्रसादमाधुर्येष्वेषु तद्व्यतिरिक्तानाम् समेषाम् अर्थगुणानाम् शब्दगुणानाञ्चान्तर्भावो भवति । वामनस्य मतस्यावलम्बनं तु केवलं भोजराज एवाकरोत् । भोजराजः गुणान् त्रीन् भेदान् स्वीकरोति—बाह्यगुणाः, अन्तरगुणाः वैशेषिकाः गुणाश्च । भोजराजः चतुर्विंशतिगुणान् स्वीकरोति स्म । सरस्वतीकण्ठाभरणनामके ग्रन्थे—

रीतेः प्राचीनं नाम मार्ग आसीत् । वैदर्भमार्गः काव्यस्य रमणीयो मार्ग आसीत् गौडीयो मार्गश्चैको निन्दनीयमार्ग आसीत् । किन्तु भामहः स्वतन्त्रमार्ग्याचार्य आसीत् । भामहः प्राह यदस्माभिः न तु वैदर्भमार्गस्य प्रशंसा करणीया न वा गौणीयमार्गस्य निन्दा करणीया; अपित्वस्माभिः काव्यस्य गुणेष्वेव ध्यानं देयम् । ते च काव्यस्य शोभनगुणाः वक्रोक्तिसम्पन्नता, पुष्टार्थकता, अग्राम्यतादिकाश्च सन्ति । तथा चाह सः—

'अलङ्कारवदग्राम्यमर्थ्यं न्याय्यमनाकुलम् ।
गौडीयमपि साधीयो वैदर्भीमिति नान्यथा' ॥ इति ।

वामनो दण्ड्यपेक्षया कल्पना अतीव दृढाधारेऽकार्षीत् । काव्यस्यात्माऽन्वेषणप्रयासे सोऽवादीत्—रीतिरात्मा काव्यस्येति । वैदर्भी, गौडी, पाञ्चालीति तिस्रः रीतीः स्वीचकार वामनः ।

वैदर्भ्यां रीतौ दश गुणानां सत्ता विद्यमाना भवति। गौड़ीयायां रीतौ कान्त्योजोनामकौ गुणौ भवतः। पाञ्चाल्यां च माधुर्यसौकुमार्यनामकौ गुणौ भवतः इति प्राह वामनः। राजशेखरः कर्पूरमञ्जर्याम् वैदर्भी-पाञ्चाली मागधीति तिसृः रीतीः स्वीकृतवान्, रुद्रटः चतुर्थीं लाटीयामपि रीतिं स्वीकृतवान्। भोजराजः षड् रीतीः स्वीकृतवान्।

वामनेऽलङ्कारान् गुणेभ्यः पृथङ्मत्त्वा तेषां व्याख्यां चकार। वामनः सर्वानऽलङ्कारानुपमाप्रपञ्चनाम्नाऽभिहितं चकार। एतस्मादेवकारणात् वामनकृतानि केषाञ्चनालंकाराणाम् भिद्यन्ते। इदमेव नहि-वामन-पर्यायोक्त-प्रेयो-रसवदुर्जस्वि-उदात्त-भाविक-सूक्ष्माख्यानलंकारान अलङ्कारस्य कोटित एव बहिश्चकार। वामनस्य वक्रोक्त्यलङ्कारस्सादृश्यमूलको वर्तते। वामनस्य विशेषोक्तिः जगन्नाथस्य रूपकान्नहि भिद्यते। वामनस्याक्षेपालंकारः मम्मटस्य प्रतीपात् साम्यं विभर्त्ति च।

रीतेर्महत्त्वम्—अलङ्कारसम्प्रदायापेक्षया रीतिसम्प्रदाये काव्यस्याधिको विकासो बभूव। काव्यस्य मूलरूपविवेचने रीतिसम्प्रदायो महनीयः प्रयासो दृश्यते। अतएवानन्दवर्धनाचार्यः वामनाचार्यं निर्दिशन्निव प्राह ध्वन्यालोके—

'अस्फुटस्फुरितं काव्यतत्त्वमेतत् यथोदितम्।
अशक्नुवद्भिर्व्याकर्तुं रीतयः सम्प्रवर्तिताः॥' इति

अस्याः कारिकाया अभिप्रायो वर्तते यत् रीतिसम्प्रदायस्य निरूपणे काव्यतत्वम् स्फुरितं तु जातम् किन्तु तेन प्रकारेण नहि स्फुरितं येन प्रकारेण ध्वनिसम्प्रदाये।

भामहः गुणालङ्कारयोर्भेदं नहि प्रदर्शयामास। किन्तु दण्डी तु सकलान् काव्यशोभाकरान् धर्मानलङ्कारशब्देन व्याहृतं चकार किन्तु आचार्यो वामनस्त्वाह—

'काव्यशोभायाः कर्तारो धर्माः गुणाः; तदतिशयहेतवस्त्वालंकारा—' (काव्यालङ्कारः ३।१।१–२) अतएव वामनाचार्यस्य मतानुसारेण महत्त्वमधिकं वर्तते तेषां काव्यशोभाकरत्वात्। ते च गुणाः नित्याः सन्तिः तैर्विना काव्यशोभानुपपत्तेः। काव्यस्यावश्यकाः धर्माः गुणाः सन्ति। गुणयुक्तं काव्यं काव्यस्य महनीयया पद्धत्या मण्डितं भवति। काव्ये गुणानां महत्त्वं प्रतिपादयन्नाचार्यो वामन आह—

'यदि भवति वचश्च्युतं गुणेभ्यो, वपुरिव यौवनवन्ध्यमङ्गनायाः।
अपि जनदयितानि दुर्भगत्वं नित्यतमलंकरणानि संश्रयन्ते॥ इति

रीतिसम्प्रदायस्याचार्याणां रसविषयको विचारः—अलङ्कारसम्प्रदायापेक्षया रीतिसम्प्रदायस्याचार्याणां रसविधानविषये महनीयः प्रयासो दृश्यते। भामहा-

दिका आचार्याः रसं काव्यस्य बहिरङ्गं साधनमभ्युपगच्छन्ति, किन्त्वाचार्यो वामनः रसं काव्यस्यान्तरङ्गं साधनमभ्युपगच्छति। वामनानुसारेण रसः कान्तिरूपेण काव्ये आयाति। दीप्तरसत्वमेव कान्तेर्लक्षणम्। यत्रोद्दीप्ताः शृङ्गारादिकाः रसः काव्ये समाविशन्ति तत्र जायन्ते कान्तिगुणाः। गुणाभ्यन्तरेव रसस्य विधानात् वामनाचार्यः रसवदादिकानलङ्कारान् अलङ्कारकेष्बहिश्चकार। अविवक्षितवाच्यध्वनेदरन्तर्भावश्च वामनस्य वक्रोक्तौ जायते।

यद्यपरवर्तिन आचार्याः रीतेः काव्यात्मत्वं नहि स्वीचक्रुः अथापि सर्वैरेवाचार्यैः रीतिम् काव्यस्योपादेयं तत्वम् स्वीकुर्वन्ति। ध्वनिवादिन आन्याचार्याः रीतिं स्वीकृतवन्तः।

यद्यपि रीतीनां नामानि भौगोलिकाधारेण कृतानि सन्ति किन्तु आचार्यः कुन्तकः आसां रीतीनां नवीनानि कृत्वा तासां नवीनानां गुणानामपि कल्पनामकरोत्। तथाहि—वैदर्भी रीतेर्नाम—सुकुमार्गमकरोत्। गौड़ीरीतेर्नाम विचित्रमार्गमकरोत्। पाञ्चालीरीतेर्नाम मध्यममार्गमकरोत् आचार्यः कुन्तकः।

एतदेव नहि पाश्चात्या अपि आलोचकाः रीतेर्महत्त्वं स्वीकृतवन्तः।

रससम्प्रदायः

रससम्प्रदायस्य प्रथमः प्रवर्तकः को वर्तत इति तु इदमित्थन्तया वक्तुं यद्यपि नहि शक्यते। अथापि राजशेखरस्य मतानुसारेण ब्रह्मण उपदेशमवाप्य सर्वप्रथमं नन्दिकेश्वरः रसस्य निरूपणमकरोत्। परन्तु साम्प्रतम् एतस्मिन् विषये किमपि प्रमाणम् नहि समुपलभ्यते। उपलब्धस्य रससिद्धान्तस्य तु संवन्धः भरतमुनिना साकं वर्तते। भरत एव रसस्य सर्वप्रथमः सर्वश्रेष्ठश्चाचार्यो वर्तते। नाटचशास्त्रस्य षष्ठसप्तमाध्याययोः समुपलभ्यमानम् रसस्य वैज्ञानिकं विवेचनम् साहित्यसंसारेऽपूर्वं वस्तु विद्यते। यतो भरतमुनेरुद्देश्यम् नाटचस्यैव निरूपणमासीदत एव सः नाटचरसस्यैव विस्तारेण विवेचनमकरोत्। इत्थं सर्वप्रथमं रसस्य निरूपणम् नाटचस्यैव प्रसङ्गे समुपलभ्यते तदनन्तरमालंकारिकाः काव्यविषयकस्य रसस्य निरूपणस्य प्रथमं समकार्षुः।

रससम्प्रदायस्य मूलभूतम् सूत्रम्—विभावानुभावसंचारिसंयोगाद्रसनिष्पत्ति' रस्ति। यद्यपि भरतमुनिरस्य सूत्रस्यातिसरलां भाष्यमकरोत् किन्तु पश्चात्तनिका आचार्या अस्य सूत्रस्य व्याख्यायाम् महान्तमायासं प्रदर्शयामासुः। अस्य रससूत्रस्य व्याख्यातृषु—भट्टलोल्लट—भट्टशंकुक—भट्टतौत—भट्टनायकाभिनवगुप्तपादानाम् नामानि प्रख्यातानि सन्ति। अतएवैतेषां मतानाम् संक्षिप्तं विवेचनमधस्तात् प्रस्तूयते—

(क) भट्टलोल्लटमतम्—भट्टलोल्लटः रसस्य विषये उत्पत्तिवाद्याचार्यो

वर्तते । एतन्मतानुसारेण मुख्यरूपेण रसस्य संवन्धः नायकेन साकं भवति । रामायणे रामः सीताया विषयेऽनुरक्तमना वर्तते। अतएव सीतामवलोक्य रामस्य मनस्येको मनोज्ञो भाव उत्पद्यते । स एवानुकूलपरिस्थितौ परिपोषं लब्धस्सन् स्नेहरूपतामाप्नोति । अस्या एव घटनाया वर्णनं कविः काव्ये करोति । तस्यैवाभिनयः रङ्गे क्रियते । मुख्यतया रामे उत्पन्न एव रसरामानुकरणकर्तरि नटेऽप्युत्पद्यते । अस्मिन् रसोत्पत्तौ विभावानुभावसंचारिभावः समुदितरूपेण कारणतां यान्ति । विभावेन द्वारा सहृदयहृदये स्थायिभावः अंकुरितो भवति । विभावस्य द्वौ भेदौ भवतः आलम्बनविभावः उद्दीपनविभावश्च । नायकनायिके शृङ्गाररसस्यालम्बनविभावस्वरूपे स्तः । वसन्तर्तु–पुष्पवाटिका–मलयानिलादिकाः तस्योद्दीपनविभावाः भवन्ति ।

अनुभावयतीति व्युत्पत्त्यनुसारेण येन द्वारा द्रष्टारः श्रोतारश्चाङ्कुरितस्य रसस्यानुभवं कुर्वन्ति स अनुभाव इत्यभिधीयते । यथा—कटाक्षविक्षेपाश्रुप्रवाहवैवर्ण्यरोमाञ्चादिकाः ।

स्वसत्तया स्थायिभावपरिपोषकः आगमापायी भावविशेष एव संचारीत्यभिधीयते। एतेषां त्रयाणां संयोगाद्रस उत्पद्यते। परन्त्वेतेषां त्रयाणामपि रसं प्रतिकारणता भिन्न-भिन्नस्वरूपा वर्तते। तथाहि—विभावः रसमुत्पादयति, अनुभावो रसं प्रतीतिगम्यं करोति। संचारिभावश्च रसं पोषयति। सूत्रस्थस्य निष्पत्तिशब्दस्यार्थः उत्पत्तिरूपो वर्तते । मुख्यतया रसः अनुकार्ये उत्पद्यते किन्तु अनुकार्यस्य रूपानुसन्धानादेव रसः नटादिष्वपि प्रतीयते ।

भट्टलोल्लटस्यास्मिन् सिद्धान्ते अयं मुख्यो दोषो विद्यते यदनेन मतेन दर्शकाभिनययोः संबन्धस्य व्याख्या नहि क्रियते। यदि रसः अनुकार्ये एव उत्पद्यते तर्हि तस्य रसस्य सहृदयेन सहसः संवन्धो वर्तते । निष्प्रयोगं तु सहृदयस्य काव्यनाट्ययोः प्रवृत्तिर्भवितुं नार्हति । किञ्चातीतकालिकानां रामसीताप्रभृतीनां वर्तमानेनाभिनयेन साकम् कोऽपि संवन्धोऽपि भवितुं नार्हति। किञ्चानुकार्यानुकर्तरि यदि नटेऽपि रस उत्पद्यते तदापि तेन साकम् सहृदयस्य संबन्धो भवितुं नार्हति। भट्टलोल्लटस्य मतस्येमानेवंदोषानपाकर्तुं भट्टशंकुकः रससूत्रस्य स्वमतानुसारेण व्याख्यामकरोत् ।

(ख) भट्टशंकुकमतम्—भट्टशंकुकः रसस्य विषयेऽनुमानवादी वर्तते। सः रसमनुमानविषयम् स्वीकरोति । शंकुकमतानुसारेणाभिनयकलाचतुरः काव्यनाट्ययोर्व्युत्पन्नेऽभिनेतानाट्यस्य मूलपात्राणामभिनयं तेन प्रकारेण करोति, येन दर्शकाः तेन प्रकारेणानन्दमानाः भवन्ति, येन ते नटमेव रामाभिन्नं जानन्ति। सा चाभिन्नता चित्रं तु सान्यायाश्रिता वर्तते । यथाचित्रलिखितः तुरगः वस्तुतस्तुरगो नास्ति, अथापि सः तुरगादभिन्न एव प्रतीयते। अनेन प्रकारेण रामानुकारी नटोऽपि रामाद् भिन्नाभिन्न एव। अतएव रामो यो हि रसो वस्तुत उत्पद्यते स एव रसः अभिनयनिपुणे

नटेऽनुमीयते । सहृदयसमुदायः अस्य रसस्यानुमानं करोति श्रीशंकुकमतानुसारेण रससूत्रस्थस्य संयोगात् पदस्यार्थः अनुमानात् वर्तते, निष्पत्तिशब्दस्य चार्थेऽनुमिति वर्तते ।

नैयायिकैः क्रियमाणमनुमानम् नीरसं शुष्कं च भवति किन्तु श्रीशंकुकेन क्रियमाणमनुमनाम् आनन्दोत्पादकं भवति। अनुमानकर्तारो दर्शका अपि तेनानन्दानुभवं कुर्वन्ति । श्रीशंकुकमतानुसारेण रसोऽनुकरणरूपो भवति ।

श्रीशंकुकस्यास्य मतस्य भट्टतौतः विस्तारपूर्वकं खण्डनमकरोत् अभिनवभारत्यामभिनवगुप्तपादाचार्यः स्वगुरुं भट्टतौतं श्रीशंकुकमतस्य प्रवलविरोधिनमाह । श्रीभट्टतौतमतानुसारेण, रसस्य निर्वाहः केनापि प्रकारेण अनुमानान्तर्गतं भवितुं नार्हति । अनुमानम् हेतुविशुद्धिमाश्रयति किन्तु रसोन्मीलनावसरे हेतोस्सत्ता यद्यपि भवति तथापि तदा तस्य शास्त्रीया शुद्धिर्नहि भवति। यथार्थानुमान सिद्धये हेतोः त्रिरूपताऽनिवार्या भवति ।

अस्मिन् मते महती त्रुटिरियं वर्तते यदनुमानम् केनापि प्रकारेणानन्दप्रदं नहि भवति । अनुमानस्य प्रयोगतस्तु तत्त्वबोधाय भवति । अतएव रसोऽनुमानस्य विषयः केनापि प्रकारेण भवितुं नार्हति ।

किञ्च—नटप्रदर्शितैर्विभावानुभावसञ्चारिभावैः सहृदयः यस्य रसस्यानुमानं करोति, स तु मूलतया नटे एव भवति । दर्शकः अनेनानुमानेन किमपि आनन्दानुभवं नहि करोति ।

(ग) भट्टनायकस्य मतम्—भट्टनायकः रसस्य व्याख्यायां दर्शकस्य महत्त्वं स्वीचकार । भट्टनायकः न तु रसस्य उत्पत्तिं स्वीकरोति, नवानुमितिं स्वीकरोति; न वा अभिव्यक्तिं स्वीकरोति, अपि तु सः रसस्य भुक्तिं स्वीकरोति । अतएवायं रसस्य विषये मुक्तिवाद्याचार्यो वर्तते । काव्ये व्यापार एव मुख्यो भवति । अस्य व्यापारस्य त्रीणि रूपाणि भवन्ति—अभिधा, भावकत्वम्, भोजकत्वञ्च । अभिधा द्वारा शब्दः अर्थं वोधयति । भावकत्वस्यार्थः साधारणीकरणम् वर्तते । साधारणीकरणेन द्वारा नाट्येऽभिनीतस्य पात्रस्य व्यक्तिगतं वैशिष्ट्यं विहाय, विस्मृत्य च तस्यैतिहासिकताम् सामान्यरूपेण तस्य ग्रहणं भवति । शब्दस्य भोजकत्वव्यापारेण द्वारा सहृदयः रसस्य भोगं करोति । अस्मिन्नवसरे तस्य राजसाः तामसाश्च भावाः तिरोभवन्ति उदेति च शुद्धः सात्त्विको भावस्तस्मिन् । सात्त्विकभावोदये संजाते सत्येव रसमुक्तेः दशायाति । अस्य मतानुसारेण संयोगात् पदस्यार्थः भोज्यभोजकभावादथवा भाव्यभावकभावादस्ति । निष्पतिशब्दस्य चार्थे मुक्तिर्वर्तते ।

भट्टनायकः अस्यां स्वव्याख्यायां दर्शकस्य दृष्ट्या रससूत्रस्य व्याख्यां करोति । भट्टनायककृतेयं रससूत्रस्य व्याख्या मनोवैज्ञानिकव्याख्यानुकूला वर्तते ।

परन्त्वस्यां व्याख्यायां महान् दोषोऽयं वर्तते च तत्र शब्दस्य त्रिविधव्यापारस्य कल्पनास्वमनोनुकूल्या विद्यया वर्तते । यद्यपि अभिधा व्यापारस्तु सर्वसम्मतो वर्तते । किन्तु भोजकत्वभावकत्वव्यापारयोः कृते कश्चनापि आधारो नास्ति । स्वेच्छया शब्दव्यापारस्य कल्पना प्रामाणिकी भवितुं नार्हति ।

(घ) अभिनवगुप्तपादाचार्यस्य मतम्—अभिनवगुप्तपादाचार्यः रसस्य विषये व्यञ्जनावाद्याचार्यो वर्तते । अस्य मतस्यानुसारेण सूत्रस्थस्य 'संयोगात्' पदस्यार्थः व्यङ्ग्यव्यञ्जकभावात् वर्तते, निष्पत्तिशब्दस्य चार्थः अभिव्यक्तिर्वर्तते । अभिनवमतानुसारेण सर्वेषां सहृदयानां हृदये रतिशोकक्रोधादिकाः स्थायिभावाः वासनारूपेण तिष्ठन्ति । वासनेयं पूर्वजन्मसंस्कारवशात् वर्तमानजन्मनो वा काव्यादिसेवनवशात् । विभावानुभावसञ्चारिभावैः स्थायिभावनामभिव्यंजना भवति । इमे भावाः सामान्यरूपेण गृह्यन्ते । ललितवस्तूनां गुणग्रहणकाले प्रत्येकस्य पदार्थस्य सामान्यरूपेण संवन्धरहितरूपेण च भवति ग्रहणम् । तथा विधानां वस्तूनां ग्रहणे स्वत्वपरत्वममत्वादिकानां संवन्धो न भवति । रसोद्‌वोधकानां समेषां भावानामपि सामान्यरूपेण ग्रहणं भवति । रसानुभवकाले सहृदयः स्वमपि सामान्यरूपेण गृह्णाति सो जानाति यत् सर्वेषां सहृदयानां हृदयेषु समानरूपेण रसानुभूतिर्जायते ।

सोऽयं रस आनन्दस्वरूपो वर्तते । करुणादावपि आनन्दस्वरूपरसानुभवात् सहृदयानाम् करुणादावपि रसे जायते रसानुभूतिः ।

रसानाम् संख्या—भरतमुनिः—शृङ्गार-हास-करुण-रौद्र-वीर-भयायकबीभत्साद्भुतान् अष्टौ रसान् स्वीकरोति । भरतधनञ्जयौ काव्ये शान्तरसस्य स्थितिं नहि स्वीकरोति । किन्तु आनन्दवर्द्धनाचार्यः महाभारतस्य मुख्यरसम् शान्तमेव स्वीकरोति । रुद्रटः प्रेयान् नामकं दशममालंकारं स्वीकरोति ।

साहित्यशास्त्रे रसमत्त्वस्य महत्त्वं वर्तते । ध्वनिवादिन आचार्याः रसस्य काव्येऽत्यधिकं महत्त्वं स्वीकुर्वन्तिः । ध्वनेस्त्रयः प्रकारा भवन्ति—वस्तुध्वनिः अलंकारध्वनिः रसध्वनिश्च । एतेषु त्रिप्रकारकेषु ध्वनिषु रसध्वनिरेव मुख्यो ध्वनिर्वर्तते ।

भोजराजः सम्पूर्णवाङ्मयं भागत्रये विभक्तवान् स्वभावोक्तिवक्रोक्ति-रसोक्तीनां भेदात् । भोजराजोऽपि एतेषु त्रिषु रसोक्तिमेव प्रधानम् स्वीकरोति । साहित्यदर्पणकारोऽपि रसवाद्याचार्यो वर्तते । सः प्राहाऽपि—'वाक्यं रसात्मकं काव्यमिति' । साहित्यदर्पणकारः 'रस्यते इति रसः' इति व्युत्पत्त्यनुसारेण आनन्दप्रदत्वात् रसभासभावाभासानपि रसान्तर्गतमेव स्वीचकार ।

रुद्रभट्टोऽपि रसभावं काव्यात्मानं स्वीकरोति । 'वाग्वैदग्धचप्रधानेऽपि रसएवात्रजीविकम्' इति वाक्यानुसारेण रसस्यैव प्राधान्यं स्वीकरोति अग्निपुराण-

कारः । अलंकारशेखरकारकेऽप्याह—'अलङ्कारस्तु शोभायां रस आत्मा परे मतः ।' इति ।

वेदाङ्गानां महत्वम्

अथवा—षडङ्गो वेदोऽध्येयो ज्ञेयश्च ।

अथवा—षट्शास्त्राणि ।

ऋग्यजुस्सामाथर्वसु चतुर्षु एव वेदेषु वेदशब्दस्य समानरूपेण भवति प्रयोगः । त इमे वेदाः समग्रस्यार्थस्य शास्त्रस्य मूलभूताः सन्ति । तत्र धार्मिकाणां वैदिकानां क्रियाकलापानां प्रतिपादकाः ब्राह्मणग्रन्थाः अरण्यकग्रन्थाश्च सन्ति, ब्रह्मज्ञानस्य प्रतिपादिकाः उपनिषद् ग्रन्थाः सन्ति; सामाजिकव्यवस्थायाः निश्चितरूपेण निर्णायकान्निकल्पसूत्राणि सन्ति, भाषाविज्ञानस्य प्रतिपादकानि च सन्ति शिक्षा–व्याकरण-छन्दोनिरुक्तानि, शुभाशुभकालस्य च निर्णायकमस्ति ज्योतिश्शास्त्रम् । इमानि सर्वाणि शास्त्राणि वेदादेवोद्भुतानि सन्ति ।

तत्र मुण्डकोपनिषदि परापरयोर्विद्ययोः वर्णनं समुपलभ्यते । चत्वारो वेदाः ऋग्यजुस्सामाथर्वाख्याः शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतींषि चापराविद्यान्तर्गतानि सन्ति । उपनिषत्सु एव पराविद्या वर्णिता वर्तते । तथा चाह श्रुतिः—

'तस्मै होवाच द्वे विधे वेदितव्ये इति ह स्म
यद् ब्रह्मविदो वदन्ति पराचैवा परा च ।
तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः
शिक्षाकल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति ।
अथ परा यया तदक्षरमधिगम्यते । इति

षण्णां वेदाङ्गानां निर्माणेन भारतीयसाहित्यस्य विकासे एकस्य नवीनस्य युगस्य प्रारम्भो भवति । इमे वेदाङ्गा एव षट्शास्त्रशब्देनाभिधीयन्ते । तानि च षट् शास्त्राणि–शिक्षा–कल्प–व्याकरण–निरुक्त–छन्दोज्योतींषि सन्ति । तथा चोक्तम्—

'शिक्षा कल्पोऽथ व्याकरणं निरुक्तं छन्दसां च यः ।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु ॥'

पाणिनीयशिक्षायाम् एकस्य रूपकस्य माध्यमेन तेषां तेषां वेदाङ्गानां तत्तदवयवत्वं कल्पितम् वर्तते—

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते ।
ज्योतिषामयनं चक्षुर्निरुक्तम् श्रोत्रमुच्यते ।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥' इति

एतेषाम् समेषाम् षण्णां शास्त्राणाम् महत्त्वम् अवस्तात् शास्त्रक्रमानुसारेणवर्ण्यते ।

शिक्षाशास्त्रस्य महत्त्वम्—येन प्रकारेण वैदिकानां सम्पादनाय ब्राह्मणग्रन्थानामुपयोगिता स्वीक्रियते, तेनैव प्रकारेण वेदिकानाम् मन्त्राणामुच्चारणविधिकानपि शिक्षाशास्त्रस्यापि ज्ञानमनिवार्यम् वर्तते । वेदस्य पाठे स्वराणाम् यथार्थज्ञानमावश्यकं वर्तते । स्वरदोषयुक्तो वेदपाठः कुपरिणामप्रदो भवति । ऋक् प्रातिशाख्येऽपि वर्णानाम् स्थानप्रयत्नयोः विवेचनम् कृतम् वर्तते । साम्प्रतम् समुपलभ्यमाने पाणिनीयशिक्षाग्रन्थे वर्णोच्चारणविषये विशदं विवेचनं समुपलभ्यते । तथा चोक्तं पाणिनीयशिक्षायाम्—

'एवं वर्णाः प्रयोक्तव्या नाऽव्यक्ताः न च पीडिताः ।
सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते ॥
सुतीर्थादागतं व्यक्तं स्वाम्नातं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥

व्याकरणमहाभाष्यकारः पतञ्जलिर्वक्ति—'एकः शब्दः सम्यग् ज्ञातः सुष्ठुप्रयुक्तः स्वर्गे लोके च कामधुग्भवति ।

धर्मव्याख्याकारो महर्षिर्याज्ञवल्क्यो वक्ति वेदाध्यापनकाले गुरुभिरुच्चारणशुद्धताया विषये ध्यानं देयम् । अतएव वेदाध्यापनप्रक्रियाया विषये आह महर्षिः याज्ञवल्क्यः—

'अभ्यासार्थे द्रुतां वृत्तिं प्रयोगार्थे च मध्यमाम् ।
शिष्याणामुपदेशार्थम् कुर्याद् वृत्तिं विलम्बिताम् ॥ इति ।

वेदोच्चारणस्याशुद्धिरनिष्टफलप्रदा भवतीति प्रतिपादयन् निरुक्तकारो यास्कोऽप्याह—

'मन्त्रहीनो स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥ इति

वेदमन्त्राणां स्वरज्ञानाय शुद्धोच्चारणाय च शिक्षाशास्त्रस्य निर्मितिः सञ्जाता । व्याकरणशास्त्रानुसारेण स्वरस्य त्रयो भेदा भवन्ति—उदात्तोऽनुदात्तः स्वरितश्चेति । इमान् स्वरान् परिभाषमाणो भगवान् पाणिनिराह—'उच्चैरुदात्तः' 'नीचैरनुदात्तः' 'समाहारः स्वरितश्च' इति ।

इत्थं ध्वनीनामवरोहावरोहौ, उच्चारणस्य शुद्धिश्च शिक्षाशास्त्रस्य विषयाः सन्ति । सामान्यतः शिक्षाशास्त्रस्य विषयाः वर्ण–स्वर–मात्रा–बल–साम–सन्तानाः सन्ति । तथा चोक्तम् शिक्षावल्ल्याम् तैत्तिरीयोपनिषदि ।

'वर्णः स्वरः मात्रा बलम्, साम सन्तानः । इत्युक्तः शिक्षाध्यायः'

इति । एतेषां समेषां व्याख्या पाणिनीयशिक्षायाम् व्याख्यां कुर्वन् महर्षिः पाणिनिराह—

'माधुर्यमक्षमव्यक्तिः पदच्छेदस्तु सुस्वरः ।
धैर्यलयं समर्थ च षडेते पाठकागुणाः ॥ इति

अयमाशयो यत् वर्णः आकारादिः, स्वराः = उदात्तानुदात्तस्वरितरूपाः । मात्राः = ह्रस्वतीर्दप्लुताः वलम्—स्थानप्रयत्नौ साम = साम्येन विधिना माधुर्यादिगुणसमन्वितवर्णोच्चारणम्, सन्तानः = संहितापाठमनुसृत्य सन्धिनियमानुकूलः पदप्रयोगः ।

साम्प्रतम् द्वात्रिंशत् संख्याकाः शिक्षाग्रन्थाः समुपलभ्यन्ते । ते च—याज्ञवल्क्यशिक्षा, व्यासशिक्षा, नारदशिक्षा, माण्डूकी शिक्षा, भारद्वाजशिक्षा, शौनकीयशिक्षा, आपिशालिशिक्षा इत्यादिकाः सन्ति ।

(१) कल्पसूत्राणि—महर्षिः पाणिनिकल्पसूत्राणि वेदपुरुषस्य हस्तौ प्राह । कल्पसूत्रेषु विविधानां यज्ञानाम् संस्कारादीनां च वर्णनं कृतम् वर्तते । तन्त्रमन्त्राणां विविधकर्मसु विनियोगोऽपि निर्दिश्यते कल्पशव्दस्य सामान्योऽर्थः विधिः–नियम–न्यासः–कर्मांशाः सन्ति अर्थाः । कल्पसूत्राणां प्रधानविषयाः सन्ति कर्मणाम् प्रतिपादनम्, संस्काराणां व्याख्या यज्ञविधानवर्णनञ्च । अथर्ववेदे यज्ञाः जगतः उत्पत्तिस्थानत्वेन वर्णिताः सन्ति । यज्ञस्य श्रेष्ठताया; प्रतिपादनः ग्रन्थो यज्ञपरिभाषासूत्रम् वर्तते । अस्मिन् ग्रन्थे श्रौतानां गृह्यानां च यज्ञानां वर्णनम् कृतम् वर्तते ।

तत्र श्रौतयज्ञानां द्वौ भेदौ कृतौ स्तः सोमसंस्थाः यज्ञाः हविः संस्थाश्च यज्ञाः । यज्ञाः पाकसंस्थायज्ञशब्देनाभिधीयन्ते । एतेषां लिप्तकारकाणामपि यज्ञानां सप्त-सप्त भेदाः भवन्ति । सोमसंस्था यज्ञेषु–अग्निष्टोम-उक्थ्य–षोडशी–वाजपेय–अतिरात्र–आप्तोपाधिनामकाः यज्ञाः सन्तिः । हविसंस्या यज्ञेषु च अग्न्याध्येय–अग्निहोत्रदर्श–पौर्णमास–आग्रहायण–चातुर्मास्य–पशुवन्धसंज्ञकाः यज्ञा भवन्ति । पाकसंस्थासु यज्ञेषु च सायं होत्र–प्रात र्होत्र–स्थालीपाक–नवयज्ञ–वैश्वदेव–पितृयज्ञ–अष्टका संज्ञकाश्च यज्ञाः सन्ति ।

कल्पसूत्राणि प्राचीनभारतस्य कर्मपरायणस्य सात्त्विकस्य जीवनस्य परिचायकानि सन्ति । अत्र जीवनाभ्युदयस्य सामजस्य व्यवस्थाया उपायाश्च सन्ति वर्णिताः ।

कल्पसूत्राणाम् मुख्यतया त्रयो भेदाः भवितुमर्हन्ति । (१) श्रौतसूत्राणि, (२) गृह्यसूत्राणि, (३) धर्मसूत्राणि च ।

(१) तत्र श्रौतसूत्राणि यद्यपि व्राह्मणग्रन्थेषु वर्णितानां कर्मकाण्डविषयकाणां विधीनां निर्देशं कुर्वन्ति अथापीमानि व्राह्मणग्रन्थेभ्यो नितराभिद्यन्ते संहितासु

वर्णितानां यज्ञादीनां विधानस्य सारांश एवात्र सुरक्षितो वर्तते । श्रौतसूत्राणामुद्देश्यम् सोमयज्ञविषयकाणां धार्मिकानुष्ठानानां प्रतिपादनम् वर्तते ।

आश्वालायनश्रौतसूत्रम् शांखायनश्रौतसूत्रम्, मानवश्रौतसूत्रम् बौधायनश्रौतसूत्रामित्यादीनि प्रधानानि श्रौतसूत्राणि सन्ति ।

(२) गृह्यसूत्रेषु गार्हस्थ्यजीवनविषयकाणां धार्मिकाणां विषयाणां वर्णवर्णनम् वर्तते । सर्वेषां संस्काराणां विस्तृतं वर्णनं वर्तते एतेषु गृह्यसूत्रेषु । येन प्रकारेण चतुर्दशसंख्याका वैदिकयज्ञाः सन्ति तेन प्रकारेण गृह्ययज्ञानामपि संख्या सप्त वर्तते । पितृयज्ञः, पार्वणयज्ञः, अष्टकायज्ञः, श्रावणीयज्ञः, अश्वायुगीयज्ञः, आग्रहायणीयज्ञः, चैत्रीयज्ञश्च । किञ्च–देवयज्ञ–भूतयज्ञ–पितृयज्ञ–महायज्ञ–मनुष्य यज्ञानां च वर्णनं वर्तते गृह्यसूत्रेषु ।

प्रधानानि गृह्यसूत्राणि सन्ति—आश्वलायनगृह्यसूत्रम्, शाख्यायनगृह्यसूत्रम्, मानवगृह्यसूत्रम्, बौधायनगृह्यसूत्रमित्यादीनि ।

(३) धर्मसूत्रेषु च सामाजिकानां विषयाणां वर्णनं वर्तते । वर्णाश्रमधर्माणाम् विस्तृतं वर्णनं धर्मसूत्राणां विषयो वर्तते । वसिष्ठधर्मसूत्रम्, मानवधर्मसूत्रम् बौधायनधर्मसूत्रमित्यादीनि प्रधानानि धर्मसूत्राणि सन्ति ।

(ग) व्याकरणस्य महत्त्वम्—व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इदमेव हि व्याकरणशब्दस्य व्युत्पत्तिः । व्याकरणशास्त्रम् वेदपुरुषस्य सर्वप्रधानमङ्गम् वर्तते । तथा चोक्तम् पाणिनीयशिक्षायाम्—'मुखं व्याकरणं स्मृतम्' इति । व्याकरणशास्त्रे सन्धिनियमानां शब्दानाम् धातूनाम् प्रत्ययानाम् शब्दरूपाणाम्, धातुरूपाणाम्, समासानाम्, कारकाणाम्, कृत् प्रत्ययानाम्, तद्धितप्रत्ययानाम्, स्त्रीप्रत्ययानाञ्च विचाराः क्रियन्ते । व्याकरणशास्त्रम् हि प्रातिशाख्यमूलकारः वर्तते ।

साम्प्रतम् पाणिनीयम् व्याकरणमेव व्यवहारे वर्तते । अस्य व्याकरणस्य प्रधानतमोग्रन्थः पाणिनिप्रणीताष्टध्ययी वर्तते । अस्या एव अष्टाध्यय्याः व्याख्याभूताः सन्ति, काशिका-न्यास-पदमञ्जरी, सिद्धान्तकौमुदी, पातञ्जलमहाभाष्य-शब्देन्दु इत्यादिकाः ग्रन्थाः । व्याकरणशास्त्रस्य प्रयोजननिर्देशं कुर्वन् महाभाष्यकारः पतञ्जलिराह—'रक्षोहागमलध्वसन्देहाः प्रयोजनम् ।' इति ।

(घ) छन्दः—वेदेषु मन्त्राः प्रायश्छन्दोबद्धाः सन्तिः । तेषां छन्दसां ज्ञानाय छन्दः शास्त्रस्य ज्ञानमनिवार्यम् वर्तते । छन्दः शास्त्रविषयको मुख्योग्रन्थः पिङ्गलसूत्रम् वर्तते । छन्दोमञ्जरी वृत्तरत्नाकरप्रभृतयः अपि ग्रन्थाः छन्दः शास्त्रस्य ज्ञानायोपादेया सन्ति ।

(५) निरुक्तम्—शब्दज्ञानम् शब्दव्युत्पत्तिश्च निरुक्तस्यप्रधान विषयौ स्तः ।

वेदमन्त्राणामर्थं ज्ञानात् प्राक् तेषु मन्त्रेषु समागतानाम् पदानामर्थंज्ञानमत्यावश्यकं वर्तते। विना पदार्थंज्ञानं वाक्यार्थंज्ञानम् तु सर्वथा असंभवमेव। तत्र ये कठिनाः शब्दाः समायान्ति तेषां समेषां शब्दानां निरुक्तिः निरुक्तस्यालोके सुकरो भवति। निरुक्तस्य प्रणेतुः नाम यास्को वर्तते। समालोचकानामभिप्रायो वर्तते यत् प्राक् एतद् व्यतिरिक्तान्यपि निरुक्तान्यवर्तन्त। साम्प्रतम् किन्तु तेषां समेषामुपलब्धिर्न हि जायते।

निरुक्तप्रतिपाद्यस्य विषयस्य विषयेऽभिहितम् वर्तते—

'वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ।
धातोस्तथार्थातिशयेन योगः यदुच्यते पञ्चविधं निरुक्तमिति॥

निरुक्ते काण्डत्रयम् विद्यते नैघण्टुककाण्डम्, नैगमकाण्डम्, दैवतकाण्डं च।

(६) ज्योतिश्शास्त्रम्—सर्वेष्वेव शुभेषु कार्येषु कालस्य शुद्धिरपेक्षिता भवति। भारतीयाः कालशुद्धौ पूर्णतया विश्वसन्ति। सर्वेषां वैदिकानां यज्ञानाम् कालविशेषो भवति अनुष्ठानोपयोगी। कालशुद्धेः ज्ञानं तु ज्योतिश्शास्त्रैः द्वारा भवति। अतएव ज्योतिश्शास्त्रस्य वेदपुरुषस्य नेत्रस्थानीयम् वर्तते। ज्योतिश्शास्त्रमहत्त्वविषये अभिहितमपि—

'वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वाविहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषम् वेद सवेदवेदम्॥

इति हि वेदाङ्गज्योतिष् ग्रन्थम्।

उपनिषदाः-उपासनाः मोक्षविद्याः

तत्त्वहितपूमर्थपर्यालोचनपरायणाः पुरुषाः प्रतिपादयन्ति अखिलजगद्धितानुशासनश्रुतिनिकटशिरसि समधिगतोऽयमर्थो यज्जीवपरमात्मयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्मेतिकर्तव्यताकपरमपुरुषचरणयुगलध्यानार्चनप्रणामादिरत्यर्थप्रियस्तत् प्राप्तिफल इति।

शास्त्राणि हि परमात्मनः प्राप्यत्वेन जीवस्य प्रापकत्वेन वर्णनं कुर्वन्ति। तस्य परमात्मनः प्राप्तिसाधनरूपेण उपनिषत्सु द्वात्रिंशत् संख्याका विद्याः उपदिष्टाः सन्ति। इमा विद्या एव औपनिदोपसनाशब्देनाप्यभिधीयन्ते। तासां सर्वासामुपनिषद्विद्यानामात्मविद्याशब्दवाच्यानाम् विवरणम् मनाऽधस्तात् समुपस्थाप्यते।

(१) सद्विद्या—इयम् विद्या छान्दोग्योपनिषदः षष्ठाध्याये समुपवर्णिता अस्ति। अस्या विद्याया आरम्भ 'सरेवसोम्येदमग्रासीदेकमेवाद्वितीयम्' इति श्रुतेस्सम्भवति। अस्याम् विद्यायामिदं प्रतिपादितं वर्तते यदस्य जगतः अभिन्ननि-

मित्तोपादानकारणं ब्रह्मैव वर्तते । इयम् विद्या जगतः अभिन्ननिमित्तोपादानरूपेण ब्रह्मण उपासनाया उपदेशं करोति । महर्षिः वादरायणः शारीरकमीमांसायाः ईक्षत्यधिकरणे अस्याः विद्यायाः चर्चामकार्षीत् ।

(२) **आनन्दमयविद्या**—इयं विद्या तैत्तिरीयोपनिषदः ब्रह्मवल्ल्यां समुपवर्णितो वर्तते । अस्या विद्यायाः आरम्भः ब्रह्मविदाप्नोति परम्' इति श्रुते र्भवति । इयम् विद्या ईश्वरस्य कल्याणगुणाकरत्वेन आनन्दमयरूपेण चोपसनामुपदर्शिता । अस्याः विद्यायाः चर्चाम् वादरायणः आनन्दमयाधिकरणेऽकार्षीत् ।

(३) **अन्तरादित्यविद्या**—इयं विद्या छान्दोग्योपनिषदि वर्णिता वर्तते । 'य एषोऽन्तरादित्ये' (छा० ६।१।७) श्रुतितः अस्या विद्याया आरम्भो भवति । अस्यां विद्यायामुपदिष्टं वर्तते यदात्मकररूपाभिरीश्वरस्योपासना कर्तव्येति । अस्याः विद्यायाः व्याख्याम् महर्षिः वादरायणः शारीरकमीमांसायाः अन्तराधिकरणे (१।१।७) अकार्षीत् ।

(४) **उद्गीथाकाशविद्या**—इयमपि विद्या छान्दोग्योपनिपदि समुपवर्णिता वर्तते । अस्या विद्याया आरम्भः (सर्वाणि ह्वा इमानि भूतान्याकाशादेव समुत्पद्यन्ते' (छा० १।९।१) इति श्रुते र्भवति । महर्षि वादरायणः ब्रह्मसूत्रस्य आकाशाधिकरणे (१।१।८) अस्या विद्यायाः वर्णनमकार्षीत् । अस्यां विद्यायाम् वर्णितमास्तेयदीश्वर एवास्य चराचरस्य प्रकाशको वर्तत इति ।

(५) **प्रस्तावप्राणविद्या**—अस्या विद्याया आरम्भः छान्दोग्योपनिषदः 'कतमा सा देवतेति प्राण इति होवाच, सर्वाणि हवा इमानि भूतानि प्राणमेवाभिसंविशन्ति । प्राणामभ्युज्जिहते (छा० १।११।४) इति श्रुते र्भवति । अस्याम् विद्यायाम् ईश्वरस्यैव चराचरस्य प्राणत्वम् प्रतिपादितमस्ति । ब्रह्मसूत्रस्य प्राणाधिकरणे महर्षिः वादरायणः अस्याः विद्यायाः व्याख्यामकरोत् ।

(६) **गायत्रीज्योतिविद्या**—छान्दोग्योपनिषदः 'अथ यदतः परो दिवो ज्योतिर्दिव्यते' (छा० ३।१३।७) श्रुतेरस्या विद्याया आरम्भो भवति । अस्याम् विद्यायाम् ईश्वर एव सम्पूर्णं जगति प्रकाशते इति प्रतिपादितमस्तीति प्रतिपादितम् । महर्षिः वादरायणः ब्रह्मसूत्रस्य ज्योतिरधिकरण (१।१।१०) विद्याया विवेचनमकरोत् ।

(७) **प्रतर्दनविद्या**—अस्याः विद्यायाः विवेचनम् महर्षिः वादरायणः ब्रह्मसूत्रस्येन्द्रप्राणाधिकरणे (ब्र० १।१।११) कृतवान् । अस्या विद्यायाः आरम्भः कौषीतकिब्राह्मणस्य (प्रतर्दनो) हवै दैवोदासिरिन्द्रस्य धामोपजगाम युद्धेन पौरुषेण च ।' (३।१) इति श्रुते र्भवति । अस्यां विद्यायाम् प्रतिपादितमास्ते यत् परमात्मैव इन्द्रादिचेतनाणाम् प्राणाद्यचेतनानाञ्च आत्मास्तीति ।

(२०) मधुविद्या—इयं छान्दोग्योपनिषद्० 'असौवाव आदित्योदेवमधु' (३।१।१) इति श्रुतौ समुपवर्णिता वर्तते । शारीरकमीमांसायाः मध्वधिकरणे अस्याः विद्यायाः विवेचनं कुर्वन् महर्षिः बादरायणः प्राह यत् वस्वादित्यादिकानाम् देवानामप्यात्मा ईश्वर एव वर्तते ।

(२१) संवर्गविद्या—इयं छान्दोग्योपनिषदो विद्या वर्तते । अस्याः विद्यायाः प्रारम्भः ज्ञानश्रुतिः किल पौत्रायणः (छा० ४।१।१) श्रुतेः भवति । अस्यां विद्यायामयमर्थोऽस्ति प्रतिपादितो यत् सर्वे जीवाः ईश्वरस्योपासनां स्व-स्वाधिकारानुसारेण कर्तुं क्षमाः सन्ति । अस्याः विद्यायाः व्याख्यां महर्षि बादरायणः शारीरकमीमांसायाः अपशूद्राधिकरणेऽकरोत् ।

(२२) अजाशरीरकविद्या—इयं विद्या बृहदारण्यकोपनिषदि वर्णिता वर्तते । अस्याः विद्यायाः प्रारम्भः बृहदारण्यकोपनिषदः—'यस्मिन् पञ्च पञ्चजनाः आकाशश्च प्रतिष्ठितः ।' (बृ० उ० ४।४।१७) इति श्रुत्या भवति । अस्याः विद्यायाः प्रतिपाद्यो विषयो वर्तते यत् 'परमात्मैव प्रकृतिशरीरको वर्तत इति । अत्राजाशब्देन प्रकृतिरभिहिता वर्तते । इयं विद्या शारीरकमीमांसायाः व्याख्या संख्योपसंग्रहाधिकरणे कृता वर्तते ।

(२३) वाल्मीकि विद्या—इयं कौषीतकिब्राह्मणोपनिषदो विद्या वर्तते । 'अखिलमिदं जगत् ईश्वरस्य कार्यं वर्तते' इत्येवमास्ते अस्याः विद्यायाः प्रतिपाद्यम् । अस्याः विद्यायाः उपसंहारः 'यस्य वै तत् कर्म' (कौ० ब्रा० ४।१९) इत्यादिकया श्रुत्या भवति । अस्याः विद्यायाः विवेचनम् महर्षिः बादरायणः ब्रह्मसूत्रस्य जगद्वाचित्वाधिकरणे अकार्षीत् ।

(२४) मैत्रेयी विद्या—बृहदारण्यकोपनिषदः अस्याः विद्यायाः प्रतिपाद्यम् वर्तते यत् ईश्वरस्य साक्षात्कार एव मोक्षस्य साधनम् वर्तते । अस्याः विद्यायाः प्रारम्भः 'न वा अरे ! पत्युः कामाय पतिः प्रियो भवति (बृ० उ० ४।४।६) श्रुत्या भवति । अस्याः विद्यायाः व्याख्यामकार्षीन्महर्षि बादरायणः शारीरकमीमांसायाः वाक्यान्वयाधिकरणे ।

(२५) द्रुहिण रुद्रादिशरीरकविद्या—तैत्तिरीय संहिताया हिरण्यगर्भसूक्ते समुपवर्णितायामस्यां विद्यायाम् प्रतिपादितमस्ति यद् द्रुहिण रुद्रादिका अपि उपासनाया परमात्मानमेव प्रसादयन्ति । इयं विद्या तैत्तिरीयनारायणोपनिषदिः तैत्तिरीयारण्यकस्य षष्ठे प्रश्ने च समुपश्लोकिता वर्तते । अस्याः विद्यायाः प्रारम्भः हिरण्यगर्भसूक्तस्य 'हिरण्थगर्भः समवर्तताधि' इति मन्त्राद्भवति । अस्याः विद्यायाः व्याख्यानम् महर्षिः बादरायणः सर्वव्याख्यानाधिकरणेऽकार्षीत् ।

(२६) पञ्चाग्निविद्या—इयं छान्दोग्योपनिषद अत्यन्तप्रख्याता विद्या वर्तते । अस्याः विद्यायाः प्रारम्भः—'वेत्थ सोम्य । यथा पञ्चम्यामाहुतौ आपः

पुरुषवचसाभिलभ्यो भवन्ति' (छा० उ० ५।३।३) इति श्रुत्या भवति। अस्याः विद्यायाः प्रतिपाद्यमस्ति यत् 'जीवानाम् मुक्तिः ईश्वरेच्छाधीना भवति। अस्याः विद्यायाः विवेचनम् महर्षिः नादरायणः तदन्तरप्रतिपत्त्यधिकरणेऽकार्षीत्।

(२७) आदित्यस्थाहर्नामकविद्या—अस्याः विद्यायाः प्रारम्भः बृहदारण्यकोपनिषदः 'सत्यं ब्रह्म' इति श्रुत्या भवति। अस्याः विद्यायाः व्याख्यामकार्षीमहर्षि बादरायणः ब्रह्मसूत्रस्य संबन्धाधिकरणे। अस्याः विद्यायाः प्रतिपाद्यमास्ते यत् आदित्यमण्डलमध्यवर्तीतिपुरुषरूपेण परमात्मन उपामना करणीया वर्तते। परमात्मनः उपासना अहर् नाम्ना करणीया वर्तते।

(२८) अक्षिस्थाहन्नामकविद्या—इयमपि बृहदारण्यकोपनिषदो विद्या वर्तते। अस्याः विद्ययाः चर्चाम् बादरायणः ब्रह्मसूत्रस्य संबन्धाधिकरणेऽकरोत्। अस्याः विद्यायाः प्रतिपाद्यम् वर्तते यंत् आत्मकल्याणकामिना पुरुषेण अक्षिस्थ पुत्तलिकायाम् दृश्यमानस्य पुरुषस्योपासना अहन्नाम्ना कर्तव्या। उपासकस्य दक्षिणाक्षिणि दृश्यमानः पुरुषः पुण्डरीकाक्षस्य परमात्मनः स्वरूपं वर्तते।

(२९) पुरुषविद्या—इयं तैत्तिरीयनांरायणोपनिषदो विद्या वर्तते। अस्याः विद्यायाः प्रारम्भः 'तस्यैवं विदुषो यज्ञस्यात्मा यजमानः इति श्रुत्या भवति। इयं विद्या परमात्मनः पुरुषोत्तमरूपेण प्रतिपादनं करोति। अस्याः विद्यायाः विस्तृतं विवेंचनं महर्षिः वादरायणः ब्रह्मसूत्रस्य पुरुषविद्याधिकरणे (३।३।९) अकार्षीत्।

(३०) ईशावास्यविद्या—ईशावास्योपनिषदि वर्णितायाः अस्या विद्यायाः प्रारम्भः ईशावास्योपनिषदः 'कुर्वंन्नेवेहकर्माणि जिजीविषेच्छतं समाः। एवं त्वयि नान्यथेतोऽक्तिनकर्म लिप्यते नरे। (ई० २) इति श्रुत्या भवति। अस्याः विद्यायाः विवेचनं कुर्वन् महर्षिः वादरायणः शारीरकमीमांसायाः पुरुषार्थाधिकरणे प्रत्यपीपदत् यत् 'कर्मसहकृतेन ज्ञानेन द्वारैव ईश्वरः प्राप्यो वर्तते।

(३१) उपस्थिकरोलविद्या—बृहदारण्यकोपनिषदः षष्ठाध्यायस्य प्रथमे ब्राह्मणे इयं विद्या वर्णिता वर्तते। अस्याः विद्याया उपसंहारः 'नध्वा अस्यानन्नं जग्धं भवति' (बृ० उ० ६।१।१४) इति श्रुत्या भवति। अस्यां विद्यायां प्रतिपादितमस्ति यत् परमात्मोपासनायै साधनप्रकानुगृहीतेन मनसा भाव्यम्। अस्याः विद्यायाः व्यायाख्यां महर्षिः वादरायणः सर्वान्नानुमत्यधिकरणेकरोत्।

(३२) व्याहृतिशारीरकविद्या—बृहदारण्यकोपनिषदः विद्यायाः प्रारम्भः— 'य एतस्मिन्मण्डले पुरुषः तस्य भूरिति शिरः।' (बृ० उ० ५।५।३) श्रुते भंवति। अस्याम् विद्यायाम् ईश्वरो मन्त्रमयः व्याहृतिशरीरकश्चोक्तो वर्तते। इयं विद्यया संबन्धाधिकरणे व्याहृता वर्तते।

आसु विद्यासु परमात्मनः द्वात्रिंशद्विधाः उपासनाः वर्णितास्सन्ति। आसु विद्यासु कामप्ये कामप्येकामपि विद्यामाश्रित्य मुमुक्षुपुरुषः परं निःश्रेयस अपि प्राप्ति कर्तुं शक्यते । इमाः सर्वाः विद्याः ब्रह्मविद्या नाम्नाभिहिता भवन्ति ।

एताभ्यो विद्याभ्यो व्यतिरिक्ता न्यासाख्या विद्या तैत्तिरीयनारायणोपनिषदि वर्णिता वर्तते। इयमेव विद्या मोक्षावाप्तेः रूपेण वर्णिता वर्तते । तैत्तिरीयनारायणोपनिषदेवास्याः विद्यायाः उपजिव्यं वर्तते। 'सत्यं परः परः सत्यम् । (म० ७६ अनु० ६२) श्रुत्या भवति अस्याः विद्यायाः प्रारम्भः । अस्य मंत्रस्यान्ते स्पष्टरूपेणाभिहितमस्ति यन्न्यासः सर्वोत्कृष्टा विद्या वर्तते। तथाहि—'न्यास इति ब्रह्मा, ब्रह्मा हि परः परो हि ब्रह्मा, तानि वा एतान्य वराणि तपांसि, न्यास एवात्वरेचयत्। (तै० ना० उ० ७७ मं० ६२ अनु० ।)

न्यासकालेस्वयमेव शरणागतः पुरुषो वक्ति 'वसुरण्यो प्राणे त्वमसि संधाता ब्रह्मंस्त्वमसि विश्वसृक् तेजोदास्त्वमसि अग्नेर्वर्चोदास्त्वमसि सूर्यस्य द्युम्नोदास्त्वमसि चन्द्रमसः। उपयामगृहीतोऽसि ब्रह्मणे त्वा महस ओमित्यात्मानं युञ्जीतैतद्वै महोपनिषदं देवानां गृह्यम्, य एवं वेद ब्रह्मणो महिमानमप्नोति, तस्माद् ब्रह्मणे महिमानमित्युपनिषत् (७८ मं० ६३ अनु०) अस्या उपनिषदः एकोनशीतितमे मन्त्रे न्यासस्य सर्वनिरपेक्षत्वमभिधाय, तस्य फलम् मोक्षाधिगमो वर्णितो वर्तते ।

मन्त्रब्राह्मणयोर्वेदनामधेयम्

अथवा—वेदा विज्ञानराशयः ।

विश्वस्मिन् विश्वे वेदा एव प्राचीनतमवाङ्मयस्वरूपास्सन्तीति नास्ति तिरोहितम् विपश्चिदपश्चिमेभ्यः वेदानामखिलजगद्धितानुशासनत्वम् सर्वे वेदविज्ञानवृद्धाः विदन्ति। सम्पूर्णे विश्वे यावत्यः भाषाः यत् किमपि साहित्यं वा समुपलभ्यन्ते, तेषु सर्वेषु वेदा एव पुरातनाः सन्ति इति सर्वे प्राच्याः प्रतीच्याश्च विद्वांस एकमत्येन स्वीकुर्वन्ति ।

त इमे वेदाः ऋग्यजुस्सामथर्व सुचतुर्षुभागेषु विभक्तास्समुपलभ्यन्ते । एतेषां वेदानाम् रचनाकालः कः, वेदानाम् कति शाखाः सन्ति। वेदानाम् विवेचनीया विषयाः के सन्ति ? इत्यादिकाः अनुयोगाः सर्वेषां समालोचकानां समक्षम् सामान्यतया समुपस्थिताः भवन्ति ।

वेदानां कालः—वेदानाम् निर्मितिः कदाऽभूत् इत्ययमनुयोगः सर्वप्रथमम् उदेति ?—वेदानाम् कालविषये विभिन्नाम् समालोचकानाम् मतानि भिन्नानि सन्ति । भारतीया अपि समालोचका अस्मिन् विषये भागद्वये विभक्तास्सन्ति। एके समालोचकाः वेदानामपौरुषेयत्वम् स्वीकुर्वन्ति । वेदानामपौरुषेयत्ववादिनाम् मत-

मस्ति यत् वेदानाम् प्रणेता कोऽपि नास्ति । वेदा अनादयः अनन्ताश्च सन्ति । जगद्व्यापारकर्ता ईश्वरोऽपि सृष्टेरादौ पूर्वकल्पस्थितानाम् वेदानाम् वर्णानुक्रमस्य स्वसर्वज्ञतायाः प्रभावेण साक्षात्कारं कृत्वा, सर्वप्रथमम् ब्रह्मणे वेदानाम् उपदेशं करोति । अतएव सर्वेषु कल्पेषु वेदानामानुपूर्व्यपि समाना भवति ।

अपरे भारतीयाः समालोचकाः प्रतिपादयन्ति यत् वेदाः अपौरुषेया नहि सन्ति अपि ते ईश्वरप्रणीतास्सन्ति । अन्यापि एतेषां ईश्वरप्रणीतत्वेऽपि वेदानामनादित्वमनन्तत्वं च नापहीयेते । एतादृशास्समालोचकाः नैयायिका प्रभृतयः सन्ति ।

अर्वाचीनाः समालोचकाः वेदानाम् मनुष्यकृतत्वं स्वीकुर्वन्ति । एतादृशाः समालोचकाः प्रतिपादयन्ति यत् वेदानाम् प्रणयनम् १५०० ई० पू० कालतः ५०० ई० पू० कालं यावत् स्वीकुर्वन्ति ।

वेदाश्चत्वारस्सन्ति सामान्यरूपेण ऋग्यजुस्सामाथर्वाख्याः । एतेषां चतुर्णां समानरूपेणाभिधानम् भवति । एतेषाम् चतुर्णामेव बह्व्यः शाखा आसन् प्राचीनकाले । वेदशाखानाम् संख्या विषये महर्षिः पतञ्जलिः महाभाष्ये न्यगादीत् ।

'सहस्रवर्त्मा सामवेदः, एकविंशतिधा वह्वृचः । एकशतमध्वर्युशाखः, नवधा अथर्वाणः ।' अनेन वाक्येन ज्ञायते यत् पतञ्जलेः काले वेदानाम् ११३१ संख्याकाः शाखाः समुपलब्धा आसन् । साम्प्रतम् तु समुपलभ्यमानानां वेदशाखानाम् संख्याङ्गुलिगण्या वर्तते ।

वेदशब्दस्य निष्पत्तिः 'विद्ज्ञाने' धातोः, घञि प्रत्यये कृते जायते । अनया व्युत्पत्त्या वेदाः स्वयं ज्ञानस्वरूपाः सन्तीति सिद्ध्यति । अतएव हि वेदानां ज्ञानराशित्वम् सिद्ध्यति । येन प्रकारेण जलसमूद्रादेव सर्वत्र जलं याति, यदि समुद्रे जलस्यात्यन्ताभावस्सम्पद्येत तर्हि विश्वे क्वापि जलं नोपलभ्येत । सर्वत्रैव जलस्यात्यन्ताभावः सम्पद्येत । अनेनैव प्रकारेण सर्वत्र समुपलभ्यमानानि ज्ञानानि ज्ञानराशेः वेदानामेव वितति भूतानि सन्ति । वैदिकानां ज्ञानानामेव विविधानि रूपाणि जातानि तत्र तत्र लोके इति वैदिकानां विदुषामभिमतिः ।

विद्धातोः घञि प्रत्ययेन वेदशब्दस्य व्युत्पत्तिस्वीकारे सति वेदशब्दस्यार्थास्त्रयो भवितुमर्हन्ति, (१) ज्ञानम्, (२) ज्ञानविषयाः, (३) ज्ञेयाः पदार्थाश्च । किञ्च महर्षिः पाणिनिः विद्धातोः सत्तालाभ-विचाररूपान् त्रीनन्यानप्यर्थान् धातुपाठे पपाठ । अतएव वेदानामानन्दप्रदत्वम् लाभार्थकाद् विद्धातोः व्युत्पत्तेः सिद्ध्यति । सत्तारूपार्थकादेव विद्धातोः वेदशब्दस्य व्युत्पत्ति मत्वा श्रुतिरप्यभिधत्ते—

६ बृ० सं० नि० क०

'अस्ति ब्रह्मेति चेद् वेद सन्तमेनं ततो विदुः ।
असन्नेव स भवति असद् बह्मेति वेद चेत् ॥' इति

वेदार्थपर्यालोचनपरायणा वैदिका विद्वांसः प्रतिपादयन्ति वेदा विविधप्रकारकाणां विज्ञानानाम् मूलाभूताः सन्ति । प्रत्यक्षानुमानाभ्याम् येषाम् विषयाणाम् निश्चयः असम्भवो वर्तते तेषामप्यर्थानां निश्चयसाधनम् वेदा एव सन्ति । धर्मस्य स्वरूपम् किम् ? अधर्मस्य स्वरूपम् किम् । वर्णव्यवस्था का वर्तते ? आश्रमाणां व्यवस्थायाः स्वरूपम् किम् वर्तते ? दैवतानि तत्त्वानि कानि वर्तन्ते ? पत्न्येव गम्या कथम् ? पत्नीव्यतिरिक्ता नारी अगम्या कस्मात् स्वीक्रियते ? कानि कर्माणि कदा अनुष्ठेयानि भवन्ति ? एतेषाम् समेषां प्रश्नानामुत्तराणि वेदेभ्य एव लब्धुं शक्यते । वेदव्यतिरिक्तं किमपि साधनम् नास्ति येन साधनेन एतेषा समेषां विषयाणां ज्ञानं सम्पद्येत ।

वेदानाम् सामान्यतया भागद्वयं स्वीकृतं सर्वैः एव समालोचकैः । कर्मकाण्डभागो ज्ञानकाण्डभागश्च । वेदानाम् संहितासु कर्मकाण्डानाम् विवेचनम् वर्तते । ऋग्वेदो हि समेषाम् सूक्तानाम् संग्रहो वर्तते । ऋग्वेदे दशमण्डलानि अष्टौ अष्टकानि च सन्ति । यजुर्वेदो चत्वारिंशदध्यायेषु विभक्तो वर्तते । तेषां तेषा यज्ञानां विशदं विवेचनम् यजुर्वेदस्यैव विषयो वर्तते । सामवेदः स्तुतिस्वरूपो विद्यते । अथर्ववेदस्येदम् वैशिष्टयं वर्तते यत् तत्र तेषां तेषां लौकिकाभ्युदयसाधनभूतानाम् कर्मणाम् वर्णनम् अस्मिन्नेव वेदे समुपलभ्यते ।

वेदानामपरो भागः ज्ञानकाण्डो वर्तते । अस्मिन् काण्डे सृष्टयादिकानामतिरहस्यमयानां विषयाणां विशदं विवेचनं समुपलभ्यते तथा च तैत्तिरीयश्रुतिः—

'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति,
यत् प्रयन्त्यभिसंविशन्ति तद् विजिज्ञासस्व तद् ब्रह्म ।' इति

श्रुतिः प्रतिपादयति यद् ब्रह्मैव जगतः करणम् वर्तते । एकान्या श्रुतिर्वक्ति—'कारणं तु ध्येयम् ।' कारणतत्त्वस्य ज्ञानम् सम्पादनीयमित्यर्थः ।

छान्दोग्योपनिषद एवान्या श्रुतिः वक्ति जगत्कारणविषये—

'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम् ।' अस्यामेवोपनिषदयभिहितम्—'स ऐक्षत् एकोऽहम् बहु स्याम' इति । अस्य जगतो नामरूपव्याकरणविषयिण्येकान्या श्रुतिरभिधत्ते—

'हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि ।' अनया श्रुत्या ब्रह्मण एव नामरूपयोर्निर्वाहकत्वम् सिद्धयति ।

अस्य सम्पूर्णस्य प्रपञ्चस्योत्पत्तेः रहस्यमुन्मीलयन्ती अपरा श्रुतिर्वक्ति यत्—

'तस्माद् वा एतस्मादात्मन आकाशः संभूतः । आकाशाद् वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथ्वी' इति ।

छान्दोग्योपनिषदः त्रिवृत्करणप्रक्रियैव पञ्चीकरणप्रक्रियायाः मूलम् स्वीक्रियते । पृथिवीजलतेजसां परस्परं मिश्रणे नैव जगतः सृष्टिः संजाता इति त्रिवृत्करणप्रक्रियायाः अभिप्रायः । इमामेव त्रिवृत्करणप्रक्रियामुपजीव्य भगवान् मनुः मनुस्मृतेः सृष्टिप्रकरणस्य सप्तश्लोक्याम् पञ्चीकरणप्रक्रियाया निर्देशमकार्षीत् ।

ज्ञानकाण्डण्डस्य निःश्रेयसावाप्तिसाधनभूतानाम् षट्त्रिंशत् सङ्ख्याकानाम् मोक्षविद्यानाम् विवेचनम् साधकेभ्यः पुरुषेभ्यः अतीवमहत्त्वपूर्णाः सन्ति । आत्मविद्यायाः विवेचनम् तु प्रायेण सर्वैरेवाचार्यैः आत्मावाप्ते रूपायत्वेन कृतम् । पञ्चाग्निविद्यैव संसारादस्मात् सप्तविधदोषसंभिन्नात् वैराग्यं समुपजायते । पुरुषविद्यया पुरुषस्य स्वरूपं ज्ञायते । अक्षरविद्यया परमात्मनः स्वरूपम् ज्ञायते । अनेनैव प्रकारेणान्यासामपि विद्यानाम् प्रयोजनान्यूह्यानि ।

वेदा अस्माकम् भारतीयानां संस्कृतेराधारस्वरूपा वर्तन्ते । तथा चाह श्रुतिः ब्रह्मचर्यजीवनविषये—

'अष्टवर्षं ब्राह्मणमुपनयीत, तमध्यापयेत् ।' अस्यैवार्थस्योपबृंहणं कुर्वन् भगवान् मनुराह मनुस्मृतौ—

'श्रावण्यां प्रौष्ठपद्याम् वा उपाकृत्य यथाविधिः ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चाम् ।।' इति ।

जीवनस्यादौ विविधविधविज्ञानसम्पत्तये वेदानामध्ययनमत्यावश्यकं वर्तते । तथा चोक्तम् मनुस्मृतौ—

'वेदमेव सदाऽभ्यस्येत् तपस्तप्यन् द्विजोत्तमः ।
वेदाभ्यासो हि विप्रस्य तपः परमिहोच्यते ।।
योऽनधीत्य द्विजो वेदम् अन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति तान्वयः ।।

अतएव हि महाभाष्यकारेण महर्षिणा पतञ्जलिनाऽभिहितम् प्रथमाह्निके—

'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति

वेदानधित्य छात्रः यदा आचार्यगृहात् गृहस्थाश्रमे प्रविशति तदा तस्मै प्राप्तविद्याय स्नातकाय आचार्यः गार्हस्थ्यजीवनोपयोगिनो धर्मानुपदिशति—

वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमद । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् ।

मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव । यान्यनवद्यानि कर्माणि तानि सेवितव्यानि । नो इतराणि । यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि नो इतराणि। ये के चास्मच्छ्रेयांसो ब्राह्मणाः । तेषां त्वयासनेन प्रश्वसितव्यम् । श्रद्धया देयम् । अश्रद्धयादेयम् । श्रिया देयम् । ह्रियादेयम् । भियादेयम् । संविदा देयम् ।"

अनेन प्रकारेणाचार्यः स्नातकाय शिष्याय जीवनोपयोगिनां विषयाणामुपदेशं ददाति । व्याहारव्यवहारयोः विषये आचार्यस्यापीयमन्तिमा शिक्षा भवति । कानि कर्माणि कर्तव्यानि कानि नहि कर्तव्यानि इत्येतद्विषये आचार्यः उपदिशन् शिष्यम् प्राह—

"अथ यदि ते कर्मविचिकित्सा वा वृत्तिचिकित्सा वा स्यात् । ये तत्र ब्राह्मणाः सम्मर्शिनः । युता आयुक्ताः अलूक्षा धर्मकामाः स्युः । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथाः । अथाभ्याख्यातेषु । ये तत्र ब्राह्मणाः सम्मर्शिनः । युक्ता आयुक्ताः । अलाक्षा धर्मकामाः स्युः । यथा ते तेषु वर्तेरन् । तथा तेषु वर्तेथाः । एष आदेशः । एष उपदेशः । एषा वेदोपनिषत् । एतदनुशासनम् । एवमुपासितव्यम् । चैतदुपास्यम् ।"

वेदानां शास्त्रीयं महत्त्वमत्यधिकं वर्तते । अतएव प्राह भगवान् मनुः—'सर्वज्ञानमयो हि सः ।' इति । वेदेषु सर्वे दार्शनिकाः सिद्धान्ताः समुपवर्णिताः सन्ति । राजनीतिः, समाजशास्त्रम्, अध्यात्मशास्त्रम्, मनोविज्ञानम्, आयुर्वेदः, गणितम्, अर्थशास्त्रम्, नाट्यशास्त्रम्, काव्यशास्त्रम्, कामशास्त्रम्, अभिचारकर्म, यज्ञकर्म वहुविधाः विद्याः, पुरुषार्थचतुष्टयम्, आश्रमचतुष्टयम् च वेदानां वर्णनीयम् विषयम् वर्तते ।

मूलतत्त्वस्यानन्दरूपता, पुरुषविज्ञानम्, अक्षरपुरुषविज्ञानम् क्षरपुरुषविज्ञानम्, यज्ञप्रक्रिया, पञ्चभूतसिद्धान्तः, पृथ्वीतत्त्ववर्णनम्, आकाशतत्त्ववर्णनम्, षोडशी प्रजापतिवर्णनम्, ईश्वरतत्त्ववर्णनम् जीवतत्त्ववर्णनम्, जडतत्त्ववर्णनम् इत्यादिका विषयाः । प्रतिपाद्या सन्ति ।

अनेन विवेचनेनेदं स्पष्टं वर्तते यत् वेदाः सर्वे धर्मनाम् मूलभूताः सन्तीति ।

सर्वोपनिषदो गावः

अथवा—वेदान्तानामुपनिषत् प्रमाणम्

अथवा—उपनिषिदाम् महत्त्वम्

अथवा—उनिषदामवदानम्

वेदानाम् भागद्वयम्-कर्मकाण्डज्ञानकाण्डौ—कर्मकाण्डज्ञानकाण्डाभ्यां द्वेधा विभक्तम् । सम्पूर्णमेव वाङ्मयम् सृष्टेरादिकालत एवाखिलस्य जगतो हितानु-

शासने प्रवृत्तमस्ति। कर्मकाण्डस्तु त्रिवर्गसाधनानामेवोपदेशने प्रवृत्तम् किन्तु ज्ञानकाण्डम् सर्वात्मना चरमपुरुषार्थस्य स्वरूप-साधन-अधिकारि-फल-तद्विरोधिनाम् चा विचारणं प्रवृत्तमवलोक्यते । ज्ञानकाण्डस्य निरूपणम् कुर्वता महर्षिणा हारीतेनाप्यभिहितम्—

‘प्राप्यस्य ब्रह्मणो रूपम् प्राप्तुश्च प्रत्यगात्मनः
प्राप्त्युपायं फलं प्राप्तेस्तथा प्राप्तिविरोधिनम् ।
वदन्ति सकला वेदाः ऐतिहासपुराणकाः ।
मुनयश्च महात्मानो वेदवेदान्तवेदिनः ॥ इति ॥

उषनिषत्शब्दस्य प्रवृत्तिनिमित्तम्—वेदस्यान्तिमभागत्वात् सारत्वात् सिद्धान्तस्वरूपत्वादेव वा ज्ञानकाण्ड एव वेदान्तशब्देनाभिधीयते। ‘तद्यथेह कर्मचितालोकः क्षीयते एवमेवामुत्रपुण्यचितो लोकः क्षीयते ।’ (छा० उ० ८।१।६) सस्यमिव मर्त्यः पच्यते सस्यमिव जायते पुनः ।’ (क० उ० १।१।६) दुःखमूलं दुःखमिश्रं दुःखोदर्कमथास्थिरम् । अल्पं देहात्मधीमूलं क्षयप्राप्तिविरोधि ।” (अहिर्बु० संहिता)

इत्यादिकानां श्रौतस्मार्तानाम् वाक्यानामर्थानुसन्धानेन जगतोऽल्पत्वं क्षयित्वं चावगत्य, सप्तविधदुःखसंभिन्नात् जगतो विषण्णः, शान्तोदान्त उपरतः तितिक्षु, उपसाधनसप्तकानुगृहीतमना प्रमाता प्राप्यभूतस्य ब्राह्मणः प्राप्तेरद्वारकसासाधनेषु उपनिषत्सु प्रवर्तते । उप, निपूर्वकात् ‘षद्लृविशरणगत्यवसादनेषु’ इति धातोः क्विपि व्युत्पन्नस्य उपनिषच्छब्दस्यार्थोऽस्ति संसारबन्धनानि विशीर्यं, विनाश्य च मुमुक्षुं पुरुषः ब्रह्मणः अतीवसन्निकटं प्रापयति या विद्या सा उपनिषदित्यभिधीयते। अथवा संसारग्रंथिं विशिथिलय्य जीवानाम् स्वाभाविकान् ‘एष आत्मा अपहतपाप्मा र्विजरो विमृत्युरविशोकोविजिघत्सोऽपिपासः सत्यकामः सत्यसंकल्पः’ इति श्रुतिप्रोक्तान् गुणानाविर्भावयति यो विद्या सा उपनिषदित्यभिधीयते ।

उपनिषच्छब्दस्य साम्प्रदायिकमर्थं निरूपयन् श्रीभाष्यस्य श्रुतप्रकाशिकानामकव्याख्याकारः श्रीसुदर्शनसूरिराह छान्दोग्यब्राह्मणस्य वाक्यग्रन्थानुसारेण—साक्षाद् ब्राह्मण्युपनिषण्णेत्युपनिषत् उपनिषण्णत्वाद् वोपनिषत् ।’ इति । ‘गहने हीयं विद्या सन्निविष्टा ।’ इति तद्विपयं द्रविडभाष्यम् ।

परवर्त्याचार्याणामनुसारेण सर्वाभ्यो विद्याभ्यो रहस्यात्मकत्वात् मुमुक्षुपुरुषैराचार्यसन्निधावुपविश्य ग्राह्यत्वाच्च ब्रह्मविद्या उपनिषत् शब्देनाभिधीयते ।

मुण्डकोपतिषदि द्वयोः विद्ययोः वर्णनं वर्तते परापरानाम्न्योः। तत्र अपरा विद्या तु त्रिवर्गविषयिणी वर्तते किन्तु पराविद्या परब्रह्मज्ञानस्य साधकतमस्वरूपा विद्या। तथा चाह श्रुतिः—‘अथ परा यया तदक्षरमधिगम्यते।’ इति। इयं

परा विद्यैव तदुपबृंहणग्रन्थेषु आत्मविद्या उपनिषद्विद्या ब्रह्मविद्या इत्यादिभिर्नामभिरभिधीयते । इयमेव विद्या वेदान्तविद्या इत्यभिधीयते ।

वेदान्तशब्दस्यार्थः—वेदान्तम् परिभाषमाणो वेदान्तसारस्य कर्ता सदानन्दः प्राह—वेदान्तो नाम उपनिषत् प्रमाणमिति । उपनिषदाम् प्रमाणभूतानि वाक्यान्येव वेदान्तशब्देनाभिधीयन्ते । वेदस्य अन्तः = अन्तिमो भाग एव वेदान्तशब्दवाच्यो भवति । वेदस्य याः याः शाखाः सन्ति तासां शाखानामन्तिमोऽध्याय एव उपनिषत् शब्दवाच्यो भवति । तस्याध्यायस्य स्वस्याः शाखायाः सारांशरूपत्वात् । अन्तशब्दश्चानेकार्थः । अन्तिमो भागः, सारः, निश्चय इत्यादिका अनेकार्थाः सन्ति अन्तशब्दस्य । वेदस्यान्तिमभागत्वात् स्वस्याः शाखायाः सरांशरूपत्वात् स्वस्याः शाखायाः निश्चयार्थरूपत्वात् वा उपनिषदः वेदान्तशब्देनाभिधीयन्ते ।

उपनिषदां संख्या—उपनिषदां सङ्ख्याया विषये इदमवश्यं ज्ञातव्यम् वर्तते यत्, महाभाष्यस्य—'सहस्रवर्त्मा सामवेद एकविंशतिधा बह्वृषु एकशतमध्वर्युशाखा, नवधा अथर्वाणः ।' इति वाक्यानुसारेण महर्षिपतञ्जलेः समये वेदानां ११३१ शाखा उपलब्धा आसन् परं साम्प्रतम् समुपलभ्यमानानामुपनिषदाम् सङ्ख्याऽतीवाल्पीयसी वर्तते । गुजराती प्रिण्टिंग प्रेस मुम्बईतः प्रकाशिते 'उपनिषद् वाक्यकोशे २२३ उपनिषदां वाक्यानि संगृहीतानि सन्ति । मोतीलाल वनारसी दास दिल्लीतः प्रकाशिते 'उपनिषत् संग्रह' नामके ग्रन्थे १८८ उपनिषदां संग्रहो वर्तते । एतासु सर्वासूपनिपत्सु दश उपनिषदः, प्रधानभूताः सन्ति । ताश्चोपनिषदः सन्ति ईशावास्योपनिषत्, केनोपनिषत्, कठोपनिषत्, प्रश्नोपनिपत्, मुण्डकोपनिषत्, माण्डूक्योपनिषत्, ऐतरेयोपनिपत्, तैत्तिरीयोपनिषत्, छान्दोग्योपनिषत्, बृहदारन्यकोपनिपच्च ।

उपनिषदाम् प्रख्याता व्याख्याकाराः—उपनिषदां व्याख्याकारेषु सर्वप्रधानम् परिगणनीयम् भगवतः शङ्कराचार्यस्य नाम वर्तते । भगवान् शङ्कराचार्यः सर्वप्रथमं अद्वैतदर्शनस्यालोके उपनिषदाम् व्याख्यामकार्षीत् । शङ्कराचार्यस्यानन्तरम् श्रीरामानुजाचार्यस्यावतरणम् उपनिषदाम् महत्त्वपूर्णव्याख्याकाररूपेणाऽभवत् । अयमाचार्यः विशिष्टाद्वैतदर्शनस्यालोके उपनिषदाम् व्याख्यामकार्षीत् । उपनिषदाम् विवादास्पद् वाक्यानाम् श्रीरामानुजाचार्यकृतव्याख्यावलोकनायाः श्रीभाष्यस्यावलोकनमनिवार्यं वर्तते । तदनन्तरम् वल्लभमध्वनिम्बार्कप्रभृतय आचार्याः श्रीरामानुजाचार्यकृत व्याख्यायाः आलोके उपनिषदां व्याख्यामकार्षुः । सत्यपि सिद्धान्तभेदे आचार्येषु एतेषां आचार्याणाम् व्याख्या यासु, किमपि मौलिकं वैशिष्टयं नावलोक्यते । इमे समे आचार्याः तेनैव प्रकारेण शाङ्करमतस्य प्रधानतया प्रत्याख्यानमकार्षुः येन प्रकारेण श्रीरामानुजाचार्याः प्रधानतया शाङ्करमतस्यालोचनमकार्षीत् ।

उपनिषदाम् प्रतिपाद्यम्—यद्यप्युपनिपत्सु नैकेविपया व्याकृताः सन्ति अथापि

सर्वासामुपनिषदां प्रधानं प्रतिपाद्यम् तत्त्वत्रयम् वर्तते। तानि च त्रीणि तत्त्वानि चिदचिदीश्वराख्यानि सन्ति। इमा उपनिषदः एतेषां त्रयाणां तत्त्वानां स्वरूपस्य संबन्धस्य च प्रतिपादनपूर्वकम् परमात्मप्राप्तेः साधनभूतानां विद्यानां च प्रतिपादनं कुर्वन्ति । अत्र चित् चेतयति इति विग्रहानुसारेण चेतनतत्त्वस्य वाचको वर्तते ।

उपनिषदाम् परमार्थपर्यालोचनेन ज्ञायते यत् जीवस्स्वभावतः अजडः आनन्दस्वरूपः, नित्यः, अणुपरिमाणकः, अव्यक्तः, अचिन्त्यः, निरवयवः, निर्विकारः, ज्ञानाश्रयः, ईश्वरस्य नियाम्यः धार्यः शेषश्च वर्तते ।

जीवानाम् भेदाः—उपनिषदामनुसारेण जीवानां त्रयो भेदाः भवितुमर्हन्ति—वद्धो जीवोः मुक्तो जीवो नित्यो जीवश्च ।

'द्वा सुपर्णा स युजा सखाया समानं वृक्षं परिषष्वजाते ।
तयोरन्यः पिप्पलं स्वादवत्ति अनश्नन् चान्यः भियाकशीति ॥'

इति श्रुतिः वद्धजीवस्य वर्णनं करोति । एतादृशेषु जीवेषु आब्रह्मस्तम्बपर्यन्तं विद्यमानाः सर्वे जीवा आयन्ति ।

संसारवन्धाद्विनिर्मुक्ताः जीवाः मुक्तशब्देनाभिधीयन्ते । एतादृशा जीवा आविर्भूतगुणाष्टकाः । एतादृशानामेव जीवानां विषये श्रुतिरभिधत्ते—'सोऽश्नुते सर्वान् कामान् सहब्रह्मणा विपश्चिताः ।' इति । मुक्तो जीवः अर्चिरादिमार्गेण उत्क्रम्य परमब्रह्म प्राप्नोति । अर्चिरादिमार्गस्य कुर्वन् वात्स्यवरदाचार्यः प्राह—

'मुक्तोऽर्चिर्दिनपूर्वपक्षषडुदङ् मासाब्दवानां शुभद् ।
ग्लौर्विर्विद्युद्वरुणेन्द्रधातृमहितः सीमान्त सिन्ध्वाप्लुतः ।
श्रीवैकुण्ठमुपेत्यनित्यमगडं तस्मिन् परब्रह्मणः
सायुज्यं समवाप्य नन्दति चिरं तेनैव धन्यः पुमान् ॥' इति ।

ये जीवाः परभात्मनः पत्नीपरिजनपरिवारवाहणदासादिरूपेण सर्वदा परब्रह्मण एव लोके सर्वदा निवसन्ति, ते हि नित्य इत्यभिधीयन्ते । एतादृशा जीवाः शेषगरुडादिकाः सन्ति ।

अचित्तत्त्वानि—औपनिषत्तत्त्वेषु अचित् तत्त्वानां स्थानं द्वितीयम् वर्तते । पराक्–अचित्–जडादिकाः शब्दाः समानार्थकाः सन्ति । अचित्तत्त्वस्यापि त्रयो भेदाः भवितुमर्हन्ति । ते च भेदा सन्ति–शुद्धसत्त्वमिश्रसत्त्वसत्त्वशून्यानां भेदात् । तत्र शुद्धसत्त्वशब्देन नित्यविभूतिरभिधीयते । मिश्रसत्त्वशब्देन च चतुर्विंशतितत्त्वात्मिका प्रकृतिरभिधीयते । सत्त्वशून्यशब्देन च भेदोपभेदसहितः कालोऽभिधीयते ।

ईश्वरतत्त्वम्—औपनिषद्तत्त्वेषु ईश्वरतत्त्वम् सर्वप्रधानं वर्तते । एष ईश्वरः

सर्वासूपनिषत्सु अखिलहेयप्रयत्नीकरूपेण अखिलकल्याणगुणाकररूपेण च बर्णितो वर्तते। 'यः सर्वज्ञः सर्ववित् परास्यशक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च। इत्यादिकाः श्रुतयः परमात्मानं अखिलकल्याणगुणाकररूपेण वर्णयन्ति।' निर्गुणः निर्विकारः निरञ्जनः' इत्यादिकाः श्रुतयः ईश्वरमखिलहेयप्रत्यनीकरूपेण वर्णयन्ति। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत्प्रयन्त्यभिसंविशन्ती'त्यादिकाः श्रुतयः ईश्वरम् जगद्व्यापारकर्तारूपेण प्रतिपादयन्ति। 'सदेव सोम्येदमग्र आसीत् एकमेवाद्वितीयम' इति श्रुतिः ईश्वरम् जगतः अभिन्ननिमित्तोपादानकारणरूपेण प्रतिपादनं कुर्वन्ति। 'ऐतदात्म्यमिदं सर्वम्' इति श्रुतिः जगतः परमात्मात्मकत्वं प्रतिपादयति। 'यस्यात्मा शरीरम्' इत्यादिकाः श्रुतयः जगतः परमात्मनः शरीररूपण प्रतिपादनम् कुर्वन्ति।

उपनिषत्सु परमात्मप्राप्तेः साधनरूपेण षट्त्रिंशत् सङ्ख्याकानाम् मोक्षविद्यानाम् वर्णनम् समुपलभ्यते। ताश्च विद्याः निम्नाङ्किताः सन्ति।

(१) सद्विद्या, (२) आनन्दमयविद्या, (३) अन्तरादित्यविद्या, (४) उद्गीथाकाशविद्या, (५) प्रस्तावप्रणविद्या, (६) गायत्री ज्योतिर्विद्या, (७) प्रतर्दनविद्या, (८) शाण्डिल्यविद्या, (९) नाचिकेतसविद्या, (१०) उपकोसल विद्या, (११) अन्तर्यामीविद्या, (१२) अक्षरविद्या, (१३) वैश्वानरविद्या, (१४) भूमाविद्या, (१५) गार्ग्यक्षरविद्या, (१६) प्रणवोपास्यपरमपुरुषविद्या, (१७) दहरविद्या, (१८) अंगूष्ठप्रमितविद्या, (१९) देवोपास्यज्योतिर्विद्या, (२०) संवर्गविद्या, (२२) अजाशरीरकविद्या, (२३) वालाकिविद्या, (२४) मैत्रेयीविद्या, (२५) द्रुहिणरुद्रादिशरीरकविद्या, (२६) पञ्चाग्निविद्या, (२७) आदित्यस्थाहन्नामकविद्या, (२८) अक्षिस्थाहन्नामकविद्या, (२९) पुरुषविद्या, (३०) ईशावारस्यविद्या, (३१) उषस्तिकहोल विद्या, (३२) व्याहृतिशरीरकविद्या च।

आसु द्वात्रिंशत् विधासु परमात्मनः द्वात्रिंशत् विधाः उपासनाः समुपवर्णितास्सन्ति। आत्मकल्याणकामी पुरुषः एतासु एकामपि विद्यामाश्रित्य परमनिःश्रेय समधिगन्तुं क्षमो भवति। इमाः सर्वाः विद्या ब्रह्मविद्याया नाम्ना अभिहिताः भवन्ति।

अनेन विवेचनेनायमर्थः स्पष्टो भवति यत् सर्वाः समुपलभ्यमाना उपनिषदः तथाविद्याः गावः सन्ति याः मुमुक्षुपुरुषसंगकान् दुहन्ति। आसामुपनिषदामालोके परमनिःश्रेयसः प्राप्तिः सुकरा भवति। औपनिषदपरमपुरुषवरणीयताहेतुगुणस्तु तस्य उपनिषत्प्रतिपादितविद्याविधिनोपासनमेव वर्तते तथा चोक्तम्—

'नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन।
यमेवैष वृणुते तेन लभ्यः तस्यैव आत्मा विवृणुते तनुं स्वाम्॥'

तथाविधपात्रता च जीवपरमात्मयाथात्म्यज्ञानपूर्वकवर्णाश्रमेति कर्तव्यताकपरमपुरुषचरणयुगलप्रणामादिफला ।

राष्ट्रीयैकता

भारतवर्षस्य वैदिकः कालः संगठनात्मकदृष्ट्या स्वर्णयुग आसीत् यत्र महर्षिभिः कामना कृता यत्—'संगच्छध्वम् संवदध्वम् संजोमनांसि जानताम्' 'भद्रं कर्णेभिः श्रृणुयाम देवभद्रं पश्येमाक्षभिः ।' 'माता नः पृथिवी पुत्रोऽहम् पृथिव्याः' इत्यादिकम् । वेदोपबृंहणपरायणा अपि प्राहुः—'सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वें भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत् ।' 'वसुधैव कुटुम्बकम्' इति च ।

इयं मानवमात्रस्य कल्याणकामना भारतस्यैव संस्कृतौ समुपलभ्यते । अत्रैव जनाः विश्वकल्याणकामनया कार्याण्यकार्षुः । अस्यैव देशस्य विदुषां सविधे उपविश्य जनाः चारित्र्यादिकस्य शिक्षामाप्नुवन्ति स्म । तथा चाह भगवान् मनुः—

'एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं-स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः ॥' इति ।

अत्रैव आचार्याः शङ्कररामानुजवल्लभनिम्बार्कमध्वप्रभृतयः समेषां जगति जनिमतां जननमरणपदवीजाङ्घालानामात्मोद्धाराय समवाप्तये च परमां शान्तिम् आजीवनं समाजोपदेशस्य निःस्पृहतया कार्याण्यकार्षुः ।

परन्तु दैवदुर्विपाकात् जनेषु मतभेदस्य पाश्चात्यानां षडयन्त्रभयेन कार्येण प्रचारः संजातः । पाश्चात्या एव भारतीयायां जनतायाम् वैरस्य प्रचुरं प्रचारमकार्षुः । वर्गेषु तेषु तेषु मतभेदः प्राचरत । अस्यारम्भस्तु तदाभूत् पदायमखण्डो भारतः भारतपाकिस्तानरूपेण विभक्तोऽभूत् । एक एव महान् देशः देशद्वयरूपेण विश्वस्मिन् विश्वे प्रख्यातोऽभूत् ।

पुनः स्वतन्त्रे भारते राजनीतिज्ञानां अतीव कष्टप्रदं साम्राज्यं संजातम् । परञ्चेयं राजनीतिरपि दलागतराजनीतिरूपेणोद्भूय सम्पूर्णमेव देशं विनाशयितुम् आतिष्ठते । इमे राजनीतिज्ञाः एव समीहितसाधनाय वञ्चयितुमखिलं समाजमखिलां जनताम् च तथा तथा प्रयतन्ते । कांग्रेस–जनतादल–भारतीयजनतापार्टी–कम्युनिस्ट–लोकदलादिकानि यानि कान्यपि संगठनानि साम्प्रतम् समुपलभ्यन्ते तानि सर्वाण्येव एव समीहितसाधनपराण्येव पार्यन्तिकविचारे कृते सति प्रतीयन्ते । देशस्य सत्तायाम् केन प्रकारेण ममाधिकारो जायेत एतदर्थमेव सर्वदलीयाः राजनीतिज्ञाः प्रयतन्ते ।

अद्य खालिस्तानसमर्थकानामुग्रवादः, कश्मीरं विनाशयितुमुग्रवादः इत्यादिरूपेण देशे सर्वत्रोग्रवादस्य प्रचुरः प्रचारो विलोक्यते ।

एतत् सर्वम् राष्ट्रीयैकतायाः विरुद्धम् वर्तते । यदि सर्वे राजनीतिज्ञा पारस्परिकं मतभेदं विस्मृत्य देशस्य सुखसमृद्धचे प्रयत्नं कुर्युः तर्हि नूनमिदम् प्रतीयमानं संकटं विनश्येत । भाषाविषयको विवादः, धर्मविषको विवादः, दलविषयको विवादः, उग्रवाद पृथकतावादश्चैतत् सर्वमेव अस्माकं बुद्धेः विकारमात्रम् वर्तते । अस्माभिः सर्वैरेवमेवावगन्तव्यम् यत् वयं न तु विहारप्रदेशीयाः स्मः न वा बङ्गीयाः नवोत्तरप्रदेशीयाः व यम् सर्वे दक्षिणात्याः औत्तराहश्चि भारतीयाः स्मः । अस्माकं सर्वेषाम् एक एवदेशो वर्तते भारतवर्षः । अस्य देशस्य सर्वे वासिनः परस्परं बान्धवाः सन्ति केनापि साकं कस्यचनापि मौलिको विरोधो नास्ति । अस्माकं सर्वेषामेकैव भाषा वर्तते याऽस्य देशस्य राष्ट्रभाषा वर्तते । राष्ट्रभाषायाः सहायिकाः सन्ति सर्वाः भाषाः याः याः अस्य देशस्य तस्मिन् तस्मिन् प्रदेशेभागविशेषे वा व्याहृयन्ते व्यवहृयन्ते वा ।

येन प्रकारेणैकस्मिन् परिवारे एक एव पुरुषो नियामको भवति । गृहस्थाश्रमे जनाः तस्य समर्थकाः भवन्ति, तेनैव प्रकारेण देशस्य राष्ट्रभाषैव मुख्या भाषा भवति, तद्व्यतिरिक्ताः सर्वाः देशस्य भाषाः तस्याः राष्ट्रभाषायाः सहायिकाः भवन्ति यदीत्थमेव सर्वं निश्चीयते तदा भाषाविषयको यो हि विवादो देशे विलोक्यते, सः शाम्येत् ।

अनेनैव प्रकारेण यदि सर्वे भारतीयाः इदम् निश्चयेयुः यत् सर्वे वयम् भारतीयाः स्मः । विहार–वङ्गाल–उत्तरप्रदेश–आसाम–कश्मीर–पञ्जावप्रभृतयस्तु प्रदेशाः अस्य भारतराष्ट्रस्यावयवभूताः सन्ति । यदि भारतदेशः: समृद्धः, निष्कण्टकः कलहकोलाहलरहितो भविष्यति तदाऽस्य देशस्य सर्वे प्रदेशा अपि शान्ताः सुखमयाः समृद्धाश्च भविष्यन्ति । कश्चनापिकुत्रचित् केनापि प्रकारेणोपद्रवो नहि भविष्यति तदा नूनमस्य देशस्य राष्ट्रीयता सुरक्षिता स्यात् । विश्वस्मिन् विश्वे भारतदेशः पुनरपि समुन्नतेः काष्ठां चुम्बेत् । पुनरपि भारतदेशः विश्वे गुरुत्वस्य पदमियात् ।

परञ्चैतत् सर्वं तदा भवितुमर्हति यदा स्वार्थमयी राजनीतिः राजनीतिज्ञैः परित्यक्ता भवेत् । राजनीतिज्ञा एव नेताशब्देनाभिधीयन्ते । यस्य देशस्य नेतारः स्वार्थसिद्धि परित्यज्याखिलजनताकल्याणकामनया कार्याणि कुर्युः ।

अस्माकं देशो यदा परतन्त्रोऽभूत् तदात्वेऽपि एतादृशी स्थितिरासीत् । सम्पूर्णो देशः पृथक् राज्येषु विभक्त आसीत् । सर्वेषां राज्यानां प्रशासकाः पृथक्-पृथक् स्वकीयां सत्ताम्, अनुभूयन्ते स्म । परस्परं तेषु विद्वेष आसीत् राजानः स्वेतरस्य राज्ञो विनाशमकामयन्त । एतादृश्यामेवावस्थायाम् भारतवर्षस्योपरि यवनानामाक्रमणमभूत् । जयचन्दनामकः स्वदेशीय एव एकोराग तस्य सहायकोऽप्यभूत् । साम्प्रतमपि राजनेतारः परस्परं कलहायन्ते । अतएव देशस्य अतीव कष्टमयी स्थितिर्वर्तते ।

साम्प्रतम् पाश्चात्येषु देशेषु राष्ट्रैकतायाः सम्वन्धेनैव प्रायेण मानवाः सम्वद्धा दृश्यन्ते । सर्वे हि योरोपीयाः देशाः प्रायः क्रिश्चियनधर्मेण व्याप्ताः सन्ति । अस्याः धार्मिक्याः एकतायाः सत्वेऽपि तेषां-तेषां देशानाम् नागरिकाः स्वम् स्वम् जापानीन्–रसियन–अमेरिकनेत्यादिरूपेणाभिदधति । अनेन तेषां देशीयैकता दृग्गोचरा भवति । अनेनैव प्रकारेण–प्रदेश–जाति–धर्म–भाषादिकानां भेदान् विस्मृत्य आत्मानं यदि भारतीयत्वेनानुभवेन तर्हि देशैकतायां अस्याः भावनायाः महान् प्रभावो जायेत ।

अनेनैव प्रकारेण यदा भारतस्योपरिचीनदेशीयानामाक्रमणमभूत् तदाऽस्य देशस्य वासिनः चीनाक्रमणस्य विरोधमकार्षुः। भारतस्येनामेकतामेवावेक्ष्य चीनदेशीयाः स्वाक्रमणप्रवृत्तेः विरता बभूवुः ।

परन्तु साम्प्रतम् तु देशे एतद्विपरीतैव काचन भावना दृश्यते । स्वतन्त्रतादिवसस्य समये कश्मीरप्रदेशे तत्रत्याः उग्रवादिनः श्रीनगरे पाकिस्तानीयामेव पताकाम् उत्तोलायन्तीति महती विडम्वना। इमे पथभ्रान्ताः नागरिकाः केन मोहेन परिगताः सन्ति इत्यनुमातुमपि कठिनं वर्तते । यथेतादृशमेव वातावरणं वर्तते तर्हीदम् स्पष्टरूपेण राष्ट्रद्रोहो वर्तते । अस्याः भावनायाः कश्चनापि राजनीतिज्ञोऽपि यदि समर्थनं करोति तर्हि स्पष्टरूपेण सः राष्ट्रद्रोही वर्तते। एतादृशी भावना तु सर्वदा निन्दनीयैव वर्तते ।

साधनसप्तकानुगृहीतमनाः परमात्मानमुपासीत

अथवा—भक्ते साधनानि

अथवा—अनुविद्यविजानाति

मोक्षप्राप्तिरेव परमपुरुषार्थ इत्यभिधीयते । तस्य मोक्षस्य प्राप्तेः किं साधनत्वमित्यपेक्षायां श्रुतयः ज्ञानस्यैव मोक्षसाधनत्वं प्रतिपादयन्ति । तत्र मोक्षसाधनभूतस्य ज्ञानस्य स्वरूपम् किमित्यपेक्षायाम् एके वेदान्तिनः प्रतिपादयन्ति यत् 'तत्त्वमस्यादि वाक्यवाक्यजन्यम् ज्ञानमेव साधनमिति । तत्र विशिष्टाद्वैतिनः प्राहुः—

वाक्यार्थज्ञानादन्यदेव ध्यानोपासनादिशव्दवाच्यम् ज्ञानम् वेदान्तवाक्यैः मोक्षसाधनतया विधित्सितम् वर्तत इति । तथा चात्रोपन्यस्यन्ति वेदान्तवाक्यानि विशिष्टाद्वैतिनः—

(१) विज्ञाय प्रज्ञां कुर्वीत इति मुमुक्षुपुरुषः श्रवणमननाभ्यां सम्यङ्निश्चित्य ततस्तद्ध्यायेत् इत्यर्थः ।

(२) अनुविद्यविजानाति—सदाचार्यस्य सविधे श्रवणेन द्वारा वाक्यार्थज्ञानं सम्पाद्य ततः मननं निदिध्यासनं च कुर्यादित्यर्थः । (३) ओमित्येवमात्मानं ध्यायथ—इति—हे धीराः । परब्रह्मभूतं परमात्मानं तद्वाचकेन 'ओम्' इति

प्रणवेनैव सततं चिन्तयत । (४) निचाय्य तं मृत्युमुखात् प्रमुच्यते—इति—पूर्वोक्तं परमात्मानं दर्शनसमानाकारेण ध्यानेन साक्षात्कृत्य अत्यन्तभयङ्कराद् संसाराद् मुक्तो भवतीत्यर्थः । (५) आत्मानमेव लोकमुपासीत' इति—आत्मेतददखिलं वस्तु परित्यज्य, उपायभूतमात्मानमेव उपेयतया भजेत इत्यर्थः । (६) आत्मावारे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति हे मैत्रेयि ! परमात्मैव दर्शनसमानाकारेण ध्यानेन विषयीकार्यः । तदर्थं च तत्त्वतः इदमित्थमिति स्वात्मनि प्रतिष्ठाप्य, तदर्थं च यथावस्थितं गुरुमुखाच्छ्रोतव्य इत्यर्थः । (७) सोऽन्वेष्टव्यः सो विजिज्ञासितव्यः इति । स एवात्मा परिमार्गणीयो ध्यातव्यश्चेत्यर्थः ।

एताः श्रुतयः अनुविद्य, विज्ञाय इति वाक्यार्थज्ञानमनुद्य अप्राप्तत्वेन निदिध्यासनस्यैव विधानं कुर्वन्ति । 'आत्मा वा अरे' इति श्रुतौ 'श्रौतव्यः' इत्यनुवादः स्वाध्यायस्यार्थपरत्वेनाधीतवेदः पुरुषः प्रयोजनवदर्थावबोधित्वदर्शनात् तन्निर्णयाय स्वयमेव श्रवणे प्रवर्तते इति श्रवणस्य प्राप्तत्वात् श्रवणप्रतिकण्ठार्थं मननस्य मन्तव्यः इति चानुवादः । तस्मात् श्रुत्याध्यायनमेव विधीयते । वक्ष्यति च—'आवृतिरसकृदुपदेश इति सूत्रकारः ।

अनेन विवेचनेनायमर्थः स्पष्टो भवति यत् अपवर्गोपायतया विधित्सितम् वेदनमुपासनमित्यवगम्यते । विधुपास्योः व्यतिरेणोपक्रमोपसंहारदर्शनात् । 'मनोब्रह्मेत्युपासीत' इत्यत्र 'भाति च तपति च कीर्त्या यशसा ब्रह्मवर्चसेन य एवं वेद' इत्यादिषु स्मृतिषु विधुपास्योः व्यतिकरेण उपक्रमोपसंहारौ दृश्येते ।

ध्यानं च 'तैलधारा वेदविछिन्नस्मृतिसन्तानरूपम्' भवति ध्रुवा स्मृतिः । स्मृतिलम्भे सर्वग्रन्थानां विप्रमोक्षः इति ध्रुवायाः स्मृते अपवर्गोपायत्वश्रवणात् । सा च स्मृतिः दर्शनसमानाकारा । भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे । इत्यादिना ऐकार्थात् । एवं च सति 'आत्मावाऽरेद्रष्टव्यः' इत्यनया श्रुत्या निदिध्यासनस्य दर्शनसमानाकारता विधीयते । भवति च स्मृतेः दर्शनसमानाकारता भावना प्रकर्षात् । अतएवायमर्थः सिद्धचति यत् सर्वासूपनिषत्सुमोक्षसाधनतया विहितम् वेदनमुपासनम् स्यादिति ।

किञ्च वाक्यकारो ब्रह्मानन्द्याचार्योऽपि—'सकृतप्रत्ययं कुर्यात् शब्दार्थस्य कृततत्वात्' । इति पूर्वपक्षं कृत्वा सिद्धान्तरूपेण प्राह—'सिद्धं तूपासनशब्दात्' । इति तेनैवाचार्येण 'वेदनम्' असकृदावृत्तं मोक्षसाधनमिति निर्णीतम् । पुनः—'उपासनं स्यात् ध्रुवानुस्मृतिः दर्शनान्निर्वचनाच्च' इति वाक्येन तस्यैव वेदनस्य उपासनरूपस्य असकृतावृतस्य ध्रुवानुस्मृतित्वमुपवर्णितम् सेयं स्मृतिः दर्शनरूपा प्रतिपादिता । दर्शनरूपता च प्रत्यक्षतापत्तिः ।

एवं भूतामेव प्रत्यक्षतापन्नां स्मृतिं विशिनष्टि श्रुतिः—

'नायमात्मा प्रवचनेन लभ्यो न मेघया न बहुना श्रुतेन ।
यमेवैष वृणुते तेन लभ्यः तस्यैव आत्मा विवृणुते तनूं स्वाम्' ॥ इति

अनेन केवलं श्रवणमनननिदिध्यासनानाम् आत्मप्राप्त्यनुपायत्वमुक्त्वा यमेवैष वृणुते तेनैव लभ्यः' इत्युक्तम् । प्रियतम एव हि वरणीयो भवति । यस्यायं निरतिशयप्रियः स एवास्य प्रियतमो भवति । यथा अयं प्रियतम आत्मानं प्राप्नोति, तथा भगवान् स्वयमेव प्रयतते इति भगवतैवोक्तम्—

'तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ॥ इति
'प्रियो हि ज्ञानिनोऽत्यर्थमहं स च मम प्रियः ।' इति च ।

अतः साक्षात्काररूपा स्मृतिः स्मर्यमाणात्यर्थप्रियत्वेन स्वयमपि अत्यर्थं प्रिया यस्य स एव परेणात्मना वरणीयो भवति इति तेनैव लभ्यते पर आत्मा इत्युक्तम् ।

एवं रूपा ध्रुवानुस्मृतिरेव भक्तिशव्देनाभिधीयते उपासनापर्यत्वात् भक्तिशव्दस्य । उक्तश्चापि—'स्नेहपूर्वमनुध्यानं भक्तिरित्यभिधीयते' इति । अतएव चाभिधीयते श्रुतिस्मृतिभिः ।

'तमेव विदित्वातिमृत्युमेति ।' (श्वे० ३।८)
तमेवं विद्वानमृत इह भवति ।
नान्यः पन्था अपनाय विद्यते ॥ (तै० पु० सू० १७)
नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवं विधो द्रष्टुं दृष्टवानसि मां यथा ॥ (गी० ११।५३)
भक्त्या त्वनन्यया शक्य अहमेवं विधोऽर्जुन !
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥ (गी० ११।५४)
पुरुषः सः परः पार्थ ! भक्त्या लभ्यस्त्वनन्यया ॥'
(गी० ८।२२)

एवं रूपायाः ध्रुवानुस्मृतेः साधनानि यज्ञादीनि कर्माणीति तथा चाह महर्षिः वादरायणः सूत्रे—'यज्ञादिश्रुतेरश्ववत् ।' (ब्र० सू० ३।४।२६) येन प्रकारेण गमनसाधनानि भवन्ति अश्वादिकानि तेनैव प्रकारेण ध्रुवानुस्मृतिसाधनानि सन्ति यज्ञादिकानि नित्यानि नैमित्तिकादीनि च कर्माणि ।

यद्यपि 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन । (वृ० उ० ६।४।२२) इति श्रुत्या यज्ञादयो विविदिषोत्पत्तौ । विनियुज्यन्ते, तथापि तस्यैव वेदनस्य ध्यानरूपस्य अहरहरनुष्ठीयमानस्य अभ्यासाधेयातिशयस्य अप्रयाणादनुवर्तमानस्य ब्रह्मप्राप्तिसाधनत्वात् तदुत्पत्तये सर्वाण्याश्रमकर्माणि यावज्जीवमनुष्ठेयानि।

तस्याश्च ध्रुवानुस्मृतेः निष्पत्तिः विवेकादिभ्य एव भवतीति प्रतिपादयन्नाचार्यो ब्रह्मानन्दिराह—

तल्लब्धिः विवेकविमोकाभ्यासक्रियाकल्याणानवसादानुद्धर्षेभ्यः सम्भवात् निर्वचनाच्च ।' तत्र विवेकादीनां स्वरूपं निरूपयन्नाचार्यो ब्रह्मनन्दिनाह—

'जात्याश्रयनिमित्ता दुष्टादन्नात् कायंशुद्धिः विवेकः (ब्र० नं० वा०) अयमाशयो यत्, अन्ने दोषत्रयम् जाते-जातिदोषः यथा—प्लाण्डुलशुनादिका जातिदोषदूषिताः । आश्रयदोषः–यथा—अभिशस्त चाण्डालादिकानामन्नम् । निमित्तदोषः—यथा केशमक्षिकादिपतनेन दूषितम् सिद्धमन्नम् । एभिः त्रिप्रकारकैः दोषैरहितेनान्नेव द्वारा शरीरस्य यात्रानिर्वाहनिश्चय एव विवेक इत्यभिधीयते । तथा चात्र निर्वचनम्—

'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृति ।'

(छा० उ० ७।२६।२) इति ।

विमोकं स्पष्टयन् वाक्यकार आह—विमोकः कामानभिष्वङ्गः ।' इति । विषयभुक्त्वा स्थातुं न शक्नोति येन स विकारः अभिष्वङ्ग इत्यभिधीयते । तस्याभाव एव कामानभिष्वङ्ग इत्यभिधीयते । तथा चात्र निर्वचनम्—'शान्त उपासीत ।' इति ।

अभ्यासं निरूपयन् वाक्यकर आह—'आलम्बणसंशीलनम् पुनः पुनरभ्यासः' इति । आलम्बनीभूतः शुभाश्रय एवात्रालम्वणशब्देनाभिधीयते । संशीलनञ्च योगकालकर्तव्यध्यानानुग्राहकमिदं सदासंशीलनम् । निर्वचनं चात्र स्मार्तमुदाहृतं भाष्यकारेण । 'सदा तद्भावभावितः' (गी० ८।६) इति ।

स्वशक्त्यनुसारेण पञ्चमहायज्ञादीनामनुष्ठानमेवात्र कियाशव्दवाच्यं प्रतिपादयन् वाक्यकार आह—पञ्चमहायज्ञाद्यनुष्ठानं शक्तिः क्रिया ।' इति । चात्र निर्वचनम्—'क्रियावानेष ब्रह्मविदां वरिष्ठः ।' (मु० उ० ३।१।४) इति । 'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसा अनाशकेनेति च ।

'सत्यार्जवदयादानाहिंसानभिध्याः कल्याणानि ।' इति । तथा चात्र निर्वचनम्—'सत्येन लभ्यः' (मु० उ० ३।१।५) तेषामेवैष विरजो ब्रह्मलोकः (प्रश्न० उ० १।१५।१६) इत्यादिकम् ।

अनवस्थादरूपम् षष्ठ साधनं निरूपयन् वाक्यकारः प्राह—देशकालवैगुण्यात् शोकवस्त्वाद्यनुस्मृतेश्च तज्जं दैन्यभमास्वरत्वं मनसः अवसादः' इति तद्विपर्ययः' इति तद्विपर्ययः अनवसादः । निर्वचनश्चात्र—'नायमात्मा वलहीनेन लभ्यः ।' (मु० उ० ३।२।४)

तद्विपर्यंजा तुष्टिरुद्धर्षः इति। तद्विपर्यय अनुद्धर्षः। अतिसन्तोषविरोधीत्यर्थः। निर्वचनमपि—शान्तोदान्त इति।

पंचवर्षीययोजनाः

कस्यचनापि कार्यस्यानुष्ठानात् पूर्वभूतस्य कार्यस्य योजनायाः निर्माणमावश्यकम् भवति। येन प्रकारेण भवननिर्माणात् पूर्वम् तस्य भूमिका निर्माणमावश्यकम् भवति तेनैव प्रकारेण कस्यचनापि कार्यस्य कारणात् पूर्वम् तस्य कार्यस्य योजना निर्माणमावश्यकम् भवति। अनेनैव प्रकारेण भारतवर्षस्य पञ्चवर्षीययोजनाः अपि राष्ट्रनिर्माणस्याङ्गभूतास्सन्ति। पञ्चवर्षीययोजना भारतराष्ट्रस्य सर्वकारीया योजनाः सन्ति। देशस्योन्नतये उपलभ्यमानानि यानि साधनानि सन्ति तेषां सर्वेषां साधनानां समावेश अत्र कृतो वर्तते। पञ्चवर्षीययोजना सुदेशस्य जनतायाः क्षमतायाः, तस्याः वृद्धेः कलाकौशलस्य, प्रवीणतायाश्च विषये पूर्णरूपेण विचारः क्रियते। इमाः पञ्चवर्षीययोजनाः भारतस्य प्राकृतिकसाधनेषु विशेषरूपेणाश्रितानि सन्ति। समकालमेव धनगतसाधनानामप्यत्यधिकं महत्त्वं वर्तते एतासु योजनासु।

धनगतसाधनेष्वेव देशस्य शिल्पशालानां, पण्यनिर्माणस्थानानाम् विद्युद्गृहाणां, वायुयानानां, रेलयानानाम्, राजमार्गाणांम्, मोटरयानानाम्, गृहाणाम्, भवनानाम्, आयुधानामपि गणना भवति।

तत्र नूनमयं देशः व्यक्तिगतसाधनेन प्रकृतिकेन साधनेन च परिपूर्णो वर्तते भारतवर्षः। यद्यनयोरुभयप्रकारकयोः साधनस्य परस्परं साहाय्यं स्यात् तदा तु धनगतसाधनं तु निरन्तरमेधिष्यत एव। इदमेव लक्ष्यं निश्चित्य भारतवर्षस्य केन्द्रीयः सर्वकारः प्रादेशिकाश्च सर्वकाराः नैकधा यतन्ते।

पञ्चवर्षीययोजनासु सर्वकाराः निम्नाङ्कितेषु विषयेषु ध्यानं दीयते।

(१) सिंचनम्—भारतः कृषिप्रधानो देशो वर्तते। अतएव देशस्य प्रथमाऽवश्यकता कृषेरभ्युन्नतिरस्ति। कृषेरुन्नतये चावश्यकता भवति समयानुसारेण धान्यानां सिंचनस्य। अतएवास्मिन् भारतेवर्षे तस्य तस्य राज्यस्य सर्वकाराः स्व-स्वसौविध्यानुसारेण स्वकीये राज्ये सिंचनस्य योजनाम् प्रारम्भयन्ति। यद्यपि नदीभ्यो सारणीः—निष्कास्य ताभ्यश्क्षेत्रसिंचनम् क्रियत एव, किन्तु साम्प्रतिके काले तु नदीसु वन्धं निर्माय तेभ्यो विद्युतः उत्पादनं कृत्वा नल-कूपादिद्वारा सिंचनस्य व्यवस्था महतीम् भूमिकां सिंचनस्य क्षेत्रे निर्वहति। तस्य तस्य प्रदेशस्य सर्वकाराः तु इदं कार्यं कुर्वन्त्येव, नलकूपादिनिर्माणाय व्यक्तिगत रूपेणापि सर्वकाराः ऋणादिकं वितरन्ति।

(२) विद्युदुत्पादनम्—यद्यपि सिंचनस्य क्षेत्रे विद्युतो महती भूमिका तु वर्तत एव, किन्तु विद्युतः उपयोगः शिल्पशालादिकानाम् संचालनाय अपि। यतः

देशस्योन्नतये शिल्पशालादिकानाम् निर्माणम् तेषां तेषां वस्तूनाम् राष्ट्रपुरुषाणामुपयोगाय उत्पादनमप्यत्यावश्यकं विद्युदा । ग्रामाणाम् नगराणाम् प्रकाशोकरणमपि सम्पद्यते । अस्यां योजनायां तस्मिन् तस्मिन् प्रदेशे सर्वकाराः त्रिवृहद्रूपेण धनव्ययं कुर्वन्ति । तेन च भवत्यपि राष्ट्रस्य दिनानुदिनम् समृद्धिरिति नास्ति तिरोहितम् कस्मैचनाराष्ट्रपरिस्थित्या परिचिताय पुरुषाय ।

(३) कृषेरभ्युन्नतिः—साम्प्रतिको वैज्ञानिको वर्तते । सर्वेषु क्षेत्रेषु विज्ञानम् नैजम् महत्त्वमयं स्थानं विभर्ति । अस्मिन् विषये सर्वकारा अपि प्रयत्नशीलाः सन्ति । विज्ञानस्य सहायतया उन्नतकृषिकार्यं क्रियते । उन्नतानां बीजानामनुदिनमन्वेषणम्, कृषिसाधनानां वैज्ञानिकीकरणं, कृषेः भूमेः वैज्ञानिकं परीक्षणं प्रथितानां कृषिपद्धतीनामनुसरणमेतत् सर्वमेव कृषेरभ्युन्नत्तेः साधनम् वर्तते ।

(४) पशुधनस्योन्नतिः—ग्रामेषु निवसताम् कृषिकर्म कुर्वताम् जनानां जीवने पशुधनस्याप्यत्यधिकं महत्त्वम् वर्तते । कृषावपि वृषभादिकानामुपयोगो जायते साम्प्रतमपि । दुग्धाय गवाम् महिष्यादिकानाञ्चावश्यकता भवति । एतदर्थं सर्वकाराः वैज्ञानिकेन विधिना संकरीकरणं कृत्वा पशुजातिकमुन्नत्तिशीलां कुर्वन्ति । इदानीं देशस्य सर्वेषु भागेषु तथा विधा अपि गावः समुपलभ्यन्ते याः प्रतिदिनम् मणपरिमितामपि दुग्धं दुहन्ति । तथा विधा महिष्य अपि सर्वत्र लब्धप्रचाराः सन्ति । अनेन दुग्धव्यापारे महती वृद्धिः संजाता । दुग्धशाला स्वपेक्षितमात्रायाम् दुग्धम् सर्वत्र समुपलभ्यते ।

(५) यातायातसौविध्यम्—भारतदेशोऽयं ग्रामप्रधानदेशो वर्तते । अतएव सर्वेषु ग्रामेषु गमनागमनोपयोगिनां राजमार्गरेलमार्गादिकानाम् सौविध्यम् नास्ति । प्रत्येकस्मिन् पञ्चवर्षीययोजनायाम् सर्वकाराः तस्य तस्य प्रदेशस्य राजमार्गादिनिर्माणार्थम् रेलमार्गादिवृद्ध्यर्थं च प्रयासं कुर्वन्ति, तदर्थं प्रचुरमात्रायां धनव्ययं च कुर्वन्ति । यदि राजमार्गादिकानां पूर्णरूपेण वृद्धिः संजायेत तदा हाटकादियावत् कृषकाः स्वयमेव स्वोत्पादितानि वस्तूनि समासायेयुः ।

(६) जनस्वास्थ्यः—जनशक्तिः देशस्य महती शक्तिर्भवति । भारतवर्षस्य तु विशेषरूपेण । एतदर्थं देशस्य जनताया स्वास्थ्यमत्यावश्यकम् । तदर्थम् पौष्टिकस्याहारस्य, स्वास्थ्यसंरक्षणोपयोगिनः औषधेश्चावश्यकताऽनिवार्यरूपेण भवति । नगरस्य ग्रामस्य स्वच्छताया आवश्यकता भवति रोगप्रसारनिरोधाय । पञ्चवर्षीययोजनासु एतस्मिन्नपि विषये सर्वकाराः योजनाबद्धरूपेण व्ययं कुर्वन्ति ।

(७) शिक्षा—जनतायाः योग्यताया उन्नतये शिक्षा अनिवार्या भवति । यस्य राष्ट्रस्य जनता यावन्मात्रायाम् शिक्षिता भवति, तस्य देशस्योन्नतिः, तस्य देशस्य समाजश्च तावन्मात्रायामेवोन्नत्तं भवति । कश्चित् काल आसीत् यदा

भारते वर्षे सर्वे जनास्सुशिक्षिता अभूवन्। तदात्वे देशोऽयमपि जगद्गुरोः सिंहासनमध्यतिष्ठत्। वैदेशिकानाम् आक्रमणकारिणां च देशे प्रवेशात् देशोऽयम् परतन्त्रः संजातः येन जना अशिक्षिता अभूवन्। किन्तु स्वतन्त्रता प्राप्तिकालतः एवास्य देशस्य सर्वकाराः प्रयतन्ते शिक्षाविकासाय। साम्प्रतम् तु भारतस्यानेके एतादृशाः प्रदेशाः मण्डलानि ग्रामाश्च सन्ति यत्र कश्चनापि अशिक्षितो नास्ति। एतदर्थमेव सर्वकारीयस्तरेण देशे अनिवार्यशिक्षायोजनाऽपि प्रवर्तिताऽभूत्। देशस्यावश्यकतामेवाक्षिलक्ष्यीकृत्य सर्वकारीयस्तरेण औद्योक्याः शिक्षाः, प्रौढ़शिक्षायाः, सामान्यशिक्षायाः, सामाजिकशिक्षायाश्च नियमाः प्रवर्तिताः भवन्ति, येन सर्वे जनाः स्वस्वोपयोगिताऽनुसारेण शिक्षामाप्नुयुः।

परञ्च शिक्षायाः विषये इदम् चिन्तनीयम् वर्तते यत् अनुदिनम् शिक्षायाः क्षेत्रेह्रास एव जायते। योग्यानामध्येतॄणाम् प्रतिशतम् न्यूनायते एव। यद्यपि अध्येतॄणाम् तु सङ्ख्या वर्द्धते, किन्तु बौद्धिकमुत्पादनम् ह्रासमेवानुसरति। अतएवास्मिन् विषये सर्वकारेण, शिक्षकैः, अध्येताभिश्च नूनं ध्यानम् देयम्।

(८) पददलितानामुन्नतये प्रयासः—समाजे सर्वप्रकारकाः जनाः निवसन्ति। देशस्य सर्वाङ्गीणविकासाय सर्वेषाम् देशवासिनामुन्नतिरनिवार्या वर्तते। एतदर्थं देशे ये निर्धना जनाः सन्ति, येषामुदरपोषणमेव दुष्करम् भवति, तेषां जनानामपि आवास–शिक्षावृत्त्यादिविषये सौविध्यावाप्तिरनिवार्या वर्तते अन्यत्था निर्धनानां वर्गः अनुदिनमपहीयेत एव। एतदर्थं सर्वकाराः सर्वेषां प्रदेशानाम्, केन्द्रस्य च आरक्षणस्य सौविध्यं ददाति येन तेषामपि जनानां भृत्यादिकानाम् क्षेत्रे प्रवेशः सुकरः स्यात्। प्रत्येकयोजनायां निर्धनवर्गस्योन्नतये सर्वकाराः व्यवस्थां कुर्वन्ति।

(९) बहूद्योगीया सामूहिक्यो योजनाः—अस्यां योजनायाम् ग्रामाणामुन्नतये, गमनागमनोपयोगीनि साधनानि एकत्रीक्रियन्ते। एतासु योजनासु नवीनानां राजमार्गाणाम् निर्माणम्, अधिकाधिकानामन्नानामुत्पादनम्, ग्रामीणानां बालानां प्रौढानां च शिक्षणमित्यादिकाः कार्यक्रमाः सर्वकारेणायोज्यन्ते।

अनेन प्रकारेणविभिन्नप्रकारेण सर्वकाराः पञ्चवर्षीययोजनानाम् माध्यमेन देशस्य, समाजस्य व्यक्तेश्चोन्नतये नैकविधानि कार्याणि कुर्वन्ति। इदानीं भारतवर्षे अष्टमी पञ्चवर्षीया योजना प्रचलति। आसां पञ्चवर्षीययोजनानां माध्यमेन देशस्य प्रचुरोन्नतिरपि संजाता।

तत्त्वत्रयम्

अथवा—भोक्ता भोग्यं प्रेरितारञ्च मत्त्वा।

तत्त्वत्रयमेव वैदिकानां सारतमः सिद्धान्तः । तत्त्वत्रयस्यैव प्रतिपादने सर्वेषां वेदागमानां परमं तात्पर्यमिति वैदिका अभिप्रयन्ति । तत्त्वत्रयशब्देन हि चिदचिदीश्वरा अभिधीयन्ते । तत्र चित्, चेतनो, जीवः, प्रत्यक्, आत्मा प्रभृतयः शब्दाः समानार्थका इति शब्दविदः । अचेतनम्, प्रकृतिः, पराक्, अचित्, प्रधानम् जडः इत्यादिकाः शब्दाः जडतत्त्वान्येवाभिदधति । ईश्वरः, परमात्मा, परः, परब्रह्मेत्यादिकाः समानार्थकाः ।

'भोक्ता भोग्यं प्रेरितारञ्च मत्त्वा' (श्वे० १।१२)। 'ज्ञाज्ञौ द्वावजावीशनीशौ' (श्वे० उ० १।९)। 'क्षरं प्रधानममृताक्षरं हरः क्षरात्मनावीशते देव एकः' (श्वे० १।९)। 'प्रधानक्षेत्रज्ञपतिर्गुणेशः' (श्वे० ६।१६)। 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः' इत्यादिकाः श्रुतयः—

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥
उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥
यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥

इत्यादीनि गीताशास्त्रवाक्यानि—

नेतरोऽनुपपत्तेः (ब्र० सू० १।१।१७) भेदव्यपदेशाच्च (ब्र० सू० १।१।१८) अनुपपत्तेस्तु न शारीरः (ब्र० सू० १।२।३) कर्मकर्तृव्यपदेशाच्च (ब्र० सू० १।२।४) संभोगप्राप्तिरिति चेन्न वैशेष्यात् (ब्र० सू० १।२।८) मुक्तोपसृप्यव्यपदेशाच्च (ब्र० सू० १।३।२) सुषुप्त्युत्क्रान्त्योर्भेदेन (ब्र० सू० १।३।४३) अधिकं तु भेदनिर्देशात् (ब्र० सू० २।१।२२) इत्यादीनि सूत्राणि च तत्त्वत्रयस्य स्वरूपयाथात्म्यम् तस्य परस्परं सम्बन्धम्, तत्त्वत्रयस्य भेदाश्च प्रतिपादयन्ति ।

एतेषां श्रौतस्मार्तसौत्रवाक्यानामालोके स्पष्टतया वक्तुं शक्यते यत् शेषत्वे सति चेतनत्वम् जीवसामान्यलक्षणम्, परप्रकाशत्वे सति विकारास्पदत्वमचित्सामान्यलक्षणम् । चिदचिदोरसंकीर्णतया शेषित्वमाधारत्वम् नियामकत्वञ्चेश्वरलक्षणम् ।

तत्रात्मनः स्वरूपम् प्रतिपादयन्तः श्रीमाल्लोकाचार्याः प्राप्तुः 'शेन्नु शेन्नु परम्परमाण' इत्युक्तप्रकारेण देहेन्द्रियमनःप्राणबुद्धिभ्यो विलक्षणम् अजडमानन्दरूपम् नित्यमणुमव्यक्तमचिन्त्यं निरवयवं निर्विकारम् ज्ञानाश्रयम् ईश्वरस्य नियाम्यं, धार्यं, शेषञ्चात्मस्वरूपम् श्रीमद्यामुनाचार्योऽपि आत्मसिद्धिनामके ग्रन्थे प्राह आत्मनो लक्षणम्—

'देहेन्द्रियमनःप्राणधीभ्योऽन्योनन्यलक्षणः ।
नित्यो व्यापी प्रतिक्षेत्रमात्मा भिन्नः स्वतः सुखी ॥' इति

आत्मनः परिमाणविषये नैयायिकानां मतभेदो विद्यते, ते आत्मनो विभुत्वं स्वीकुर्वन्ति । विशिष्टाद्वैतिनः आत्मनोऽणुपरिमाणत्वं स्वीकुर्वन्ति । आत्मा यद्यणु परिमापको नहि स्यात् तर्हि हृदि ह्येष आत्मा, इति श्रुतेः 'वालाग्रशतभागस्य शतधा कल्पितं च यत् । भागो जीवस्यवेज्ञेयः सोऽनन्तत्वापकल्पते ।' इति आत्मनोऽणुत्वप्रतिपादिकाया श्रुतेश्च विरोधः स्यात् ।

किञ्च 'उत्क्रान्तिगत्यागतीनाम्' (ब्र० सू० २।३।२०) इति सूत्रम् 'प्रद्योतेनैव आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा, अन्येभ्यो वा शरीरदेशेभ्यः' (वृ० उ० ६।४।२) 'ये वैके चास्मालोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' (कौ० उ० १।२) 'ते पुनरेत्यस्मै लोकाय कर्मणे' (वृ० उ० ४।४।६) इत्यादिकाः जीवस्य देहादुत्क्रमणलोकान्तरगमनलोकान्तरादागमनानां समर्थिकाः श्रुतयः जीवस्याणुत्वे एव सार्थका भविष्यन्ति । किञ्च 'एषोऽणुरात्मा चेतसा वेदितव्यः' (मु० उ० ३।१।९) श्रुतिः जीवस्याणुत्वं कण्ठरवेन प्रतिपादयति । अतएव जीवस्याणुत्वमेव श्रुतिसम्मतमिति सिद्धयति ।

जीवानां भेदविषये अद्वैतिनाम् मतभेदो वर्तते । प्रायेणाद्वैतिनः जीवाभेदमेव स्वीकुर्वन्ति । ये भेदमपि स्वीकुर्वन्ति तेषामपि मते भेदस्त्वौपाधिक एव, अभेद एव वास्तविकः । किन्तु परमार्थपर्यालोचने कृते प्रतीयते यत् जीवानां भेद एव वास्तविकः । यतो यदि भेदः औपाधिकः अथवा अविधिकः स्यात् तदा मुक्तावस्थायां नश्येत्, यस्मात् कारणान्नहि नश्यति मुक्तावस्थायां भेदः तस्मादेव कारणात् भेदस्य वस्तुत्वं सिद्धयति ।

निम्नांकिताश्श्रुतयः मोक्षेऽपि जीवभेदस्य समर्थनं कुर्वन्ति—(१) तद्विष्णोः परमं पदम् सदा पश्यन्ति सूरयः ।' 'साध्याः सन्ति देवाः' । 'श्रीश्च ते लक्ष्मीश्च पत्न्यौ' इत्यादिकाः ।

ते च जीवानां भेदाः बद्धमुक्तनित्याख्याः सन्ति । तत्र—'समाने जीवे पुरुषो निमग्नः अनीशया शोचति मुह्यमानः ।' इत्यादिकाः श्रुतयः बद्धजीवानाम्, 'सदा पश्यन्ति सूरयः' इत्यादिकाः श्रुतयः मुक्तजीवानाम्, श्रीश्च ते लक्ष्मीश्च पत्न्यौ' इत्यादिकाः श्रुत्तयश्च नित्यजीवानां वर्णनं कुर्वन्ति । यतो हि—संसारिणो जीवा बद्धा भवन्ति । उच्छिन्नसंसारबन्धा जीवाः नित्याः कथ्यन्ते । कदाप्यनाघ्रातसंसारा जीवाः नित्याः कथ्यन्ते ।

अचित्तत्त्वम्—तत्त्वत्रयस्य द्वितीयम् तत्त्वं वर्तते । ज्ञानशून्यत्वे सति विकारास्पदत्वमचित्सामान्यलक्षणम् । तस्य च अचितः शुद्धसत्त्वं मिश्रसत्त्वम् सत्त्वशून्यञ्चेति त्रयो भेदास्सन्ति ।

तत्र त्रिपाद्विभूतिः, नित्यविभूतिः वैकुण्ठमित्यादिकाः शब्दाः शुद्धसत्त्वस्य वाचकाः सन्ति । 'त्रिपादस्यामृतं दिवि' इति श्रुत्या समाम्नातम् शुद्धसत्त्वमुपर्यपरिच्छिन्नम् नीचैर्लीला विभूत्या परिच्छिन्नम् नित्यमुक्तैर्जीवैरध्युषितञ्जडश्च वर्तते ।

मिश्रसत्त्वशब्देन हि चतुर्विंशतितत्त्वात्मिका प्रकृतिरुच्यते । तदिदं सत्त्वरजस्तमोगुणयुक्तं, बद्धानां जीवानां ज्ञानानन्दयोस्तिरोधायकं विपरीतज्ञानजनकं, नित्यं, परमात्मनः क्रीडापरिकरभूतं देशभेदेन कालभेदेन च सदृशानां विसदृशानां च विकाराणाञ्जनकं भवति । प्रलयावस्थायां मिश्रसत्त्वं सदृशान् विकारान्, सृष्टौ च विसदृशान् विकारान् जनयति । नामरूपविभागानर्हावस्था विकाराणां सदृशत्वं, नामरूपविभागार्हावस्था गुणानां विसदृशत्वमित्युच्यते । प्रकृतिमहानहङ्काराः पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणां मनः, पञ्चविषयाः पञ्चमहाभूतानीति प्राकृतिकानि चतुर्विंशतितत्त्वानि । तन्मात्राणां भूतानां सूक्ष्मावस्थात्वात् तानि पृथङ् नो गण्यन्ते । उपर्युक्तमुभयप्रकारकमचिदीश्वरात्मनोः भोगाभोगोपकरणभोगस्थानभूतम् ।

काल एव सत्त्वशून्यमिति व्यपदिश्यते । इदमेव प्रकृतेः प्राकृतानां परिणामहेतुभूतम् । कलाकाष्ठादिरूपेण परिणामार्हः ईश्वरस्य क्रीडापरिकरञ्च भवति । कालः परमपदे नित्यः लीलाविभूतावनित्यश्च भवति ।

ईश्वरः तत्त्वत्रयस्य तृतीयं तत्त्वं वर्तते । सोऽयमीश्वरः जडचेतनात्मकस्याखिलस्य जगतो नियामकः, अखिलहेयप्रत्यनीकः, अखिलकल्याणगुणसागरः 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी चे'त्युक्तानां चतुर्विधानां पुरुषानामाराध्यः लौकिकालौकिकानां कलानां निरपेक्षप्रदाना, लक्ष्मीभूनीलादेवीनां नायकश्च वर्तते । भगवान् परमात्मा परमब्रह्मेत्यादिकाः शब्दाः ईश्वरस्य साक्षाद्वाचकाः । इममेव 'स्यः सर्वज्ञः सर्ववित्' (मु० उ० १।१।३) 'पराऽस्य शक्तिर्विविधैव श्रूयते स्वाभाविकी ज्ञानबलक्रिया' च (श्वे० ६।८) 'सत्मूलाः सोम्येमाः सर्वाः प्रजास्सदायतनाः सत्प्रतिष्ठाः' इत्यादिकाः श्रुतयः सर्वज्ञं सर्वशक्ति सर्वमूलम् सर्वाधारञ्च वदन्ति । 'सत्यं ज्ञानमनन्तं ब्रह्म' (तैत्ति० २।१।१) 'ऐतदात्म्यमिदं सर्वम्' (छा० उ० ६।८।१) 'यस्यात्मा शरीरम्' (श० प० ब्रा० १४।५।२०) 'जगत् सर्वं शरीरं ते' (वा० रा० यु० का० ११७।२५) 'तानि सर्वाणि तद्वपुः' (वि० पु०) इत्यादिकानि वचांसि ईश्वरस्य त्रिविधपरिच्छेदरहितत्वम्, सकलजगदन्तर्यामित्वम्, सकलात्मत्वम् जगच्छरीरत्वञ्च प्रतिपादयन्ति । 'यतो वा इमानि भूतानि जातानि येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति' इति श्रुतिः परमात्मानमेव जगतः सृष्टिस्थितिलयकर्तारमुशन्ति । 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति श्रुतिः परमात्मनो जगतोऽभिन्ननिमित्तोपादानकारतामभिधत्ते ।

स चासावीश्वरः सृष्टेरादौ स्वसत्यसंकल्पेनेवेदं जगत् सृजति। तत्र ब्रह्माणम् ब्रह्माण्डञ्च साक्षात् सृष्ट्वा परमात्मा हिरण्यगर्भादिकां सद्वारिकां सृष्टिं करोति। परमात्मनः सृष्टेः प्रयोजनम् लीलामात्रमिति प्राह भगवान् वादरायणः 'लोकवत्तु लीलाकैवल्यमि'ति सूत्रेण। अस्यैव परमात्मनः सच्छास्त्राणि 'परव्यूहविभवान्तर्याम्यर्चावतारूपेण पञ्चधावस्थितिमुशन्ति। पररूपेणेश्वरः अकालकाल्यमनन्तानन्दमयं नित्यमुक्तजीवैरध्युषितम् 'त्रिपादस्यामृतं दिवी'त्यादिषु श्रुतिषु वर्णितं देशविशेषमध्यास्ते। स एव सृष्टिस्थितिसंहारार्थम् संसारिणां संरक्षणार्थम् च संकर्षणप्रद्युम्ना निरुद्धाख्यव्यूहरूपेणाविर्भवति। अयमेव परित्राणाय साधूनाम् विनाशाय च दुष्कृताम, धर्मसंस्थापनार्थाय युगे युगे श्रीरामकृष्णादिविभवरूपेणाविर्भवति।

सर्वेषामचेतनानामसाधारणवन्धुत्वात्, सर्वेषामन्तः प्रविश्य नियमनं, तेषां ध्येयत्वाय रक्षणार्थञ्च हृदयकमलेऽवस्थानञ्चान्तर्यामिरूपेण करोतीति 'एष त आत्मान्दर्याम्यमृतः' ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति' इत्यादिकानि श्रौतस्मार्तानि वचांसि प्रतिपादयन्ति।

'भक्ता वाञ्छन्ति यद्रूपं तन्मय ईश्वरो भवेत्' इत्युक्त्यनुसारेण देशकालाधिकारिणां नियमान् विहाय अर्चकपरतन्त्रसमस्तव्यापारविशिष्टमालयेषु गृहेषु च सर्वलोकनयनविषयतां गतस्यार्चकपरतन्त्रस्य रङ्गनाथवेङ्कटेशरामकृष्णादिमूर्तिरूपेण भगवंतोऽवस्थितं रूपम अर्चावतार इत्यभिधीयते।

अनेन विवेचनेन तत्त्वत्रयस्य श्रुतिस्मृतिप्रतिपादितस्य स्वरूपं स्पष्टं जातम्।

ध्वनिसम्प्रदायः

साहित्यशास्त्रे सर्वाधिकमहत्त्वशाली सम्प्रदायः ध्वनिसम्प्रदाय एव वर्तते। अस्य सम्प्रदायस्य समक्षम् रीतिरसालङ्कारवक्रोक्तीनां सम्प्रदाया अभिभूता अभूवन्। परवर्तिनः प्रायः सर्वे काव्यसमालोचकाः अस्यैव सम्प्रदायस्यानुगन्तारः अभूवन्। अस्य सम्प्रदायस्य समालोचकाः काव्यस्यान्तस्तत्त्वस्य व्याख्यामकार्षुः ध्वनेर्माध्यमेन। अस्य सम्प्रदायस्य समालोचकाः इदानीं यावदुद्भावितानां सर्वेषां काव्यतत्त्वानां काव्ये सामञ्जस्यम् स्थापयामासुः। अस्य सम्प्रदायस्य व्यवस्थापक आचार्य आनन्दवर्धनो वर्तते। आनन्दवर्धनाचार्यादारभ्य इदानीं यावत् सर्वे समालोचका आनन्दवर्धनाचार्यप्रवर्तितस्य ध्वनिसम्प्रदायस्यैवानुगन्तारोऽभूवन्। यद्यपि प्रतिहारेन्दुराज–कुन्तक–भट्टनायक–महिमभट्ट–प्रभृतयः अनेके महान्तः समालोचकाः ध्वनिसिद्धान्तस्य कट्वीमालोचनामकार्षुः, अथापि ध्वनिसिद्धान्तोपरि एतेषाम् आलोचकानाम् कोऽपि प्रभावो नह्यभूत्। साम्प्रतम् तु ध्वनिः साहित्यजगतः सर्वस्वमेव वर्तते।

ध्वनेः स्वरूपम्—यत्र वाच्यादर्थात् कश्चन नवीनः चमत्कारपूर्णः, वाचादर्थात् मनोज्ञश्चार्थो निस्सृतो भवति तत्रैव भवति ध्वनिकाव्यम् । प्रायेणार्थस्य द्वौ भेदौ भवतः–वाच्यः प्रतीयमानश्च । तत्र वाच्यार्थे अलङ्कारादीनां समावेशो भवति, प्रतीयमाने चार्थे ध्वनेः समावेशो भवति । अस्य प्रतीयमानस्यार्थस्य ज्ञानम् सहृदयायैव भवति । तथा चाहानन्दवर्धनाचार्यः—

'प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत् तत् प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥'

अलङ्कारशास्त्रस्यैतिह्ये ध्वनेः कल्पना साहित्यसमालोचकाः स्वसूक्ष्मेक्षिकयाऽकार्षुः । यद्यपि रामायणादिषु लक्ष्यग्रन्थेषु ध्वनिर्विद्यमान एवासीत् किन्तु आनन्दवर्धनात् प्राक् कश्चनापि काव्यात्मत्वं नहि स्वीकृतवान् । सर्वप्रथमं आनन्दवर्धन एव तं अन्येभ्यः काव्यतत्त्वेभ्यः पृथक्कृत्य स्वतन्त्रकाव्यतत्त्वस्येणाङ्गीचकार । सः एव वाल्मीकि–व्यास–कालिदासादीनां काव्येषु विद्यमानस्य ध्वनिपदार्थस्यापरोक्षमकार्षीत्, तस्योपरि काव्यस्य जीवातुतत्त्वस्य च सिद्धान्तं स्थापयामास । अतएवालोचनाया ऐतिह्ये ध्वनेरत्यधिकं महत्त्वं वर्तते । अस्य ध्वनेः विशदां व्याख्यामकरोत् आनन्दवर्धनाचार्यः ध्वन्यालोकनामके नैजे ग्रन्थे । आनन्दवर्धनाचार्यस्य शतवर्षाणामनन्तरम् अभिनवगुप्तपादाचार्यः ध्वन्यालोकलोचननाम्न्यां व्याख्यायाम् ध्वनिसिद्धान्तस्य प्रबलं समर्थनमकरोत् । अस्मिन्नेव समये कतिपये आचार्याः ध्वनेः खण्डनमप्यकार्षुः परन्तु तेषां सर्वेषां ध्वनिविरोधिनामाचार्याणाम् आक्षेपानाम् युक्तियुक्तमुत्तरं दत्त्वा आचार्यो मम्मटः काव्यप्रकाशस्य माध्यमेन ध्वनिसिद्धान्तम् पूर्णतया व्यवस्थापयामास ।

वैयाकरणाः स्फोटं स्वीकुर्वन्ति । व्याकरणसिद्धान्तानुसारेण यो हि शब्दः श्रूयते सोऽनित्यो वर्तते, तस्मात् कस्यचनाप्यर्थस्य प्रतीतिर्नहि भवति । अतएव वैयाकरणाः स्फोटस्य कल्पनां कुर्वन्ति । 'स्फुटति अर्थोऽस्मात्' इति हि स्फोटशब्दस्य व्युत्पत्तिः । स्फोटो नित्यः शब्दो वर्तते । सो हि पूर्वापसंमविहीनः अखण्डः एकरसश्च विद्यते । तथा चाह शेषकृष्णः स्फोटतत्त्वनिरूपणे—

'न प्रत्येकं न मिलिता न चैकस्मृतिगोचराः ।
अर्थस्य वाचका वर्णाः किन्तु स्फोटः स द्विधा ॥'

यस्य शब्दस्य वयमुच्चारणं कुर्मः स एवेम्, स्फोटमभिव्यञ्जयति । स एव ध्वनिरित्यभिधीयते । वैयाकरणानामिमं ध्वनिशब्दमेवादायालङ्कारिकाः तस्य विस्तारमकार्षुः । व्याकरणशास्त्रे तु ध्वनिशब्दस्य प्रयोगः अभिव्यञ्जकस्य शब्दस्यार्थे भवति किन्तु साहित्यशास्त्रे तस्य शब्दार्थयोरुभयोरेवाभिव्यञ्जकस्य शब्दस्य अर्थे क्रियते ।

एषो ध्वनिसिद्धान्तो रससिद्धान्तस्यापरं नाम रसो वाच्यो नहि भवति तस्याभिव्यक्तिश्च शब्दस्य व्यञ्जनया वृत्त्या भवति । आनन्दवर्धनाचार्योऽप्याह ध्वन्यालोके—

“अयमेव हि महाकवेर्मुख्यो व्यापारो यत् रसादीनेव मुख्यतया काव्यार्थीकृत्य तद्व्यक्त्यनुगुणत्वेन शब्दानामर्थानाञ्चोपनिवन्धनम् । एतच्च रसादितात्पर्येण काव्यनिवन्धनम् भरतादावपि सुप्रसिद्धमेवेति ।···· ···· ····रसादयो हि द्वयोरपि तयोः जीवितभूताः ॥” इति

अतएवाचार्यं आनन्दवर्धनाचार्यः भरतस्य रसमतम् विकसितं कृत्वा स्वकीयस्य ध्वनिमतस्य विस्तारमकरोत् ।

ध्वनिकारः ध्वनिं त्रेधा विभजति—रसध्वनिः, अलङ्कारध्वनिः वस्तुध्वनिश्च । रसध्वनौ रसासाभासभाव–भावाभास-भावशान्ति–भावशवलतानाम् भवति ग्रहणम् । यत्र कस्यचन तथ्यकथनमात्रस्याभिव्यंजना भवति तथा वस्तुध्वनिर्भवति । अलङ्कारध्वनिवस्तु तत्र भवति यत्राभिव्यज्यमानः पदार्थः कल्पनाप्रसूतो भवति न त्वितिवृत्तात्मको भवति । एतेषु त्रिषु रसध्वनिरेव श्रेष्ठो भवति ।

महाकवेः वाल्मीकेः हृदये क्रौञ्चवधहेतोः क्रौञ्चयाः करुणं क्रन्दनं श्रुत्वा यो हि शोकस्य प्रवलो भावो जाग्रतोऽभूत् सः स्वयमेव श्लोकरूपेण परिणतोऽभवत् । अयमेव रसध्वनिर्वर्तते । महत्त्वपूर्णत्वाद् रस एव काव्यस्यात्मा वर्तते । वस्त्वलङ्कारध्वन्योस्तु रसध्वनावेवान्तर्भावो भवति । ध्वनेः काव्यात्मत्वकथनं तु सामान्यं कथनं वर्तते वस्तुतो रस एव काव्यात्मा वर्तते । तथा चाहाभिनवगुप्तपादाचार्यः ध्वन्यालोकलोचने—

‘तेन रस एव वस्तुतः आत्मा । वस्त्वलङ्कारध्वनी तु सर्वथा रसं प्रति पर्यवस्येते इति वाच्यत्वात् उत्कृष्टौ तौ । इत्यभिप्रायेण ध्वनिः काव्यस्यात्मेति सामान्येनोक्तम् ॥’

अतएवाभिनवगुप्तपादाचार्येणाभिहितम्—

‘प्राथमिकानामभ्यासार्थिनां यदि परं चित्रेण व्यवहारः प्राप्तपरिणतीनां तु ध्वनिरेव प्राधान्येन काव्यमिति स्थितमेतत् ।’

ध्वनिसम्प्रदायानुसारेण काव्यस्य त्रयो भेदाः भवन्ति—ध्वनिकाव्यम्, गुणीभूतकाव्यम् चित्रकाव्यम् च। ध्वनिकाव्ये वाच्यार्थापेक्षया व्यंग्यार्थोऽधिकं चमत्कारी भवति । इदमेवोत्तमं काव्यम् । तथा चाह मम्मटाचार्यः काव्यप्रकाशे—

‘इदमुत्तममतिशयिनि व्यंग्ये वाच्याद् ध्वनिर्बुधैः कथितः ।’

यत्र वाच्यार्थापेक्षया व्यंग्यार्थः वाच्यार्थापेक्षया चमत्कारनैयून्यं विभर्ति ।

चित्रकाव्ये तु शब्दार्थालङ्कारयोरेव वैचित्र्यं भवति । चित्रकाव्यमधमकोटिकं भवति ।

तत्र सामान्या एव कवयः चित्रकाव्यस्य निर्माणे प्रवृत्ताः भवन्ति रसपरिपाकाभिज्ञानां कवीनां तु ध्वनिकाव्य एव प्रवृत्तिर्जायते । तथा चोक्तम् आनन्दवर्धनाचार्येण ध्वन्यालोके—

'एतत् च चित्रं कवीनां विशृंखलगिरां रसादितात्पर्यमनपेक्ष्यैव काव्यप्रवृत्तिदर्शनादस्माभिः परिकल्पितम् । इदानींतनानां तु न्याय्ये काव्यनयव्यवस्थापने क्रियमाणे नास्त्येव ध्वनिव्यतिरिक्तः काव्यप्रकारः । यतः परिपाकवतां कवीनां रसादितात्पर्यविरहे व्यापार एव न शोभते ।।' इति ।

ध्वनिवादिनः आचार्याः ध्वनेर्मूलसिद्धान्तानुसारेण गुणालङ्कारौ तयोः वास्तविके स्थाने स्थापयामासुः । रसाश्रितो हि धर्मो भवति गुणः शौर्यवीर्यादिवत् । काव्यशोभाकराः धर्माः अलङ्काराः भवन्ति । ते च काव्यस्यानित्यधर्माः । गुणः काव्यस्य नित्यधर्मः । तथा चोक्तम् ध्वनिकारेण—

'तमर्थमवलम्बते येऽङ्गिनं ते गुणाः स्मृताः ।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत् ।।' इति ।

ध्वनिकारानुसारेण संघटानायास्त्रयो भेदाः भवन्ति—असमासा, मध्यसमासा दीर्घसमासा च ।

काव्यस्य द्वे वृत्ती भवतः—शब्दवृत्तिः अर्थवृत्तिश्च । तत्र शब्दवृत्तेरपि त्रयो भेदाः भवन्ति—उपनागरिका, परुषा ग्राम्या च । अर्थवृत्तेः चत्वारो भेदाः भवन्ति—कैशिकी आरभटी, सात्त्वती भारती च । रसतात्पर्येण निवेशिताः रसानुकूला वृत्तयः काव्यनाट्ययोः शोभावराः भवन्ति ।

रसवादिनां मतानुसारेण रसापहतिरेव दोष इत्यभिधीयते ।

अनेन प्रकारेण ध्वनिवादिन आचार्याः ध्वनिमेव काव्यस्य मुख्यं तत्त्वं स्वीचक्रुः ।

औचित्यसिद्धान्तः

संस्कृतपर्यालोचनपरायणानाम् सर्वाधिकं महत्त्वपूर्णमवदानम् औचित्यतत्त्वस्य वर्तते । साहित्यशास्त्रस्य व्यापकतमसिद्धान्तो वर्तते औचित्यसिद्धान्तः । यद्यपि औचित्यसिद्धान्तस्य संस्थापकः क्षेमेन्द्र एव स्वीक्रियते अथापि औचित्यविचारस्य परम्परा अतीव प्राचीना वर्तते । क्षेमेन्द्रेण औचित्यस्य काव्यात्मत्वं प्रतिपादितम् । भरतस्य नाट्यशास्त्रे एव औचित्यविधानं समुपलभ्यते । इयं तु अपरा कथा यत् तत्रौचित्यस्य सैद्धान्तिकं रूपं नासीत् किन्तु औचित्यस्य व्यावहारिकं रूपं तु तत्र वर्तत एव ।

भरतमतानुसारेण लोक एव नाट्ये प्रमाणम् । लोके यद् वस्तु यस्मिन् वेषे, यस्यां मुद्रायाम् चोपलभ्यते तस्य वस्तुनः तस्मिन्नेव वेषे, तस्यामेव मुद्रायाम् अनुकरणम् नाट्यस्य चरमं लक्ष्यम् । एतस्मादेव कारणात् नाट्यशास्त्रस्य पात्रस्य भाषावेशादिकेषु महानभिनिवेशः ।

सामान्यतया प्रकृतयः त्रिधा भवन्ति—दिव्याः, अदिव्याः दिव्यादिव्याश्च । एतासाम् तिसृणामपि स्वभावे मूलतो वैलक्षण्यं भवति । रङ्गे एतासां विधानमेव नाट्यस्य परमं लक्ष्यम् । तत्र दिव्यप्रकृतीनां कार्यस्य अदिव्ये प्रदर्शनमसम्भवम् । तेषां देवादीनां भाषणप्रकारोऽपि मानवेषु असङ्गतमेव स्यात् । अस्यैव विषयस्य साङ्गोपाङ्गम् वर्णनम् भरतमुनिर्नाट्यशास्त्रस्यानेकेष्वध्यायेष्वकार्षीत् । एतेनायमर्थः सिद्ध्यति यद् भरतमुनिरौचितत्यस्य प्रबलः समर्थक आसीदिति । काव्येषु औचित्यतत्त्वस्य कल्पनायाः इदमेव मूलम् ।

अस्मिन् प्रसङ्गे भरतमुनेर्निम्नाङ्कितः श्लोकः संग्राह्यो वर्तते—

अदेशजो हि वेशस्तु शोभां जनयिष्यति ।
मेखलोरसिबन्धे तु हास्यायैव प्रजायते ॥'

यस्य देशस्य यो हि वेशो वर्तते, यस्मिंश्चाङ्गे यद्भूषणं धार्यते तस्माद् भिन्ने देशे तस्य विधानकरणं शोभावहं नहि जायते । तद्यथा—मेखला तु कट्यां धार्यते, तदेव यदि कश्चन उरसि बध्नाति ग्रीवायां वा बध्नाति तदा तु तस्य मेखलाधारणम् हास्यायैव भवति । अनेन श्लोकेनायमर्थः सिद्ध्यति यत् भरतमुनिः ललितकलायामौचित्यस्य समर्थकः आसीदिति ।

औचित्यस्य सर्वमान्य आचार्यः आनन्दवर्धनो वर्तते । सः काव्ये औचित्यस्य पूर्णरूपेण समर्थनमकरोत् । रसाभङ्गस्य व्याख्याया अवसरे ध्वन्यालोककारेणाभिहितम्—

'अनौचित्याद् ऋते नान्यद् रसभङ्गस्य कारणम् ।
औचित्योपनिबन्धस्तु रसस्योपनिषत् परा ॥' इति ।

आनन्दवर्धनाचार्यस्य प्रबलसमर्थकः व्याख्याता चाभिनवगुप्तपादाचार्यः तेषाम् काश्मीरालोचकानां तीव्रामालोचनामकरोत् ये समालोचकाः ध्वनिसम्बन्धं विनैवौचित्यस्य काव्यात्मत्वं समर्थयामासुः । अभिनवगुप्तपादाचार्याः समर्थयामासुः यत् ध्वनेस्सतां विनौचित्यं प्रतिष्ठितमेव नहि भवितुमर्हति । औचित्यध्वनी तु परस्परमन्योन्यस्योपकारकौ काव्यजगति स्तः ।

अभिनवगुप्तपादाचार्यस्य प्रधानः शिष्यः क्षेमेन्द्र आसीत् । अयमपि ध्वनिवाद्याचार्य आसीत्, अथापि सः औचित्यविचारचर्चानामके ग्रन्थे सः ज्ञापककाव्यतत्त्वरूपेण प्रतिष्ठामकरोत् । अतएव औचित्यस्य सिद्धान्तसंस्थापकरूपेण क्षेमेन्द्र एव स्वीक्रियते ।

किम् नामौचित्यम् ? इत्याकांक्षायाम् उचितस्य भाव एवौचित्यमित्यभिधीयते। यद् वस्तु येन वस्तुना साकम् साम्यं विभर्ति तदेवोचितमित्यभिहितम् भवति। उचितस्य भाव एवौचित्यमित्याह क्षेमेन्द्रः—

'उचितं प्राहुराचार्याः सदृशं किल यस्य यत्।
उचितस्य च यो भावः तदौचित्यं प्रचक्षते ॥' इति।

तदौचित्यमेव काव्यस्य जीवातुतत्त्वं वर्तते इतीमम् अर्थं प्रतिपादयन् औचित्यविचारचर्चाकारः प्राह—

'औचित्यस्य चमत्कारकारिणश्चारु चर्वणे।
रसजीवितभूतस्य विचारं कुरुतोऽधुना ॥' इति।

क्षेमेन्द्रः तस्यौचित्य–पदवाक्य–अर्थ–रस–कारक–लिङ्ग–वचनादिकानां भेदात् अनेकान् भेदानकार्षीत्। उपर्युक्तेषु समेषु स्थलेषु औचित्यस्य प्रदर्शनं कृत्वा क्षेमेन्द्रः साहित्यजगति नवीनामाभां प्रसारयामास। तद्यथा—

'आसारय घनसारं कुरुहारं दूर एव किं कमलैः।
अलमलामलिमृणालैरिति वदति दिवानिशं बाला ॥' इति।

अस्य पद्यस्य रसः विप्रलम्भश्रृङ्गारो वर्तते। अस्य पद्यस्य पूर्वार्द्धे रकारस्यानुप्रासः उत्तरार्द्धे च लकारस्यानुप्रासः विप्रलम्भस्यातीवोत्कर्षकौ स्तः। इदं हि अलङ्कारौचित्यस्योदाहरणम् किन्तु टवर्गस्यानुप्रासः श्रृङ्गारस्य प्रतिकूलो भवतीति अज्ञात्वैव राजशेखरः कर्पूरमञ्जर्याः इदं प्राकृतं पद्यं लिलेख—

चित्ते विहट्टदि ण टुट्टदि सा गुणेसु
सज्जासु लोट्टदि विसंट्टदि दिम्मुहेसु।
बोलम्मि बट्टदि पवट्टदि कव्वबन्धे
झाठे ण ट्टुट्टदि चिरं तरुणी तरट्टी ॥ इति।

अनेन विवेचनेन ज्ञायते यत् क्षेमेन्द्रः औचित्यस्य काव्यात्मत्वं समर्थयित्वा तस्य विस्तृतं विवरणं प्रस्तुतवान् किन्तु इदं कथनं तु अनुचितमेव वर्तते यत् क्षेमेन्द्र एव औचित्यस्य मूलगवेषकः इति। क्षेमेन्द्रः भरतमुनेः, आनन्दवर्धनात्, अभिनवगुप्तपादाचार्याच्च सामग्रीमेकत्रीकृत्य औचित्यस्य विस्तृतं विवेचनं कृतवानित्येव सुवचम्।

क्षेमेन्द्रेण निर्दिष्टाः औचित्यस्य सर्वे भेदाः ध्वन्यालोके विद्यमानाः सन्ति। औचित्यस्य समर्थने प्राह आचार्यः क्षेमेन्द्रः—

कण्ठे मेखलया नितम्बफलके तारेण हारेण वा,
पाणौ नूपुरबन्धनेन चरणे केयूरपाशेन वा।

शीर्षेण प्रणते रिपौ करुणतया नायान्तिके हास्यताम् ।
औचित्येन विना रुचिं प्रतनुते नालंकृतिर्नो गुणाः ॥ इति ।

काव्यहेतुः

प्रतिभैव काव्यस्य प्रधानतमं साधनमित्याह आचार्यो भामहः । भामहस्तु प्रावोचत् यत् आचार्योपदेशमधिगम्य सामान्योऽपि जनशास्त्रतत्त्वमेवेति किन्तु कवितायाः निर्माणं तु कश्चन प्रतिभासम्पन्न एव पुरुषः कर्तुं क्षमः । प्रतिभाया अभावे काव्यनिर्माणम् सर्वथा असम्भवमेव । तथाहि—

'गुरूपदेशादध्येतुं शास्त्रं जडधियोऽप्यलम् ।
काव्यं तु जायते जातु कस्यचित् प्रतिभावतः ॥

प्रतिभासम्पन्न एव कविः निरवद्यं काव्यं कर्तुमलम् । दोषयुक्तस्य काव्यस्य प्रणेता कविस्तु तथैव निन्दनीयो भवति येन प्रकारेण दुष्टेन पुत्रेण द्वारा पिता निन्दनीयतां याति । तथाहि—

'सर्वथा पदमप्येकं न निगाद्यमवद्यवत् ।
विलक्ष्मणा हि काव्येन दुःसुतेनेव निन्द्यते ॥ इति ।

कुकवित्वस्य निन्दनीयतां प्रतिपादयन् आचार्यो भामहः प्राह यत् कवित्वाभावो न तु दण्डनाय भवति न वा व्याधये भवति नवाऽधर्माय भवति, किन्तु कुकवित्वं तु साक्षान्मृत्युरेव । तथाहि—

'अकवित्वमधर्माय व्यानये दण्डनाय वा ।
कुकवित्वं पुनः साक्षात् मृतिमाहुर्मनीषणः ॥' इति ।

अनेन प्रकारेण प्रतिभैव काव्यस्य सर्वोत्तमं साधनं वर्तते । तामिमां प्रतिभां निरूपयन् आचार्यो भट्टतौतः प्राह—

'प्रज्ञा नवनवोन्मेषशालिनी प्रतिभा मता' । इति ।

आचार्यस्य कुन्तकस्य मतानुसारेण तु—

'प्राक्तनाद्यतनसंस्कारपरिपाकप्रौढा प्रतिभा काचिदेव कविशक्तिः' ।

आचार्यो वामनस्तु प्रतिभायाः स्वरूपं निरूपयन्नाह—

कवित्वबीजम् प्रतिभानम् ॥१।३।१६॥
कवित्वस्य बीजम् कवित्वबीजम्, जन्मान्तरागतः
संस्कारविशेषः कश्चित् । यस्माद् विना काव्यं न निष्पद्यते ।
निष्पन्नं वा हास्यायतनं स्यात् ।
(काव्यालङ्कारसूत्रवृत्तिः—वामनः)

राजशेखरस्तु काव्यमीमांसायामाह यत् कविता सा शक्तिविशेषो वर्तते या कवि-

हृदये—शब्दसमूहं, अर्थसंमूहं, किं मार्गम् धान्यां च काव्यसामग्रीं प्रतिभासयति। प्रतिभाहीनाय पदार्थाः परोक्षाः भवन्ति, किन्तु प्रतिभासम्पन्नो नेत्रहीनोऽपि पदार्थान् प्रत्यक्षयन्निव वर्णयति।

भट्टगोपालानुसारेण प्रतिभा कवित्वस्य बीजम् वर्तते। येन प्रकारेण वृक्षं वीक्ष्य तस्य बीजस्यानुमानं क्रियते तेनैव प्रकारेण काव्यरूपं कार्यं दृष्ट्वा तस्य वासनारूपस्य कारणस्यानुमानं क्रियते।

एतेषां समेषामाचार्याणां मतानुसारेण प्रतिभा नाम कश्चन जन्मान्तरीयः संस्कारविशेष एव।

भामहानन्तरमाचार्यो दण्डी काव्यसाधकहेतुषु प्रतिभया साकम् शास्त्रज्ञानाभ्यासयोरपि आवश्यकता प्रत्यपीपदत्। तथाचोक्तं काव्यादर्शे—

नैसर्गिकी च प्रतिभा श्रुतश्च बहुनिर्मलम्।
अमन्दश्चाभियोगश्च कारणं काव्यसम्पद॥' इति।

प्रतिभा तु पूर्वजन्मवासनाश्रिता भवति। दण्डिनः मतानुसारेण प्रतिभारहितोऽपि पुरुषः शास्त्रज्ञानेन द्वारा अभ्यासेन च द्वारा सरस्वत्याऽनुगृहीतो भवति। तदा भवति च काव्यकर्ता। तथाहि—

'न विद्यते यद्यपि पूर्ववासना, गुणानुबन्धि प्रतिभानमद्भुतम्।
श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहम्॥' इति।

आचार्यो वामनस्तु प्रतिभां प्रतिभानशब्देनाभिधत्ते। प्रतिभानमेव कवित्वबीजम्। काव्यपरिचय–काव्यरचनोद्योग–गुरुशुश्रूषा–विविधशास्त्राणां ज्ञानानि च काव्याभिव्यक्तिसाधनानि भवन्तीति प्राहाचार्यो वामनः। किञ्च चित्तैकाग्रयरूपमवधानमपि काव्याभिव्यक्तिसहायकः। तथा चोक्तमपि वामनेन काव्याङ्कारे—

'तत्र काव्यपरिचयो लक्ष्यज्ञत्वम्। काव्यबन्धोद्यमोऽभियोगः। काव्योपदेशरुशुश्रूषणं वृद्धसेवा। पदाधानोद्धरणमवेक्षणम्। कवित्वबीजम् प्रतिभानम्। चित्तैकाचमवधानम्। तद्देशकालाभ्याम्।' इति।

आचार्यो रुद्रटानुसारेण सम्मिलितः—प्रतिभाच्युत्यात्त्यभ्यासाः काव्यहेतुः। तिभायाः स्थाने सः शक्तिं स्वीकरोति शक्तिरेव काव्यस्य प्रधानहेतुः। सः प्राह व्यालङ्कारे—

'मनसि सदा सुसमाधिनि विस्फुरणमनेकधाभिधेयस्य।
अक्लिष्टानि पदानि च विभान्ति यस्यामसौ शक्तिः॥

आनन्दवर्धनाचार्यानुसारेण तु प्रतिभाव्युत्पत्त्योः प्रतिभैव काव्यस्य श्रेष्ठं साधनम्।

शास्त्रव्युत्पत्तिरहितस्य काव्ये बहवो दोषा जायन्ते । किन्तु प्रतिभा इमान् सर्वान् दोषानपाकरोति । दोषास्तु अशक्त्याऽपि भवन्ति अव्युत्पत्त्याऽपि भवन्ति किन्तु अशक्तिजन्यो दोषस्तु जघन्यो भवति । तथाहि—

> 'अव्युत्पत्ति कृतो दोषः शक्त्या संव्रियते कवेः ।
> यस्त्वशक्तिकृतस्तस्य झणित्येवावभासते ॥' इति ।

किन्त्वाचार्यो मङ्गलः व्युत्पत्तिमेव काव्यस्य श्रेष्ठं साधनं स्वीकरोति । व्युत्पत्तेरर्थो बहुज्ञता वर्तते । व्युत्पन्नस्य कवेः सर्वासु दिक्षुरव्याहता गतिर्भवति ।

राजशेखरस्तु काव्यमीमांसायां वक्ति यत् श्यामदेवनामकस्याचार्यस्य मतानुसारेण तु समाधिरेव काव्यस्य श्रेष्ठं साधनम् । तथाहि—

काव्यकर्मणि कवेः समाधिः परं व्याप्रियते इति श्यामदेवः ॥

समाहितमेव चित्तमर्थोन्मीलनकरं भवति । मनोयोगेनाराधयितुरेव चित्ते सारस्वतरहस्यस्योन्मेषो जायते । तदर्थः चित्तैकाग्रयमनिवार्यमिति प्रतिपादयन् राजशेखरः प्राह—

> सारस्वतं किमपि तत्सुमहारहस्यं
> यद् गोचरे च विदुषां निपुणैकसेव्यम् ।
> तत्सिद्धये परमयं परमोऽभ्युपायो०,
> यच्चेतसो विदितवेधविधेः समाधिः ॥ इति ।

किन्तु स्वयम् आचार्यमङ्गल अभ्यासस्य काव्यकर्मणि महत्त्वं स्वीकरोति । राजशेखरः शक्तिमेव काव्यनिर्मितौ प्रधानसहायिकां स्वीकरोति । समाध्यभ्यासौ तु शक्तेरुद्भासकौ स्तः राजशेखरानुसारेण । भक्तेः विस्तारश्च प्रतिभया व्युत्पत्त्या च भक्त्या च प्रतिभाव्युत्पत्त्योर्विकासो भवति ।

राजशेखरः प्रतिभायाः द्वौ भेदौ स्वीकरोति—कारयित्री प्रतिभा भावयित्री प्रतिभा च । काव्यकर्मणि कवेरुपकारिणी प्रतिभा कारयित्रीत्यभिधीयते । अस्यैव कविः शब्दार्थयोर्मनोज्ञं गुम्फं सहृदयानां समक्षमुपस्थापयति । भावयित्र्या प्रतिभया च भावकः कवेः श्रमस्य महत्त्वं जानाति ।

राजशेखरमतानुसारेण कारचित्र्याः प्रतिभायाः त्रयो भेदाः भवन्ति—सहजाऽहार्यौपदेशीकी च । पूर्वजन्मसंस्कारवशादिह जन्मनि अल्पेनैव प्रयासेनोद्वुद्धा प्रतिभा सहजेत्यभिधीयते । जन्मसंस्काराभ्यां जन्या अभ्यासाधेयातिशया प्रतिभाऽहार्येत्यभिधीयते । औपदेशिकी तु प्रतिभा मन्त्रतन्त्रादीनामुपदेशाद्भवति ।

आचार्यस्य मम्मटस्य मतानुसारेण काव्यकर्मणि शक्तिनिपुणताभ्यासाः सम्मिलिता एव हेतुः । तथा चाहाचार्यो मम्मटः काव्यप्रकाशे—

शक्तिर्निपुणताभ्यासलोकशास्त्राद्यवेक्षणात् ।
काव्यज्ञशिक्षयाभ्यासः इति हेतुस्तदुद्भवे ॥' इति ।

काव्यलक्षणम्

काव्यस्य लक्षणविषये नैकेषामालोचकानाम् नैके विचाराः सन्ति । अत एवात्र आचार्यस्य मम्मटस्य काव्यलक्षणस्य ऐतिहासिकदृष्टया विवेचनम् क्रियते । काव्यस्य स्वरूपं निरूपयन् मम्मटः प्राह काव्यप्रकाशे—

'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापी'ति ।

दोषरहितौ गुणसहितौ सर्वत्र सालङ्कारौ क्वचिदलङ्कारविरहितावपि शब्दार्थौ काव्यमिति अस्य लक्षणवाक्यस्याभिप्रायः ।

अनेन लक्षणवाक्येनायमर्थः स्पष्टो जातः यत् शब्दार्थाविव काव्यशब्देनाभिधीयेते । परन्तु तौ शब्दार्थौ साधारणौ नहि भवतः अपितु तयौ दोषरहितत्वम् गुणसहितत्वम् सर्वत्रालङ्कारयुक्तत्वञ्चापेक्षितम् ।

एतेषु शब्दार्थयोः त्रिषु विशेषणेषु शब्दार्थयोः दोषरहितत्वविषये मम्मटस्य सर्वाधिक आग्रहो वर्तते । तदनन्तरम् सः शब्दार्थयोः काव्यत्वात् तयोर्गुणयुक्तत्वमप्यावश्यकं मनुते । शब्दार्थयोः सालङ्कारत्वविषये सर्वापेक्षया न्यून आग्रहो वर्तते आचार्यस्य मम्मटस्य । अतएवैतादृशान्यनेकानि पद्यानि दृश्यन्ते यत्रालङ्काराभावेऽपि काव्यत्वम् नापहीयते । तद्यथा—

'हारो नारोपितः कण्ठे मया विश्लेषभीरुणा ।
इदानीमावयोर्मध्ये सरित्सागरभूधराः ॥' इति ।

अस्मिन् पद्ये अलङ्कारस्य चमत्कारो नहि वर्तते अथापि विप्रलम्भपोषकत्वादस्य पद्यस्यास्मिन् उत्तमकाव्यतैव स्वीक्रियते । अतएव हि प्राहाचार्यो मम्मटः अनलंकृती पुनः क्वापीति ।

आचार्यो मम्मटः ध्वनिसिद्धान्तानुयायी आचार्यो वर्तते, अतएव काव्ये दोषाहानगुणाधानयोरनिवार्यतास्वीकरणमावश्यकमेवासीत् । शब्दार्थयोः गुणाधानस्यार्थो वर्तते रससम्पत्तिः । नीरसयोः शब्दार्थयोः काव्यत्वम् नहि स्वीक्रियते । यत्र क्वचन रसाभावेऽपि अलङ्कारमात्रेणापि काव्यत्वं शब्दार्थयोः स्वीक्रियते तत्रापि चित्रकाव्यमेव भवति न तूत्तमं मध्यमं वा काव्यम् ।

गुणास्तु काव्यस्यान्तरङ्गानि साधनानि सन्ति । अतएव ते काव्यस्य नियतधर्माः । अलङ्काराश्च काव्यस्य वहिरङ्गसाधनत्वादनियतधर्माः सन्ति, तेषां शब्दार्थयोरतिशयाधानमात्रहेतुत्वात् । अतएव अनलङ्कृती पुनः क्वापीति कथनम् युक्तमेव ।

मम्मटस्याभिप्रायमिदमज्ञात्वैव चन्द्रालोककारः पीयूषवर्षी जयदेवः चन्द्रालोकस्यादौ मम्मटोपरि दोषारोपणं कुर्वन् प्राह—

अङ्गीकरोति यः काव्यम् शब्दार्थावनलंकृती ।
असौ न मन्यते कस्मादनुष्णमनलंकृती ॥ इति ।

जयदेवमतानुसारेणअलङ्कारा: काव्यस्य नैसर्गिकाः धर्माः तेनैव प्रकारेण सन्ति येन प्रकारेण अग्नेरौष्ण्यम् स्वाभाविको धर्मो वर्तते ।

मम्मटस्य काव्यलक्षणम् सर्वेषाम् पदानां समालोचनामकार्षुः समालोचकाः । अस्य काव्यलक्षणस्य 'अदोषौ शब्दार्थौ' इति अंशमादाय समालोचनामकार्षुः आलोचकाः ।

भामहस्तु 'शब्दार्थौ सहितौ काव्यम्' इति काव्यलक्षणमकरोत् । किन्तु अहितनावस्याधारः को वर्तते । यद्यपि भामहोऽपि काव्ये परित्याज्यानां दोषाणां वर्णनमकरोत्, अथापि दोषरहितत्वं शब्दार्थयोः सः काव्यलक्षणे नहि प्राह । वामनः प्राह दोषाणां परित्यागेण गुणालङ्कारयोगदानेन च काव्ये सौन्दर्यं वर्द्धते । तथाहि—

'स दोषगुणालङ्कारहानादानाभ्याम् ।' (१।१।३)

मम्मटस्य पूर्वमेव भोजराजोऽपि 'निर्दोषत्वम्' काव्यस्यावश्यकमङ्गं प्राह काव्यलक्षणे । तथाहि—

'निर्दोषं गुणवत् काव्यमलङ्कारैरलंकृतम् ।
रसान्वितं कविः कुर्वन् कीर्तिं प्रीतिं च विन्दति ॥' इति ।

अस्य काव्यलक्षणस्य व्याख्यायां रत्नेश्वरस्त्वाह—

'निर्दोषं दोषात्यन्ताभाववत् । अवयवैकवर्तिना श्वित्रेणेव कामिनीशरीरस्य वर्णमात्रगतेनापि दोषेण काव्यवैरस्यनियमात् । अतएवामङ्गलप्रायाणामपि दोषाणां प्रथममुपादानम् । अयमेव हि प्रायः कवेर्व्यापारो यद् दोषहानं नाम ।

इमान् सर्वानिवार्थानुररीकृत्याचार्यो मम्मटः स्वकीये काव्यलक्षणे शब्दार्थयोः विशेषणदोषावित्याह ।

किन्तु इमं विशेषणमादाय साहित्यदर्पणकर्त्रा विश्वनाथेन पण्डितराजेन जगन्नाथेन विस्तारपूर्वकं खण्डनं कृतम् ।

विश्वनाथस्याभिप्रायो वर्तते यत् कविकृतेषु काव्येषु मानवसुलभानां दोषाणामत्यन्ताभावो नहि भवितुमर्हति; दोषाणामत्यन्तसूक्ष्मत्वात् । एतस्मादेव कारणात् महतां कवीनामपि काव्येषु तत्र तत्र दोषाः समुपलभ्यन्त एव । ध्वनिकाव्येष्वपि

दोषाणां विलोक्यते । अतएव दोषाणामभावो काव्येषु सर्वथाऽसंभवः । फलतः निर्दोषत्वम् शब्दार्थयोः विशेषणम् सर्वथाऽनुपपन्नमेव । विशेषणस्यास्य निर्विषयत्वात् प्रविरलविषयत्वात् वा ?

किञ्चाभिहितं साहित्यदर्पणकर्त्रा—'एतदपि काव्यलक्षणे न वाच्यम् रत्नादि-लक्षणे कीटानुवेधपरिहारवत् । नहि कीटानुवेधादयो रत्नस्य रत्नत्वं व्याहन्तुमीशाः, किन्तूपादेयतारतम्यमेव कर्तुम् । तद्वदत्रापि श्रुतिदुष्टादयः काव्यस्य' ।

अथापि मम्मटकृतस्य काव्यलक्षणस्य अदोषौ इति विशेषणस्य विषये इदं समाधानमस्ति यत् मम्मटस्यात्राभिप्रायो मुख्यानामेव दोषाणां हानेन वर्तते न तु सामान्यानां दोषाणाम् । मुख्या दोषास्तु रसदोषा एव अतएवाभिहितम्—'रसापकर्षकाः दोषाः' इति । रसापकर्षकत्वमेव काव्ये सर्वाधिकावद्यावहम् । सामान्यानां दोषाणां सत्त्वेऽपि काव्यस्य काव्यत्वं नापहीयते । किञ्च मम्मटः आदर्शस्य काव्यस्य लक्षण-मकरोत्, न तु सामान्यस्य काव्यस्य तथैव लक्षणं क्रियतेऽपि ।

किञ्च काव्ये सौन्दर्यसम्वर्द्धनस्य दोषहानत्वमप्येकं साधनं वर्तते । प्राचीनाचार्यै-स्त्वभिहितम्—

'दोषः सर्वात्मना त्याज्यो रसहानिकरो हि सः ।
अन्यो गुणोऽस्तु मा वास्तु महान् निर्दोषता गुणः ॥' इति

काव्यलक्षणस्य 'सगुणावि'ति विशेषणस्याभिप्रायो वर्तते यत् काव्यत्वशब्दार्थयोः गुणसहित्वमावश्यकमस्ति । सर्वप्रथमं वामन एव प्राह—'गुणालङ्कृतयोः शब्दार्थयोः कालशब्दो विद्यते ।' इति ।

तदनुसारेण मम्मटाचार्येण काव्ये रससम्पत्तये प्रोक्तम्—सगुणौ शब्दार्थौ काव्यम् ।

कविराजो विश्वनाथः सगुणौ विशेषणस्यालोचनां कुर्वन्नाह—यत् गुणास्तु शब्दार्थयोः धर्माः भवन्त्येव नहि गुणास्तु रसस्य धर्माः सन्ति अतएव सगुणा विशिष्टशब्दार्थयोः विशेषणस्य किमप्यौचित्यं नास्ति ।

न च येन प्रकारेण शौर्यादि व्यञ्जनशरीराय शौर्यादिविशेषणस्य प्रयोगो भवति तेनैव प्रकारेण रसभिलपञ्जकशब्दार्थाभ्यामत्र सगुणौ विशेषणमुपचाराद् बोध्यमिति वाच्यम्, तर्हि सरसौ शब्दार्थौ इति वक्तुमुचितत्वात् नहि प्राणिमन्तो देशा इति वक्तव्ये शौर्यादिमन्तो देशा इति व्यवह्रियते ।

परञ्च विश्वनाथादिकानामस्या आलोचनाया समाहतौ वक्तुं शक्यते । यत् मम्मटस्येदं काव्यलक्षणं वैज्ञानिकं लक्षणं नास्ति । इदं त्वादर्शकाव्यस्य लक्षणं वर्तते । आदर्शकाव्यनिर्माणाय शब्दार्थयोः वैशिष्टचे ध्यानमवश्यं देयम् भवति । रसमभिलक्ष्य प्रवृत्तः कविः गुण एव दृष्टिपातं करोति । रसस्तु परोक्षः गुण एव

प्रत्यक्षो भवति। अतएव हि कविः रसाभिव्यक्तये गुणस्यैव सत्तायाम् साग्रहो भवति। अतएव सगुणाविति शब्दार्थयोः विशेषणम् युक्तियुक्तमेव।

शब्दार्थौ काव्यस्य शरीरत्वेन स्वीकृतौ स्तः। तत्र शब्दार्थयोः कस्य प्राधान्यं भवति काव्ये शब्दस्य वा ? अर्थस्य वा, शब्दार्थयोरुभयोर्वा ? इत्याशङ्कायाः समाधानविषये आलङ्कारिकाणां पक्षद्वयम् विद्यते, एके आलङ्कारिकाः शब्दार्थयोरुभयोरेव काव्यत्वं स्वीकुर्वन्ति। अस्मिन् पक्षे आलङ्कारिकाणां संख्या भूयसी वर्तते। भामह-वामन-रुद्रट-भोजराज-मम्मट-हेमचन्द्रादिकाः शब्दार्थयोरुभयोरेव काव्ये प्राधान्यं स्वीकुर्वन्ति।

द्वितीये समालोचकाः केवलं शब्दस्यैव काव्यत्वं स्वीकुर्वन्ति। तेषां मतानुसारेण काव्ये शब्दस्यैव प्राधान्यं भवति। अस्य पक्षस्य प्रधानसमालोचकाः सन्ति—दण्डी, अग्निपुराणकारकः, विश्वनाथः, जयदेवः, पण्डितराजो जगन्नाथादिकाः।

अतएव काव्यं संलक्षयन् दण्डयाह—इष्टार्थव्यवच्छिन्ना पदावली काव्यमि'ति। कविराजो विश्वनाथस्त्वाह—'वाक्यं रसात्मकं काव्यमि'ति।

चन्द्रालोककारस्य जयदेवस्य मतानुसारेण तु काव्यस्य लक्षणम् निम्नाङ्कितं वर्तते—

'निर्दोषा लक्षणवती सरीतिर्गुणभूषिता।
सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक्'॥ इति॥

रसगङ्गाधरस्य प्रणेता पण्डितराजस्तु काव्यलक्षणमाह—'रमणीयार्थप्रतिपादकः शब्दः काव्य'मिति।

एतेषां समेषां मतानुसारेण शब्दस्यैव काव्ये प्राधान्यं भवति। अर्थस्य शब्दस्यानुगन्ता भवति।

शब्दमात्रस्यैव काव्यत्वं प्रतिपादयन् पण्डितराजो जगन्नाथः प्राह—

'एको न द्वौ इति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारापत्तेः। न द्वितीयः एकस्मिन् पद्ये काव्यद्वयव्यवहारापत्तेः। तस्माद् वेदशास्त्रपुराणलक्षणस्येव काव्यलक्षणस्यापि शब्दनिष्ठतैवोचिता।' इति।

पण्डितराजस्य युक्तीनां खण्डनं कुर्वता नागेशभट्टेनाभिहितम् यत् येन प्रकारेण—'काव्यं पठितम्' काव्यं श्रुतं इत्यादिभिर्लोकव्यवहारैः शब्दमात्रस्य काव्यत्वं सिद्धयति, तेनैव प्रकारेण 'काव्यं बुद्धम्' इत्यादिभिः लोकव्यवहारैः अर्थस्यापि काव्यत्वं सिद्धम् भवति।

किञ्च पण्डितराजेन यत् वेदशास्त्राणाम् केवलं शब्दनिष्ठता प्रतिपादिता तदपि

नोचितम् । महाभाष्यकारेण 'तदधीते तद्वेद' इति सूत्रस्य महाभाष्ये शास्त्रस्योभयनिष्ठता प्रतिपादिता । तथा चात्र भाष्यम्—

'तदधीते तद्वेद किमर्थमुभावप्यर्थौ निर्दिश्येते । न योऽधीते वेत्त्यपि असौ । यस्तु वेत्ति अधीतेऽप्यसौ । नैतयोरावश्यकः समावेशः । भवति हि कश्चित् संपाठं पठति न वेत्ति तथा, तथा कश्चिद् वेत्ति न च संपाठं पठति' । इति ।

यत्तु पण्डितराजेनाभिहितं 'एको न द्वौ' इति तत्रोच्यते यत् लोकेऽपि अवयव्यर्थे अवयवस्य प्रयोगदर्शनात् रूढलक्षणया कार्यं भवत्येव ।

वास्तविकतेयम् वर्तते यत् काव्यस्यास्वादव्यञ्जकताया आधारः शब्दार्थौ उभावेव भवतः । रसोन्मेषे शब्दार्थयोरुभयोरेव समानरूपेण भूमिका भवति । अतएव शब्दार्थयोरुभयोरेव काव्यत्वं स्वीकरणीयमिति ।

४७. संस्कृतसाहित्ये राष्ट्रियभावना

सामान्यतया साम्प्रतिकाः जनाः कथयन्ति यत् राष्ट्रियभावना पाश्चात्यानामेव प्रदानम् वर्तते । संस्कृतसाहित्ये राष्ट्रियभावनाया लेशोऽपि नहि विद्यते इति । किन्तु इयं साम्प्रतिकानाम् धारणा भ्रान्तिपूर्णैव वर्तते । संस्कृतसाहित्ये राष्ट्रियभावनायाः प्रचुरः सामग्री समुपलभ्यते । संस्कृतसाहित्यराष्ट्रमङ्गलस्य भावनायाः अखण्डस्य राष्ट्रस्य कल्पनायाश्च सर्वत्र साम्राज्यं दृश्यते ।

वैदिकयुगादेवेयं भावना बद्धमूला वर्तते यत् आर्याः भारतवर्षस्य सप्तसिन्धुप्रदेशस्य वासिनः आसन् । ते कुतश्चन भारते नहि समागताः सन्ति । फलतः तेषाम् मातृभूमिं प्रति अनुरक्तिः स्वाभाविकी वर्तते । अत एवेयं भूमिः वेदेषु मातृरूपेण वर्तते । सा वेदेषु देवतारूपेण चास्ति वर्णिता ।

प्राचीनतमे द्योतनशीले द्वे एव देवते स्तः । एकस्तु आकाशः प्रकाशस्वरूपः । स च वेदेषु पितृरूपेण वर्णितो वर्तते । सर्वेषां जीवनामाश्रयदात्री पृथिवी मातृरूपेण चास्ति वर्णिता । तथा चात्र वेदवाक्यानि भवन्ति—

द्यौर्मे पिता जनिता । (ऋग्वेदः १।१६४।३३)
द्यौर्नः पिता जनिता । (ऋग्वेदः १।१०।१२)
द्यौर्मे पिता पृथिवी मे माता । (काठकसंहिता ३०।१४।१६)
यं मे नाभिरिह मे सधस्थम् । (ऋग्वेदः १०।६१।१९)

अथर्ववेदस्य पृथिवीसूक्तं तु आनखिरं राष्ट्रप्रेम्णः समुज्ज्वलं प्रतीकं वर्तते । अस्मिन् सम्पूर्णे सूक्ते पृथिव्याः स्वरूपस्य यत् साहित्यिकं वर्णनं समुपलभ्यते तद् आर्याणां देशं प्रति प्रगाढप्रेमानुरागस्य सत्याभिव्यक्तिस्वरूपमेव । पृथिव्याः महिम्नः महत्त्वोपनिरं निरूपणम् स्वातन्त्र्यकाङ्क्षिभिः आर्यवंश्यैः हृदयोद्गारस्वरूपमेवास्ति ।

अस्य सूक्तस्य ऋषिः पृथिवीं समेषां पार्थिवानां पदार्थानां जनयित्रीरूपेण पोषिकारूपेण चोद्घोषितवान्। अस्मिन् सूक्ते ऋषिः प्रजाः सर्वेभ्योऽपकृत्येभ्यो वारयितुम्, क्लेशेभ्योऽनर्थेभ्यश्च रक्षितुम् पृथिवी प्रार्थयामास। तथा चात्र मन्त्रो भवति—

यामाश्विनावमिमातां विष्णुरस्यां विचक्रमे।
इन्द्रो या चक्र आत्मेनऽनमित्रां शचीपतिः।
सा नो भूमिर्विसृजतां माता पुत्राय मे पयः॥

अयमाशयोऽस्ति मन्त्रस्य—याम् पृथिवीम् अश्विनीकुमारौ मिनुतःस्म, यस्यां पृथिव्यां भगवान् विष्णुः पादप्रक्षेपमकार्षीत्, सामर्थ्यस्य स्वामी शचीपतिरिन्द्रः स्वस्मै यां शत्रुरहितां चकार सा पृथिवी मह्यम् तथैव पयः प्रददातु यथा माता स्वपुत्राय ददाति।

अन्यस्मिन्मन्त्रेर्षिर्वक्ति यत् यस्यां पृथिव्यां वयम् नानाप्रकारेण मोदामहे, आनन्दानुभवं च कुर्महे सा पृथिवी देवी अस्माकम् शत्रूनपकरोत्विति।

तथा च मन्त्रः—

यस्यां गायन्ति नृत्यन्ति भूम्यां मर्त्या व्यैलवाः।
युध्यन्ते यस्यामाक्रन्दो यस्यां नदति दुन्दुभिः॥
सा नो भूमिः प्रणुदतां सपत्नान्।
असपत्नं मा पृथिवीं कृणोतु॥ (पृथिवीसूक्तम् ४१)

अस्मिन् मन्त्रे ऋषिः भौतिकं जीवनं प्रति पूर्णरूपेण आशावादी प्रतीयते। सः मातुः पृथिव्याः समक्षं स्वकीयं सुखमयं जीवनं कामयते। वैदिकाः आर्याः सर्वदा स्वकीयं जीवनं सुखमयं कर्तुं स्वकीयान् देवान् प्रार्थयन्ते स्म।

ऋग्वेदस्य (१०।७५) नदीसूक्ते ऋषि स्वदेशस्य पवित्रमानां नदीनां स्मरणम् स्वकामनापूर्त्यै कुर्वन् वक्ति—

'इमे मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमं सचता परुष्ण्या।
आसिक्न्या मरुद्वृद्धे वितस्तयाऽऽर्जिकीये शृणुह्या सुषोमया॥

एभिः मन्त्रैः प्रतीयते यत् आर्याः स्वदेशस्य नदीः देवतारूपेण मन्यन्ते स्म। तेषु तेषु वैदिकेषु सूक्तेषु आर्याः देशस्याखण्डतायाः एकतायाश्च कामनाः कुर्वन्ति स्म।

यस्याः राष्ट्रियभावनायाः सूत्राणि वेदेषु दृश्यन्ते तस्याः भावनायाः पूर्णरूपेण विकासो बभूव पुराणेषु। सर्वाभिः पुराणानि सम्पूर्णं भारतवर्षम् एकदेशरूपेण वर्णयन्ति। पुराणेषु अस्य देशस्य नदीनाम् पर्वतानाम्, वनानामरण्यानाम्, तीर्थाणाम्, प्रदेशानाम् च अतीव मनोज्ञं वर्णनम् समुपलभ्यते। सर्वाणि हि पुराणानि भुवनकोषस्य सम्यग्

वर्णनं कुर्वन्ति। भारतवर्षस्याखण्डता, देशप्रेम च सर्वेषु पुराणेषु वर्ण्येते। विष्णुपुराणे तु अभिहितम्—

गायन्ति देवाः किल गीतकानि, धन्यास्तु ते भारतभूमिभागे।
स्वर्गापवर्गास्पदमार्गभूते, भवन्ति भूयः पुरुषाः सुरत्वात्॥ इति।

श्रीमद्भागवते पुराणे त्वभिहितम् स्वर्गलोके कल्पपर्यन्तस्यायुष अपेक्षया भारतवर्षे क्षणमात्रस्यायुः श्रेयस्करम् भवति। यतः अत्र क्षणमात्रं यावदेव कृतस्य कर्मणः संन्यासान्मानवः भगवतो नारायणस्य अभयप्रदं पदं प्राप्नोति। तथा च श्लोकः—

'कल्पायुषां स्थानजपात् पुनर्भवात् क्षणायुषां भारतभूजयो वरम्।
क्षणेन मर्त्येन कृतं मनस्विनः संन्यस्य संयान्त्यभयं पदं हरेः॥ इति।

देवा अपि भारतवर्षभूमौ स्वजन्म कामयन्ते। ते भारतवर्षवासिनां शोभनानां कर्मणां भूरितया प्रशंसां कुर्वन्ति। भारतवर्षे जन्मग्रहणं भगवतो मुकुन्दस्य चरणकमलसेवायाः मुख्य उपायः; तेनैव च भवति मोक्षस्यापि प्राप्तिः। अत एवोक्तं देवैरपि—

'अहो अमीषां किमकारि शोभनम् प्रसन्न एषां स्विदुत स्वयं हरिः।
यैर्जन्मलब्धं नृषु भारताजिरे मुकुन्दसेवौपयिकं स्पृहा हि नः॥' इति।

पूजाया अवसरे धार्मिकाणां कृत्यानामनुष्ठानावसरे राष्ट्रियभावनायाः पूर्णरूपेणाभिव्यक्तिर्भवति। संकल्पसमये प्रत्येके उपासकाः अखण्डस्य भारतस्य चित्रं कल्पयति। स्नानदानादिकेषु संकल्पं कुर्वाणो मानवः देश–काल कर्तृ–कर्मणाम् समकालमेव योगं कृत्वा सगर्वं स्वम् भारतवर्षस्य बृहत्तरस्य निवासीरूपेणानुभवति।

मत्स्यपुराणे भारतस्य विस्तारं वर्णयन् महर्षिर्वक्ति—

'आयामस्तु कुमारीतो गंगायाः प्रवहावधिः।'

अनेन वाक्येन भारतवर्षस्य विस्तरः कन्याकुमारीतः आरभ्य गंगाया उद्गमस्थलं यावदभिहितः।

आर्याः स्नानकाले सप्तसिन्धूनाम् स्मरणं कुर्वन्तः पठन्ति—

'गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धुकावेरि जलेऽस्मिन् सन्निधिं कुरु॥

अस्मिन् स्नानमन्त्रे अखण्डस्य भारतस्य भव्या कल्पना दृश्यते। यत्र इमाः सप्त नद्यः प्रवहन्ति स एवायमखण्डो भारतवर्षदेशः।

एतदेव नहि पूजादिकर्मकरणकाले इदमपि विहितम् यत् तदात्वे स्वदेशनिर्मितम् अखण्डमेव वस्त्रं धारणीयम्। तथा च श्लोकः—

'न स्यूतेन न दग्धेन पारक्येण विशेषतः ।
मूषकोत्कीर्णजीर्णेन कर्म कुर्यात् विचक्षणः' ।। इति ।

इयम् राष्ट्रियभावना कालिदासादीनाम् परवर्तिकवीनां काव्येषु तु अतिभव्यतया प्रकटीवभूव । विशेषतः महाकविः कालिदासस्तु भारतवर्षस्य राष्ट्रिय एव कविर्वर्तते इति नास्ति तिरोहितं विपश्चिदपश्चिमेभ्यः । महाकविः कालिदास उज्जयिन्याः भगवतो महाकालस्य महान् उपासक आसीत् अतएव तस्य काव्येषु शङ्कराराधनाविषयक आग्रहस्तु स्वाभाविक एव । सोऽयं महाकविः नैजेषु काव्येषु भगवतः शङ्करस्य अष्टमूर्तीनामुल्लेखमसकृत् कृतवान् । अभिज्ञानशाकुन्तलस्य नान्द्याम् भगवतः शङ्करस्याष्टमूर्तीनाम् वर्णनम् कुर्वता महाकविनाभिहितम्—

'या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री ।
ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम् ।।
यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः ।
प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वः ताभिरष्टाभिरीशः' ।।

मालविकाग्निमित्रनाटकस्यापि नान्द्याम् भगवतः अष्टमूर्तीनां संकेतः समुपलभ्यते । तथाहि—

'अष्टाभिर्यस्य कृत्स्नम् जगदपि तनुभिर्बिभ्रतो नाभिमानः ।'

अनेनैव प्रकारेण कुमारसम्भवग्रन्थेऽपि अष्टमूर्तीनामुल्लेखः समुपलभ्यते । तथा च श्लोकः—

'कलितान्योन्यसामर्थ्यैः पृथिव्यादिभिरात्मभिः ।
येनेदं ध्रियते विश्वं धूर्यैर्यानमिवाध्वनि ।।'

किन्त्वष्टमूर्तीनामुपासनाया इदं रहस्यं वर्तते यत् भगवतः शङ्करस्येमाः मूर्तयः सूर्य–चन्द्र–यजमान–पृथिवी–जल–तेज–वायु–आकाशस्वरूपाः वर्तन्ते । एतासां मूर्तीनां प्रतीकभूतानाम् शिवलिङ्गानाम् स्थापना सम्पूर्णे भारतवर्षे समुपलभ्यते ।

तत्र यजमानमूर्तेः प्रतीकं शिवलिङ्गम् नेपालदेशस्थपशुपतिनाथनामकम् वर्तते । यत् भारतवर्षस्य तादात्विकस्योत्तरे भागे वर्तते । भारतवर्षस्य दक्षिणे भागे आकाशस्य प्रतीकभूतम् शिवलिङ्गम् चिदम्बरम् वर्तते । चन्द्रमूर्तेः प्रतीकभूते द्वे प्रख्याते शिवलिङ्गे समुपलभ्येते—एकं तु गुर्जरप्रदेशसोमनाथनामकम् अपरं चाग्रामास्थम् चन्द्रनाथनामकम् । अनेन प्रकारेण नेपालदेशादारभ्य चिदम्बरं यावत्, सोमनाथादारभ्य चाग्रामं यावदखण्डभारतस्य कल्पनामकरोत् महाकविः कालिदासः अष्टमूर्तीनामुपासनायाः माध्यमेन ।

'अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।' इति श्लोकेन नगराजस्य भारतवर्षस्य भालस्वरूपस्य हिमालयस्य विशदं वर्णनमकरोत् महाकविः

कालिदासः कुमारसम्भवाख्ये महाकाव्ये। महाकाव्यमिदम् हिमालयस्य सौन्दर्यनिधेः वर्णनस्वरूपम् वर्तते।

हिमालयस्य भौतिकरूपस्य वर्णनं कुर्वता महाकविना अभिहितम् कुमारसम्भवे महाकाव्ये—

'आ मेखलं संचरतां घनानां छायामधः सानुगतां निषेव्य।
उद्वेगिता वृष्टिभिराश्रयन्ते शृङ्गाणि यस्यातपवन्ति सिद्धाः॥' इति।

अनेन प्रकारेण संस्कृतग्रन्थेषु राष्ट्रियभावनायाः प्राचुर्यं सर्वत्र विलोक्यते। यजुर्वेदस्य एकस्मिन् मन्त्रे राष्ट्रवृद्धयै कृता प्रार्थना तु मनोज्ञतमा राष्ट्रियभावनया परिपूर्णा चावलोक्यते। तथा चात्र मन्त्रः—

'आ ब्रह्मन् ब्राह्मणो ब्रह्मवर्चसी जायताम्, आ राष्ट्रे राजन्यः शूर इषव्योऽति व्याधी महारथो जायताम्। दोग्ध्री धेनुर्वोढाऽनड्वान्, आशुः सप्तिः, पुरन्ध्रिर्योषा, जिष्णू रथेष्टा सभेयो युवास्य यजमानस्य वीरो जायताम्। निकामे निकामे नः पर्जन्यो वर्षतु। फलवत्यो न ओषधय पच्यन्ताम्। योगक्षेमो नः कल्पताम्।' (शु० य० वे० २२।२२) इति।

मन्ये अस्य स्वतन्त्रभारतस्येयमेव सांस्कृतिकी प्रार्थना भवेत्। अस्मिन् मन्त्रे वर्णित आदर्शः श्लाघनीयो वर्तते।

अतएव संस्कृतकवीनाम् मनोज्ञतमा वाणी वैदिककालादेव राष्ट्रियभावनया परिपूर्णा आस्ते इत्यत्र नास्ति कश्चनापि सन्देहः।

४८. कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः।

अथवा—कर्मणैव हि संसिद्धिमास्थिताः जनकादयः।
अथवा—कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।

इमानि सर्वाणि हि वाक्यानि मानवजीवने कर्मणां प्राधान्यं प्रतिपादयन्ति। मानवजीवनं हि वस्तुतः कर्मप्रधानं वर्तते। मानवा एव शास्त्रवश्याः भवन्ति अतएव मानवेभ्य एव शास्त्राणामुपदेशः भवन्ति। मानवजीवनं हि पुरुषार्थसाधनम् वर्तते। पुरुषैरर्थ्यन्ते याच्यन्ते प्रार्थ्यन्ते ये ते पुरुषार्थाः। अतएव पुरुषार्था एव मानवजीवनस्य लक्ष्यभूताः। ते च पुरुषार्थाः चत्वारः—धर्मार्थकाममोक्षाख्याः। एतेषां सर्वेषां पुरुषार्थानां प्राप्तेः साधनानि कर्माण्येव भवन्ति। विना कर्म पुरुषार्थानां प्राप्तिरसंभाविनी। अतएव मानवजीवनस्यारम्भ एव कर्मभिः भवति।

शिशुः कर्मभिरेव विद्यां प्राप्नोति। कर्मभिरेव अर्थार्जनम् करोति। कर्मभिश्च तानि तानि धार्मिकान्यनुष्ठानानि करोति। तानि तानि कर्माण्येव कृत्वा सः कामान् लभन्ते। विना कर्म मोक्षावाप्तिरप्यसम्भवा। कृतानां कर्मणाम् फलाननुसन्धानादेव मानवः

मोक्षभाग् भवति । अतएव जीवने कर्मणामतीव महत्त्वं वर्तते । इमानेव सर्वानर्थान् निश्चित्य यजुर्वेदो वक्ति—

'कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ।
एवं त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे ॥'

अनेन मन्त्रेण ज्ञायते यत् कर्म एव मानवजीवनस्य लक्ष्यं वर्तते । अकर्मण्यस्य पुरुषस्य जीवनं लक्ष्यविहीनं भवति । अतएव मानवजीवनस्याधिकारेयत्तां निरूपयता भगवता श्रीकृष्णेनाभिहितम्—

'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ॥' इति ।

मानवस्याधिकारः स्ववर्णाश्रमानुसारेण वेदविहितानाम् कर्मणामनुष्ठान एव वर्तते, तेषामनुष्ठितानाम् कर्मणाम् फलस्य त्ववश्यम्भावित्वात् । इयं त्वपरा वार्ता यदनुष्ठितानाम् कर्मणामपि फलानि कदाचिदन्तरायबाधितानि नो उदियन्ति । अतएव परमपुरुषार्थप्राप्तिसाधनविचारावसरे विचारकैः कर्मयोगस्य प्राधान्यम् स्वीकृतम् ।

स्ववर्णाश्रमानुकूलानाम् वेदविहितानाम् कर्मणानुष्ठानमेव कर्मयोगशब्देनाभिधीयते । कर्माणि हि द्वेधा फलम् प्रयन्ति, यतो हि तेषाम् अनुष्ठानमपि द्विधा भवति सकामकर्मानुष्ठानम्, निष्कामकर्मानुष्ठानञ्च । तत्र यानि कर्माणि तत् तत् कामनाप्रेरितैः पुरुषैरनुष्ठितानि कर्माणि सकामकर्माणि भवन्ति, यथा स्वप्राप्तेरिच्छया अश्वमेधयागस्यानुष्ठानम्, वर्षायाः कामनया करीरीयागस्य अनुष्ठानम्, पुत्रप्राप्तेः कामनयापुत्रेष्टियागस्यानुष्ठानमित्यादिकम् । किन्तु यानि कर्माणि भगवदाज्ञारूपेण, भगवतः कैङ्कर्यरूपेण भगवतः प्रसन्नतायै क्रियन्ते तानि कर्माणि निष्कामानि कथ्यन्ते ।

अनयोः सकामनिष्कामभागविभक्तयोः कर्मणोः निष्कामैव कर्म निःश्रेयसप्रदं भवति । अतएव कल्याणकामिभिः पुरुषैः निष्कामभावनयैव केवलं भगवतस्तुष्ट्यै एव कर्माण्यनुष्ठेयानि । अनासक्तिभावनयानुष्ठानम् कर्मणामेव जीवनस्य सर्वोत्तमं लक्ष्यं भवति । एतादृशानि कर्माणि बन्धकराण्यपि नहि भवन्ति । सकामान्येव कर्माणि बन्धनकराणि भवन्ति इति हि कर्मतत्त्वविवेचकानामभिमतिः ।

कर्मणामनुष्ठानने लाभो भविष्यति न वेति विचारः अनावश्यकः । कर्माणि भगवत्तोषकराणि मानवजीवनस्य कर्तव्यभूतानीत्येव मत्त्वानुष्ठेयानि भवन्ति इति प्राह भगवान् श्रीकृष्णः गीतायाम् । तथाहि—

'योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते' ॥

लाभालाभयोः, सिद्ध्यसिद्ध्योः समानरूपतैव योगशब्देनाभिधीयते । तदिदं समत्वं फलाभिसन्धिरहितानां कर्मणामनुष्ठानेन सम्पद्यते । अतएव फलासक्तेस्त्याग अनिवार्यो

भवति कर्मयोगिना कृते।

समत्वमेव योगस्यापरं नाम। योग एव कर्मानुष्ठानस्य विचक्षणता कथ्यते। तथा चाह भगवान्—

'तस्माद् योगाय युज्यस्व योगः कर्मसु कौशलम्।'

अतएव श्रुतिष्वभिहितम्—'क्रियावानेप ब्रह्मविदां वरिष्ठः।' इति। अयमाशयो यत् स्वशक्त्यनुसारेण विहितकर्मणाम् नित्यनैमित्तिकानाम् अनुष्ठानकर्तैव ब्रह्मवेतृषु मुख्यतां लभते। अन्यापि वृहदारण्यकोपनिषदः श्रुतिर्वक्ति—'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति, यज्ञेन, दानेन तपसानाशकेन।' इति। अस्यां श्रुतौ–यज्ञ–दान–तपस्योपवासादिकाः क्रियाः ब्रह्मज्ञानस्य साधनानि अभिधीयन्ते। एतस्मादेव कारणादभिधत्ते भगवान् श्रीकृष्णः गीतायाः तृतीये अध्याये—

'न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते।
न च संन्यसनादेव सिद्धिं समधिगच्छति॥' इति।

अयमाशयो यत् शास्त्रविहितानाम् कर्मणाम् अननुष्ठानादेव ज्ञाननिष्ठाम् नहि प्राप्नोति किञ्च सः कर्मणाम् परित्यागेनापि सिद्धिं न भजते। यतः—

नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
कार्यत्ते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥

क्रियाशीलता तु मानवजीवनस्य स्वभावः। नहि किञ्चिद् भवति क्षणम् यस्मिन् जीवः किमपि प्रकारकं कर्म नहि कुर्यात्। प्राकृतिकगुणविवशो मानवः सर्वदा किमपि करोत्येव मानसिकं वा वाह्यम् वा।

अतएव वाह्यानामिन्द्रियाणां मनसा नियमनं कृत्वा फलाभिसन्धिरहितः सन् कर्मेन्द्रियैः केवलं कर्मणामनुष्ठानमतीव विशिष्टः कर्मयोगी करोति। तथाहि—

'यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते'॥

अकर्मण्यस्य पुरुषस्य शरीरयात्राऽप्यसम्भाविनीत्याह भगवान् श्रीकृष्णः—

'नियतं कुरु कर्म त्वं कर्मज्यायो ह्यकर्मणः।
शरीरयात्राऽपि च ते न प्रसिद्ध्येदकर्मणः॥'

प्राचीना ये जनकादयः ज्ञानिन अभूवन् तेऽपि कर्मानुष्ठानेनैव सिद्धिं गता इति प्रतिपादयता भगवताऽभिहितम्—

'कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवाऽपि संपश्यन् कर्तुमर्हसि॥

सर्वविधकर्मवन्धविनिर्मुक्तः अपहतपाप्माऽपि भगवानस्मिँल्लोके अवतीर्य सततं

सावधानतया नैकविधानि कर्माणि करोति इति प्राह भगवान् श्रीकृष्णः—

'यदि ह्ययं न वर्तेयं जातु कर्मण्यतन्द्रितः ।
मम वर्त्मानुवर्तन्ते मनुष्याः पार्थ सर्वशः ॥

फलतः—

'उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदरम् ।
संकरस्य च कर्ता स्यामुपहन्यामिमाः प्रजाः' ॥ इति ।

मानवजीवनस्य चत्वारः आश्रमाः सन्ति—ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्यासाख्याः । तत्र त्रिषु ब्रह्मचर्य–गार्हस्थ्य–वानप्रस्थेषु कर्मणाम् महत्त्वं तु भवत्येव संन्यासेऽपि सर्वाणि कर्माणि त्याज्यानि नहि भवन्ति । संन्यासं लक्षयता भगवता श्रीकृष्णेनाभिहितम्—

'काम्यानां कर्मणाम् त्यागं संन्यासं कवयो विदुरि'ति ।

अतएव संन्यासेऽपि निष्कामकर्माणि क्रियन्ते एव मुमुक्षभिः । अतएव—

'यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥'

४६. काव्यस्यात्मा ध्वनिः

ध्वनिकार आनन्दवर्धनाचार्यः काव्यस्य सारतत्त्वं निरूपयन् प्राह—'काव्यस्यात्मा ध्वनिरिति बुधैः यः समाम्नातपूर्वः ।' अयमाशयो यत् यो हि ध्वनिः विद्वद्भिः प्राचीनैः सम्यग्रूपेण वर्णितो वर्तते, स एव ध्वनिः काव्यस्यात्मा वर्तते । येन प्रकारेण शरीरे आत्मनः प्राधान्यं भवति, विनाऽत्मानं शरीरं निष्क्रियम्, त्याज्यम्, अस्पृश्यं व्यर्थञ्च जायते तेनैव प्रकारेण ध्वनिं विना काव्यम् व्यर्थम्, विद्वभिः अश्लाघ्यम्, उपहास्यास्पदं च भवति ।

सोऽयं काव्यास्यात्मभूतो ध्वनिशब्दो विद्वद्भिः पञ्चधा निरूप्यते—(१) ध्वनतीति ध्वनिः । अनया व्युत्पत्त्या ध्वनिशब्दो व्यञ्जकशब्दपरः । (२) ध्वनयतीति ध्वनिः । अत्र ध्वनिशब्दः व्यञ्जकार्थपरः । (३) यद् ध्वन्यते तद्ध्वनिः । अनया व्युत्पत्त्या ध्वनिशब्दः वस्त्वलङ्कारसादिपरः । (४) ध्वन्यते अनेनेति ध्वनिः । अनया व्युत्पत्त्या ध्वनिशब्दः व्यञ्जनादिशक्तिपरः । (५) ध्वन्यतेऽस्मिन्निति ध्वनिः । अस्याः व्युत्पतेरनुसारे ध्वनिशब्दः व्यङ्ग्यार्थप्रधानकाव्यपरः । इत्थं ध्वनिशब्दः व्युत्पत्तिभेदेन–व्यञ्जकशब्द–व्यञ्जकार्थ–व्यङ्ग्यार्थ–व्यञ्जनाशक्तिव्यङ्ग्यप्रधानकाव्यानाम् भवति वाचकः ।

तस्य ध्वनेः यत्र प्राधान्यम् भवति तदेव काव्यम् काव्यशब्दवाच्यम् । तदेवोत्तमं सहृदयैः श्र्लाघ्यम् च भवति । तथाभूतस्य ध्वनेः स्वरूपम् किमिति जिज्ञासायाम् ध्वन्यालोककारः आनन्दवर्धनाचार्यः प्राह—

मुखमुद्रणमकरोत्, संस्थापयामास सः काव्यप्रकाशस्य माध्यमेन ध्वनिसिद्धान्तम्। व्यञ्जनाविरोधीनाम् मुखमुद्रणं कुर्वता काव्यप्रकाशकारेणाभिहितं काव्यप्रकाशे—

'यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते ।
फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया ।।'

व्यङ्ग्यार्थस्य प्रकाशने अभिधालक्षणयोरक्षमताम् प्रतिपादयता काव्यप्रकाशकारेणाभिहितम्—'

'नाभिधा समयाभावात् हेत्वभावान्न लक्षणा ।' इति

साहित्यदर्पणकारेण विश्वनाथकविराजेनाभिहितम्—

'विरुतास्वभिधाद्यास्तु ययार्थो बोध्यते परः ।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ।।'

रसादेः व्यञ्जनैकविपयतां प्रतिपादयन् कविराजो विश्वनाथः प्राह—

'प्रागसत्त्वाद्रसादेर्नो वोधिके लक्षणाभिधे ।
किञ्च मुख्यार्थवाधस्य विरहादपि लक्षणा ।।' इति

यस्य काव्यस्यात्मभूतो ध्वनिर्वर्तते तदिदं त्रिप्रकारकं भवतीति प्राह काव्यप्रकाशकारो मम्मटः—उत्तमकाव्यम्, गुणीभूतव्यङ्ग्यकाव्यम्, चित्रकाव्यं च। साहित्यदर्पणकारः चित्रकाव्यनामकं काव्यभेदं नहि स्वीकरोति।

काव्यात्मभूतस्य ध्वनेः द्वौ भेदौ मुख्यरूपेण स्तः—(१) लक्षणामूलो ध्वनिः अविवक्षितवाच्यध्वनिर्वा। (२) अभिधामूलो ध्वनिः विवक्षितान्यपरवाच्यध्वनिर्वा। लक्षणामूलध्वनौ वाच्यार्थस्य विवक्षा नहि भवति। लक्षणामूलध्वनेरपि द्वौ भेदौ भवतः—अर्थान्तरसंक्रमितवाच्यध्वनिः, अत्यन्ततिरस्कृतवाच्यध्वनिश्च।

अभिधामूलध्वनेरपि द्वौ भेदौ भवतः—संलक्ष्यक्रमव्यङ्ग्यध्वनिः, असंलक्ष्यक्रमव्यङ्ग्यध्वनिश्च।

इत्थम्भूतस्यैव ध्वनेः काव्यात्मत्वं स्वीचकार ध्वन्यालोककारः। अयमेव सिद्धान्तः ध्वनिसिद्धान्त इत्यभिधीयते। ध्वनिसिद्धान्त एव साम्प्रतम् आलङ्कारिकाणां गोष्ठ्याम् सर्वाधिकं प्रख्यातम् वर्तते।

५०. आदिकविर्वाल्मीकिः

वन्दे वाल्मीकिकोकिलम् ।
रम्या रामायणी कथा ।

नास्ति तिरोहितमिदं विपश्चिदपश्चिमेभ्यो यत् रामायणकाव्यम् प्रणिनाय निजाप्रतिमप्रतिभाप्रतिभावितवृहस्पतिः, तपःपूतनिर्मलमतिः, महर्षिकुलपतिः त्रिकालदर्शी,

आदिकविः प्राचेतसो वाल्मीकिः। देवर्षिनारदमुखाच्छ्रुत्वा भगवतो रामचन्द्रस्य आलोकसामान्यगुणान्, देवर्षिवर्णितामेव रामकथाम् उपजीव्यीकृत्य क्रौञ्चद्वन्द्ववियोगोत्थश्लोकात्मकं शोकोद्गारमेव व्याजीकृत्य परमेष्ठिनः प्रेरणया महर्षिः वाल्मीकिः रामकथां निबबन्ध।

श्लोक एवास्त्वयं बद्धो नात्र कार्या विचारणा।
मच्छन्दादेव ते ब्रह्मन् प्रवृत्तेयं सरस्वती।
रामस्य चरितं कृत्स्नं कुरु त्वमृषिसत्तम॥

× × ×

रहस्यं च प्रकाशं च यद्वृत्तं तस्य धीमतः।

× × ×

तच्चाप्य विदितं सर्वं विदितं भविष्यति।
न ते वागनृता काव्ये काचिदत्र भविष्यति॥
कुरु रामकथां पुण्यां श्लोकबद्धां मनोरमाम्॥

इत्यनेन परमेष्ठिनानुगृहीतो महर्षिः श्रीरामकथायाः माध्यमेन चतुर्विंशतिसहस्रात्मकम् रामायणकाव्यम् निर्मितवान्।

इदमेव काव्यमादिमम् वर्तते यल्लक्ष्यीकृत्य सर्वे काव्यलक्षणकर्तारः लक्षणग्रन्थानां निर्माणमकार्षुः। इदमेव महाकाव्यमादर्शीकृत्य परवर्तिनः समालोचनाशास्त्रमाविश्चक्रुः। एतस्मादेव कारणादिदमादिकाव्यस्य विरुदेन विभूषितम् वर्तते।

इदं रामायणमेवादर्शीकृत्य महर्षिः द्वैपायनोऽपि पुराणेषु तत्र तत्र रामकथायाः सन्निवेशमकरोत्।

तदुक्तं वृहद्धर्मपुराणे—

'पठ रामायणं व्यासं काव्यबीजं सनातनम्।
यत्र रामचरित्रं स्यात् तदहं तत्र शक्तिमान्॥' इति।

किञ्च द्वैपायनमहर्षिणाप्यभिहितम् तत्र—

रामायणे पठितं प्रसन्नोऽस्मि कृतस्त्वया।
करिष्यामि पुराणानि महाभारतमेव च॥ इति।

अनेकेषु पुराणेषु रामायणस्य माहात्म्यमपि गीतम्। महाभारते द्रोणपर्वण्यपि महर्षेः वाल्मीकेर्नामोल्लेखपुरस्सरम् वाल्मीकीयः एकश्लोकः समुपलभ्यते। तथाहि—

'अपि चायं पुरा गीतः श्लोको वाल्मीकिना भुवि।
न हन्तव्या स्त्रियश्चेति यद् ब्रवीषि प्लवङ्गम॥
सर्वकालं मनुष्येण व्यवसायवता सदा।
पीडाकरममित्राणां यच्च कर्तव्यमेव तत्'॥ इति।

अग्निपुराणेऽपि नारदवाल्मीकिसंवादनिर्देशपूर्वकं रामायणकथायाः सारांशः संगृहीतो दृश्यते । एवमेव स्कन्दपुराणे पद्मपुराणे चापि रामकथा संगृहीता वर्तते ।

महाकविः कालिदासस्तु रामायणमेवोपजीव्यमकरोत् रघुवंशमहाकाव्यम् । अतएव सः रघुवंशमहाकाव्यस्य चतुर्दशे सर्गे प्राह—

'सोऽनु व्याहरणाद् भूयः शोकः श्लोकत्वमागतः ।' इति ।

किञ्च तस्मिन्नेव सर्गे प्राह महाकविः कालिदासः—

'तामभ्यगच्छद् रुदितानुसारी, मुनिः कुशेध्माहरणाय यातः ।
निषादविद्धाण्डजदर्शनोत्थः श्लोकत्वमापद्यत यस्य शोकः' ॥

तथैव चाह ध्वन्यालोककार आनन्दवर्धनाचार्यः—

'काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥'

उत्तररामचरितप्रणेता महाकविः भवभूतिरपि प्राचेतसस्यैवोपजीव्यताम् समुद्घोषयन् प्राह उत्तररामचरितस्य द्वितीयेऽङ्के—

मुनयस्तमेव पुराणब्रह्मवादिनं प्राचेतसमृषि····उपासते ।'

सुभापितपद्धतिप्रणेता शार्ङ्गधरोऽपि परवर्तिनामधमर्णतामादिकवेश्चोत्तमर्णतामेवानुवर्णितवान्—

'कवीन्द्र' नौमि वाल्मीकिं यस्य रामायणी कथाम् ।
चन्द्रिकामिव चिन्वन्ति चकोरा इव साधकः' ॥ इति

सोऽयम् रामायणस्य प्रणेता महामुनिर्वाल्मीकिः 'प्राचेतसोऽहं दशमः पुत्रो राघवनन्दनः' इति वाक्येन द्वारा आत्मानं प्राचेतसत्वेन पर्यचापयत् । अस्य वाल्मीकीयरामायणस्य बह्व्यष्टीकाः सन्ति—(१) कतक व्याख्या । अस्याः व्याख्यायाः उल्लेखम् गोविन्दराज–नागोजिभट्टौ कृतवन्तौ । (२) नागोजिभट्टविरचितम् रामायणतिलकम् । (३) गोविन्दराजप्रणीतम् रामायणभूपणम् । (४) शिवसहायेन समनुष्ठिता रामायणशिरोमणिव्याख्या । (५) महेश्वर तीर्थंकृतः तत्त्वदीपः । (६) रामानुजाचार्यकृता रामायणव्याख्या । (७) वरदराजकृतो विवेकतिलकः । (८) त्र्यम्बकराजमखानीकृता धर्माकूतव्याख्या । (९) रामानन्दतीर्थकृता रामायणकूटव्याख्या । (१०) चतुरर्थदीपिका । (११) रामायणविरोधपरिहारः । (१२) रामायणसेतुः । (१३) तात्पर्यतरणिः । (१४) शृङ्गारसुधाकरः । (१५) रामायणसप्तविम्बः । (१६) अहोवलकृता वाल्मीकिहृदयव्याख्या । (१७) विरोधभञ्जिनी टीका । (१८) माधवाचार्यकृता रामायणतात्पर्यनिर्णयटीका । (१९) श्रीअप्पयदीक्षितविरचिता रामायणतात्पर्यनिर्णयः । (२०) प्रवालमुकुन्दसूरि-

विरचिता रामायणभूषणव्याख्या । (२१) श्रीरामभद्राश्रमनिर्मिता सुबोधिनी टीका ।

एताभ्यो व्यतिरिक्ता अपि वह्वचः टीकाः सन्ति श्रीरामायणस्य । यासामुलेखम् ते ते विद्वांसः तत्र तत्र अकार्षुः ।

तदिदं चतुर्विंशतिसहस्रश्लोकात्मकम् वाल्मीकीयं रामायणम् भूतलस्याद्यं महाकाव्यम् वर्तते इदमेव महाकाव्यं लक्ष्यीकृत्य अग्निपुराणे 'काव्ये स्फुरदलङ्कारं गुणवद्दोषवर्जितम्' इति काव्यलक्षणम् अभिहितम् । आचार्यो मम्मटोऽपि तथैवाह— 'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापी'ति काव्यप्रकाशे । काव्यम् इतिहासपुराणाभ्यां व्यंग्यार्थस्यैव प्राधान्यात् व्यतिरिच्यते । तथा चोक्तम् अग्निपुराणे—

'शास्त्रे शब्दप्रधानत्वमितिहासेषु निष्ठता ।
अभिधायाः प्रधानत्वात् काव्यं ताभ्यां विभिद्यते ॥'

इममखिलमेवार्थमालोच्य आनन्दवर्धनाचार्येणाप्यभिहितम्—'काव्यस्यात्मा ध्वनिः' इति । मम्मटाचार्येण तु प्रोक्तम्—

'इममुतममतिशायिनि व्यङ्ग्ये वाच्याद् ध्वनिर्बुधैः कथितः ।'

अग्निपुराणकारेणाप्यभिहितम्—'वाग्वैदग्ध्यप्रधाने अपि रस एवात्र जीवितम् ।' इति ।

तादृशं रसविशिष्टमेव वाल्मीकीयम् रामायणं कुश-लवाभ्याम् गीतम् । तथाहि—

रसैः श्रृङ्गारकरुण–हास्य–रौद्र–भयानकैः ।
वीरादिभिः रसैर्युक्तं काव्यमेतदगायताम् ॥'

(वा० रा० १।४।९)

रामायणकाव्यमिदम् करुणरसप्रधानम् वर्तते । अतएवात्र करुण एव रसोऽङ्गी रसः । तद्व्यतिरिक्ता अन्ये रसाः तस्याङ्गभूताः ।

रामायणकाव्यमिदं समालोचयता ध्वनिकारेणानन्दवर्द्धनाचार्येणाप्यभिहितम्— 'तथा चादिकवेर्वाल्मीकेः निहतसहचरी विरहकातरक्रौञ्चाक्रन्दजनितः शोक एव श्लोकतया परिणतः शोको हि करुणास्थायिभावः ।' इति ।

काव्येऽस्मिन् करुणरसस्य प्राधान्यं सूचयता आदिकविना महर्षिणा वाल्मीकिना स्वयमेवाभिहितम्—'शोकः श्लोकत्वमागतः ।' इति ।

ध्वन्यालोके द्वितीयोद्योतेऽत्यन्ततिरस्कृतवाच्यध्वनेरुदाहरणरूपेण वाल्मीकीयरामायणस्य अधोऽङ्कितश्लोकोऽपि उद्धृतः—

'रविसंक्रान्तसौभाग्यतुषारारुणमण्डलाः ।
निःश्वासान्ध इवादर्शश्चन्द्रमा न प्रकाशते' ॥ इति

श्रीरामायणस्य सद्धर्मोपदेशाः प्रख्याततमाः सन्ति । एतस्मादेव कारणात् साहित्यदर्पणकारेणाभिहितम्––'रामादिवत् प्रवर्तितव्यं न रावणादिवदि'ति कृत्याकृत्यप्रवृत्तिनिवृत्ति।' इत्यादि । मातापित्रोः सेवा, पतिशुश्रुषादिकानाम् सद्धर्माणाम् विषये रामायणस्य सीतारामादिकाः निदर्शनभूताः । लक्ष्मणभरतयोः भ्रातरि श्रद्धावैपुल्यम् प्रख्यातमेव लोके ।

'तपःस्वाध्यायनिरतं तपस्वी' इत्यादि श्लोकेन प्रारब्धस्य वाल्मीकीयरामायणस्य जपतपसोः प्राधान्यस्यापलापः केनापि कर्तुं न शक्यते ।

यद्यपि वाल्मीकीये रामायणे भगवतो रामचन्द्रस्य चरित्रम् मनुष्यरूपेणैवोपवर्णितम् अथापि केचन सन्ति श्लोकाः येषामालोके श्रीरामस्य परमात्मत्वं स्पष्टमेव भवति । तथाहि––

सुमित्रा कौसल्यामाश्वासयन्ती प्राह अयोध्याकाण्डे श्रीरामचन्द्रविषये––

'सूर्यस्यापि भवेत् सूर्यः ह्यग्नेरग्निः प्रभोः प्रभुः ।
श्रियाः श्रीश्च भवेदग्र्या कीर्त्याः कीर्तिः क्षमाक्षमा ।
दैवतं देवतानां भूतानां भूतसत्तमः' ॥

भगवान् श्रीरामः स्वयमेव स्वसामर्थ्यं प्रकटयन्नाह––

सकृदेव प्रपन्नाय तवास्मीति च याचते ।
अभयं सर्वभूतेभ्यो ददाम्येतद् व्रतं मम ॥ इति ।

श्रीहनुमानप्याह रावणस्य समक्षम्––

सर्वान् लोकान् सुसंहृत्य सभूतान् सचराचरान् ।
पुनरेव तथा स्रष्टुं शक्तो रामो महायशाः ॥ इति ।

अनेन प्रकारेण रामायणे महाकाव्यस्य सर्वे गुणाः सन्ति इति सिद्धमेव ।

५०. महाभारतम् ज्ञानपरम्परायाः विश्वकोशः

अथवा––वेदानध्यापयामास महाभारतपञ्चमान् ।
अथवा––यन्न महाभारते तन्न भारते ।

भारतस्य मनीषिभिः दीर्घकालिकपरम्परातः सुचिन्तितताया जीवनधारायाः सर्वाङ्गीणव्याख्याः सर्वोत्कृष्टः प्रतिनिधिग्रन्थो महाभारतम् वर्तते । महर्षेः वादरायणस्य विज्ञानभूम्नः सर्वोत्तमं रत्नमिदं यत्र सम्पूर्णं भारतीयम् जीवनम् भवत्यालोकितम् । अस्मिन् विशालकाये ग्रन्थे वर्णितानां विषयाणां वैशिष्ट्यं विलोक्यैव समीक्षकैरभिहितम्––'यन्नेहास्ति न तद् क्वचित् ।' इति ।

महाभारतमेक एव ग्रन्थः वेदविज्ञानस्य, पुराणसाहित्यस्य, इतिहासस्य,

महाकाव्यस्य, धर्मग्रन्थस्य, सामाजिकसांकृतिकचेतनायाश्च प्रतिनिधिग्रन्थो वर्तते। अस्मिन् ये केचनापि विषया वर्णितास्तेषाम् सर्वेषाम् चरमैव काष्ठा दृश्यते।

महाभारतम् भारतस्योज्ज्वलज्ञानपरम्परायाः अमृतम् स्मारकम् वर्तते। वैदिकलौकिकोभययुगयोः संघर्षमयस्य कालस्य अधिकाराणां परिसीमनार्थम् महाभारतम् सन्धिपत्रमिव वर्तते। महाभारतस्य वास्तविकमुद्देश्यम् मनुष्यजातेः भौतिकजीवनस्य निस्सारताप्रदर्शनपूर्वकम् मोक्षमार्गस्योपदेशो वर्तते। एतस्मादेव कारणात् काव्यसमीक्षकाः महाभारतम् शान्तरसप्रधानम् मेनिरे। तथा चाह आनन्दवर्धनाचार्यः ध्वन्यालोकस्य चतुर्थे उद्योते—

महाभारतेऽपि शास्त्रकाव्यरूपच्छायान्वयिनि वृष्णिपाण्डवविरसावसानवैमनस्यदाविनि समाप्तिमुपनिबध्नता महामुनिना वैराग्यजननं तात्पर्यं प्राधान्येन स्वप्रबन्धस्य दर्शयता मोक्षलक्षणः पुरुषार्थः शान्तो रसश्च मुख्यतया सूचितः।' इति।

महाभारतस्य माहात्म्यं वर्णयता तद्रचनाकारः प्राह आदिपर्वणः द्वितीयेऽध्याये—

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।
न चाख्यानमिदं विद्या नैव स स्याद् विचक्षणः॥
अर्थशास्त्रमिदं प्रोक्तम् धर्मशात्रमिदं महत्।
कामशास्त्रमिदं प्रोक्तम् व्यासेनामितबुद्धिना॥
श्रुत्वा त्विदमुपाख्यानं श्राव्यमन्यन्न रोचते।
पुंस्कोकिलगिरं श्रुत्वा रुक्षा ध्वांक्षस्य वागिव॥

महाभारतस्याध्ययनेन ज्ञायते यत् कौरवपाण्डवानां युद्धव्यतिरिक्तानि बहूनि महार्घाणि रत्नानि महाभारते परिलसन्ति। प्रख्यातो वैयाकरणः पाणिनिर्भारतशब्दस्यार्थं युद्धम् अष्टाध्याय्याः ४।२।५६ सूत्रेऽलिखत्। अतएव महाभारतशब्दः महासंग्रामस्य बोधको भवति। महाभारतमिदं भरतवंशस्याख्यानम् वर्तते। महाभारतस्य नामकरणविषयेऽप्यभिहितमिदं यद् देवास्तुलायाः एकस्मिन् पक्षे चतुरो वेदान् कृत्वा अपरे पक्षे महाभारतमकार्षुः। ग्रन्थस्यास्य वेदेभ्यो महत्त्वाद् भारवत्त्वाच्च नाम महाभारतमभूत्।

महाभारतस्यासामान्याः विशेषता वीक्ष्येदं पञ्चमवेदरूपेण स्मर्यते। महाभारतस्यान्तराले एव—श्रीमद्भगवद्गीता, विष्णुसहस्रनाम, अनुगीता, भीमस्तवराजः, गजेन्द्रमोक्षश्चेति पञ्चरत्नानि सन्ति।

महाभारतमनेकेषां संस्कृतसाहित्यस्य काव्यानाम्, महाकाव्यानाम्, नाटकानाम् कथाकृतीनाञ्चोपजीव्यं वर्तते। तस्मिन् कविबुद्धिप्रेरकाण्यनेकानि तत्त्वानि समाविशन्ति। अस्मिन् महाग्रन्थे आध्यात्मिक—राजनीतिक—साहित्यिक—सामाजिक—

धार्मिक–ऐतिहासिकानां विषयाणां वीजानि विकीर्णानि सन्ति। अतएवास्य महत्त्वं प्रकाशयन् महर्षिः कृष्णद्वैपायनः प्राह्—'यदिहास्ति तदन्यत्र यन्नेहास्ति न भारते।'

संस्कृतसाहित्यस्य निम्नांकितानि काव्यानि महाकाव्यानि, नाटकानि च महाभारतेन प्रभावितानि सन्ति—

ग्रन्थाः	प्रणेतारः	ग्रन्थाः	प्रणेतारः
पञ्चरात्रम्	[illegible] कवि भासः	वेणीसंहारनाटकम्	भट्टनारायणः
दूतवाक्यम्		शिशुपालवधम्	माघः
मध्यमव्यायोगः		सुभद्राधनञ्जयम्	कुलशेखरः
दूतघटोत्कचम्		कीचकवधम्	नीतिवर्मा
कर्णभारम्		वालभारतम्	राजशेखरः
उरुभंगः		नैषधानन्दनम्	क्षेमेश्वरः
अभिज्ञानशाकुन्तलम्	कालिदासः	नलचम्पू	त्रिविक्रमभट्टः
किरातार्जुनीयम्	भारविः	वालभारतम्	अमरचन्दः
भारतमञ्जरी	क्षेमेन्द्रः	पाण्डवचरितम्	देवप्रभसूरिः
धनञ्जयव्यायोगः	काञ्चनपण्डितः	सहृदयानन्दम्	कृष्णानन्दः
किरातार्जुनीयव्यायोगः	वत्सराजः	वालभारतम्	अगस्त्यः
नैषधीयचरितम्	श्रीहर्षः		
नलविलासम्	रामचन्द्रः		
निर्भयभीमम्			

महाभारतस्याध्ययनेन ज्ञायते यत् तस्य कथायाः प्रवचनकर्तारः त्रयः सन्ति। अस्याः कथायाः प्रथमः प्रवक्ता कृष्णद्वैपायनो व्यासो वर्तते। सर्वप्रथमम् सः कथामिमाम् वैशम्पायनाख्यं स्वशिष्यं श्रावयामास। जनमेजयस्य नागयज्ञस्यावसरे ताम् कथाम् वैशम्पायनः अर्जुनस्य प्रपौत्रं जनमेजयं श्रावयामास। पुनः तृतीयं वारं लोमहर्षणस्य पुत्रः सौतिः पवित्रमिदम् महाख्यानम् शौनकादिभ्य ऋषिभ्यः श्रावयामास। शौनकादिभ्यः एवेयम् कथा लोकविश्रुता वभूव।

महाभारतस्य त्रीणि नामानि समुपलभ्यन्ते। समालोचकानाम् मतानुसारेण कृष्णद्वैपायनो यां कथाम् प्रावोचत् तस्या नाम जय आसीत्। तथाचोक्तमादिपर्वणि—

'नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं व्यासं ततो जयमुदीरयेत् ॥'

नामेदमैतिहासिकमस्तीत्यप्युक्तम्—

'जयनामेतिहासोऽयं श्रोतव्यो विजीगीषुणा ॥'

कृष्णद्वैपायनप्रोक्ते जयग्रन्थे ८८०० श्लोकाः आसन् । तथाहि—

'अष्टौश्लोकसहस्राणि अष्टौश्लोकशतानि च ।
अहं वेद्मि शुको वेत्ति संजयो वेत्ति वा न वा' ॥

वैशम्पायनो याम् कथाम् प्रावोचत् तस्याः नाम भारतमासीत्, तस्य श्लोकसंख्या चतुर्विंशतिसहस्राणि आसीत् । तथा चोक्तमपि—

'चतुर्विंशतिसाहस्रीं चक्रे भारतसंहिताम् ।
उपाख्यानैर्विना तावत् भारतं प्रोच्यते बुधैः' ॥ इति ।

सौतिप्रोक्ता कथा महाभारतस्य नाम्ना प्रख्याता बभूव यस्याम् महाभारतम् शतसाहस्री संहिता बभूव ।

पुराणानां महत्त्वम्

अथवा—इतिहासपुराणाभ्याम् वेदं समुपबृंहयेत् ।
अथवा—वेदार्थो निश्चेतव्यः इतिहासपुराणैः ।

वेदोपबृंहणग्रन्थेषु पुराणानामतीव महत्त्वम् वर्तते । वेदार्थस्य दुरवग्राह्यत्वात्, सम्पूर्णस्य वेदस्याध्येतुमशक्यत्वात्, वेदार्थस्य प्रतिभासम्पन्नपुरुषैरेव ज्ञेयत्वात् वादरायणः वेदार्थस्योपबृंहणायैव पुराणानां रचनामकरोत् । पुराणानां ऐतिह्यविषयेऽपि साम्प्रतिकानां विचारकाणां मतभेदो वर्तते । पुराणानां नामानि तु वैदिकसाहित्येऽपि समुपलभ्यन्ते । छान्दोग्योपनिषदः सप्तमाध्यास्य प्रथमखण्डस्य प्रथमश्रुतौ प्राह नारदर्षिः स्वाचार्यस्य सनत्कुमारस्य समक्षम् यत् मया वेदधर्मशास्त्रपुराणादिकानाम् अध्ययनं कृतम् । अथापि इमानि पुराणानि वैदिककाले नासन् । अथवा तदात्वे कल्पान्तरीयाणि पुराणानि भवेयुः ।

विष्णुपुराणमेव पुराणानामाद्यं महर्षिणा पराशरेण प्रणीतम्, पुराणसंहितानाम्ना च प्रख्यातम् वर्तते । तदनुसारमेव पाराशर्यो महर्षिर्वादरायणः प्रणिनाय तद्व्यतिरिक्तानि पुराणानीति पुराणानामध्ययनेनैव ज्ञायते । अयम् महर्षिः वादरायणः द्वापरयुगे आसीत् । विष्णुपुराणे तूक्तम्—

द्वीपे वदरिकामिश्रे वादरायणमच्युतम् ।
पराशरात् सत्यवती पुत्रं लेभे परन्तपम् ॥ इति ।

अयमेव महर्षि वादरायण नाम्ना विख्यातः समेषां पुराणानां प्रणेता महा-

भारतस्य कर्ता ब्रह्मसूत्राणां च रचयिता आसीत्। यद्यपि ऋष्यन्तरविषयेऽपि वादरायणस्य प्रयोगो दृश्यते, तथापि सूत्रकृद्विषये वादरायणशब्दः पराशर्यगोचर एव। तथा च स्कान्दे व्यक्तमुक्तम्—

'नारायणात् विनिष्पन्नं ज्ञानं कृतयुगे स्थितम्।
किञ्चित् तदन्यथाभूतम् त्रेतायां द्वापरे खिलम्॥
गौतमस्य ऋषेः शापात् ज्ञाने त्वज्ञानतां गते।
सङ्कीर्णबुद्धयो देवा ब्रह्मरुद्रपुरस्सराः॥
शरण्यं शरणं जग्मुर्नारायणमनामयम्।
तैर्विज्ञापितकार्यस्तु भगवान् पुरुषोत्तमः॥
अवतीर्णो महायोगी सत्यवत्यां पराशरात्।
उत्सन्नान् भगवान् वेदान् उज्जहार स्वयं हरिः॥
चतुर्धा व्यभजत् तांश्च चतुर्विंशतिधा पुनः।
शतधा चैकधा चैव तथैव च सहस्रधा॥
कृष्णो द्वादशधा चैव पुनस्तस्यार्थवित्तये।
चकार ब्रह्मसूत्राणि येषां सूत्रत्वमञ्जसा॥
अल्पाक्षरमसन्दिग्धम् सारवद् विश्वतोमुखम्।
अस्तोभमनवद्यं च सूत्रं सूत्रविदो विदुः॥
निर्विशेषितसूत्रत्वं ब्रह्मसूत्रस्य चाप्यतः।
सविशेषाणि सूत्राणि ह्यपराणि विदो विदुः॥
मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः।
इति वेदविदः प्राहुः शब्दतत्त्वार्थवेदिनः॥
एवंविधानि सूत्राणि कृत्वा व्यासो महायशाः।
ब्रह्मरुद्रादिदेवेषु मनुष्यपितृपक्षिषु।
ज्ञानं संस्थाप्य भगवान् क्रीडते परमेश्वरः'॥

एभिः श्लोकैरेव ज्ञायते यत् पुराणानां प्रणेता 'यः सर्वज्ञः सर्ववित्' 'परास्य शक्तिर्विविधैव श्रूयते, स्वाभाविकी ज्ञानबलक्रिया च।' इत्यादिभिः श्रुतिभिरुपश्लोकितो नारायणस्यावतारभूतो पाराशर्यः कृष्णद्वैपायन आसीत्।

किन्तु साम्प्रतिकानां समालोचकानामभिमतिरस्ति पुराणानामेषां समेषां प्रणेता कश्चनैकः पुरुषो नास्ति, अपितु पुराणानां प्रणयनम् समये-समये व्यासोपाधिविभूषितैः तैः तैः मनीषिभिः कृतम्। नवीनाः समालोचकाः स्वीकुर्वन्ति यत् पुराणानां प्रणयनम् ६०० ईस्वीपूर्वकालादारभ्य ६०० ईस्वीयकाल यावदभूत्। परञ्च भारतीयाः सनातन-धर्ममतानुयायिनः नवीनानाम् विचारमिमं नहि स्वीकुर्वन्ति। ते सर्वाण्येव पुराणानि महर्षिवादरायणकृतानि स्वीकुर्वन्ति।

पुराणानि संख्या सर्वैरेव विवेचकैः अष्टादश स्वीक्रियते। तेषां नामानि इत्थं संक्षेपतः संगृहीतानि—

'मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकुष्कानि पुराणानि विदुः बुधाः ॥'

अयमाशयो यत् द्वयोः पुराणयोराद्यक्षम् मकारः, द्वयोः पुराणयोर्नाम्नोराद्यक्षरं भकारः, त्रयाणां पुराणानाम् नाम्नामाद्यक्षरं ब्रकारः चतुर्णां पुराणानां नामानि वकारेण, अकार-नकार-पकार-लिकार-गकार-कुकार-ष्कारैश्चैकैकानि पुराणानि सन्ति। इत्थम् पुराणानामिमानि नामानि भवन्ति—मत्स्यपुराणम्, मार्कण्डेयं पुराणम् इति मकारेण द्वे पुराणे स्तः। भविष्यम् भागवतञ्चैव काकारेणेमे पुराणे स्तः। ब्रह्म-ब्रह्माण्ड-ब्रह्मवैवर्ताख्यानीमानि त्रीणि पुराणानि ब्रकारेण सन्ति। विष्णु-वराह-वामन-वायुपुराणानि हि सन्ति चत्वारि वकाराक्षरेण। अकारेण अग्निपुराणम्, पकारेण पद्मपुराणम्, नाकारेण नारदीयं पुराणम्, लिङ्गपुराणम् लिङ्कारेण, गकारेण गरुड-पुराणम्, कूर्मपुराणम् कुकोरेण, स्कारेण स्कन्दपुराणम् च संगृहीतम्।

एतेषां समेषां पुराणानाम् सात्त्विकराजसतामसभेदेन चापि विभाजनम् भगवता शङ्करेण पाद्मे पुराणे इत्थम् कृतम्—

'वैष्णवं नारदीयं च तथा भागवतं शुभम् ।
गारुडं च तथा पाद्मं वाराहं शुभदर्शने ॥
षडेतानि पुराणानि सात्त्विकानि मतानि मे ।
ब्रह्माण्डं ब्रह्मवैवर्तं मार्कण्डेयं तथैव च ॥
भविष्यं वामनं ब्राह्मं राजसानि निबोध मे ।
मात्स्यं कौर्मं तथा लिङ्गं शैवं स्कान्दं तथैव च ॥
आग्नेयं च षडेतानि तामसानि निबोध मे ॥' इति।

येन प्रकारेण पुराणानां संख्याष्टादश विद्यते तेनैव प्रकारेणोपपुराणनामपि संख्याष्टादश विद्यते। तानि चोपपुराणनि पाद्मे पुराणे निम्नप्रकारेणोपवर्णितानि—

'आद्यं सनत्कुमारोक्तम् नारसिंहमथापरम् ।
तृतीयं स्कान्दमुद्दिष्टम् कुमारेण तु भाषितम् ॥
चतुर्थं शिवधर्माख्यं साक्षान्नन्दीशभाषितम् ।
दुर्वाससोक्तमाश्चर्यं नारदोक्तमतः परम् ॥
कापिलं वामनं चैव तथैवो नः सेवितम् ।
ब्रह्माण्डं वारुणं चाथ कालिकाह्वयमेव च ॥
माहेश्वरं तथा साम्बं सौरसर्वार्थसंचयम् ।
पराशरोक्तमपरं मारीचं भास्कराह्वयम् ॥' इति।

एतेषु पुराणेषु प्रधानतया निम्नाङ्कितानां विषयाणां प्रायेण संग्रहो भवति—

(१) कस्यचन देवस्याथवा कस्याश्चन देव्याः प्रधानदेवतारूपेण प्रतिपादनम्, तत्पुराणानुसारेण सैव देवता निःश्रेयसे लौकिकाभ्युदयाय चोपास्या भवति। (२) जगद्व्यापाररूपेण सैव प्रतिपादिता देवता जगतः सृष्टि, पालनं, संहरणं च करोतीत्यस्यार्थस्य वर्णनम्। इत्थम् तत्पुराणप्रतिपादिता देवतैव तत्र जगतः कारणरूपेण वर्ण्यते। (३) प्रसङ्गतस्तत्र राज्ञाम्, देवानाम्, ऋषीणां च वर्णनं क्रियते। अनेनैव प्रकारेणात्र तेषां तेषां राज्ञां चापि वर्णनं क्रियते। (४) भौगोलिकवर्णनमपि क्रियते तेषां तेषां राज्ञां राज्यविस्तारस्य च माध्यमेन। (५) जीवनोन्नयनसाधनानाम् तीर्थाटन-जप-तप-व्रत-नियमोपवासानां नित्यनैमित्तिकप्रायश्चित्तादिकानां कर्मणाम् माहात्म्यं चापि वर्ण्यते। (६) कर्मयोग-ज्ञानयोगयोस्तु वर्णनम् पुराणेषु समुपलभ्यते एव किन्तु सर्वापेक्षया भक्तियोगस्य कल्याणकामिनां साधकतमत्वेन वर्णने पुराणानाम् प्रवृत्तिरवलोक्यते। (७) भारते वेदाङ्गरूपेण प्रख्यातानाम् व्याकरण-ज्योतिष-शिक्षा-कल्प-छन्दोविचिति-निरुक्तादिकानां विषयाणां वर्णनेन साकमेव सांख्ययोगादिकानामपि वर्णनम् तत्र समुपलभ्यते। (८) प्रायेणसर्वेष्वेव पुराणेषु नास्तिकानां पराजयः आस्तिकानां च विजयो भवति वर्णितः। एतस्य वर्णनस्योद्देश्यं भवति यत् सर्वे जनाः वेदशास्त्रसमर्थितस्यैव पथः अनुसरणं कुर्युः इति शिक्षणम्।

इदं सर्व प्रतिपाद्य पुराणानि भारतीयायाः संस्कृतेः संरक्षणस्य कार्यं कुर्वन्ति। पुराणामालोके मानवः भारतीयायाः संस्कृतेः स्वरूपं वुद्धया तेषामनुसारेण स्वीयजीवनस्य मार्गं प्रशस्तं कर्तुं समर्थो भवति।

पुराणानामिदमेकं वैशिष्टयं भवति यत् तानि अख्यानानां माध्यमेन तेषां तेषामनुष्ठानानां कर्मपात्रश्रैष्ठ्यं प्रतिपादयन्ति। यथा—ध्रुव-प्रह्लाद-परीक्षित-पाण्डवादिकानामाख्यानानां माध्यमेन भक्तेः श्रैष्ठ्यप्रतिपादनम्। इमानि सर्वाप्याख्यानानि मानवजीवनस्य समाकर्षणं साधकतमानि भवन्ति।

पुराणेषु पुराणानां विषयसंग्रहप्रसङ्गे प्रोक्तमपि—

'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च।
वंशानुचरितं चैव पुराणं पञ्च लक्षणम्॥' इति।

पुराणानां वेदार्थोपवृंहणानां प्रतिपादयन् भगवान् वादरायणः प्राह—

इतिहासपुराणाभ्यां वेदं समुपवृंहयेत्।
विभेत्यल्पश्रुताद् वेदो मामयं प्रतरिष्यतीति॥

अनेनेदमपि ज्ञायते यत् विना पुराणानामध्ययनं पुरुषे वहुतताया आधानं नहि भवितुमर्हति।

अत एव वैदिकानाम् वह्वीनाम् विद्यानाम्, व्याकरण-छन्दः-ज्योतिश्शास्त्र-धर्मशास्त्र-आयुर्वेद-तीर्थाटन-भुवनकोश-व्रत-जप-तप-नियम-उपवासादिकानां सांख्य-

योगादिकानां जीवनस्य साक्षादुपकारिणां शास्त्राणां सम्यग्ज्ञानाय--भक्तेः स्वसमीहितसाधकतमत्वश्रद्धायै च पुराणानां विशदमध्ययनं कर्तव्यम् ।

विद्यावताम् भागवते परीक्षा

यद्यपि सन्ति अष्टादश संख्याकानि पुराणानि तेषु सर्वेषु पुराणेषु श्रीमद्भागवतस्य महिमा सर्वातिशायी वर्तते । पुराणमिदं स्वविषयवैपुल्यमहिम्ना विश्वस्मिन् संस्कृतसाहित्ये प्रख्याततमं विद्यते । द्वादशस्कन्धेषु विततमिदं पुराणरत्नं स्वभक्त्यालोकेन विवेकविज्ञानधनानां चेतांसि विकासति, प्रकाशयत्यन्तःकरणम् भक्तानाम् । अस्य पुराणस्य श्रवणमात्रेणैव मानवः भगवद्भक्तिनिष्ठः सन् विवेकविलोकाभ्यासक्रियाकल्याणानवसानुद्धर्षाख्यसाधनसप्तकानुगृहीतमनाः तत्त्वयाथात्म्यमवगत्य विशद-विशदतर-विशदतमतया तस्य तत्त्वस्यान्ततो तैलधारावदविच्छिन्नस्मृतिसन्तानेन द्वारा 'निचाय्य तन्मृत्युमुखात् प्रमुच्यते' 'नान्यः पन्था विद्यतेऽयनाय' इत्यादि श्रुत्युक्त्यनुसारेण साक्षात्कृत्य मुक्तिभाजनतामुपयाति ।

पुराणस्यास्याधिकारिविषये प्रख्यातमिदं वर्तते—'विद्यावतां भागवते परीक्षा' इति । अयमत्राभिसन्धिः—सामान्यः पुरुष अस्य पुराणस्याधिकारी भवितुं नार्हति, अस्मिन् पुराणे वह्वीनाम् विद्यानाम् सन्निवेशत्वात् । यद्यपि सर्वेष्वेव पुराणेषु अनेकासाम् विद्यानाम् सन्निवेशो वर्तते, किन्त्वस्मिन् पुराणे तु विद्यानाम् समवाय एव विद्यते । अस्य पुराणस्य प्रथम एव श्लोको विद्यते—

'जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट् ।
तेने ब्रह्म हृदाय आदिकवये मुह्यन्ति यत् सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा,
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ।। इति ।

अस्यैवैकस्य श्लोकस्य अष्टोत्तरशतसंख्याकाः अर्थाः तु प्रकाशिता एव सन्ति, एकेनैव विदुषा कृता ।

अस्मिन् पुराणे सांख्यदर्शनस्य विशदं विवेचनम् कपिलोपाख्याने समुपलभ्यते । द्वादशस्कन्धेषु विततस्यास्य पुराणस्य सर्वे स्कन्धाः स्वविषयवैशिष्ट्यं विभ्रति । तत्र प्रथमस्कन्धे परीक्षितजन्मसम्बन्धिनी कथा विस्तारेण वर्णिता सति भगवद्विषयिणीं भक्ति परिपरोषयति । द्वितीयः स्कन्धोऽस्य पुराणस्य यद्यपि संक्षिप्ततमो वर्तते तथापि अत्र योगदर्शनस्य विषयाः विस्तरेण वर्णिताः सन्ति । तृतीयस्कन्धे धृतराष्ट्रपिदरयोः संवादः मैत्रेयोद्धवसंवादः कपिलोपाख्यानादिकाः विषयाः अतीव प्रसिद्धा वर्तन्ते । चतुर्थे स्कन्धे सर्गप्रतिसर्गयोः वर्णनम् वर्तते । अस्मिन्नेव स्कन्धे प्रख्यातम् ध्रुवोपाख्यानमपि वर्तते । अनेनोपाख्यानेन भगवद्भक्तौ निष्ठा सुस्थिरा भवति । यद्यपि ध्रुवस्यैव वंशे वेननामको राजा वभूव अथापि तस्य नास्तिकत्वात् ऋषय एव तस्य विनाश-

मकार्षुः । अस्य स्कन्धस्य पृथुचरितम् पुरञ्जनोपाख्यानञ्चातीव प्रसिद्धम् वर्तते । पुरञ्जनोपाख्याने इदम् निर्दिष्टं वर्तते यत् श्रीमद्भागवतस्य उपाख्यानानि प्रतीकात्मकानि सन्ति ।

पञ्चमस्कन्धः दण्डकानां कृते प्रख्यातो वर्तते । गद्यस्य प्रकृष्टतमं रूपमत्र समुपलभ्यते । अस्मिन् स्कन्धे जडभरतचरितस्य माध्यमेन ज्ञाननिष्ठानिष्ठितानाम् माहात्म्यं प्रकटितं वर्तते । ज्ञानीपुरुषः सर्वविधसङ्गरहितो भवेदिति जडभरतस्य चारित्र्येण ज्ञायते । अस्मिन्नेव स्कन्धे भवाटवीवर्णनम्, भरतवंशवर्णनम्, भूगोलवर्णनम्, खगोलवर्णनम्, नवद्वीपानां वर्णनम्, नरकादिगतीनां च वर्णनं समुपलभ्यते ।

षष्ठस्य स्कन्धस्यारम्भः अजामिलोपाख्यानेन भवति । अस्मिन्नेव स्कन्धे वृत्रवधस्य कथा, नारायणवर्मस्य च वर्णनम् वर्तते ।

सप्तमे स्कन्धे हिरण्यकशिपोर्वधः प्रह्लादस्य च कथा वर्तते । प्रह्लादः सर्वत्र भगवदात्मकताया दर्शनं चकार । तस्यैव प्रभावेण प्रह्लादस्य सर्वेऽन्तरायाः विनष्टा अभूवन् ।

अष्टमे स्कन्धे गजेन्द्रमोक्षवर्णनम् समुद्रमन्थनस्य च वर्णनम् वर्तते । उदधेराविर्भूतस्यामृतस्य विभागप्रसंगेन देवासुरसंग्रामवर्णनमप्यत्र कृतम् । पुनरत्र वलिराजस्य वर्णनम्, वामनावतारवर्णनम्, वलिवन्धस्य च वर्णनम् वर्तते ।

नवमे स्कन्धे सूर्यवंशस्य वर्णनम् सर्वप्रथमं कृतं वर्तते । महाभागवतस्य राज्ञोऽम्वरीपस्य कथाऽत्रैव समस्ति । भगीरथस्य कथा श्रीरामस्य च कथाऽत्राकर्षणमयी वर्तते । पुनश्चन्द्रवंशस्य कथाऽत्र वर्णिता ।

श्रीमद्भागवतस्य हृदयं वर्तते दशमः स्कन्धः । स्कन्धोऽयं पूर्वार्द्धोत्तरार्द्धयोः विभक्तो वर्तते । अस्मिन् स्कन्धे नवतिसंख्याका अध्यायाः सन्ति । अस्य स्कन्धस्य वेदस्तुतिः, ब्रह्मस्तुतिः, इन्द्रस्तुतिश्च काठिनस्य प्रतिमूर्तिभूता अध्यायाः सन्ति । किन्तु गोपीगीतम्, युगलगीतम् भमरगीतञ्चेमानि गीतानि माधुर्यस्य निदर्शनानि सन्ति। भगवतः श्रीकृष्णस्य मनोज्ञम् वालचरितम्, तेषां तेषां राक्षसानाञ्च वधः अस्य स्कन्धस्य मनोज्ञान्याकर्षणानि सन्ति ।

एकादशे स्कन्धे हंसोपदेशाः, अवधूतोपाख्यानम् ज्ञानयोगस्य निदर्शनभूते । अत्र वर्णाश्रमधर्मस्य वर्णनम्, ऐलगीतम्, सांख्ययोगवर्णनम्, परमार्थनिरूपणम्, यदुवंशस्य संहारवर्णनञ्च अस्य स्कन्धस्याकर्षणानि सन्ति ।

द्वादशः स्कन्धः पुराणस्योपसंहारभूतो वर्तते । अत्र कलियुगीयानां राज्ञां वर्णनम्, चतुर्विधप्रलयवर्णनम्, मार्कण्डेयमहर्षेः वर्णनम् वर्तते ।

पुराणस्यास्य नाम श्रीमद्भागवतम् वर्तते । अत एवास्मिन् पुराणे भागवतानां चरित्रस्यैव प्राधान्यम् वर्तते । अस्य पुराणस्य वक्ता महर्षिः शुकः भागवतेषु महत्तमो

वर्तते । श्रोऽप्यस्य पुराणस्य परीक्षितः भागवतेषु प्रधानो वर्तते । मध्ये मध्ये ध्रुवप्रह्लाद अम्बरीषादिकानाम् महाभागवतानां कथा निवद्धा वर्तते ।

इत्थं विषयाणां वैशिष्टचात्, तत्र तत्र कठिनानां सन्निवेशात् छन्दसां वैविध्याच्च भागवतं पुराणमिदं स्वेतराणि पुराणानि अतिशेते ।

श्रीमद्भागवतमहापुराणस्य वैशिष्टचादेवास्यानेके महान्तो व्याख्याकारा अभूवन् । तेषु सर्वेषु व्याख्याकारेषु श्रीधरस्वामिनो व्याख्यातीव प्रख्याता संक्षिप्तकलेवरा च वर्तते । अन्वितार्थप्रकाशिका व्याख्या सरला, सुवोधा सर्वजनगम्या च वर्तते । वल्लभाचार्यस्तु श्रीमद्भागवतम् महापुराणमेव स्वसिद्धान्तस्य प्रधानम् ग्रन्थं स्वीचकार । वल्लभाचार्यस्य सुवोधिनी व्याख्या विदुषां समाजे समादृता वर्तते । वीरराववीटीकारामानुजमतस्थानामनुसारेण कृता वर्तते । श्रूयते यत् भगवतो वादरायणस्य शिष्यः पुत्रश्च शुक्राचार्योऽप्यस्य पुरुपस्य कामपि शुकपक्षीयां व्याख्यामकरोत् । स्वामिनारायणसम्प्रदायानुयायिभिः विगतेष्वेव कतिपयेषु वर्षेषु द्वाविंशतिटीकाभिः सह श्रीमद्भागवतमहापुराणस्य प्रकाशनमकार्षुः गीताप्रेसतः अपि हिन्द्यनुवादेन साकं श्रीमद्भागवतमहापुराणस्य प्रकाशनमभूत् ।

लोकेऽपि यादृशः प्रचारः श्रीमद्भागवतपुराणस्य प्रचारो वर्तते तादृशः प्रचारः अन्यस्य कस्यचन पुराणस्य नहि दृश्यते । भगवताः मोक्षकामिनो जनाः श्रीमद्भागवतमहापुराणस्य सप्ताहश्रवणं कुर्वन्ति । अत एव श्रीमद्भागवतमहापुराणम् लोके प्रख्याततमं विद्वद्भिः संसेवितम् अष्टादशसहस्रश्लोकात्मकम् सर्वासाम् विद्यानामधिष्ठानम् भगवतः श्रीकृष्णस्य स्वरूपयाथात्म्यप्रवोधकम् शास्त्रम् विद्यते इति नास्ति तिरोहितं विपश्चिद पश्चिमेभ्यः ।

पुराणं पञ्चलक्षणम्

पुराणं दशलक्षणम्

पुराणसाहित्यम् संस्कृतवाङ्मयस्याद्भुतम् रत्नम् वर्तते, यत्र वर्णाश्रमर्माणाम् धर्माः, भारतीया संस्कृतिः मानवसामान्यस्य धर्मः, भारतीयमैतिह्यम्, विश्वस्य भूगोलम्, ब्रह्माण्डकोशः, साङ्ख्यदर्शनम्, योगदर्शनम्, जपतपनियमोपवासव्रततीर्थाटनादिकानाम् माहात्म्यम्, अत्र कल्याणकामिभिरनुष्ठेयाः निःश्रेयसावाप्तिसाधकतमाः कर्मयोग-ज्ञानयोग-भक्तियोगादिकाः, महतां राजवंश्यानां चरित्राणि, भुवो भारावताराय भगवता नारायणेन कृताः ते ते अवताराः, यन्त्रमन्त्रतन्त्रविद्याः, ज्योतिश्शास्त्रम् प्रभृतयो नैकविधाः विषयाः प्रकाशन्ते ।

तथाभूतस्य पुराणस्य साहित्यस्य वस्तुनिर्देशात्मकं लक्षणम् कुर्वता महर्षिणा पराशरेण विष्णुपुराणेऽभिहितम्—

'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम्' ॥

पुराणानां विषयाणां विस्तरेण वर्णनं कुर्वता भगवता वादरायणेनाभिहितम् श्रीमद्भागवतमहापुराणस्य द्वादशस्कन्धस्य सप्तमेऽध्याये—

पुराणलक्षणं ब्रह्मन् ब्रह्मर्षिभिर्निरूपितम् ।
शृणुष्व बुद्धिमाश्रित्य वेदशास्त्रानुसारतः ॥
सर्गोऽस्यार्थविसर्गश्च वृत्तीरक्षान्तराणि च ।
वंशो वंशानुचरितं संस्थां हेतुरपाश्रयः ॥
दशभिर्लक्षणैर्युक्तं पुराणं तद्विदो विदुः ।

एतेषां प्रत्येकेषाम् पुराणविषयाणां स्वयमेव व्याख्यां चकार भगवान् वादरायणः तत्रैव तत्र सर्गविषये प्राह—

'अव्याकृतगुणक्षोभान् महतस्त्रिवृतोऽहमः ।
भूतसूक्ष्मेन्द्रियार्थानो सम्भवः सर्ग उच्यते' ॥ इति ।

(श्री० भा० १२।७।११)

प्रलयावस्थायां सत्त्वरजस्तमसां साम्यावस्थारूपेण प्रकृतिस्तिष्ठति तदनन्तरं सम्प्राप्ते सर्गकाले तस्यां प्रकृतौ क्षोभो भवति तेन गुणाः विषमा भवन्ति । विषमावस्थायाः प्रकृतेः महान् उत्पद्यते तस्याः त्रिवृतस्याहङ्कारस्योत्पत्तिर्भवति । अहङ्कारस्य त्रिवृत्त्वं च तस्य सात्त्विकाहङ्कार-राजसाहङ्कार-तमसाहङ्काररूपेण त्रिप्रकारत्वात् । तस्मादहङ्कारशब्दादितन्मात्राणां भूतसूक्ष्माणाम् ज्ञानेन्द्रियाणां कर्मेन्द्रियाणाम् च तदर्थानां= स्थूलानां पृथिव्यादिमहाभूनामुत तद्देवतानां सम्भवश्च कारणसृष्टिः सर्ग उच्यते इत्यर्थः ।

विसर्गं निरूपयन् प्राह भागवतकारः—

'पुरुषानुगृहीतानामेतेषां वासनामयः ।
विसर्गोऽयं समाहारो वीजाद् वीजं चराचरम्' ॥ इति ।

(भा० १२।७।१२)

अयमर्थः—पुरुषेण = परमेश्वरेण, अनुगृहीतानामाहितसृष्टिसामर्थ्यानाम्, एतेषाम् = महदादीनाम्, पूर्वकर्मसदसद्वासनाप्रधानः, योऽयं समाहारः सङ्घातकार्यभूतः चराचरशरीरात्मकः समष्टिव्यष्टिजीवोपाधिरूपः वीजाद्वीजमिव प्रवाहापन्नः स विसर्ग इहोच्यते । ऊतयः कर्मं वासना इति लक्षिता या ऊतिः साऽत्र विसर्गेऽन्तर्भाविता ।

यत् क्वचन पालनशब्देनाभिहितम् तदेवात्र वृत्तिशब्देनोच्यते । तां वृत्तिं व्याचष्टे—

वृत्तिर्भूतानि भूतानां चराणामचराणि च ।
कृता स्वेन नृणां तत्र कामाच्चोदनयापि वा ॥
(भा० १२।७।१३)

चराणां भूतानां सामान्यतः अचराणि व्रीहिफलादीनि चकारात् चराणि गोमहिषवृषादीनि च जीविकासाधनं वृत्तिरित्युच्यते । तत्रापि नृणां स्वेन स्वभावेन कामात् तथा चोदनया शास्त्रविध्यनुसारेण वा कृता जीविका वृत्तिर्भवति। तेषां चराणामाश्रयः सर्वैव पृथ्वीति वृत्तिप्रसङ्ग एव भूगोलचक्रं पञ्चमस्कन्धे निरूपितम्। मन्वन्तरस्यैवापरं नाम रक्षान्तरम् । तस्य रक्षान्तरापरपर्यायस्य निरूपणं कुर्वता भगवता वादरायणेनाभिहितम्—

रक्षाच्युतावतारेहा विश्वस्यानुयुगे युगे ।
तिर्यङ्मर्त्यर्षिदेवेषु हन्यन्ते यैः त्रयीद्विषः ॥
मन्वन्तरं मनुर्देवाः मनुपुत्राः सुरेश्वरः ।
ऋषयोंऽशावतारश्च हरेः षड्विधमुच्यते ॥
(भा० १२।७।१४-१५)

अयमाशयः—युगे युगे तिर्यङ्मर्त्यर्षि देवेषु येऽच्युतावतारास्तेषां या ईहा लीला सा विश्वस्य रक्षोच्यते । यैरवतारैरिति उपसर्जनभूतस्याप्यवतारस्य परामर्शः प्रकरणबलात् त्रयीद्विषो वेदविरोधिन असुराः हन्यन्ते इति अतो दुष्टनिग्रहात् स्वभक्तरक्षणमेव रक्षेत्यर्थः। उपलक्षणमेतत् । अजामिलादीनामभक्तानाम् रक्षापि रक्षोच्यते । मनुरित्यादि षड्विधं मन्वन्तरमुच्यते। एते मन्वादयः षड्वर्गाः स्वस्वाधिकारे यदा प्रवर्तन्ते स कालः मन्वन्तरमित्युच्यत इत्यर्थः ।

वंशवंशानुचरितयोर्वर्णनं कुर्वन्नाह भगवान् वादरायणः—

'राज्ञां ब्रह्मप्रसूतानां वंशस्त्रैकालिकोऽन्वयः ।
वंश्यानुचरितं तेषां वृत्तं वंशधराश्च ये' ॥
(भा० १२।७।१६)

ब्रह्मणः सकाशात् प्रसूतिर्येषां तेषा शुद्धानां राज्ञां यस्त्रैकालिकोऽन्वयः स वंश इत्युच्यते। तेषां मध्ये ये वंशधराः राज्यवंशादिनिर्वाहकाः तेषां वृत्तं वंश्यानुचरितमुच्यते । एतद् द्वयमपि पूर्वमीशकथायामन्तर्भावितम् ।

'नैमित्तिकः प्राकृतिको नित्य आत्यन्तिको लयः ।
संस्थेति कविभिः प्रोक्ता चतुर्धाऽस्य स्वभावतः ॥'
(भा० १२।७।१७)

स्वभावतो मायातो निष्पन्नस्य कालकर्मगुणाधीनत्वात् अस्य विश्वस्य यो नैमित्तिकादि चतुष्प्रकारको लयः सः कविभिः संस्थेति प्रोक्तः ।

हेतुम् निरूपयन् भगवान् वादरायण आह—

‘हेतुर्जीवोऽस्य सर्गादेरविद्याकर्मकारकः ।
यं वानुशयिनं प्राहुरव्याकृतमुतापरे ॥’ (भा० १२।७।१८)

यः अविद्या मोहितः कर्मकारकः = कर्मकर्ता, तत्कर्मप्रयुक्तत्वात् स जीव एवास्य सर्गादेर्हेतुः । नन्वनुशयी निमित्तामिति केचित् । अव्याकृतमित्यपरे । तत्राह—कर्मकर्तृत्वादेव चैतन्यप्राधान्यविवक्षया यं जीवमनुशायिनमाहुः । अनुशयः = अभुक्तफलकर्मविशेषः तद्वाननुशायी । उत त्वर्थे । अपरे तु उपाधिप्राधान्यविवक्षया सृष्टेः पूर्वं नामरूपविशेषाकृतिरहितत्वात् यमव्याकृतमाहुः ।

अपाश्रयं निरूपयताऽऽचार्येण वादरायणेनाभिहितम्—

‘व्यतिरेकान्वयो यस्य जाग्रत्स्वप्नसुषुप्तिषु ।
मायामयेषु तद् ब्रह्म जीववृत्तिष्वपाश्रयः’ ॥ इति ।
(भा० १२।७।१९)

जाग्रदादिष्ववस्थासु जीवतया वर्तन्ते इति जीववृत्तयो विश्वतैजसप्राज्ञास्तेषु वृत्तिषु मायामायेषु अविद्याकल्पितेषु यस्य साक्षितया कारणतया चान्वयः समाध्यादौ च व्यतिरेकः तत् पृथक्तया स्वरूपेणावस्थानं च तद्ब्रह्म संसारप्रतीतिवाधयोरधिष्ठानमवधिभूतम् अपाश्रय उच्यते इत्यर्थः ।

श्रीमद्भागवते महापुराणे तु एतेषां समेषां पुराणलक्षणानां सत्तां समर्थयता वादरायणेनाभिहितम् श्रीमद्भागवतपुराणस्य द्वितीये स्कन्धे—

‘अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।
मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ॥ (भा० २।१०।१)
दशमस्य विशुद्ध्यर्थम् नवानामिह लक्षणम् ।
वर्णयन्ति महात्मानः श्रुतेनार्थेन चाञ्जसा’ ॥ (भा० २।१०।२)

एतेषां समेषां वर्णनमत्र अनेन प्रकारेण कृतं वर्तते—

भूतमात्रेन्द्रियधियां जन्मसर्ग उदाहृतः ।
ब्रह्मणो गुणवैषम्याद् विसर्गः पौरुषः स्मृतः ॥
स्थितिर्वैकुण्ठविजयः पोषणं तदनुग्रहः ।
मन्वन्तराणि सद्धर्म ऊतयः कर्मवासनाः ॥
अवतारानुचरितं हरेश्चास्यानुवर्तिनाम् ।
पुंसामीशकथाः प्रोक्ता नानाख्या नोपबृंहिताः ॥
निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ।
मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥
आभासश्च निरोधश्च यतश्चाध्यवसीयते ।
स आश्रयः परं ब्रह्म परमात्मेति शब्दते ॥ इति ।

॥ तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥

नास्ति सांख्यसमं ज्ञानम्

सांख्यतत्त्वविवेचनम्

'संख्या बुद्धिर्ज्ञानम्' इति कोशवाक्यानुसारेण संख्याशब्दो ज्ञानपरः। सङ्ख्यामधिकृत्य प्रवृत्तं शास्त्रं साङ्ख्यमित्यभिधीयते। अतएव साङ्ख्यशास्त्रस्यापरो पर्यायः ज्ञानशास्त्रं वर्तते। ज्ञानञ्च व्यक्ताव्यक्तज्ञानां विवेकस्वरूपम्। भेदपूर्वकं ज्ञानमेव विवेक इत्यभिधीयते।

सांख्याः हि समाम्नाशिषुः—

'दुःखत्रयाभिघाताज्जिज्ञासा तदभिघातके हेतौ।' अयमाशयो यत्—जननमरणपदजङ्घालाः जनिमन्तो जीवाः नूनम् आध्यात्मिकाधिभौतिकाधिदैविकाख्यैः दुःखैः अहर्निशं सन्तप्ताः भवन्ति। अतएवात्र जिज्ञासा भवति यत् यस्मात् कारणादिमानि दुःखानि आगन्तुकानि भवन्ति, तस्मादेव कारणादेतेषां विनाशो भवतीति निश्चितम्। आत्मनः प्रतिकूलत्वादेतेषां दुःखानां दूरीकरणमप्यनिवार्यं विद्यते अत एवैतेषां दुःखानां विनाशकानि कानि साधनानि सन्ति? यानीह साधनानि दुःखदूरीकरणस्य दृश्यते तानि द्विप्रकारकानि सन्ति—लौकिकानि वैदिकानि च। परन्तु लौकिकैः साधनैः दुःखानामत्यन्ताभावो नहि दृष्टः अतएव वैदिकेषूपायेषु जिज्ञासा जायते। यानि च वैदिकानि साधनानि यागादीनि शास्त्रैर्निर्दिष्टानि तेषामपि अविशुद्धिक्षयातिशययुक्तत्वात् तेष्वनैकान्तिकत्वबुद्धिर्जायते। तथा चोक्तमीश्वरकृष्णेन—

'दृष्टवदानुश्रविकः सो ह्यविशुद्धिक्षयातिशययुक्तः।' इति

अतएव—

'तद्विपरीतः श्रेयान् व्यक्ता व्यक्तज्ञविज्ञानात् ॥'

अयमाशयः—लौकिकालौकिकसाधनव्यतिरिक्तमेव व्यक्ताव्यक्तज्ञानां भेदपूर्वकज्ञानस्वरूपम् विज्ञानमेव कैवल्यावाप्तेः साधनमस्ति।

तानि च व्यक्ताव्यक्तज्ञख्यानि तत्त्वानि कानि सन्तीत्यभिकांक्षायामाह ईश्वरकृष्णः—

'मूलप्रकृतिरविकृतिः प्रकृतिविकृतयः सप्त।
षोडषकश्च विकारः न प्रकृतिर्न विकृतिः पुरुषः ॥' इति।

अयमाशयः—अस्यजगतः मूलभूता प्रकृतिः स्वेतरव्यतिरिक्तानां समेषां तत्त्वानां प्रकृतिः उपादानकारणं वर्तते। तस्याः सर्वेषां कारणत्वात् कस्यचनापि तत्त्वस्य कार्याभावात् तस्याः प्रकृतित्वम्। प्राकृतिकतत्त्वेषु सप्त तत्त्वानि महदहङ्कार-

पञ्चतन्मात्राख्यानि प्रकृतिविकृतिभूतानि सन्ति । अयमाशयो यत् इमानि सप्त तत्त्वानि प्रकृतेस्तत्कार्यभूतानि किञ्च अहङ्कारस्य कारणम् महत्तत्त्वं वर्तते । अहङ्कारश्च पञ्चतन्मात्राणां कारणम्, पञ्चतन्मात्राणि च पञ्चमहाभूतानां कारणानीति एतेषां सप्तानां प्रकृतिविकृतित्वम् कारणत्वं कार्यत्वञ्चोभयविधधर्मवत्त्वम् पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्चमहाभूतानि मनश्चेति षोडश सङ्ख्याकानि कार्यभूतानि एव सन्ति, एतेषां समेषां तत्त्वान्तरस्यानुत्पादकत्वात् नहि कारणत्वं सेद्धुमर्हति । इत्थं चतुर्विंशतितत्त्वात्मिका व्यक्ताव्यक्तस्वरूपा प्रकृतिः सिद्ध्यति ।

एतेभ्यश्चतुर्विंशतितत्त्वेभ्यो भिन्नं पञ्चविंशतितमं तत्त्वम् पुरुषतत्त्वम विद्यते । तस्य स्वरूपं निरूपयन् साङ्ख्यकारिकाकारः ईश्वरकृष्णः प्राह—'न प्रकृतिर्न विकृतिः पुरुषः ।' अयमाशयो यत् पुरुषो न तु कस्यचन कार्यं विद्यते न वा कस्यचन तत्त्वस्य कारणम् । इत्थम् पञ्चविंशतिसङ्ख्यानां तत्त्वानां ज्ञानम् आवश्यकं भवति साङ्ख्यसिद्धान्तानुसारेण । उक्तञ्चापि साङ्ख्यैः—

'पञ्चविंशतितत्त्वज्ञः यत्र कुत्राश्रमे वसन् ।
जटी मुण्डी शिखी वापि मुच्यते नात्र संशयः' ॥ इति ।

साङ्ख्यदर्शनानुसारेण प्रकृतिरेव सृष्टेरुपादानम् । प्रकृतिश्च गुणानां साम्यावस्था । यदा प्रकृते पुरुषेण संयोगो भवति तदा तस्यां प्रकृतौ क्षोभो जायते तेन प्रवर्तते सृष्टिः । अस्य सृष्टेः उपक्रमविषये ईश्वरकृष्णः प्राह—

पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।
पङ्ग्वन्धवदुभयोरपि संयोगः तत्कृतः सर्गः ॥

अत्र सृष्टेः प्रयोजनद्वयमभिहितम् । पुरुषस्य प्रकृतेः स्वरूपदर्शनम्, कैवल्यस्य प्राप्तिश्च । यदा व्यक्ताव्यक्तज्ञानां ज्ञानसम्पन्नः पुरुषः प्रकृतेः स्वरूपम् ज्ञात्वा एवम् प्रकृतेः पृथक् जानाति तदा प्रकृतिः तस्मान्निवर्तते कदापि पुनस्तं पुरुषं नह्याश्रयति, इति जायते पुरुषस्य कैवल्यसिद्धिः । कैवल्यसिद्धिरेव परमं प्रयोजनम् पुरुषः ।

प्रकृतिपुरुषयोः संयोगविषये ईश्वरकृष्णः प्राह—'पङ्ग्वन्धनन्ददुभयोरपि संयोगः' । येन प्रकारेण दृक्शक्तिविकलस्यान्धस्य, गमनशक्तिविकलेन पङ्गुना साकं संयोगे अदृष्टवशात् जाते सत्युभावेव लक्ष्यं प्राप्नुतः तेनैव प्रकारेण जडायाः प्रकृतेः निर्विकारेण पुरुषेण साकं संयोगे जाते प्रवर्तते सृष्टिः ।

सृष्टिक्रमं निरूपयतेश्वरकृष्णेनाभिहितम्—

'प्रकृतेर्महांस्ततोऽहङ्कारस्तस्माद् गणश्च षोडशकः ।
तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि' ॥

अयमर्थः—प्रकृतेर्महान् जायते, महतोऽहङ्कार उत्पद्यते, अहङ्कारादेव पञ्च-

तन्मात्राणाम्, पञ्चज्ञानेन्द्रियाणां पञ्चकर्मेन्द्रियाणाम्, मनसश्चोत्पत्तिर्भवति । पञ्चतन्मात्राणि च रूपरसगन्धस्पर्शशब्दतन्मात्राख्यानि सन्ति । चक्षुस्त्वक्‌रसनाश्रोत्रघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि । वाक्पाणिपादपायूस्थाख्यानि सन्ति पञ्चकर्मेन्द्रियाणि । तत्र पञ्चभ्यस्तन्मात्रेभ्यः पृथिव्यप्तेजोवाय्वाकाशाख्यानि वञ्चमहाभूतानि जायन्ते ।

साङ्ख्याः कार्यकारणभावविषये सत्कार्यवादिन सन्तिः । एतेषां मतानुसारेण कार्यं कारणे पूर्वत एव विद्यमानं भवति, सामग्रीसाह्येन तेषामभिव्यक्तिर्जायते । सत्कार्यवादस्वीकारे पञ्चानां हेतूनामुपन्यासं कुर्वन् साङ्ख्यकारिकाकारः प्राह—

'असदकरणात् उपादानग्रहणात् सर्वसम्भवाभावात् ।
शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम्' ।। इति ।

अयमाशयो यत् सत्कार्यवादस्य स्वीकारे इमे पञ्च हेतवः सन्ति—(१) असदकरणात्—महता शिल्पिना अपि असद् वस्तु सत् कर्तुं न शक्यते । यथा मृत्पिण्डे असद् वस्त्रं साधनसहस्रं समवाप्यापि प्रख्याततमः कुलालः मृत्पिण्डात् वस्त्रं निर्मातुं न क्षमो भवति । मृत्पिण्डेऽव्यक्तरूपेण घटमणिकशरावादिका भवन्ति, अतएव मृत्पिण्डेन ते क्रियन्ते । (२) उपादानग्रहणात्—यस्य कार्यस्य यद् वस्तु उपादानकारणं भवति तदेव वस्तु तत्कार्यकरणायोपादीयते । यथा घटकरणाय कुलालः घटस्योपादानम् मृत्पिण्डमेव गृह्णाति न तु तन्तून् । (३) सर्वसम्भवाभावात्—नहि सर्वस्मात् सर्वम् उत्पद्यते, यतः अतएवापि ज्ञायते यत् कारणे कार्यं सद्भवति । न तु कारणेऽसत् वहतु क्रियते कारणकलापेन । (४) शक्तस्य शक्यकरणात्—समर्थादेव कारणात् तद्विधस्य कार्यस्योपलब्धिर्भवति यस्मात् तस्मात् कारणे सद्भवति । (५) कारणभावाच्च सत्कार्यम्—वस्तुतः कारणकार्ययोः वस्तुतो नहि भवति तात्त्विको भेदः । उभयोः द्रव्यस्यैक्यात् वस्तुनो नामरूपविभागानर्हावस्थैव कारणत्वेन भवति व्यपदिष्टा तस्य नामरूपविभागार्हावस्था च भवति कार्यत्वेन व्यपदिष्टा । यथा—नामरूपविभागानर्हमेव मृद्द्रव्यम् मृत्पिण्डमित्यभिधीयते, नामरूपविभागार्हं च मृद्द्रव्यम् घटशब्देन व्यपदिश्यते ।

एभि पञ्चभिः कारणै सत्कार्यवादः युक्तियुक्तः प्रतीयते ।

साङ्ख्यानां प्रकृतिश्च गुणत्रयस्य साम्यावस्थैवाभिधीयते । ते च गुणाः सत्त्वरजस्तमोऽभिधानाः सन्ति ।

एतेषां त्रयाणां गुणाणां स्वरूपं निरूपयतेश्वर कृष्णेनाभिहितम्—

'सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।
गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ।।' इति ।

सांख्याः स्वसाध्यसाधनसाधकतमत्वेन प्रमाणत्रयं स्वीकुर्वन्ति, तानि च प्रमाणानि प्रत्यक्षानुमानाप्ताख्यानि सन्ति । उक्तञ्चापि ईश्वरकृष्णेन—

प्रतिविषयाध्यवसायो दृष्टम् त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्गलिङ्गिपूर्वकम् आप्तश्रुतिराप्तवचनं तु ॥

इन्द्रियार्थसन्निकर्षजन्यं प्रत्यक्षज्ञानं द्विप्रकारकं भवति—निर्विकल्पकं सविकल्पकं च । अनुमानं तु लिङ्गपरामर्शजन्यं ज्ञानम् भवति । तच्च द्विविधम्—वीतमवीतञ्च । अन्वयमुखेन जायमानं वीतम् द्विप्रकारकं भवति, पूर्ववत् सामान्यतोदृष्टञ्च । व्यतिरेकमुखेन जायमानं ज्ञानमवीतम् भवति । आप्तवचनमेव शब्दप्रमाणमित्यभिधीयते ।

साङ्ख्यानाम् पुरुषः चेतनः, त्रिगुणातीतः, विवेकी, विषयी चैतन्यस्वरूपश्च वर्तते । सांख्यमते पुरुषवहुत्वं स्वीक्रियते । पुरुषवहुत्वं साधयन् ईश्वरकृष्णः प्राह—

जननमरणकरणानां प्रतिदियमादयुगपत् प्रवृत्तेश्च ।
पुरुषवहुत्वं सिद्धम् त्रैगुण्यविपर्यया च्चैव ॥' इति ।

यद्यपि श्रीमद्भागवतादि पुरुषेषु कपिलादिउपाख्यानेषु सेश्वरसाङ्ख्यमुपवृंहितम् किन्तु ईश्वरकृष्णः साङ्ख्यदर्शने ईश्वरस्य सत्ता स्वीकरणमनावश्यकं मनुते । अतएव साङ्ख्यानुसारेण ईश्वरो नास्त्येव ।

सर्वेषां दर्शनानां प्रवृत्तिः अपवर्गावाप्तये भवति, साङ्ख्यदर्शने अपवर्गः कैवल्यशब्देनाभिधीयते । कैवल्यावाप्तये एव व्यक्ता व्यक्तज्ञानानाम् ज्ञानमावश्यकम् भवति ।

योगान्नास्ति परं वलम्

योगदर्शनस्य तत्त्वनिरूपणम्

योगेन चित्तशोधनम्

योगदर्शनस्य प्रथमोपदेष्टरूपेण हिरण्यगर्भो ब्रह्मा श्रूयते । परन्तु साम्प्रतम् हिरण्यगर्भोपदिष्टः योगः नहि समुपलभ्यते । साम्प्रतम् यस्य योगदर्शनस्योपलब्धिर्भवति तद्योगदर्शनम् महर्षिपतञ्जलिकृतमेव वर्तते । ग्रन्थोऽयं चतुर्षु पादेषु विभक्तो वर्तते । समाधि–साधन–विभूतिकैवल्याख्या इमे चत्वारः पादाः सन्ति ।

योगस्य स्वरूपं निरूपयता महर्षिणा पतञ्जलिना सूत्रितम्—'योगश्चित्तवृत्तिनिरोधः ।' इति सूत्रस्य व्यासभाष्ये अभिहितम्—

'योगः समाधिः । स च सार्वभौमश्चित्तस्य धर्मः ।' यस्य चित्तस्य वृत्तीनां निरोधः योगेन द्वारा क्रियते तस्य चित्तस्य पञ्च अवस्थाः भवन्ति । इमा अवस्था एव चित्तभूमिशब्देनाभिधीयन्ते । चित्तभूमीनां नामानि सन्ति क्षिप्तमूढ-विक्षिप्त-एकाग्र-निरुद्धाख्यानि । तथा चोक्तम् व्यासभाष्यकारेण—'क्षिप्तं मूढं विक्षिप्तमेकाग्रं निरुद्धमिति चित्तभूमयः ।' तत्र विक्षिप्ते चेतसि विक्षेपोपसर्जनीभूतः समाधिर्न योगपक्षे वर्तते । यस्त्वेकाग्रे चेतसि सद्भूतमर्थं प्रद्योतयते । क्षिणोति च क्लेशान् कर्मवन्धनानि श्लथयति निरोध-

मभिमुखं करोति स सम्प्रज्ञातो योग इत्याख्यायते ॥ स च वितर्कानुगतः विचारानुगतः आनन्दानुगतः अस्मितानुगतः । सर्ववृत्तिनिरोधे त्वसम्प्रज्ञातः समाधिः ।" इति ।

वृत्तीनां निरूपणं कुर्वन् योगसूत्रकार आह--

'वृत्तयः पञ्चतय्यः क्लिष्टाक्लिष्टाः ॥' (यो० १।५)
'प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः ।' इति ।

अयमाशयो यत् पञ्चसङ्ख्याताः चित्तवृत्तयः भवन्ति । ताः सर्वा एव वृत्तयः द्विविधा भवन्ति—क्लिष्टा अक्लिष्टाश्च । तत्र—'क्लेशहेतुकाः कर्माशयप्रचये क्षेत्रीभूताः क्लिष्टाः । गुणाधिकारविरोधिन्योऽक्लिष्टाः' इत्याह क्लिष्टत्वाक्लिष्टत्वविवरणे व्यासभाष्यकारः ।

प्रमाणान्यत्र दर्शने प्रत्यक्षानुमानागमाख्यानि स्वीक्रियन्ते । तथा चोक्तम् सूत्रे—'प्रत्यक्षानुमानागमाः प्रमाणानि' (१।७) 'विपर्ययो मिथ्याज्ञानम् तद्रूपप्रतिष्ठितम् ।' (१।८) निरूपणे विकल्पनिद्रास्मृतीनां निम्नप्रकारेण सूत्रितवान् महर्षिः पतञ्जलिः—

'शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः । (१।९) अभावप्रत्ययालम्बनावृत्तिर्निद्रा । (१।१०) अनुभूतविषयासम्प्रमोषः स्मृतिः' । (१।११) इति ।

इमा वृत्तय एव कार्याणि समुत्पाद्य संस्काररूपेण मानवानां हृदयेषु निवसन्ति । समयानुसारेण सादृश्यादिमहिम्ना उद्बुद्धा इमे संस्कार एव पुनर्वृत्तिरूपेण परिणता भवन्ति । आसां वृत्तीनां निरोधेन तत्त्वज्ञानमुत्पद्यते दुःखानामत्यन्ताभावश्च सम्पद्यते । अत एव एतासां वृत्तीनां निरोधः कर्तव्यः ।

वृत्तिनिरोधेरुपायः—वृत्तीनां निरोधश्चाभ्यासवैराग्याभ्यां सम्पद्यते । तथा चोक्तं व्यासभाष्यकारेण—

'चित्तनदी नामोभयतो वाहिनी, वहति कल्याणाय वहति शापाय च । या तु कैवल्यप्राग्भारा विवेकविषयनिम्ना साकल्याणवहा । संसारप्राग्भाराऽविवेकविषयनिम्ना पापवहा । तत्र वैराग्येण विषयस्रोतः खिलीक्रियते । विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घाटय इत्युभयाधीनश्चित्तवृत्तिनिरोधः ।' इति । (व्यासभाष्यम् १।१२)

अभ्यासवैराग्ययोः स्वरूपनिरूपणेऽभिहितम्—'तत्र स्थितौ यत्नोऽभ्यासः ।' 'स तु दीर्घकाल नैरन्तर्यसत्कारसेवितो दृढभूमिः ।' दृष्टानुश्रविकविषयवितृष्णस्य वशीकारसंज्ञावैराग्यम् ।' इति ।

'योगः समाधिः' इति व्यासभाष्यकारेणाभिहितम् । सोऽयं समाधिः द्विप्रकारको भवति—सम्प्रज्ञातः असम्प्रज्ञातश्च । अनयोः समाध्योः विषये व्यासभाष्यकारः

प्राह—'सर्ववृत्तिप्रत्यस्तमये संस्कारशेषो निरोधश्चित्तस्य समाधिरसम्प्रज्ञातः । तस्य परं वैराग्यमुपायः । सालम्बनोऽभ्यासस्तत्साधनाय कल्पते इति विरामप्रत्ययो निर्वस्तुक आलम्वनीक्रियते च चार्थशून्यः । तदभ्यासपूर्वकं हि चित्तम् निरालम्वनमभावप्राप्तमिव भवतीत्येषः निर्वीजः समाधिः । स खल्वयं द्विविधः उपायप्रत्ययो भवप्रत्ययश्च । तत्रोपायप्रत्ययो योगिनां भवति, भवप्रत्ययश्च विदेहप्रकृतिलयानाम् ।

तत्रोपायप्रत्यये प्रज्ञायाः उदयेनाविद्यायाः नाशो भवति भवप्रत्यये चाज्ञानोदयाभावादविद्यावशिष्यत एव । सोऽयं समाधिः तीव्रसंवेगादासन्नो भवति ईश्वरप्राणिधानात् वा ।

अस्मिन् योगदर्शने 'ईश्वरः स्वीक्रियते । तस्य स्वरूपविषये अभिहितम्—'क्लेशकर्म विपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः । (१।२४) सः सर्वज्ञो भवति । किञ्च सः अनादिनिधनत्वात् पूर्वेषामपि गुरुः' ।

समाधेः विघ्नानां वर्णनप्रसङ्गे प्राह महर्षिः पतञ्जलिः—'व्याधिस्त्यान-संशय-प्रमादालस्य-अविरति-भ्रान्ति-दर्शन-अलब्धभूमिकत्व-अनवस्थितत्वानि चित्त-विक्षेपास्ते अन्तरायाः । (१।३०) किञ्च 'दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेप सहभुवः' । (१।३१) इति ।

चित्तप्रसन्नतायाः उपायविषयेऽभिहितम् सूत्रकारेण— मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ।' इति ।

अविद्याच्छन्ने चेतसि मिथ्याज्ञानोत्पत्तेः भ्रान्तिर्भवति । मिथ्याज्ञानहेतोरेव अविद्यास्मितारागद्वेषाभिनिवेशभेदभिन्नाः पञ्च क्लेशा जायन्ते । एतेभ्यः क्लेशेभ्यो मुक्तये अष्टाङ्गयोगस्याभ्यासोऽनिवार्यो भवति। योगस्याष्टौ अङ्गानि च—यमनियमासनप्राणायाम-प्रत्याहारधारणाध्यानसमाधिख्यानि सन्ति । एतेषु अष्टसु धारणाध्यानसमाधीनां समुदितं नाम संयमो विद्यते । संयमे संजाते प्रज्ञाया उदयो भवति। एकस्यां भूमावधिकृतायामेवान्यस्यां भूमौ संयमस्योपयोगो भवति । योगस्य चतस्रः भूमयस्सन्ति । तासां भेदादेव योगिनामपि चत्वारो भेदाः भवन्ति । ते च सन्ति योगिनः—(१) प्रथमकल्पिको योगी—अष्टाङ्गयोगाभ्यासरतस्य यस्य योगिनः अतीन्द्रियं ज्ञानं समाध्यभिमुखमात्रं जातं स योगी प्रथमकल्पिक इति कथ्यते । (२) मधुभूमिको योगी—निर्विचारसमाधिस्थस्य प्रज्ञा ऋतम्भरा भवति । इयमवस्था योगस्य निश्चितसाधनस्वरूपा भवति । अतएव ऋतम्भरेत्यभिधीयते । सः भूतेन्द्रियाणां वशित्वं चिकीर्षति । एतादृश एव योगी मधुभूमिकः कथ्यते । (३) प्रज्ञाज्योतिर्योगी—अस्यां भूमौ योगी भूतेन्द्रियाण्यधिकरोति परचित्तं वेत्ति च । सः विशोकादिसाधनादारभ्यासम्प्रज्ञातसमाधिं प्राप्तुमिच्छति । इयं प्रज्ञाज्योतिः तृतीया भूमिर्वर्तते । (४) अतिक्रान्तभावनीयो योगी—अस्य योगिनः चित्तलय एव लक्ष्यं भवति । अयं योगी सप्तविधां प्रान्तभूमिप्रज्ञां लभते ।

तासां सप्तविधानां प्रान्तभूमिप्रज्ञानां स्वरूपं योगदर्शनस्य व्यासभाष्ये इत्थम् निरूपितम्—

(१) परिज्ञातं हेयं नास्य पुनः परिज्ञेयमस्ति । (२) क्षीणा हेयहेतवो न पुनरेतेषां क्षेतव्यमस्ति । (३) साक्षात्कृतं निरोध समाधिना हानम् । (४) भावितो विवेकख्यातिरूपो हानोपायः इति । एषा चतुष्टयी कार्या विमुक्तिः प्रज्ञायाः ।

चित्तविमुक्तिस्तु त्रयी (५) चरिताधिकारा बुद्धिः । (६) गुणगिरिशिखरतटच्युता इव ग्रावाणो निरवस्थानाः स्वकारणे प्रलयाभिमुखाः सह तेनास्तं गच्छन्ति । न चैषां प्रविलीनानां पुनरस्त्युत्पादः प्रयोजनाभावादिति । (७) एतस्यामवस्थायां गुणसम्बन्धातीतः स्वरूपमात्रज्योतिरमलः केवली पुरुष इति ।

चित्तवृत्तेर्निरोध एव योग इत्यभिधीयते । चित्तं हि त्रिगुणात्मकम् परिणामि च भवन्ति । तस्मिन् सदा विकारो भवति । चित्तस्यावस्थाद्वयी भवति । (१) कार्यावस्था—अस्यामवस्थायां चित्तं सर्वदा क्रियाशीलं भवति । इयमेवावस्था संसारावस्थेति कथ्यते । योगदर्शने इयमेवावस्था व्युत्थानावस्थेति कथ्यते । (२) निरोधावस्था—अस्यामवस्थायां चित्तस्य सर्वावृत्तयो निरुद्धा भवन्ति ।

अस्य चित्तस्य परिणामो षोढा भवति ।

(१) निरोधपरिणामः—इमं परिणामं निरूपयन् सूत्रकारः प्राह—व्युत्थाननिरोधसंस्कारयोरभिभवप्रादुर्भावौ निरोधक्षणचित्तान्वयो निरोधपरिणामः । (यो० सू० ३।९) अत्र व्यासभाष्यकारः प्राह—व्युत्थानसंस्काराश्चित्तधर्मा न ते प्रत्ययात्मका इति प्रत्ययनिरोधे न निरुद्धाः । निरोधसंस्कारा अपि चित्तधर्माः तयोरभिभवप्रादुर्भावौ । व्युत्थानसंस्कारा हीयन्ते निरोधसंस्काराः आधीयन्ते । निरोधलक्षं चित्तमन्वेति । तदेकस्य चित्तस्य प्रतिक्षणमिदं संस्कारान्यथात्वं निरोधपरिणामः ।

(२) समाधिपरिणामः—सर्वार्थतैकाग्रतयोः क्षयोदयौ चित्तस्य समाधिपरिणामः। सर्वार्थता चित्तधर्म एकाग्रताऽपि चित्तधर्म । सर्वार्थतायाः तिरोभावः एकाग्रतायाः आविर्भावः। तयोः धर्मित्वेनानुगतं चित्तम् । तस्मिन् चित्तमपायोपजनयोः स्वात्मभूतयोर्धर्मयोरनुगतं समाधीयते स चित्तस्य समाधिपरिणामः ।

(३) एकाग्रतापरिणामः—ततः पुनः शान्तोदितौ तुल्यप्रत्ययौ चित्तस्यैकाग्रता परिणामः । अयमाशयः—समाहितस्य पूर्वप्रत्यये नष्टे तदुत्तरकाले तत्सदृशप्रत्ययः उत्पद्यते । एतादृशः चित्तस्य जायमानः तदात्वे परिणाम एकाग्रतापरिणामः कथ्यते ।

(४) धर्मपरिणामः—व्युत्थाननिरोधयोः धर्मयोः अभिभवप्रादुर्भावौ धर्मिणि धर्मपरिणामः ।

(५) लक्षणपरिणामः—अत्र लक्षणशब्दः कालपरः। धर्माणाम् कालत्रयरूपेण भवनमेव लक्षणपरिणामः।

(६) अवस्थापरिणामः—निरोधकाले व्युत्थानसंस्काराः दुर्बलाः भवन्ति निरोधसंस्काराः सबलाः भवन्तीति निरोधे अभिहितम्। इदं दुर्बल-सबलभवनमेवावस्थापरिणामः अभिधीयते।

कैवल्यविचारः—ईश्वरप्रणिधानात् स्वाध्यायाच्च क्लेशानां नाशो भवति, समाध्यनुकूला भावना च भवति। अस्मिन् काले अष्टाङ्गयोगस्याभ्यासं करोति साधकः। अनेनाभ्यासेन चित्तम् स्थिरं भवति। क्रमशः सम्प्रज्ञातासम्प्रज्ञातौ समाधी भवतः।

वैराग्येण तु तृष्णा विनश्यन्ति किन्तु सिद्धय उत्पद्यन्ते। एतासु सिद्धिष्वपि योगिना निःस्पृहेण भाव्यम्। विवेकज्ञानस्यापि सत्त्वगुणस्य धर्मत्वात् तस्य त्यागोऽनिवार्यो भवति। क्लेशेषु विनष्टेषु सर्वेषां लये जाते दुःखैर्विमुक्तो मानवः गुणैर्वियुज्यते इदमेव कैवल्यमित्यभिधीयते। इयमेव योगदर्शनस्य मुक्तिः। तथा चोक्तम् महर्षिणा पतञ्जलिना–सत्त्वपुरुषयोः शुद्धिसाम्ये कैवल्यमिति।

कर्मविचारः—योगदर्शनानुसारेण कर्माणि चतुष्प्रकारकाणि भवन्ति—कृष्णम्, शुक्लकृष्णम्, शुक्लम्, अशुक्लकृष्णञ्च। दुर्जनानां कर्माणि कृष्णानि भवन्ति। बाह्यसाधनजन्यानि शुक्लकृष्णानि, तपस्यास्वाध्यायादिनिरतानां कर्माणि शुक्लानि भवन्ति। फलाभिसन्धिरहितानां योगिनां कर्माणि अशुक्लाकृष्णानि भवन्ति।

जीवः स्वकर्मानुसारेण वासनावशात् तासु तासु योनिषु याति। इमाः वासनाः हेतुफलाश्रयालम्बनसंस्कारैः स्थिराः भवन्ति। आभिः वासनाभिः प्रेरित एव जीवः तासु तासु योनिषु याति। अस्य संसारचक्रस्य प्रहाणायैव प्रवर्तते—योगदर्शनम्। तदर्थञ्चाष्टाङ्गयोगाभ्यासमुपदिशति। इत्थं योगदर्शनस्यापि चरमं लक्ष्यम् मुक्तिप्राप्तिरेव।

सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः

एकं सांख्यं च योगं च पश्यति स पश्यति।
सांख्ययोगयोः साम्यनिरूपणम्।

यद्यपि साङ्ख्ययोगयोः आचार्यौ पृथक्-पृथग्वर्तेते साङ्ख्यशास्त्रस्याचार्यः कपिलो वर्तते, योगशास्त्रस्य चाचार्यो वर्तते पतञ्जलिः; तथापि द्वयोः शास्त्रयोः अनेकविधं साम्यं वर्तते। उभयोरेव शास्त्रयोरुद्देश्यम् एकम् वर्तते। उभयो शास्त्रयोः पद्धतिरेका वर्तते। साङ्ख्यशास्त्रम् ज्ञानयोगस्य महत्त्वं प्रतिपादयति। साङ्ख्यशास्त्रानुसारेण अनुदिनं जायमानस्य त्रिविधस्य दुःखस्यैकान्तिकात्यन्तिकविनाशाय

प्रकृति-प्राकृत-पुरुषाणां ज्ञानमनिवार्यं मनुते । तथा चोक्तम् साङ्ख्यकारिकाकारेणेश्वरकृष्णेन—

दृष्टवदानुश्रविकः स चाविशुद्धिक्षयातिशययुक्तः ।
तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥

योगमतानुयायिनः कर्मयोगस्य महत्त्वं प्रतिपादयन्ति । अतएव भगवता गीतायाम् कर्मयोगस्य महत्त्वं प्रतिपादयताऽभिहितम्—

'कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि ॥'

इमानि च कर्माणि फलाभिसन्धिरहिततया कर्तव्यानि भवन्ति । अतएव ज्ञानयोगमिश्रितानि कर्माण्येव निःश्रेयसप्रदानि भवन्ति । तथा चोक्तम् भगवता—

'सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥'

यस्मात् कारणात् साङ्ख्ययोगयोरुभयोरेव शास्त्रयोः लक्ष्यम् कैवल्यापरपर्यायभूतस्य मोक्षस्याधिगमो वर्तते, उभेऽपि शास्त्रे संसारप्रहाणस्य साधनानि स्व-स्वपद्धत्या उपदिशतः तस्मादेव कारणात् श्रीकृष्णः उभयोरपि शास्त्रयोरैक्यं प्रतिपादयन् वक्ति—

'सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥'

अयमाशयो यत् वस्तुतः साङ्ख्ययोगावुभे अपि शास्त्रे उद्देश्यादिदृष्ट्या परस्परं न विद्यते तयोरैक्यमेव पारमार्थिकम् । अतएव तयोरेकत्वनिश्चायकः एव पुरुषः उभयोरपि शास्त्रयोः सम्यक्तया फलमाप्नोति ।

तत्त्वविषयकमपि साम्यमुभयोरपि शास्त्रयोः विद्यते । तथाहि—त्रीणि प्रमाणानि स्वीकुर्वन्ति प्रत्यक्षानुमानागमाख्याः । तथा चोक्तम् ईश्वरकृष्णेन—

'प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।
तल्लिङ्गलिङ्गिपूर्वकम् आप्तश्रुतिराप्तवचनम् ॥' इति ।

प्रमाणानाम् विषये महर्षिणा पतञ्जलिनाऽपि सूत्रितम्—प्रत्यक्षानुमानागमाः प्रमाणानि । (१।७ यो० द०) इति ।

साङ्ख्याः प्रकृतिमेव मूलतत्त्वम् स्वीकुर्वन्ति । प्रकृत्यैव प्रवर्तते सर्गः । सा च प्रकृतिः त्रिगुणात्मिका वर्तते । ते च गुणाः सत्त्व–रजस्–तमोगुणाः सन्ति । प्रकृतेर्महान् जायते । महतोऽहङ्कारः । तस्मात् पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चतन्मात्राणि, मनः इति षोडश पदार्थाः जायन्ते । पञ्चतन्मात्रेभ्यः पञ्चमहा-

भूतानि जायन्ते। इत्थं चतुर्विंशतितत्त्वात्मिका प्रकृतिः जायते । पञ्चविंशतितमं तत्त्वं पुरुषो वर्तते ।

योगिनः अपि चतुर्विंशतित्त्वात्मिकाम् प्रकृतिं स्वीकुर्वन्ति । तथाहि—'प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ।' अस्मिन् सूत्रे सत्त्वरजस्तमसां त्रयाणां गुणानाम्, एकादशेन्द्रियाणाम् पञ्चमहाभूतानां वर्णनं वर्तते । इमानि सर्वाणि साङ्ख्याभिमतानि सन्ति ।

'विशेषाविशेषलिङ्गमात्रालिङ्गानि गुणपर्वाणि । (यो० द० २।१९)

पृथिव्यप्तेजोवाय्वाकाशाख्यानं पञ्चमहाभूतानां, रूपरसगन्धस्पर्शशब्दाख्यानां पञ्चतन्मात्राणां श्रोत्रत्वक्चक्षुजिह्वाघ्राणाख्यानां ज्ञानेन्द्रियाणां, वाक्पाणिपादपायूपस्थाख्यानां कर्मेन्द्रियाणां च वर्णनम् अस्य सूत्रस्य व्यासभाष्ये स्पष्टरूपेण समुपलभ्यते ।

सांख्याः पुरुषम् सर्वविशेषणरहितम् स्वीकुर्वन्ति । योगिनः अपि पुरुषम् तथैव स्वीकुर्वन्ति । तथा च योगसूत्रम्—'द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ।' (यो० सू० २।२०) अस्मिन् सूत्रे द्रष्टा ज्ञानस्वरूपः प्रोक्तः । तथा चात्र व्यासभाष्यम्—

'दृशिमात्रः इति दृक्शक्तिरेव विशेषणापरामृष्टेरित्यर्थः । स पुरुषो बुद्धेः प्रति संवेदी । स बुद्धेर्न सरूपो नात्यन्तं विरूपः इति ।'

पुरुषस्य भोक्तृत्वं प्रकृतेश्च भोग्यत्वं प्रतिपादयता महर्षिणा पतञ्जलिनाऽभिहितम्—'तदर्थ एव दृश्यस्यात्मा ।' (यो० द० २।२१) सांख्याः प्रकृतिपुरुषयोः संयोगेनैव सृष्टिं स्वीकुर्वन्ति, अनेनैव प्रकारेण योगिनोऽपि स्वीकुर्वन्ति यत् अविद्यैव प्रकृतिपुरुषयोरभेदस्य कारणतां भजते । तथा च सूत्रम्—'तस्य हेतुरविद्या' (यो० द० २।२४) इति । तत्त्वज्ञानेन द्वारा प्रकृतिपुरुषयोः स्वरूपज्ञानं सम्पद्यते । तेन च भवत्यपवर्गस्य प्राप्तिः ।

सांख्याः पञ्चविंशतितत्त्वानां ज्ञानस्य फलमेव स्वीकुर्वन्ति कैवल्यस्य प्राप्तिः । तथा चोक्तम्—

'पञ्चविंशति तत्त्वज्ञः यत्र कुत्राश्रमे वसन् ।
जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः' ॥ इति ।

अनेनैव प्रकारेण योगिनोऽपि सांख्याभिमतानि पञ्चविंशतितत्त्वानि स्वीकृत्य तेषां तत्त्वज्ञानस्य सर्वज्ञतापदत्वं स्वीकुर्वन्ति । तथा च सूत्रम्—

सत्त्वपुरुषान्यताख्यातिमात्रस्य सर्वभावाधिष्ठातृत्वं सर्वज्ञातृत्वं च ।
(यो० द० ३।४०)

न चात्र वाच्यम् यत् योगिनस्तत् षड्विंशतितमं तत्त्वमीश्वरं स्वीकुर्वन्ति । तस्य

प्रणिधानस्यैव समाधिसाधनत्वं च स्वीकुर्वन्ति इति योगिभिः ईश्वरस्यापि पुरुषविशेषरूपेण स्वीकारात् । तथा च पातञ्जलं सूत्रम्—

‘क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेष ईश्वरः’ इति । अतएव येन प्रकारेण सांख्यमतानुसारेण बद्धमुक्तज्ञकोटिकाः त्रिविधाः पुरुषाः भवन्ति, तेनैव प्रकारेण योगदर्शनेऽपि त्रिविधाः पुरुषाः भवन्ति—बद्धमुक्ता ईश्वरकोटिकाः येन प्रकारेण सांख्यदर्शने पुरुषबहुत्वं स्वीक्रियते, तेनैव प्रकारेण योगदर्शनेऽपि पुरुषबहुत्वं स्वीक्रियते ।

इत्थं सांख्ययोगदर्शनयोर्नैकधा साम्यं विलोक्यैव भगवान् प्रत्यपीपदत्—‘सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः इति ।

दर्शनं लोकदर्शनम्

भारतीयदर्शनान्येव भारतस्य निधयः ।

भारतीयदर्शनानां महत्त्वं वैशिष्ट्यं च ।

दर्शनार्थकाद् दृश् धातोरेव दर्शनशब्दो ‘करणाधिकरणयोश्च’ इति सूत्रेण करणे ल्युटि प्रत्यये कृते व्युत्पद्यते । अतएव दृश्यते अनेन इत्यस्मिन्नर्थे एव दर्शनशब्दो व्युत्पद्यते । अतएव येन साधनेन द्वारा विश्वस्मिन् विश्वे विद्यमानानां वस्तूनां सूक्ष्मतमं ज्ञानं सम्पद्यते तज्ज्ञानमेव दर्शनमभिधीयते । अतएव केनोपनिषदि श्रुत्याभिहितम्—

‘इह चेदवेदीदथ सत्यमस्ति नो चेदवेदीन् महती विनष्टिः’ । इति । अस्याः श्रुतेरभिप्रायो वर्तते यत् मानवश्चेदत्र सूक्ष्मज्ञाननेत्रेण द्वारा मानवजीवनस्य प्रयोजनभूतानाम् प्राप्यस्य, प्राप्तुः, प्राप्यप्राप्त्युपायस्य, प्राप्यप्राप्तिफलस्य, प्राप्यप्राप्तिप्रतिबन्धकस्य च स्वरूपं यथायथ ज्ञात्वा आत्मोज्जीवनं करोति तदा तु तस्य मानवं जीवनं सफलं जातम्, अन्यथा मानवे जीवने जायमानासु महती विनष्टिः तत्त्वज्ञानाभावस्वरूपैव भवति ।

इमानि दर्शनानि ‘आत्मा वाऽरे द्रष्टव्यः’ इत्यादिकानां श्रुतीनां माध्यमेन आत्मतत्त्वसाक्षात्कारस्य तत्साधनभूतानाम् श्रवणमनननिदिध्यासनानां च ज्ञानस्य, ‘कारणं तु ध्येयम्’ इत्यादिकानां श्रुतीनां माध्यमेन जगतः कारणं किम् ? तत्रोपादानता निमित्तता च कस्य तत्त्वस्य ? कुतश्चोद्भूय कुत्र लीयते जगत्, जीवात्मनः स्वरूपम् किम्; तानि तानि शरीराणि किं कारणानि ? शास्त्रेषूपवर्णितेषु कर्मयोगभक्तियोगज्ञानयोगेषु किं भवति मुक्तेः साधनम् मुक्तेश्च स्वरूपम् किम् ? जगति जनिमतां जीवानाम् अनुदिनं जायमानस्य दुःखत्रयाभिघातस्यैकान्तिकात्यन्तिकी अप्रकृतिः कथं सम्पद्येत प्रभृतीनां विषयाणां ज्ञानस्य महत्त्वं सम्पादयन्ति ।

सम्पूर्णेऽस्मिन् भारते वर्षे यानि दर्शनानि प्रख्यातानि सन्ति तेषां समेषां स्थूलदृष्ट्या द्विधा विभागः कर्त्तुं शक्यते—आस्तिकं दर्शनम् नास्तिकं दर्शनं च। शास्त्रप्रतिपादितानि तत्त्वान्येव, पारमार्थिकानि सन्तीति इति यानि दर्शनानि प्रतिपादयन्ति तानि दर्शनानि आस्तिकदर्शनशव्देनाभिधीयन्ते । वेदप्रतिपादितानामर्थानाम् प्रामाण्यमनभ्युपगच्छन्ति दर्शनानि नास्तिकदर्शनशव्देनाभिहितानि भवन्ति ।

तत्र नास्तिकदर्शनेषु देहात्मवादि चार्वाकदर्शनम्, इन्द्रियात्मवादि चार्वाकदर्शनम्, प्राणात्मवादि चार्वाकदर्शनम्, मन-आत्मवादि चार्वाकदर्शनम्, वौद्धदर्शनम्, जैनदर्शनमिति षड्दर्शनानि भवन्ति। आस्तिकदर्शनेष्वपि—न्याय—वैशेषिक—सांख्य—योगमीमांसा—वेदान्ताख्यानि षड्दर्शनानि सन्ति ।

इमानि आस्तिकनास्तिकभेदेन भिन्नानि दर्शनानि विश्वस्मिन् विश्वे प्रख्यातानि सन्ति। एतेषां समेषां दर्शनानां तत्त्वविवेचनशैल्यतीव मनोज्ञा वर्तते। आसीत् कश्चन कालविशेषो यदा भारते वर्षे वैदिकविचाराणामेव प्रचारः आसीत्। शास्त्राणामेवालोके कर्तव्याकर्तव्यानां निर्णयः समजायत। सर्वेषामाश्रमाणां वर्णानां च धर्माणाम् निर्धारणं वैदिका एव अकुर्वन्। किन्तु कालविशेषो वेदविरोधिना, तर्कैकप्रधानानां मतानाम् आविर्भावः समजायत। श्रूयते वेदेष्वेव नास्तिकदर्शनानामपि वीजानि निहितानि सन्ति । छान्दोग्योपनिषदः अष्टमे अध्याये एकाख्यायिका समुपवर्णिता वर्तते । 'एष आत्मापहतपाप्माविजरोविमृत्युरविशोको विजिघत्सोपिपासः सत्यकामः सत्यसंकल्पः।' इति आकाशवाणी श्रुत्वा देवेषु इन्द्रः दैत्येषु विरोचनश्च प्रवव्राजतुः। तौ आत्मविद्यां जिघृक्षू 'दृष्टा शिष्यनियमानुसारेण तौ समुपनेत्य ताभ्याम् चार्वाकदर्शनदृष्ट्या शरीरस्यैवात्मत्वमुपदिदेश । तच्छ्रुत्वा विरोचनस्तु सन्तुष्टः सन् गृहमाजगाम, किन्तु देवराज इन्द्रः देहस्यात्मत्वे दोषान् विचार्य पुनः पितामहस्य सविध आगत्य वहुधा प्रयस्य चात्मविद्यां जग्राह। श्रूयते तस्मादेव कालात् लोके देहात्मवादिनां मतम् प्रसृमरमभूत् ।

इदमपि श्रूयते यत् कदाचित् देवानामाचार्यः वृहस्पतिरेव चार्वाकमतम् प्रसारयामास । यागेषु जायमानान् हिंसादिदोषान् दृष्ट्वा अहिंसकमतम् वौद्धदर्शनम् जैनमतश्च लब्धप्रचारौ वभूवतुः, इत्थम् आस्तिकानि दर्शनानि तु वेदविहित अर्थाश्रितानि सन्त्येव। इमानि सर्वाण्येव दर्शनानि किञ्चिदभ्युपगम्य एव स्वमतस्य पोषणं कुर्वन्ति प्रमाणानामालोके । एतेषु दर्शनेषु प्रमाणविषयिण्यपि सङ्ख्या भिन्ना भिन्ना वर्तते। तत्र चार्वाकाः प्रत्यक्षमेकमेव प्रमाणमिति स्वीकुर्वन्ति। तत्रैव सर्वेषामपेक्षितानां प्रमाणानामन्तर्भावमपि वाञ्छन्ति। वौद्धौ प्रत्यक्षानुमाने द्वे प्रमाणे स्वीकुर्वन्ति । साङ्ख्याः योगिनः विशिष्टाद्वैतिनश्च प्रत्यक्षानुमानागमाः प्रमाणानि इति स्वीचक्रुः । नैयायिकाः चत्वारि प्रमाणानि स्वीकुर्वन्ति—प्रत्यक्षानुमानोपमानशव्दाख्यानि । मीमांसकानामनुसारेण तु पञ्च प्रमाणानि सन्ति—प्रत्यक्षा-

नुमानोपमानशब्दार्थापत्त्याख्यानि । अद्वैतिनः षट् प्रमाणानीति प्रत्यवतिष्ठन्ते—प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धाख्यानि । पौराणिका अष्टौ प्रमाणानीति प्रत्यपीपदन्—प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिसम्भवैतिह्याख्यानि ।

सर्वेषां दर्शनानां तत्त्वविवेचनशैली भिन्ना भिन्नापि स्व-स्वमौलिकतां न जहति। अतएव सर्वे पौरस्त्याः पाश्चात्याः च समालोचकाः भारतीयदर्शनस्य तत्त्वमीमांसां, ज्ञानमीमांसां च प्रशसंसुः ।

भारतीयानां समस्तानां दर्शनानामिदं वैशिष्ट्यं वर्तते यत् तेषामुत्पत्तिविषये कस्याश्चन कल्पनायाः अवसरो नास्ति। पाश्चात्येषु तु दर्शनोत्पत्तिविषये अनेके वादाः प्रख्याताः सन्ति। यथा—आश्चर्यजन्यतावादः, सन्देहजन्यतावादः, ज्ञानानुरागवादः प्रभृतय अनेके वादाः प्रख्यातास्सन्ति। किन्तु भारतीयानां दर्शनानां तु एतत् कथनं वर्तते, यत् जगति जायमानाः ये केचनापि जीवास्सन्ति, ते समे दुःखाभिभूता भवन्ति काले-काले। दुःखानाम् आगन्तुकत्वं वीक्ष्य मानवानां मनसि विचारोऽयं संजातः यत् किमपि आगन्तुकम् भवति तत् विनश्यति; यथा घटः, पटः । दुःखमपि आगन्तुकं विद्यते, तस्यकाले विशेषे एव जायमानत्वात्। अतएव अस्य आगन्तुकस्य दुःखस्य विनाशो नूनं स्यात्। तदा किं तत् साधनम् विद्यते येन साधनेन द्वारा दुःखजातस्यैकान्तिकरूपेण समूलमुन्मूलनं भवेत् शाश्वतिकं च सुखं समुपलभ्येत । एतादृशविचारपरम्परैव दर्शनमित्यभिधीयते । उक्तञ्चापि साङ्ख्यकारिकाकारेण—

दुःखत्रयाभिघाताज्जिज्ञासा तदाभिघातके हेतौ ।
दृष्टे साऽपार्था चेत् नैकान्तात्यन्ततोऽभावात् ।। इति ।

भारतीयदर्शनानां निम्नांकितानि वैशिष्टयानि सन्ति—(१) आत्मचिन्तनस्य प्राधान्यम् सर्वेषु दर्शनेषु आत्मभावनायाः प्राबल्यम् दृश्यते । आत्मनः स्वरूपम् किमिति विषये चार्वाकोऽपि विचारं स्वकीय प्रकाशयति। अतएव केचन चार्वाकाः देहस्यैवात्मत्वं प्रतिपादयन्ति, केचनेन्द्रियाणामात्मत्वं प्रतिपादयन्ति, केचन प्राणानाम् केचन च मनसाम् , बौद्धाः क्षणिकस्य निरन्वविनाशशालिनो ज्ञानस्य, अद्वैतिनः निर्वेशस्य ज्ञानस्यात्मत्वं प्रतिपादयन्ति, साङ्ख्याः पुरुषतत्त्वस्यात्मत्वं स्वीकुर्वन्ति, योगिनोऽपि तथा, नैयायिकाः, वैशेषिका अपि विभिन्नप्रकारेणात्मनः स्वरूपं निरूपयामासुः । विशिष्टाद्वैतिनस्तु प्राहुः—

देहेन्द्रियमनःप्राणधीभ्योऽन्योऽनन्यलक्षणः ।
नित्यो व्यापी प्रतिक्षेत्रमात्माभिन्नः स्वतः सुखी ।। इति।

(२) आत्मनस्सद्भावविषये प्रमाणानां स्वरूपम्—केचन दार्शनिकाः आत्मानम् प्रत्यक्षवेद्यम्, केचनानुमानसंवेद्यम् केचनागमैकवेद्यम्, केचन मानस-

प्रत्यक्षवेद्यम् स्वीकुर्वन्ति । केचन च ज्ञानस्वभावतयाऽनुदितानस्तमितस्वरूपप्रकाशः स्वयं ज्योतिः ईदृशोऽप्यागमानुमानयोगजप्रत्यक्षैः स्वेतरसकलविलक्षणस्वाभाव्येन-विशद-विशदतर-विशदतमतयाऽन्ततोऽयथावदपरोक्ष्यते आत्मा इति प्रतिपादयन्ति ।

(३) शास्त्रमूलकत्वम्—प्रायेणास्तिकाः दार्शनिकाः प्रतिपादयन्ति-'सम्मतं हि सर्वसमयेषु आत्मज्ञानं निःश्रेयसहेतुः' इति । श्रूयते च—'पृथगात्मानं प्रेरितारं च मत्वा जुष्टस्ततस्तेनामृतत्वमेति ।' 'आत्मानं चेद्विजानीयात् ।' 'तरति शोकमात्मवित्' ।'ब्रह्मविदाप्नोति परम्' इत्यादिः ।परावरात्मतत्त्वविज्ञानस्यापवर्गसाधनत्वम् प्रतिपादयन् वाक्यगणः ।

(४) परमात्मतत्त्वस्वीकरणम्—भारतीयदर्शनेषु परमात्मनः स्वीकरणमपि एकम् वैशिष्ट्यम् वर्तते । अनेकानि दर्शनानि-योग-न्याय-वेदान्तादीनि परमात्मनः सर्वज्ञत्वम् सर्वशक्तिमत्त्वम् , मर्वकारणत्वम् सर्वात्मत्वादिकञ्च स्वीकुर्वन्ति—'यः सर्वज्ञः सर्ववित्', 'परास्य शक्तिर्विविधैव श्रूयते', 'स्वाभाविकी ज्ञानवलक्रिया च', 'यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशन्ति', 'ऐतदात्म्यमिदं सर्वम्' इत्यादीनां श्रुतीनामालोके ।

(५) विवेचनप्राधान्यम्—सर्वाणि दर्शनानि स्वाभीष्टानां सर्वेषां तत्त्वानाम् विवेचनम् प्रमाणानामालोके कुर्वन्ति । यद्यपि दर्शनेषु श्रद्धाय अपि स्थानं भवति किन्तु सा श्रद्धा तर्कप्रमाणोपबृंहिता परिपुष्टा च भवन्ति ।

इत्थं सर्वाणि दर्शनानि विवेचनप्रधानानि गूढार्थसमालोचनप्रवणानि, तर्कप्रमाणोपबृंहितानि शास्त्रमूलकानि आत्मपरमात्मतत्त्वस्वरूपनिरूपणपरानि, दुःखापनोदनसाधननिर्देशकानि, जीवपरमात्मयाथात्म्यज्ञानपूर्वकवर्णाश्रमधर्मेतिकर्तव्यताकनिरूपकाणि, अखिलजगद्धितानुशासनपराणि च सन्ति ।

चार्वाकदर्शनम्

यावज्जीवेत् सुखं जीवेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।

भारतीयदर्शनानां द्वेधा विभागः कर्तुं शक्यते, नास्तिकदर्शनान्यास्तिकदर्शनानि च । तत्र नास्तिकदर्शनेषु प्रथमं स्थानम् चार्वाकदर्शनस्य वर्तते । चार्वाकाः शरीरस्यैवात्मत्वं स्वीकुर्वन्ति । छान्दोग्योपनिषदः अष्टमाध्याये चार्वाकदर्शनस्य वीजानि सुरक्षितानि सन्ति । श्रूयते वृहस्पतिरेव वभूव चार्वाकदर्शनस्य सर्वप्रथमः प्रचारकः ।

यद्यपि साम्प्रतम् चार्वाकदर्शनस्य किमपि पुस्तकं नहि समुपलभ्यते, किन्तु चार्वाकदर्शनस्य कनिचन सूत्राणि तत्र तत्र पूर्वपक्षादिरूपेण, आस्तिकदर्शनस्य ग्रन्थेषु

सुरक्षितानि सन्ति येषां संग्रहमेकत्रैव म० म० उमेशमिश्रः चकार स्वकीये भारतीयदर्शनाख्ये ग्रन्थे । तानि च सूत्राणि अधोऽङ्कितानि सन्ति—

(१) अथातः तत्त्वं व्याख्यास्यामः । (२) पृथिव्यप्तेजोवायुरिति तत्त्वानि । (३) तत्समुदाये शरीरेन्द्रियविषयसंज्ञा । (४) तेभ्यश्चैतन्यम् । (५) किण्वादिभ्यो मदशक्तिवद् विज्ञानम् । (६) भूतान्येव चेतयन्ते । (७) चैतन्यविशिष्टः कायः पुरुषः । (८) जलबुद्बुदवज्जीवः । (९) परलोकिनः अभावात् परालोकाभावः । (१०) मरणमेवापवर्गः । (११) धूर्तप्रलापस्त्रयी स्वर्गोत्पादकत्वेन विशेषाभावात् । (१२) अर्थकामौ पुरुषार्थौ । (१३) दण्डनीतिरेव विद्या अत्र वार्ताऽन्तर्भवति । (१४) प्रत्यक्षमेव प्रमाणम् । (१५) लौकिको मार्गोऽनुसर्तव्यः । इति ।

इमानि सर्वाणि सूत्राणि बार्हस्पत्यसूत्रनाम्ना प्रख्यातानि सन्ति । एतेषां सूत्राणामालोके इदम् निश्चेतुम् शक्यते ।

(१) चार्वाकाः जीवस्य पृथक् सत्त्वं नहि स्वीकुर्वन्ति ।

(२) एतेषाम् मतानुसारेण वेदस्य प्रामाण्यं नहि स्वीकरणीयम् ।

(३) चार्वाकाः पुरुषार्थचतुष्टयस्य सिद्धान्तं हित्वा अर्थकामयोरेव पुरुषार्थत्वम् स्वीकुर्वन्ति । धर्ममोक्षयोः पुरुषार्थत्वं नहि सम्भवति ।

(४) पृथिव्यप्तेजोवायुरिति चत्वारि एव तत्त्वानि सन्ति, आकाशनामकं भूतम् ते नहि स्वीकुर्वन्ति, आकाशस्यावकाशरूपत्वात् ।

(५) येन प्रकारेण मादकद्रव्याणां संयोगविशेषेण तेषु मदशक्तिरुत्पद्यते, तेनैव प्रकारेण पृथिव्यप्तेजोवायूनां संयोगविशेषेण तेषां संघातभूते शरीरे ज्ञानमुत्पद्यते ।

(६) शरीरमेवात्मा तत्रैवाहमः प्रयोगात् । भवति च लोके स्थूलोऽहं कृशोऽहम् इत्यादिकः प्रयोगे । शरीरस्यैव स्थूलत्व-कृशत्वयोर्विषयत्वात् ।

(७) चार्वाकाणां मते नास्ति परलोकः, जीवस्य क्षणिकत्वात्, शरीरपातानन्तरमेव जीवस्य सत्तासमाप्तेः ।

(८) प्रत्यक्षमेवैकम् प्रमाणम् । तद्व्यतिरिक्तं प्रमाणं नास्ति ।

देहस्यैवात्मत्वं समर्थयन्तः देहवादिनः चार्वाकाः प्राहुः—'ननु देहमेवात्मानं प्रत्यक्षतः प्रतिपद्यामहे । अहं जानामीति ज्ञाता ह्यात्मा अहमिति चकास्ति । देहश्चाहङ्कारगोचरः स्थूलोऽहम् कृशोहमिति दर्शनात् । देहस्य हि स्थौल्यादि योगः । अतस्तत्समानाधिकरणतयाऽयमहङ्कारः शरीरालम्बनः इत्यवश्याश्रयणीयम् । इतरथा सकललौकिकपरीक्षकव्यवहारविरोधश्च । न चायं लाक्षणिको व्यवहारः, मुख्यवृत्तिभूमेः पृथगसिद्धत्वात् । न चानेकावयवयोगिशरीरालम्बनत्वे ज्ञात्रवभासस्य तदीयरूपावयवाद्यवभासेनान्वयिना भवितव्यम्, येन तदन्वयाभावात् जानामीति प्रत्ययः शरीरातिरिक्त-

मवगमयेत्; वाह्येन्द्रियप्रत्यक्षतया नियमदर्शनात्; स्वान्तस्यान्तरगुणाधारतावभास एव सामर्थ्यनियमात् । अनवधृतावयवविशेषस्यापि अनेकावयवयोगिनो महिमगुणशालिनस्त्र्यणुकस्य प्रथमप्रत्यक्षाभ्युपगमात्; वायोश्च त्वगिन्द्र्येण स्पर्शाधिष्ठानमात्रतयोपलम्भदर्शनाच्च । देहव्यतिरिक्तात्मगोचरत्वेऽपि यथा तदीयगुणान्तराग्रहणम्, तथेहापि; यथा च तत्र वाह्यप्रत्यक्षगोचर एव संख्यापरिमाणादिग्रहणनियमः'। इति (आ० सि०)।

चार्वाकाः प्रलये नहि विश्वसन्ति अतएव संसारमुत्पादयितुम् इमे स्रष्टारम् नह्यपेक्षन्ते । ते स्वीकुर्वन्ति यत् सृष्टिः स्वयमेव भवति अथवा मातापित्रोः परम्परया भवति । एतेषां मतानुसारेण संयोगेनवा समवायेन वा कणानामवयवावयविरूपं संघटनं नहि भवति, यत इमे त्रसरेणवः क्षणिकाः सन्ति। अतएव एभिः अवयविनो नहि भवन्ति, त्रसरेणूनां संस्थानविशेषेण वा केवलेन संघटनेन वा वस्तूनि जायन्ते, रूपरसगन्धादिका गुणा अपि पृथिव्यादीनां संस्थानेभ्य एव जायन्ते । ते प्रतिपादयन्ति यत् येन प्रकारेण वर्षाकाले पृथिव्यादिभूतेभ्यः सहसाः कीटाः भेदादिकाः जीवविशेषाश्च समुत्पद्यन्ते तेनैव प्रकारेण, मनुष्यादिजीवेभ्यस्तेषां चैतन्यम् निष्कारणमेव उत्पद्यन्ते ।

इमे चार्वाकाः आत्मव्यतिरिक्तं परमात्मानं नहि स्वीकुर्वन्ति, तस्यानावश्यकत्वात्; परलोकोऽपि कश्चन नास्ति, मरणोपरान्तं जीवास्तित्वस्याभावात् । एतेषां मतानुसारेण यावच्छरीरमेव जीवस्य सत्ता भवति। शरीरविनाशसमकालमेव जीवस्य विनाशो भवति। सांसारिकं जायमानं सुखमेवेमे स्वर्गशव्देन त्रिविधानि दुःखानि च नरकशव्देनाभिदधति । एतेषां सिद्धान्त एव वर्तते—

यावज्जीवेत् सुखं जीवेत् ऋणं कृत्वा घृतं पिवेत् ।
भस्मीभूतस्य देहस्य पुनरागमनं कुतः ।। इति ।

इमे तमेव कर्मधर्मशव्देनाभिदधति येन कर्मणा कामपूर्तिर्भवति । कृषिकर्म, पशुपालनम्, व्यापारः, राजनीतिः इमानि सर्वाणि कर्माणि सुखावाप्तेस्साधनानि सन्ति ।

चार्वाकाणाम् चत्वारः सम्प्रदायाः सन्ति । तत्र देहात्मवादिनः चार्वाकाः सर्वप्रधानास्सन्ति । एतेषां मतस्योल्लेखो मया उपरि कृतश्चापि । अन्ये चार्वाकाः शरीरात्मवादे दोपानपेक्ष्य इन्द्रियात्मवादस्य समर्थनं कुर्वन्तः प्राहुः—

'सन्तु तर्हीन्द्रियाण्येवात्मा, न च तानीदन्तया प्रथन्ते, येन देहवत्, अहङ्कारगोचरात् वहिष्क्रियेरन् नापि तथोद्भूतरूपादि गुणानि, स्थूलानि; येन तत्प्रतिभास इवेन्द्रियगोचरत्वेऽपि, अहम्प्रत्ययस्य रूपावयवादिप्रतीतिः प्रसज्येत तद्व्यापारफलञ्च ज्ञानं तद्गामियुक्तम् स्नानाध्ययनादिफलवत् । अतएव सत्यतपाः—'द्रष्टुश्चक्षुषः इति ।' (आ० सिद्धिः)

अपरे चार्वाकाः मनस एवात्मत्वं प्रतिपादयन्तः प्राहुः—'मन एव चेतनम्, तथा सति हि पूर्वोक्ताः दोषाः परिहृता भवन्ति। तद्धि सर्वेन्द्रियाध्यक्षतया प्रज्ञायते प्रतिज्ञायते च; उपपद्यते चेन्द्रियान्तरेण प्रतिसन्धानम्, दर्शनानुसन्धानाधारस्य मनसः एकत्वात्। तत्तदिन्द्रियापायेऽपि स्मरणमप्युपपद्यत एव, मनसो नित्यत्वात्।' (आत्मसिद्धिः)

प्राणानामेवात्मत्वमुपपादयन्त अन्ये चार्वाकाः प्राहुः—'अस्तु तर्हि प्राण एवात्मा, तथा सति तदन्वयिनि शरीरे सात्मकत्वप्रतीतिः। तद्विरहिणि निरात्मकत्वप्रतीतिश्चोपपद्येयाताम्, देहादुत्क्रान्तिर्लोकान्तरगमनं देहान्तरसञ्चारश्चोपपन्तेतराम्, गत्वरस्वाभाव्यात् प्राणस्य। इतरथा परममहतो महतश्च स्पर्शविरहिणः परिस्पन्दानुपपत्तेरुत्क्रान्तिगत्यागतिश्रुतयो भाक्ताः स्युः।' इति (आत्मसिद्धिः)

अनेन प्रकारेण दृश्यते यत् चार्वाकाणामतीव महती परम्परा आसीत्। इमे सर्वे स्व-स्वमतानुसारेणात्मनः प्रतिपादनमकार्षुः। यद्यपि सर्वे चार्वाकव्यतिरिक्ता दार्शनिकाः चार्वाकदर्शनस्य प्रत्याख्यानमकार्षुः, अथापि भारतीयदर्शनसमवाये चार्वाकदर्शनस्य महतोऽवदानस्यापलापं कर्तुं नहि शक्यते। मन्ये सर्वे एव दार्शनिकाः चार्वाकमतस्य खण्डनादेव स्वमतपोषणस्यारम्भणं कृत्वा स्वकीयं पन्थानं प्रशस्तमकार्षुः।

जैनदर्शनम्

अथवा—स्याद्वाद।
अथवा—सप्तमङ्गीनयः।

नास्तिकदर्शनेषु चार्वाकदर्शनस्यानन्तरम् जैनदर्शनस्यैव स्थानमायाति। जैनानां दार्शनिकग्रन्थेषु चार्वाकदर्शनस्योल्लेखः समुपलभ्यते। चार्वाकास्तु भूतेभ्यः पृथक् आत्मनः सत्तां नहि स्वीचक्रुः किन्तु जैनाः आत्मानम् भूतेभ्यः पृथक् स्वीकुर्वन्ति अथापि जैनाः भौतिकवादात् सर्वथा मुक्ता आसन् इत्यपि वक्तुं नहि शक्यते। अलौकिकगुणसम्पन्नोऽपि आत्मा भौतिकतातः सम्बद्धो वर्तते इति जैनाः आत्मानं परिणामिनमपि स्वीकुर्वन्ति। जैनाः जीवम् अस्तिकायशब्देनाभिदधति। अतएव अस्मिन् मते आत्मा लघुरपि भवति वृहदपि।

जैनदर्शनस्यापि प्रवृत्तिः दुःखानामात्यन्तिकहानाय सुखानामवाप्तये चापि भवति। तपोभिः साधनैश्च शरीरवाङ्मनःक्रियाणां संयमनेनान्तःकरणस्य शुद्धिः, परमात्मसाक्षात्कारश्च जैनदर्शनस्य चरमं लक्ष्यम्। सम्यग्दर्शनम् सम्यज्ज्ञानम्, सम्यक् चारित्र्यञ्चेति त्रिभ्यः रत्नेभ्यो जैना आजीवनम् प्रयतन्ते।

जैनदर्शनस्य प्रवर्तकाः—ऋषभदेव. जैनदर्शनस्य प्रवर्तको वर्तते। जैनदर्शनस्य प्रवर्तकत्वेन प्रख्याताः तीर्थङ्करशब्दवाच्याः चतुर्विंशतिसंख्याकाः महापुरुषा अभूवन्। एतेषां तीर्थङ्कराणां नामानि निम्नांकितानि सन्ति—

(१) आदिनाथः (ऋषभदेवः), (२) अजितनाथः, (३) सम्भवनाथः, (४) अभिनन्दनः, (५) सुमतिनाथः, (६) पद्मप्रभुः, (७) सुपार्श्वनाथः, (८) चन्द्रप्रभः, (९) सुविधिनाथः, (१०) शीतलनाथः, (११) श्रेयांसनाथः, (१२) वसुपूज्यः, (१३) विमलानाथः, (१४) अनन्तनाथः, (१५) धर्मनाथः, (१६) शान्तिनाथः, (१७) कुन्थुनाथः, (१८) अरनाथः, (१९) मल्लिनाथः, (२०) मुनिसुव्रतः, (२१) नमिनाथः, (२२) नेमिनाथः, (२३) पार्श्वनाथः, (२४) वर्धमानो महावीरश्च । अनयैवाचार्यपरम्परया जैनसिद्धान्तः अनादिकालतः सुरक्षितो वर्तते इति जैनमतावलम्बिनाम् अभिमतिः ।

वर्धमानो महावीर एव जैनानामन्तिमः तीर्थङ्कर आसीदिति निश्चितो वर्तते । त्रिशद्वर्षदेशीयोऽयं संसारात् प्रव्रजितो वभूव कठोरतपोभिः केवलज्ञानावाप्तये आजीवनं तपांस्यचरत् । जैनसमाजे ब्रह्मचर्यपालनसंसारादनासक्तिदिगम्वरवासः प्रभृति नियमानां पालनम् दृढतया क्रियते । महावीरः उपादिशत् यत् संसारादन्निलिप्तित्वाय दिगम्वरे वृत्तिरनिवार्या वर्तते । किन्त्वस्मिन् विषये जैनेषु दलद्वयमभूत् । एके जैना दिगम्वरा अभूवन् अन्ये च श्वेताम्वराः ।

जैनानां पञ्चव्रतानि—महावीरेणोपादिष्टम् यत् केवलज्ञानावाप्तये परिव्राजकत्वस्वीकार आवश्यको भवति । तत्र गृहस्थानां गृहेभ्यो भिक्षित्वाजीवन निर्वाहकरणम् अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाख्यानां पञ्चव्रतानां पालनमत्यावश्यकं भवति । शरीरवचोमनांसि वशीनि कृत्वा आत्मनः मोक्षमार्गे उन्नयनं विरक्तेभ्य आवश्यकं भवति । मोक्षावाप्तये ऊर्ध्वगतिशीलानां जीवानां स्वरूपस्यावस्थाविशेषः गुणस्थानमिति कथ्यते । इमानि गुणस्थानानि चतुर्दशसंख्याकानि सन्ति निम्नाङ्कितानि—

(१) मिथ्यात्वे विश्वासः, (२) सासादनम्, (३) मिश्रता, (४) अविरतसम्यक्त्वम्, (५) देशविरतिः, (६) प्रमत्तता, (७) अप्रमत्तता, (८) अपूर्वकरणम्, (९) अनिवृत्तिकरणम्, (१०) सूक्ष्मसम्परायः, (११) उपशान्तमोहः, (१२) क्षीणमोहः, (१३) सयोगि केवली, (९४) अयोगि केवली च ।

जैनसम्प्रदाये तीर्थङ्करस्य पदमतीव महत्त्वपूर्णं भवति । सम्यज्ज्ञानेन सम्यग् वाचा सम्यक् चारित्र्येण च युक्तो जीवो साधु भवति । रोगभयेभ्यो विमुक्ता इमे वर्षासु चातुर्मास्यं सम्पाद्य वर्षस्याष्टसु मासेषु विचरन्तो जैनधर्मस्योपदेशं कुर्वन्ति । घातीयकर्मभ्यो रहिता इमेऽनन्तशक्तिसम्पन्ना भवति । तीर्थंकरेषु स्वभावत एव मतिज्ञानं, श्रुतज्ञानम्, अवधिज्ञानं मनःपर्यायज्ञानं च भवन्ति । कर्मवन्धविनिर्मुक्ता इमे केवलज्ञानेनापि सम्पन्ना भवन्ति ।

जैनधर्मस्य साहित्यसमवाये द्वादशसंख्याकानां ग्रन्थानां नामानि प्रख्यातानि सन्ति निम्नांकितानि—

(१) आचाराङ्गसूत्रम्, (२) सूत्रकृताङ्गम्, (३) स्थानाङ्गम्, (४) समवायाङ्गम्, (५) भगवतीसूत्रम्, (६) ज्ञाताधर्मकथा, (७) उपासकदशाः, (८) अन्तकृद्दशाः, (९) अनुत्तरौपपादिकदशाः, (१०) प्रश्नव्याकरणानि, (११) विपाकश्रुतम्, (१२) दृष्टिवादश्च । एतेषु ग्रन्थेषु दृष्टिवादः साम्प्रतम् नोपलभ्यते ।

दृष्टिवादे चतुर्दशानां पूर्वाणां द्वादशोपाङ्गानाम् , दशप्रकीर्णनाम् , षट्छेदसूत्राणां, चतुर्णां मूलसूत्राणां द्वयोः चूलिकासूत्रयोश्च समावेशो वर्तते ।

जैनदर्शने निम्नाङ्कितानि तत्त्वानि स्वीक्रियन्ते—

जीवाजीवात्मकं जगदेतन्निरीश्वरम् , तच्च षड्द्रव्यात्मकम् , तानि च द्रव्याणि—जीव-धर्मा-धर्म-पुद्गल-काल-आकाशाख्यानि । तत्र जीवाः—बद्धाः योगसिद्धाः मुक्ताश्चेति त्रिविधाः सन्ति । धर्मो नाम—गतिमतां गतिहेतुभूतो द्रव्यविशेषो जगद्व्यापी । अधर्मश्च—स्थितिहेतुभूतो व्यापी । पुद्गलो नाम—वर्ण-रस-गन्ध-स्पर्शवद् द्रव्यम् । तच्च द्विविधम्—परमाणुरूपम् तत् सङ्घातरूपञ्च । पवन-ज्वलन-सलिल-धरणी-तनु-भुवनादिकम् ।

कालस्तु—अभूदस्ति भविष्यतीति व्यवहारहेतुः अणुरूपो द्रव्यविशेषः । आकाशोऽप्येकोऽनन्तप्रदेशश्च । तेषु चाणुव्यतिरिक्तानि द्रव्याणि पञ्च अस्तिकाय इति । अनेकदेशवर्तिनि द्रव्येऽस्तिकायशब्दः प्रयुज्यते ।

जीवानां मोक्षोपयोगिनमपरमपि संग्रहं कुर्वन्ति जैनाः—'जीवाजीवास्रवबन्धनिर्जरसंवरमोक्षाः ।' इति । मोक्षसङ्ग्रहेण मोक्षोपायश्च गृहीतः । स च सम्यग्ज्ञानदर्शन-चरित्ररूपः । तत्र जीवस्तु—ज्ञान-दर्शनसुख-वीर्यगुणः । अजीवश्च जीवभोग्यवस्तुजातम् । आस्तवः—तदुपभोगोपकरणभूतमिन्द्रियादिकम् । बन्धश्चाष्टाविधः—घातिकर्मचतुष्टयमघातिकर्मचतुष्टयं चेति । तत्राद्यम् जीवगुणानां स्वाभाविकानां ज्ञानदर्शनवीर्यसुखानां प्रतिघातकम् , अपरं शरीरसंस्थानतदभिमान तत् पिति तत्प्रयुक्तसुखदुःखोपेक्षाहेतुभूतम् । निर्जरं मोक्षसाधनम् अर्हमुपदेशावगतं तपः । संवरो नाम—इन्द्रियनिरोधः समाधिरूपः । मोक्षस्तु—निवृत्तरागादिक्लेशस्य स्वाभाविकात्मस्वरूपाविर्भावः ।

पृथिव्यादिहेतुभूताश्चाणवो वैशेषिकादीनामिव न चतुर्विधाः, अपित्वेकस्वभावाः । पृथिव्यादिभेदस्तु परिणामकृतः । सर्वं च वस्तुजातम् सत्त्वासत्त्वनित्यत्वानित्यत्वभिन्नत्वाभिन्नत्वादिभिरनैकान्तिकमिच्छन्ति—स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्याद् वक्तव्यम्, स्यादस्ति,चावक्तव्यं च, स्यान्नास्ति चावक्तव्यं च, स्यादस्ति च नास्ति चावक्तव्यं च ।' इति सर्वत्र सप्तभङ्गीनयावतारात् । सर्वं वस्तुजातम् द्रव्यपर्यायात्मकमिति द्रव्यात्मना सत्त्वैकत्वनित्यत्वाद्युपपादयन्ति ते, पर्यायात्मना च तद् विपरीतम् । पर्या-

याश्च द्रव्यस्यावस्थाविशेषाः तेषां च भावाभावरूपत्वात् सत्त्वासत्त्वादिकं सर्वमुपपन्नमिति ।

जैनाः स्वपराभासिज्ञानम् प्रमाणं स्वीकुर्वन्ति। अत एव प्रत्यक्षम् द्विविधमपि प्रमाणं स्वपराभासि भवति। तत्र प्रत्यक्षस्य त्रयो भेदाः भवन्ति—अवधि, मनःपर्यायम् केवलञ्च। जैनानां मते चत्वारि प्रमाणानि सन्ति—प्रत्यक्षम् अनुमानमौपम्यम् आगमञ्च।

अनेन प्रकारेण ज्ञायते यत् जैनानाम् मतमपि आचाराश्रितं वर्तते । अस्मिन् मते अन्तःकरणशुद्धावेव जना उदति। विनाऽन्तः करणस्य शुद्धिम् मोक्षावाप्तिर्भवितुं नार्हति । अन्तःकरणशुद्धयै चास्मिन् मते नैकविधानि तपांस्याचरणीयानि भवन्ति।

बौद्धदर्शनस्य विहङ्गावलोकनम्

जैनदर्शनमिव बौद्धदर्शनमपि आचारशास्त्रमेव वर्तते । पश्चात्तनकालेषु बुद्धशिष्याः इदम् आध्यात्मिकं मत्वा अस्य दर्शनत्वं प्रत्यपीपदन् । अस्य दर्शनस्य भागद्वयम् वर्तते —आचारप्रधानम् अध्यात्मप्रधानञ्च । अस्य मतस्यादिप्रवर्तकः ५६३ ई० पू० ख्रीष्टाब्दे जगतः गौतमबुद्धो वर्तते । यद्यप्ययं राजपुत्र आसीत् अथापि स्वभावतोऽयं परदुःखानि वीक्ष्य दुःखी बभूव । अत एव गौतमः निश्चितवान् यत् संसारोऽयं दुःखमयो वर्तते । सांसारिकाद् दुःखाद् मुक्तिमवाप्तये गौतमः संसाराद्विरक्तो भूत्वा वनं प्राविशत्। विहारप्रदेशस्य बोधगया नाम्नि स्थाने तपांसि तप्त्वाऽयं बुद्धत्वमलभत ।

तत्त्वज्ञानं प्राप्य गौतमबुद्धो लोककल्याणकर्मणि व्यापृतो बभूव। अत एव सः जनेषु 'सर्वं दुखःम्' 'दुःखसमुदयः' 'दुःखनिरोधः' 'दुःखनिरोधगामिनीप्रतिपद्' इत्येषां चतुर्णामार्यसत्यानाम् उपदेशं चकार। सः स्वोपदेशपरम्परायां सर्वप्रथमं जनानुपदिदेश यत् जगति सर्वे जनिमन्तो जनाः दुःखाक्रान्ताः सन्ति। दुःखं च केनापि नहि काम्यते । अत एवास्य दुःखस्य कारणं ज्ञात्वा तस्य विनाशाय प्रयतनीयमिति ।

दुःखस्य कारणं चाविद्यैव वर्तते, यस्याः अद्भुतया शक्त्या कारणानां परम्परा समुत्पद्यते। इमां कारणपरम्परां प्रतीत्यसमुत्पादो जनयति। अस्याः परम्परायाः स्वरूपम् इत्थं वर्तते—अविद्यातः संस्कारो जायते, तस्मात् विज्ञानम्, विज्ञानात् नामरूपे भवतः, ताभ्यां षडायतनम्, षडायतनात् स्पर्शो भवति, स्पर्शाद् वेदना जायते वेदनायाः तृष्णा भवति, तृष्णायाः रागो जायते, रागाद्भवः, तस्मात् जातिः, जातेः जरा, जरायाश्च मरणम् भवति ।

विचारेण ज्ञायते यदियमखिला कारणपरम्परा आर्यसत्यचतुष्टयस्य विततिभूतं वर्तते ।

वौद्धदर्शनानुसारेण दुःखनिरोधायाष्टाङ्गमार्गस्यानुसरणमनिवार्यं भवति । तदर्थं च साधकैः निम्नांकितानां नियमानां पालनम् कर्तव्यम् । ते च नियमाः सन्ति इमे—

[१] सम्यक्दृष्टिः, [२] सम्यक्संकल्पः, [३] सम्यग्वाक्, [४] सम्यक्कर्मान्तः, [५] सम्यगाजीवः, [६] सम्यग्व्यायामः; [७] सम्यक् स्मृतिः [८] सम्यक् समाधिश्च । एतेषां नियमानां पालनेन साधकः स्व लक्ष्यंप्राप्नोति । साधकस्य वुद्धत्वावाप्तेः प्राक् तिस्रः विशिष्टा अवस्था भवन्ति–श्रावकः, प्रत्येकबुद्धः, वोधिसत्त्वश्च । तदनन्तरम् वुद्धत्वस्य प्राप्तिर्भवति ।

वुद्धः स्वशिष्यत्वयोग्यतायै दश नियमान् चकार ते चासन्—[१] अहिंसा, [२] अपरिग्रहः, [३] ब्रह्मचर्यम्, [४] सत्यम्, [५] धर्मे श्रद्धा, [६] मध्याह्नोत्तरभोजनपरित्यागः, [७] विलासपराङ्मुखता, [८] सुगन्धितद्रव्याणां निषेधः, [९] सुखदशयासनयोः परित्यागः, [१०] सुवर्णादिमहार्घवस्तूनां परित्यागश्च । वुद्धः स्वशिष्यानुपदिदेश —'भिक्षवः ! सर्वं वस्तु क्षणिकं वर्तते, सर्वस्य नाशोऽवश्यम्भावी, स्वमुक्तये सर्वैः स्वयमेव प्रयतनीयम्' । इति ।

वुद्धस्योपदेशाः पालिभाषायामासन् । तेषामुपदेशानां तच्छिष्याः भागत्रये विभक्तवन्तः—विनयपिटकम्, सुत्तपिटकम्, अभिधम्मपिटकञ्च ।

वुद्धस्य शिष्याः स्वस्वमतानुसारेण वुद्धोपदेशस्यार्थं कृत्वा परस्परभिन्नानां मतानां प्रचारमकार्षुः । सर्वप्रथमं तु वौद्धसम्प्रदायस्य द्वौ भेदावभूताम्—महासङ्घिकः स्थविरवादश्च । तत्र महासंघिकाः तार्किका आसन्, तेषां मतानुसारेण सर्वो हि जनः वुद्धत्वप्राप्तेः शक्तिम् विभर्ति ॥ अत एव समयानुसारेण सर्वे वुद्धाः भवितुमर्हन्ति । स्थविरवादानुयायिनो वौद्धाः परम्परायाः निर्वाहकाः अभूवन् । तेषां मतानुसारेण वुद्धस्य शक्तिः तपस्यातो जायते । अस्य मतस्यानुयायिनां केन्द्रम् कश्मीरप्रदेश आसीत् ।

पुनः स्थविरवादे एकादश मतानि प्रवर्तितान्यभूवन् । हैमवन्तमतम्, सर्वास्तित्ववादः, वात्सीपुत्रीयमतम्, धर्मोत्तरमतम्, भद्रयानिकमतम्, सम्मितीयमतम्, छान्दागारिकमतम् , महीशासकमतम्, धर्मगुप्तिकमतम्, काश्यपीयमतम्, सौत्रान्तिकमतञ्च ।

महासाङ्घिकस्य नवभेदाः संजाताः—मूलमहासाङ्घिकमतम्, एकव्यावहारिकमतम्, लोकोत्तरवादमतम् , कौरुकुल्लकामतम् , वहुश्रुतीयमतम् , प्रज्ञप्तिवादः चैत्यशैलमतम्, अवरशैलमतम् उत्तरशैलमतञ्च ।

पुनः महासाङ्घिकमतस्य विलयो महायानरूपेण, स्थविरवादस्य च विलयः हीनयाने चाभूत् । तत्र महायानस्यानुगन्तारः अश्वघोष-नागार्जुन-असङ्ग-आर्यदेव-वसुवन्धुप्रभृतय अनेके महान्तो विद्वांस अभूवन् । पुनः महायानस्य द्वौ भेदौ संजातौ —योगाचारो माध्यमिकश्च । योगाचाराः वौद्धाः विज्ञानवादिन अभूवन् माध्यमिकाश्च शून्यवादिनः । हीनयानस्यापि दौ भैदावभूताम्–वैभाषिकः सौत्रान्तिकश्च ।

एतेषु चतुर्विधेषु वौद्धेषु केचित्–पार्थिवाप्यतैजसवायवीयपरमाणुरूपान् भूतभौतिकान् वाह्यान् चित्तचैत्तरूपांश्चाभ्यन्तरान् अर्थान् प्रत्यक्षानुमान् सिद्धानभ्युपयन्ति । अन्ये तु वाह्यान् अर्थान् सर्वान् पृथिव्यादीन् विज्ञानानुमेयान् वदन्ति । अपरे तु—अर्थशून्यं विज्ञानमेव परमार्थसत् वाह्यार्थास्तु स्वाप्नार्थकल्पा इत्याहुः । त्रयोऽप्येते स्वाभ्युपगतं वस्तु क्षणिकमाचक्षते; उक्तभूतभौतिकचित्तचैत्तव्यतिरिक्तमात्माकाशादिकं स्वरूपेणैव नानुमन्वते; अन्ये तु सर्वशून्यत्वमेव संगिरन्ते ।

तत्र ये वाह्यार्थास्तित्ववादिनः ते चैवं मन्यन्ते—रूपरसगन्धस्वभावाः पार्थिवाः परमाणवः, रूपरसस्पर्शस्वभावाश्चाप्याः, रूपस्पर्शस्वभावाश्च तैजसाः, स्पर्शस्वभावाश्च वायवीयाः पृथिव्यप्तेजोवायुरूपेण संहन्यन्ते । तेभ्यश्च पृथिव्यादिभ्यः शरीरेन्द्रियविषयरूपसङ्घाता भवन्ति । तत्र च शरीरान्तर्वर्ती ग्राहकाभिमानारूढो विज्ञानसन्तान एवात्मत्वेनावतिष्ठते । तत एव सर्वो लौकिकव्यवहारः प्रवर्तत इति ।

विज्ञानमात्रास्तित्ववादिनो योगाचाराः प्रतिपादयन्ति यत्—अर्थस्य व्यवहारयोग्यत्वम् ज्ञानप्रकाशायत्तम् , अन्यथा स्वपरवेद्ययोरनतिशयप्रसङ्गात् । प्रकाशमानस्य च ज्ञानस्य, साकारत्वमवश्याश्रयणीयम् , निराकारस्य प्रकाशायोगात् । एकश्चायमाकारः उपलभ्यमानो ज्ञानस्यैव । तस्य च वहिर्वदवभासो भ्रमकृतः । ज्ञानार्थयोः सहोपलम्भनियमाच्च ज्ञानादव्यतिरिक्तोऽर्थः । किञ्च वाह्यमर्थमभ्युपयद्भिरपि घटपटादिविज्ञानेषु ज्ञानस्य तत्तदर्थासाधारण्यं तत्तदर्थसारूप्यमन्तरेण नोपपद्यते इत्यवश्यं ज्ञानेऽर्थसरूपं रूपमास्थेयम् । तावतैव सर्वव्यवहारोपपत्तेः तद्व्यतिरिक्तार्थकल्पना निष्प्रमाणिका । अतो विज्ञानमात्रमेव तत्त्वम् न वाह्यार्थोऽस्तीति ।

शून्यवादिनो माध्यमिकास्त्वित्थम् प्रतिपादयन्ति । शून्यवाद एव सुगतमतकाष्ठा । शिष्यवुद्धियोग्यताऽनुगुण्येनार्थाभ्युपगमादिना क्षणिकत्वादय उक्ताः । विज्ञानं बाह्यार्थश्च सर्वे न सन्ति । शून्यमेव तत्त्वम् ; अभावापत्तिरेव च मोक्षः, इत्येव वुद्धस्याभिप्रायः । तदेव हि युक्तम् । शून्यस्याहेतुसाध्यतया स्वतः सिद्धेः । सत एव हि हेतुरन्वेषणीयः । तच्च सत् भावादभावाच्च नोत्पद्यते । भावात् तावत् न कस्यचिदुत्पत्तिर्दृष्टा न हि घटादिरनुपमृदिते पिण्डादिके जायते । नाप्यभावादुत्पत्तिः सम्भवति । नष्टे पिण्डादिके ह्यभावादुत्पद्यमानं घटादिकमभावात्मकमेव स्यात् । तथा स्वतः परतश्चोत्पत्तिर्नो भवति; स्वतः स्वोत्पत्तावात्माश्रयदोषप्रसङ्गात् प्रयोजनाभावाच्च । परतः परोत्पत्तौ परत्वविशेषात् सर्वेषां सर्वेभ्यः उत्पत्तिप्रसङ्गः । जन्माभावादेव

विनाशस्याप्यभावः। अतः शून्यमेव तत्त्वम्। अतो जन्मविनाशसदसदादयो भ्रान्तिमात्रम्।

एतेषु चतुर्विधेषु वौद्धेषु यद्यपि तत्त्वतो नास्ति भेदः, केचन अथापि भेदाः अत्र भवन्ति। यथा—हीनयानीयाः अर्हत्पदप्राप्तिमेव स्वकीयं चरमलक्ष्यं स्वीकुर्वन्ति, किन्तु महायानीयाः बौद्धाः वोधिसत्त्वस्यावस्थां प्रेप्सन्ति। हीनयाने—स्रोतापन्न—सकृदागामि—अनागामि—अर्हदाख्याः चतस्रः अवस्था भवन्ति, किन्तु महायाने—दश भूमयः स्वीक्रियन्ते असंगः स्वकीये दशभूमिशास्त्रे—मुदिता-विमला-प्रभाकरी-अर्चिष्मती-सुदुर्जया-अभिमुक्ति-दुरङ्गमा-अचला-सधमती-धर्ममेघाख्यानां दशानां भूमीनां विशदं वर्णनमकरोत्।

अनेन प्रकारेण दृश्यते यत् सम्पूर्णमेव वौद्धदर्शनम् दुःखानामात्यन्तिकैकान्तिकनिवृत्तिपूर्वकम् मोक्षावाप्तये प्रयतते। इदमेव एतद्व्यतिरिक्तानामपि दर्शनानाम् लक्ष्यं वर्तते।

मीमांसादर्शनम्

'मन्त्रब्राह्मणयोर्वेदनामधेयम्।' इति वाक्यानुसारेण समग्रो वेदराशिः भागद्वये विभजितुं शक्यते। मन्त्रभागो ब्राह्मणभागश्च। तत्र वेदस्य मन्त्रभागस्यैवार्थनिर्णयाय भवति मीमांसाशास्त्रस्य प्रवृत्तिः। यद्यपि मीमांसाशब्दस्य प्रयोगः पूर्वमीमांसोत्तरमीमांसयोरुभययोः कृते भवति प्रयोगः, अथाप्यत्र मीमांसाशब्देन पूर्वमीमांसैव ग्राह्या। तस्या एवात्र विचार्यत्वेनोपक्रान्तत्वात्।

मीमांसासूत्राणाम् प्रणेता आचार्यो जैमिनिः स्वीक्रियते। अस्य ग्रन्थस्यादिमं सूत्रम् वर्तते—'अथातो धर्मजिज्ञासा' इति। अनेन ज्ञायते यत् मीमांसाशास्त्रम् प्रधानतया धर्मस्यैव विवेचनं करोति। 'यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः।' इति धर्मस्य लक्षणमभिहितम्। अनेन लक्षणेन यत् लौकिककल्याणस्य मोक्षस्य च प्राप्तेस्साधनम् धर्मशब्देनाभिधीयते।

धर्मविचारस्य प्रसङ्गे कायिक-वाचिक-मानसिकानां समेषां सत्कर्मणां विचार आवश्यको वर्तते। एभिरेव कर्मभिः अन्तःकरणं शुद्धयति। अतएव मीमांसाशास्त्रजिज्ञासुभ्य आध्यात्मिकं चिन्तनं शिक्षयति।

यद्यपि मीमांसाशास्त्रे आत्मनः अपि स्वरूपस्य विवेचनं कृतं वर्तते किन्तु मीमांसाशास्त्रस्य चरमं लक्ष्यं स्वर्गावाप्तिः वर्तते। स्वर्गस्य प्राप्तिरेव लौकिकदृष्टिकोणस्य चरमा काष्ठा वर्तते। सामान्या जनाः स्वर्गमेव परमपदशब्देनाभिदधुः। केचन मीमांसकाः आत्मनः स्वप्रकाशत्वमपि स्वीकुर्वन्ति।

मीमांसासाहित्यम्—मीमांसाशास्त्रस्य मुख्यो ग्रन्थः जैमिनिसूत्रम् वर्तते। अस्य ग्रन्थस्य प्रथमाध्यायस्य प्रथमः पादः तर्कपाद इत्यभिधीयते। तत्रैव दार्श-

निकाः विचाराः समाहिताः सन्ति । जैमिनिसूत्रे—वादरायण-वादरि-ऐतिशायन-कार्ष्णाजिनि-लावुकायन-कामुकायन-आत्रेय-आलेखनानाम् अष्टानामाचार्याणां नामानि समुपलभ्यन्ते मीमांसाशास्त्रस्याचार्यरूपेण । किञ्चैतद्व्यतिरिक्तानाम्—आपिशलि-उपवर्ष-वोधायन-भवदाख्यानां प्राचीनानाम् चतुर्णामाचार्याणां नामानि समुपलभ्यन्ते । जैमिनिप्रणीते मीमांसासूत्रे द्वादशाध्यायाः सन्ति येषां विषया अपि द्वादशसङ्ख्याकाः सन्ति । ते च विषयाः—धर्मजिज्ञासा, कर्मभेदः, शेषत्वम्, प्रयोज्य-प्रयोजकभावः, कर्मणां क्रमः, अधिकारः, सामान्यविशेषातिदेशाः, ऊहः, बाधः, तन्त्रम् आवापश्च सन्ति । इमे सर्वे पारिभाषिकाः शब्दाः सन्ति एतेषां सर्वेषां सम्वन्धो वेदमन्त्रैः साकं वर्तते ।

यद्यपि मीमांसासूत्राणां बह्व्यो व्याख्या आसन्, अथापि साम्प्रतम् तासामुपलब्धिर्नहि भवति । मीमांसासूत्रोपरि समुपलभ्यमाना प्राचीनतमा व्याख्या शवरभाष्यं वर्तते इयं व्याख्यातीव प्राचीना वर्तते । तदनन्तरम्—कुमारिलभट्टः श्लोकवार्तिकतन्त्रवार्तिकयोः टुप्टीकायाश्च प्रणयनमकरोत् । मण्डनमिश्रः विधिविवेक-भावनाविवेक-विभ्रमविवेकाख्यानां त्रयाणां मीमांसाग्रन्थानां प्रणयनमकार्षीत् । वाचस्पतिमिश्रः न्यायकणिकायाः प्रणयनमकरोत् । पुनः पार्थसारथिमिश्रेण शास्त्रदीपिकायाः, न्यायरत्नाकरस्य, न्यायरत्नमालायाः, तन्त्ररत्नस्य च प्रणयनं कृतम् । भट्टसोमेश्वरः न्यायसुधातन्त्रसारयोः, माधवाचार्यः जैमिनिन्यायमालाविस्तरस्य, अप्पयदीक्षितः विधिरसायन-मयूखावलि-उपक्रमपराक्रम-वादनक्षमालाख्यानाम् चतुर्णाम् ग्रन्थानाम्, रामकृष्णः सिद्धान्तचन्द्रिकायाः सिद्धान्तचन्द्रिकागूढार्थविवरणस्य च, विश्वेश्वरसूरिः भाट्टचिन्तामणेः, खण्डदेवः भाट्टदीपिका-भाट्टरहस्य-भाट्टकौस्तुभ-फलैकत्ववादाख्यानाम् चतुर्णाम् ग्रन्थानाम्, भास्कररायः चिन्तामणेः, प्रभाकरः शवरभाष्यस्य वृहतीलघ्व्ये व्याख्ये, शालिकनाथमिश्रः भीरविमलायाः प्रकरणपञ्चिकायाश्च भवनाथः नयविवेकस्य, वरदराजः नयविवेकदीपिकायाः, रामेश्वरसूरिः सुवोधिन्याः, आपदेवः मीमांसान्यायप्रकाशस्य, शम्भुभट्टः प्रभावल्याः, श्रीवेङ्कटेश्वरमखी वार्तिकाभरणस्य, कृष्णयज्वा मीमांसापरिभाषायाः, रामकृष्णभट्टाचार्यः पूर्वमीमांसाधिकरणकौमुद्याः लौगाक्षिभास्करः अर्थसंग्रहस्य, भट्टशङ्करः मीमांसाबालप्रकाशस्य, वासुदेवाध्वरी कुतूहलवृत्तेः, गोविन्दमुनिः शावरभाष्यविवरणस्य ब्रह्मानन्दसरस्वती च चन्द्रिकायाः प्रणयनमकार्षुः ।

प्रभाकरमिश्रानुसारेण द्रव्य-गुण-कर्म-सामान्य-समवाय-सङ्ख्या-शक्तिसादृश्यान्यष्टौ पदार्थाः सन्ति । द्रव्याणि तु वैशेषिकाभिमतानि नवैव । गुणाश्च चतुर्विंशतिसङ्ख्याकाः वैशेपिकाभिमता एव स्वीक्रियन्ते ।

कुमारिलमतानुसारेण पदार्थौ द्विधा भावोऽभावश्च । अभावश्चतुर्धा—प्रागभाव-प्रध्वंसाभावान्योन्याभावात्यन्ताभावभेदात् । द्रव्याण्येकादश पृथिव्यप्तेजोवाय्वा-

काशकालदिगात्मामनस्तमांसि । अस्मिन् मते त्रयोदश एव गुणाः—रूपरसगन्धस्पर्श-परिमाण-पृथक्त्व-संयोग-विभाग-परत्वापरत्वगुरुत्वद्रवत्वस्नेहाख्याः ।

मुरारिमिश्रस्तु ब्रह्मैकमेव पदार्थं स्वीकरोति। अतएव मुरारिमिश्र ग्रथिता मीमांसा ब्रह्ममीमांसेत्यभिधीयते ।

मीमांसायाः प्रधानो विषयो वर्तते धर्मः । तस्य स्वरूपविषये तीर्थङ्कराणां मतभेदो दृश्यते । तथाहि—साङ्ख्याः अन्तःकरणस्य वृत्तिविशेषं यागाद्यनुष्ठानजन्यं धर्ममाहुः । बौद्धाः ज्ञानस्य ज्ञानान्तरजन्यां वासनाम्; जैनाः—पुद्गलाख्यान् देहारम्भकान् पुण्यविशेषोत्पन्नान् परमाणून्, नैयायिकाः—अदृष्टापरपर्यायं विहितकर्मजन्यं विशेषगुणम्, मीमांसैकदेशिनः अपूर्वम्, काणादाः—यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः इति प्रतिपन्नाः ।

एवं वहुविप्रतिपत्तिगोचरे धर्मशब्दार्थेऽसूत्रयद्भगवान् जैमिनिः—'चोदनालक्षणोऽर्थो धर्मः ।' इति । अयमाशयो यत्—वेदबोधितश्रेयःसाधनताको यागादिक्रियाकलापो धर्मः इति । तानि धमाणि प्रथमान्यसन्' इत्यादिश्रुत्या यागादिरूपक्रियाया एव धर्मत्वप्रतिपादनात् । लोकेऽप्रियो योगमनुतिष्ठति तं धार्मिकः इति समाचक्षते । उक्तश्चापि कुमारिलभट्टैः—

श्रेयो हि पुरुषप्रीतिः सा द्रव्यगुणकर्मभिः ।
चोदनालक्षणैः साध्या तस्मात्तेष्वेव धर्मता ।
अन्यत् साध्यमदृष्ट्वैव यागादीननुतिष्ठतः ।
धार्मिकत्वसमाख्यानं तद् यागादिति गम्यते ॥
पश्वादीनि च धर्मस्य फलानीति व्यवस्थितम् ।
चित्रागोदोहनादीनां तान्युक्तानि फलानि च ॥
तस्मात्तेष्वेव धर्मत्वं धर्माणीति च दर्शनात् ।
लिङ्गसंख्याविनिर्मुक्तो धर्मशब्दो निदर्शनम् ॥ इति ।

ज्ञानप्रामाण्यविषयेऽपि वहु विवदन्ते प्राञ्चो दार्शनिकाः। प्रामाण्याप्रामाण्यं च स्वत एव जन्यते गृह्यते चेति साङ्ख्या आमनन्ति । नैयायिकमते तु द्वे अपि परतः इति प्रतियन्ति। वौद्धास्तु ज्ञानस्याप्रामाण्यं स्वतःप्रामाण्यं च परस्स्वीकुर्वन्ति । मीमांसकाः पुनः ज्ञानस्य प्रामाण्यं स्वतः अप्रामाण्यं च परतः स्वीकुर्वन्ति । अनभ्यासदशापन्नज्ञाने सन्देहोपपत्तयेऽनुमानादिना प्रामाण्यं ज्ञायत इति नैयायिकानामाकूतम् ।

अत्र मीमांसकाः प्राहुः—यदि ज्ञानं स्वगतं प्रामाण्यं स्वतो निश्चेतुम् न शक्नुयात्, तर्हि जगति निश्चयात्यन्ताभावः स्यात् इत्यान्ध्यमेवाशेषस्य जगतः सम्पद्येत । नहि स्वतोऽनिश्चीयमानोऽर्थः परतो निश्चेतुं पार्यते परस्यापि तद्वदेवासामर्थ्यात् । अतो यत्र

क्वापि वा स्वतोग्राह्यत्वमङ्गीकरणीयम्; तद्वरमुत्सर्गतः सर्वज्ञानेष्वेव प्रामाण्यं स्वतो गृह्यत इत्यङ्गीकारः। तच्च स्वतोग्राह्यत्वं प्राथमिकज्ञानग्रहग्राह्यत्वं तदप्रामाण्याग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यत्वमिति यावत् । एतादृशं स्वतोग्राह्यत्वं मीमांसकानां त्रीष्वपि मतेषु युज्यते ।

अथाध्वरमीमांसका विग्रहवतीं देवतां नाङ्गीकुर्वन्तीति, किञ्चिदेव निरीश्वरवादिकोटौ तन्निवेशयितुमीहन्ते केचित् पण्डिताः। वस्तुतो न भगवान् जैमिनिः इत्याचख्यौ देवतानां विग्रहवत्त्वम् । भाष्यकृच्छवरस्वामी पुनः अभ्युपगम्यापि अविग्रहां शव्दमात्रमयीं देवतां कर्मणः प्राधान्यं, सर्वाङ्गपरिपूर्णतां च निरावाधमुपपादयिष्यामीति प्रौढिवादेन देवतानां विग्रहवत्त्वं निराकुर्वाणो भाष्यमाकलयाञ्चकार नावमिकस्य देवताधिकरणस्य । सोऽयं तदीयो गूढोऽभिसन्धिः ये केचिद् वेदार्थतत्त्वमनवगच्छन्तः तदुदिते कर्मणि निर्भरमनावहन्तश्च देवताविग्रहमेव वहुमन्यमाना अङ्गप्रधानादिक्रियाजातमगणयन्तः कर्मणो वैकल्पमेव सम्पादयेयुः इति देवतानां विग्रह एवासद्भूते कर्मकलापेष्वैकताने मनः सम्पद्यते इति । परमार्थं तश्च देवतानां विग्रहाभावो ब्रह्मवादिनां साङ्ख्यादीनां च सम्मतः। औपाधिकविग्रहाङ्गीकरणं तु न सामञ्जस्यमश्नुवीतेति ।

तदेतत् परमगहनं सकलशास्त्रोपकारकं मीमांसाशास्त्रम् दुर्विज्ञेयम् । यद्यपि भाष्यवार्तिकप्रभृतिभिः ग्रन्थैः सुविज्ञेयतामापादितं तथापि शास्त्रमिदं नैजं स्वाभाविकं काठिन्यं न जहाति ।

काणादं पाणिनीयं च सर्वशास्त्रोपकारकम् ।

वैशेषिकदर्शनम्

न्यायवैशेषिकदर्शनयोः भिन्नशास्त्रत्वेऽपि तयोरनेकधा साम्यं वर्तते । अथापि न्यायशास्त्रे प्रमाणविचारस्य प्राधान्यं दृश्यते किन्तु वैशेषिकदर्शने प्रमेयाणां विचारस्य प्राधान्यं वर्तते। यतो वौद्धदर्शनस्यापि ग्रन्थेष्वस्य दर्शनस्योल्लेखस्समुपलभ्यते, अतएव ज्ञायते यत् वौद्धदर्शनादपि प्राचीनं दर्शनमिदं स्यादिति ।

साहित्यम्—वैशेषिकदर्शनसूत्रमेवास्य दर्शनस्य प्राचीनतमो ग्रन्थो वर्तते। वैशेषिकदर्शनस्य प्रशस्तपादनामको विद्वान् पदार्थधर्मसंग्रहनामकं भाष्यमलिखत्। प्रशस्तपादभाष्यस्यापि वह्वचः टीकाः संजाताः—यथा व्योमशिवाचार्यकृता व्योमवती, उदयनाचार्यप्रणीता किरणावली इत्यादिकाः प्रख्यातास्सन्ति ।

द्वादशशताव्दे वल्लभाचार्यः न्यायलीलावतीनामकं वैशिषिकदर्शनस्य ग्रन्थमलिखत्। अस्य ग्रन्थस्य तिस्रो व्याख्याः प्रख्यातास्सन्ति। वर्द्धमानस्य प्रकाशः, शंकरमिश्रस्य कण्ठाभरणम्, रघुनाथशिरोमणेश्च दीधितिः । पञ्चदशशताव्दे वैशिषिकसूत्राणां

व्याख्या मिथिलायाः प्रख्यातो विद्वान् शङ्करमिश्रः उपस्कारनामकं भाष्यमलिखत् । जयनारायणभट्टाचार्यः वैशेषिकसूत्राणां विवृतिमकरोत् । एतद्व्यतिरिक्तं वीरराघवाचार्यकृता वैशेषिकसूत्राणां व्याख्या, श्रीशैलताताचार्यकृता सुगमा नाम्नी व्याख्या च समुपलभ्यते ।

अस्य वैशेषिकदर्शनसूत्रस्य प्रणेता महर्षिः काणादो वर्तते । अस्मिन् दर्शने विशेषनामकः पदार्थस्स्वीकृतो वर्तते, इति कृत्वैवास्य दर्शनस्य वैशेषिकं दर्शनं नामाभूत् । अत्र विद्वन्मण्डल्यामेवाकारिकाऽपि प्रख्याता वर्तते—

द्वित्वे च पाकजोत्पत्तौ विभागे च विभागजे ।
यस्य न स्खलिता बुद्धिः तं वै वैशेषिकं विदुः ॥

वैशेषिकदर्शनसूत्रे दशाध्यायाः सन्ति । प्रत्यध्यायं द्वे आह्निके स्तः । वैशेषिकदर्शनानुसारेण सर्वेषां पदार्थानां सप्तधा विभागः कर्तुं शक्यते—ते च पदार्थाः सन्ति—द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः । पदार्थाः सत्या विषयाः त एवास्य शास्त्रस्य विषयाः सन्ति ।

वैशेषिके दर्शने निरूपितानां विषयाणां दोषनिरूपणं कुर्वन्तः केचन प्राहुः—

अतिविरसमसारं मानवार्ताविहीनं
प्रविततवहुवेलप्रक्रियाजालदुःखम् ।
....।
उदधिसममतन्त्रं तन्त्रमेतद् वदन्ति ॥ इति ।

अथापि वैशेषिकदर्शनस्य क्रमसङ्गत्यो निरूपणमाञ्जस्येन कर्तुं शक्यते । तथाहि दिष्टेषु षट्सु पदार्थेषु चरमसमवायवर्जम् इतरपञ्चकविवेचनं प्रथमस्याध्यायस्यार्थः । तत्र प्रथमे आह्निके द्रव्यगुणकर्मणां साधर्म्यवैधर्म्ययोः निरूपणं कृतं वर्तते । द्वितीये चाह्निके सामान्यविशेष पदार्थयोः विशदं विवेचनं कृतं वर्तते । 'अन्यत्रान्त्येभ्यो विशेषेभ्यः' इति सूत्रे चरमव्यावर्तकत्वाभिधानेनैव विशेषाख्यस्य पदार्थस्य स्वरूपादिकं निरूपितं भवतीति मत्वा सूत्रकारः अग्रे किमपि नहि विवेचयामास विशेषपदार्थस्य विषये ।

द्वितीयाध्यायस्य प्रथमे आह्निके सूत्रकारः पृथिव्यादीनां पञ्चभूतानाम् सम्यङ्निरूपणं कृत्वा द्वितीये आह्निके गुणविषयिणीं व्यवस्थां निरूप्य कालदिशयोरपि निरूपणमकरोत् । अत्रैव संशयस्य हेतूनां शब्दस्य द्रव्यत्वप्रत्याख्यानपूर्वकगुणत्वनिरूपणमपि कृतम् । पुनः शब्दः कार्यो व्यङ्ग्यो वा ? इत्याशङ्कायाम् सूत्रकारः शब्दस्य कार्यत्वं व्यवस्थापयामास ।

आकाशगुणस्य शब्दस्य गुणत्वानित्यत्वस्थापनस्य कालदिङ्निरूपणात् पूर्वमेवौचित्येऽपि आत्मनो भोगे प्रसिद्धा इन्द्रियार्थाः इत्यनुपदं निर्दिक्ष्यमाणानां रूपरसगन्ध-

स्पर्शशब्दानां भोग्यविषयतया प्रधानत्वस्य अदृष्टानुरोधेन क्लृप्ते काले देशे च भोग इत्यधिकरणतया देशकालयोरुपसर्जनत्वस्य च व्यञ्जनाय शब्दविचारस्य कालदिङ्निरूपणानन्तरम् अध्यायान्ते निबन्धः ।

शरीरान्तर्वर्ती द्रव्यनिरूपणम् तृतीयाध्यायस्यार्थः । आत्मामनश्च शरीरान्तर्वर्तिनी द्रव्ये । आत्मनिरूपणस्य आह्निकद्वयव्यापित्वेऽपि मनोगतेरपि आत्मलिङ्गत्वात् मध्ये द्वितीयाह्निकारम्भे मनस्साधनम् महर्षिणा कृतम् । अस्मिन्नध्याये हेत्वाभासानां प्रथमे आह्निके विवेचनम् प्रासङ्गिकमेवावगन्तव्यम् ।

सूत्रकारः चतुर्थेऽध्याये पृथिव्यप्तेजोवायूनां नित्यानित्यभेदनिरूपणमकरोत् । तत्र प्रथमे आह्निके सूत्रकारः नित्यविषये प्रसङ्गादेव तस्याप्रत्यक्षत्वं तत्कारणम् अन्यस्य प्रत्यक्षकारणं चाह । एतत् प्रसङ्गात् रूपादिगुणोपलब्धिनिरूपणम्, द्वितीये अनित्यं त्रेधा विभज्य शरीरमात्रं निरूपितम् । विषयः भोग्यवस्तुरूपः प्रसिद्ध इति मन्यते । इन्द्रियाणि प्रति वक्तव्यम् अष्टमे ज्ञाननिरूपणावसरे ब्रवीति । यदुच्यते तत्सङ्गतमिति नियमः । न तु यद् यत् सङ्गतं तत्सर्वमुच्यत इति ।

इत्थं द्रव्यनिरूपणतत्परं द्वितीयाद्यध्यायत्रयम् । एतदनन्तरं निर्देशक्रमेण गुणनिरूपणे कर्तव्येऽपि भोक्तुरात्मनः भोग्यानां विषयाणां भोगोपकरणानां शरीरेन्द्रियाणां च निरूपणे कृते भोगहेतोः, तद्व्यवस्थापकस्य च पुण्यपापरूपस्य कर्मणः तद्द्वारा कर्म सामान्यस्यचोपस्थित्या तन्निरूपणं पञ्चमषष्ठाभ्यां क्रियते । अत्र लौकिकवैदिकभेदेन कर्मविभागमभिप्रेत्य अध्यायभेदकल्पनम् ।

अनन्तरं सप्तमप्रभृतिदशमान्तम् अध्यायचतुष्टयं गुणनिरूपणपरम् । तत्र सप्तमाद्ये रूपादयश्चत्वारो गुणाः परिमाणं च विषयीभवन्ति । द्वितीये सङ्ख्यापृथक्त्वे, संयोगविभागौ परत्वापरत्वे च । अत्र संयोगेन शब्दार्थयोः तद्भावोपस्थापनद्वारा तत्सम्वन्धोपस्थापनात् तन्निरूपणं संयोगविभागनिरूपणानन्तरं क्रियते । अत्रान्तरे इहेदमिति आधाराधेयभावव्यवस्थापकस्य समवायसम्वन्धरूपस्य षष्ठपदार्थस्य लक्षणादिकमुच्यते । अष्टमे नवमे च वुद्धिनिरूपणम् । तत्र विशिष्टप्रत्यक्षस्य सकारणस्य अष्टमाद्ये । विशिष्टप्रत्ययवत् वुद्ध्यपेक्षः शव्दव्यवहारः इन्द्रियार्थसन्निकर्षेत्येतद् घटकार्थशव्दार्थः । इन्द्रियाणा प्रकृतिश्च द्वितीये ।

वाह्यभावप्रत्यक्षेतरप्रत्यक्षं नवमाद्ये । प्रत्यक्षप्रकरणे तद्विषयतया असदिति धर्मिप्राधान्येन च अभावं निरूपयन् उद्देशसूत्रे अनिर्देशेन ज्ञापितं तस्याप्राधान्यमत्र द्रढयति । प्रत्यक्षेतरबुद्धिनिरूपणं द्वितीये । एतेन वाह्यभावप्रत्यक्षातिरिक्तज्ञाननिरूपणं नवमाध्यायकृत्यमिति फलति ।

सुखदुःखविषयं दशमाध्यायस्याद्यमाह्निकम् । इच्छाद्वेषप्रयत्नानां पञ्चमषष्ठयोः प्रसिद्धवद् व्यवहारेण तेषु विशेषेण निरूपणीयं नास्तीति मत्या तन्निरूपणात् उदास्तेति

भाति । द्वितीये कारणत्रैविध्यं निरूप्य यथोपक्रमं धर्मस्य आम्नायप्रामाण्यस्य च कीर्तनेन शास्त्रमुपसंह्रियते । ऋषिपदाभिधानेन ईश्वरसाधनमत्र विशेषः ।

इत्थं वैशेषिकं दर्शनं तारतम्ययुक्तम्, प्रमेयनिरूपणपरम् सर्वशास्त्रोपकारकम् च । वैशेषिकदर्शनस्य महत्त्वं निरूपयता केनचिदभिहितमपि—

'काणादं पाणिनीयं च सर्वशास्त्रोपकारकमि'ति ।

अद्वैतदर्शनम्

द्वयोर्भावो द्विता द्वितैव द्वैतम्, न द्वैतमद्वैतम् । अभेद इत्यर्थः । अभेदमधिकृत्य प्रवृत्तम् दर्शनम् अद्वैतदर्शनम् । इति हि अद्वैतदर्शनशब्दस्य व्युत्पत्तिः । अयमाशयः—वेदान्तेषु कानिचित् सामाधिकरण्यानि वाक्यानि श्रूयन्ते—'अयमात्मा ब्रह्म ।' 'तत्त्वमसि'। 'सर्वं खल्विदं ब्रह्म' इत्यादिकानि। एतेषु सर्वेषु जगद्ब्रह्मणो भेदोऽतिप्रतिपादितः, तयो एतेषु वाक्येषु सामानाधिकरण्येन पाठात् । तथाहि—'अयमात्मा ब्रह्म' इति वाक्यम् । जीवब्रह्मणोरभेदं प्रतिपादयति । 'तत्त्वमसि' इत्यपि वाक्यम् जीवब्रह्मणोरभेदं प्रतिपादयति । 'सर्वं खल्विदं ब्रह्म' इति हि सामानाधिकरण्यं वाक्यं जगद्ब्रह्मणोरभेदं प्रतिपादयति । यतो हि सामानाधिकरण्यं वाक्यं तत् भवति यस्मिन् वाक्ये भिन्न-भिन्नप्रवृत्तिनिमित्तवन्ति पदानि एकस्यैवार्थस्य प्रतिपादनं कुर्वन्ति । तथा चाह भगवान् व्याकरणमहाभाष्यकारः—भिन्नप्रवृत्तिनिमित्तानाम् शब्दानामेकस्मिन्नर्थे वृत्तिस्सामानाधिकरण्यमिति ।

अत्रायं प्रश्नः उदेति यत् एभिः सर्वैः वेदान्तेषु पठितैः सामानाधिकरण्यवाक्यैः प्रतिपादितं जीवब्रह्मणोः, जगद्ब्रह्मणोर्वा अभेदः किं प्रकारको वर्तते ? केन प्रकारेण तयो अभेदो भवितुमर्हति ? किं वा 'रामसुग्रीवयोरैक्यं देव्येवं समजायत ।' इति वाक्योद्दिष्टात्यन्तप्रीतिवशात् समापन्नैक्यतदैक्यं जगद्ब्रह्मणोरैक्यं वर्तते ? अथवा शरीरात्मनोरैक्यवदैक्यमत्र जीवब्रह्मणोरैक्यमौपचारिकं विवक्षितम् ? अथवा शुक्तौ यथा रजताध्यासे भ्रमात् संजाते रजतादिकं रज्जौ सर्पाध्यासे जाते वा सर्पोऽयमिति भवति भ्रमः । भ्रमापनोदे च शुक्तिरियम् रज्जुरियमिति भवति वास्तविकी प्रतीतिः तादृशम् जगद्बाधजनितमैक्यमत्र विवक्षितम् ? इति शङ्कायाम् संजातायाम्, शाङ्करमतानुयायिनः प्राहुः—यत् वस्तुतः ब्रह्मैव पारमार्थिकम् । तस्मिन्नेव जगदध्यस्तं वर्तते । अस्याध्यासस्य च कारणं अविद्यैव वर्तते । अविद्यया प्रेरितं सन्मात्रमेव तथा तथा स्वात्मनि भ्रममनुभवति । अविद्या विनाशे च जाते स्वरूपज्ञानम् सम्पद्यते । इदं च सर्वमध्यारोपापवादन्यायेन हि सम्भवति ।

तथा चाहात्र वेदान्तसारप्रणेता सदानन्दः—

'असर्पभूतायां रज्जौ सर्पारोपवद् वस्तुन्यवस्त्वारोपोऽध्यारोपः । वस्तु–सच्चिदानन्दानन्ताद्वयं ब्रह्म । अज्ञानादिसकलजडसमूहोऽवस्तु । अज्ञानं तु—

सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधिभावरूपं यत्किञ्चिदिति वदन्त्यहमज्ञ इत्याद्यनुभवात्—'देवात्मशक्ति स्वगुणैर्निगूढाम्' । इत्यादि श्रुतेश्च ।

अस्यैवाज्ञानस्य समष्टचभिप्रायेण 'अजामेकाम्' इत्यादिपु श्रुतिपु एकत्वव्यपदेशे भवति व्यष्टचभिप्रायेण च 'इन्द्रो मायाभिः पुरुरूप ईयते' इत्यादिषु च श्रुतिपु वहुत्वव्यपदेशे भवति। यदा चैतन्यं समष्टचज्ञानेनोपहितं भवति तदा 'यः सर्वज्ञः सर्ववित् परास्य शक्तिर्विविधैव श्रूयते' 'स्वाभाविकी ज्ञानवलं क्रिया च' इत्यादिश्रुतिपु समाम्नातः ईश्वरः इति व्यपदिश्यते । यदा च भवति व्यष्टचज्ञानेनोपहितः तदा जीव इति [illegible]यते । इत्थं जीवेश्वरयोः व्यपदेशः उपाधिभेदकृत एव वर्तते, न तु वास्तविकः चैतन्यस्यैकत्वात् । तदिदमज्ञानमेव मायाशव्देन अविद्याशव्देन चाभिधीयते ।

अस्याज्ञानस्य शक्तिद्वयम् भवति—आवरणशक्तिर्विक्षेपशक्तिश्च । विक्षेपशक्तचा अविद्या वस्तुनः स्वरूपं तिरोहितं करोति। आवरणशक्तचा च तत्रान्यथाप्रतीतिमुद्भावयति। यथा तमसा रज्ज्वाः स्वरूपम् आवृतं भवति। तदनन्तरम् तत्र सर्पजलधाराभूदलनादिकस्य भ्रमो भवति । तथा चोदाहृतम् वेदान्तसारकारेण—

घनच्छन्नदृष्टिः घनच्छन्नमर्कः
यथा मन्यते निष्प्रभं चातिमूढः ।
तथा बद्धवद्भाति यो मूढदृष्टेः
स नित्योपलब्धिस्वरूपोऽहमात्मा ॥ इति।

उक्तश्चापि—'विक्षेपशक्तिर्लिङ्गादि ब्रह्माण्डाग्रं जगत् सृजेत्' इति ।

अस्यात्मनः स्वरूपविषये वादिनाम् मतभेदो वर्तते । तथा च संगृहीतम् वेदान्तसार कारेण—

अतिप्राकृतास्तु 'आत्मा वै जायते पुत्रः' इत्यादि श्रुतेः स्वस्मिन्निव स्वपुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे चाहमेव पुष्टो नष्टश्चेत्याद्यनुभवाच्च पुत्र आत्मेति वदति। चार्वाकास्तु 'स वा एष पुरुषोन्नरसमयः' इत्यादि श्रुतेः प्रदीप्तगृहवत् स्वपुत्रं परित्यज्यापि स्वस्य निर्गमदर्शनात् स्थूलोऽहं कृशोऽहम् इत्याद्यनुभवाच्च, स्थूलशरीरमात्मेति वदति । अपरश्चार्वाकः 'ते ह प्राणाः प्रजापतिम् पितरमेत्य ब्रूयुः ।' इत्यादिश्रुतेरिन्द्रियाणामभावे शरीरचलनाभावात् काणोऽहं वधिरोऽहम् इत्याद्यनुभवाच्चेन्द्रियाण्यात्मेति वदति। अपरश्चार्वाकः 'अन्योन्तर आत्मा प्राणमयः' इत्यादि श्रुते; प्राणाभाव इन्द्रियादिचलनायोगादहमशनायावानहं पिपासावानित्याद्यनुभवाच्च, प्राण आत्मेति वदति। अन्यस्तु चार्वाकः—'अन्योन्तर आत्मा मनोमयः' इत्यादि श्रुतेर्मनसि सुप्ते प्राणादेरभावादहं सङ्कल्पवानहं विकल्पवानित्याद्यनुभवाच्च मन आत्मेति वदति। वौद्धस्तु "अन्योन्तर आत्मा विज्ञानमयः" इत्यादि

श्रुतेः कर्तुरभावे करणस्य शक्त्यभावादहं कर्ताहं भोक्तेत्याद्यनुभवाच्च, बुद्धिरात्मेति वदति । प्राभाकरतार्किकौ तु 'अन्योन्तर आत्मानन्दमयः' इत्यादि श्रुतेर्बुद्ध्यादीनामज्ञाने लयदर्शनादहमज्ञो अहमज्ञानी इत्याद्यनुभवाच्चाज्ञानमात्मेति वदतः । भाट्टस्तु—'प्रज्ञानघन एवानन्दमयः' इत्यादि श्रुतेः सुषुप्तौ प्रकाशाप्रकाशसद्भावान् मामहं न जानामीत्याद्यनुभवाच्चाज्ञानोपहितचैतन्यमात्मेति वदन्ति । अपरो बौद्धः 'असदेवेदमग्र आसीत्' इत्यादि श्रुतेः सुषुप्तौ सर्वाभावादहं सुषुप्तौ नासमित्युत्थितस्य स्वाभावपरामर्शविषयानुभवाच्च शून्यमात्मेति वदति ।

एतैरतिप्राकृतादिभिरुक्तेषु श्रुतियुक्त्यनुभवाभासेषु पूर्वपूर्वोक्तश्रुतियुक्त्यनुभवाभासानामुत्तरोत्तरश्रुतियुक्त्यनुभवाभासैरात्मत्ववाधदर्शनात् पुत्रादीनामनात्मत्वं स्पष्टमेव । किञ्च—'प्रत्यग्रस्थूलोऽचक्षुरप्राणोऽमना अकर्ता चैतन्यं चिन्मात्रं सदित्यादि प्रवलश्रुतिविरोधादस्य पुत्रादिशून्यपर्यन्तस्य जडस्य चैतन्यमास्यत्वेन घटादिवदनित्यत्वादहं व्रह्मेति विद्वदनुभवप्रावल्याच्च तत्तच्छ्रुतियुक्त्यनुभवाभासानां वाधितत्वादपि पुत्रादिशून्यपर्यन्तमखिलमनात्मैव ? अतस्तत्तद्भासकनित्यशुद्धवुद्धमुक्तसत्यस्वभावं प्रत्येकं चैतन्यमेवात्मवस्तु इति वेदान्तविद्वदनुभवः ।

अस्मिन्नात्मन्येव जगदध्यारोपितं वर्तते । यथा अधिष्ठानमात्रं सत्यम् आरोपितं च मिथ्या भवति तेनैव प्रकारेण जगद्भ्रमाधिष्ठानभूतं व्रह्मैव सत्यं तद्व्यतिरिक्तं व्रह्मण्येवारोपितं सर्वं मिथ्या ।

इदमेव मतम् अद्वैतदर्शनमित्याख्यायते । अस्यैव मतस्य समर्थनमकरोत् आद्यशङ्कराचार्यः । शङ्कराचार्यः—व्रह्मसूत्रभाष्य-गीताभाष्य-दशोपनिषद्भाष्य-माण्डूक्यकारिकाभाष्य–विष्णुसहस्रनामभाष्य–विवेकचूडामणि–उपदेशसाहस्री–गायत्रीभाष्यादिकानां ग्रन्थानां प्रणयनमकरोत् । अस्यैव मतस्य प्रवर्तका अभूवन् सुरेश्वराचार्यप्रभृतयः। शङ्कराचार्यस्य चत्वारः प्रख्याताः शिष्या आसन्—सुरेश्वराचार्यः, पद्मपादाचार्यः, त्रोटकाचार्यः हस्तमलकाचार्यश्च ।

तत्र सुरेश्वराचार्यः—नैष्कर्म्यसिद्धि–वृहदारण्यकोपनिषद्भाष्यवार्तिक-दक्षिणामूर्तिस्तोत्रवार्तिकपञ्चीकरणवार्त्तिकप्रभृतीनाम् ग्रन्थनाम्, पद्मपादाचार्यश्च पञ्चपादिकायाः विज्ञानदीपिकायाः प्रपञ्चसारतन्त्रटीकायाश्च प्रणयनमकरोत् ।

सर्वज्ञात्ममुनिः, वाचस्पतिमिश्रः, प्रकाशात्मा, अद्वैतानन्दः चित्सुखाचार्यः अमलानन्दः अखण्डानन्दः मधुसूदनसरस्वतीप्रभृतयो विद्वांसः अस्य अद्वैतदर्शनस्य प्रख्याताः समर्थका आसन् ।

यद्यप्यद्वैतदर्शनस्य विरोधीनि अनेकानि पश्चाद्वर्तीनि मतान्यभूवन् अथापि साम्प्रतम् अपि अद्वैतदर्शनस्य प्रचुरः प्रचारो दृश्यते दार्शनिकनिकाये । एतेनैवाद्वैतदर्शनस्य दृढमूलता प्राणवत्ता च निर्णेतुं शक्यते ।

काश्मीरीयशैवदर्शनम्

अद्वैतदर्शने स्वीक्रियते अज्ञानमेवात्मानमावृणोति। अत्रानेके अनुयोगा उदियन्ति माया कुतः समागता? सा केन प्रकारेण चैतन्यमावृणोति कस्मात् सा चैतन्यमाच्छादयति? एतेषां सर्वेषां प्रश्नानां समाधानं काश्मीरीयशैवदर्शनेन भवति। तत्र परमशिव एव परमं तत्त्वम्। सः चित्स्वरूपः तस्मादेव—सर्वे चिन्मयाः पदार्थाः आविर्भवन्ति तस्मिन्नेव च लीयन्ते। सृष्टिरपि तस्योन्मीलनमात्रम्। तथा चोक्तम्—

'अन्तःस्थितवतामेव घटते बहिरात्मनः।'

(ईश्वरप्रत्यभिज्ञा—.२)

'उन्मीलनम् अवस्थितस्यैव प्रकटीकरणम्।'

(ईश्वरप्रत्यभिज्ञा—६)

इत्थमेव प्रत्यभिज्ञादर्शनमित्यभिधीयते।

प्रत्यभिज्ञादर्शनम् काश्मीरीयशैवदर्शनस्यापरं नाम। अतीव प्राचीनमिदं दर्शनं कश्मीरप्रदेशे लब्धप्रचारमासीत्। प्राचीना इयं त्रिकदर्शनस्य माहेश्वरदर्शनस्य नाम्नाऽभिदधुः। अभिनवगुप्तपादाचार्योऽस्य दर्शनस्यातीव प्रचारकोऽभूत्।

काश्मीरीयशैवदर्शनेऽपि अज्ञानापरपर्यायभूता माया स्वीक्रियते, परन्तु सा परमतत्त्वस्य शिवस्य परतन्त्रा वर्तते। परमशिवस्य लीलयैवाज्ञानस्योदयोऽस्तमयश्च जायेते। परमशिवस्य लीलयैव माया जगत् सृजति। आप्तकामस्य शिवस्य क्रीडोपस्करभूतमेव वर्तते जगते। परमशिव एव कर्ता, स्वतन्त्रः, चिन्मयः ज्ञानस्वरूपश्च वर्तते। अत्र विमर्श एव शिवस्य स्वभावः। तस्य क्रियैव ज्ञानमत एव क्रियाज्ञानयोर्नास्ति भेदः। ज्ञानक्रिययोरौन्मुख्येमेवेच्छाफलतः अस्य दर्शनानुसारेणात्मेच्छाज्ञानक्रियाभिः युक्तो वर्तते। अस्य दर्शनानुसारेणात्मा स्वभावत एव सृष्टि-स्थिति-संहार-अनुग्रह-विलयानां कर्ताऽस्ति।

काश्मीरीयशैवदर्शनानुसारेण द्वयोर्नित्यं सामरस्यमेवाद्वैतमभिधीयते।

साहित्यम्—काश्मीरीयशैवदर्शनस्य साहित्यमतिसमृद्धम् वर्तते। अस्य दर्शनस्य सप्ततिसङ्ख्याका ग्रन्थाः जम्मूकाश्मीरसंस्कृतसीरीजद्वारा प्रकाशितास्सन्ति। तेषु प्रख्याततमाः ग्रन्थास्सन्ति निम्नाङ्किताः—वृत्तिसहितम् शिवसूत्रम्, भास्करप्रणीतो वार्तिकग्रन्थः क्षेमराजस्य विमर्शिनी, प्रत्यभिज्ञाहृदयम्, तन्त्रालोकः, तन्त्रसारः, प्रत्यभिज्ञाकारिका, ईश्वरप्रत्यभिज्ञाप्रभृतयः। अस्य मतस्य—वसुगुप्तः, कल्लटः, सोमानन्दः, उत्पलाचार्यः, अभिनवगुप्तः, भास्करः, क्षेमराजः, जयरथः प्रभृतय अनेके महान्तो विद्वांसः अस्य मतस्य प्रचारका अभूवन्।

तत्त्वमीमांसा—अस्मिन् दर्शने शिव एव परमं तत्त्वं स्वीक्रियते। शिवादेवान्यानि तत्त्वान्यभिव्यज्यन्ते । येन प्रकारेण साङ्ख्यदर्शने प्रकृतेः महानुत्पद्यते, महतोऽहङ्कारः, तस्मात् पञ्चतन्मात्राणि, पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि, मनः, पञ्चभूतानि, इति चतुर्विंशतितत्त्वात्मिका प्रकृतिः पञ्चविंशतितमं च तत्त्वं पुरुषः स्वीक्रियते तेनैव प्रकारेणास्मिन्नपि दर्शने चतुर्विंशतितत्त्वात्मिका प्रकृतिः स्वीक्रियते, पञ्चविंशतितमं च तत्त्वं पुरुषः स्वीक्रियते। किन्तु साङ्ख्यदर्शने प्रकृतिपुरुषौ नित्यौ स्वीक्रियेते । काश्मीरीयशैवदर्शने तु इमे तत्त्वे अनित्ये स्वीक्रियते । अनयोः स्थितिः परमशिवाधीना भवति । शैवदर्शने प्रकृतिर्मायाशब्देनाभिधीयते । मायेयं कला–विद्या–राग–काल–नियतिभिस्समन्विता वर्तते । इमाः मायायाः पञ्चकञ्चुकयः सन्ति । एतेषां पञ्चनामन्तःप्रवेशेन एतेषां स्वरूपस्य ज्ञानं भवति, मायातो मुच्यते च जन्तुः । तदनन्तरम् मायातः सूक्ष्मे तत्त्वे साधकस्य प्रवेशो भवति, पश्यति च शुद्धसत्त्वविशिष्टं पुरुषं शुद्धाविद्यारूपेण। एतदेव सद्विद्येत्यभिधीयते । सद्विद्यातत्त्वं ईश्वरतत्त्वे लीयते तेन च साधकः ईश्वरतत्त्वस्यानुभवस्यावसरं लभते। पुनः ईश्वरतत्त्वं सदाशिवतत्त्वे सदाशिवतत्त्वं शक्तितत्त्वे, शक्तितत्त्वं च परमशिवतत्त्वे लीयते । अयमेव तत्त्वानां लयक्रमः । परमशिवतत्त्वावस्थैव शिवशक्त्योः सामरस्यस्य अनुभवस्यावस्था भवति। इयमेव पूर्णावस्था। अस्या एवावस्थाया अवाप्तिरस्य दर्शनस्य लक्ष्यम् ।

सर्वेषु जीवेषु विद्यमानम् शिवतत्त्वमेवात्मतत्त्वं भवति। इदं चैतन्यस्वरूपम्। इदमेव पराशक्तिः, परमेश्वरः शिवः, परमशिवः इत्यादिनामभिरभिधीयते । इदमेव चेतनाचेतनात्मकेषु सर्वेषु जगतो वस्तुषु व्याप्तम् वर्तते । इदमेवाखिलस्य जगत आत्मा, एकः, देशकालाभ्यामतीतमपि शिवतत्त्वं सर्वेषु देशेषु कालेषु च वर्तमानं नित्यमनन्तञ्चास्ति । परमशिवतत्त्वमेव शैवदर्शनस्य षट्त्रिंशत्तत्त्वरूपेण भासते । विश्वोत्तीर्णं, विश्वात्मकं परमानन्दमयं, प्रकाशैकघनं शिवतत्त्वम् , पृथिवीपर्यन्तानां तत्त्वानामभेदेनैव स्फुरति । शिवतत्त्वाद् व्यतिरिक्तं ग्राह्यग्राहकस्वरूपं किमपि तत्त्वं नास्ति।

प्रकाशात्मनश्शिवतत्त्वस्य विमर्श एव स्वभावः सृष्टौ विश्वाकारत्वात्, स्थितौ विश्वप्रकाशनेन द्वारा, संहारे आत्मसात् करणेन च शिवे यत्पूर्णोऽकृत्रिमोऽहं भावो वर्तते स एव विमर्शशक्तेर्नाम्नाऽभिधीयते । विमर्शशक्तेरभावे शिव अनीश्वरो जडश्च स्यात् । आगमेषु विमर्शस्यैव–चित्–चैतन्य–परावाक्–परमात्मैश्वर्य–कर्तृत्व–स्फूर्तिप्रभृतिशब्दैः वर्णनं क्रियते । सत्स्वप्यनन्तेषु अस्याः शक्तेः रूपेषु चित्शक्ति–अनादिशक्ति–इच्छाशक्ति–ज्ञानशक्ति–क्रियाशक्तिनामकानि पञ्चैव रूपाणि प्रमुखानि सन्ति। एभिः पञ्चभी रूपैस्सम्पन्नः शिवः विश्वमिदमखिलमभिव्यञ्जयति । जगत् तु शिवस्य शक्तेर्विस्तृतं रूपमस्ति। इमां शक्तिं विना शिवः स्पन्दितुमपि नहि शक्नोति। तथा चोक्तं भगवत्पादेन शङ्कराचार्येण—

शिवः शक्त्या युक्तो यदि भवति शाक्तः प्रभवितुम्।
न चेदेवं देवो न खलु कुशलः स्पन्दितुमपि ॥ इति।

विमर्शशक्तावुन्मेषे जाते एव सृष्टिर्भवति, निमेषे चास्यां लयो भवति। उन्मेषनिमिषे इमे अनन्दी अनन्ते चास्तः। अस्योन्मेषस्यैव हेतोः सदाशिवतत्त्वस्याभिव्यक्तिर्भवति।

शैवदर्शनस्येश्वरतत्त्वे जगतः क्रमशोऽभिव्यक्तिर्भवति। अत्राहमंशो गौणो भवति इदमंशश्च प्रधानः। इदमहमोः प्रतीतिः विमर्शशक्तावुल्लसिता भवति। अत्र ज्ञानशक्तेः प्राधान्यं भवति।

सद्विद्याभूमौ—इदमहमोरैक्यं प्रतीयते। 'अयमस्मि' इति भावनास्यां भूमावुत्पद्यते। अत्र क्रियाशक्तेः प्राधान्यं भवति।

मायाभूमौ इदमहमोः पृथक् पृथक् प्रतीतिर्भवति अहमंशस्य पुरुषशक्तिरूपेण इदमंशश्च प्रकृतिरूपेण प्रतीयेते। अत्र जडे प्रमातृत्वस्याभासो भवति। मायैव कलाप्रभृतीनां पञ्चानां भावानामुपादानकारणं भवति।

सर्वज्ञः सर्वकर्ता सर्वज्ञ अपि परमशिवः शक्तिसम्पन्नः अपि स्वेच्छया संकुचितः सन् कला–विद्या–राग–काल–नियतीनां नामकानां मायायाः पञ्चकञ्चुकानां रूपेण स्वयमभिव्यज्यते।

उपर्युक्तैः पञ्चकञ्चुकैरावृतम् चैतन्यमेव पुरुष इत्यभिधीयते। परमशिवस्य स्वरूपावरकत्वात् इमानि पञ्च कञ्चुकशब्देनाभिधीयन्ते।

सर्वेषां प्राकृतिकानां मूलं प्रकृतितत्त्वमित्यभिधीयते। सत्त्वरजस्तमसां साम्यावस्थैव प्रकृतिरित्यभिधीयते। अस्यावस्थायाम् गुणेषु प्रधानगौणभावौ न भवतः।

अस्मिन् दर्शने महदहङ्कारमनांसीति त्रीणि तत्त्वानि अन्तःकरणानि सन्ति। श्रोत्रत्वक्चक्षूरसनाघ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थानि च पञ्चकर्मेन्द्रियाण्यत्र स्वीक्रियन्ते। अत्र प्राकृतकेषु तत्त्वेषु शब्दस्पर्शरूपरसगन्धाख्यानि पञ्चतन्मात्राणि पृथिव्यप्तेजोवाय्वाकाशाख्यानि पञ्चमहाभूतानि च स्वीक्रियन्ते।

येन प्रकारेण वटबीजः सम्पूर्णं वटवृक्षं भवति निहितं तेनैव प्रकारेण समस्तं विश्वं परमशिवस्य हृदि बीजे निहितं भवति। अस्य दर्शनस्यानुसारेण परमशिवे लय एव जीवनस्य लक्ष्यं भवति। परमशिवव्यतिरिक्तं नास्ति किञ्चिद्। परमशिव एव परादेवता, यस्मिल्लीयते जगदिदमखिलम्। इत्येवास्ति काश्मीरीयशैवदर्शनस्य प्रतिपाद्यम्।

विशिष्टाद्वैतदर्शनम्

लक्ष्मीनाथसमारम्भां नाथयामुनमध्यमाम्।
अस्मदाचार्यपर्यन्ताम् वन्दे गुरुपरम्पराम् ॥

अस्य दर्शनस्य आद्यप्रवर्तको भगवान् नारायणः स्वीक्रियते। भगवान् वैकुण्ठनाथ एव जीवानामुद्धाराय सर्वप्रथमस्य दर्शनस्य मूलमन्त्रस्य 'ॐ नमो नारायणाय' इति मन्त्रस्योपदेशम् ददौ स्वप्रेयस्यै श्रीदेव्यै। सा च सर्वप्रथमम् विष्वसेनाख्या श्रीवैकुण्ठसेनापतये। अतएवास्य दर्शनस्य आद्याचार्या श्रीदेव्येव स्वीक्रियते। आचार्यतत्त्वपरीक्षकेषु इयं मान्यता प्रख्याता वर्तते यत् स एवाचार्यपदभाक् भवितुमर्हति यः कस्यचन शिष्यो भवति, कस्यचन च गुरुर्भवति। भगवान् नारायणः श्रीदेव्याः गुरुस्तु वर्तते किन्तु सः कस्यचन शिष्यो नास्ति, तस्यैवाद्यपुरुषत्वात्। श्रीदेवी च भगवतो नारायणस्य प्रियशिष्या वैकुण्ठसेनापतेश्चाचार्या वर्तते अतएव सैवास्य सम्प्रदायस्याद्याचार्या वर्तते।

पुनः इदं दर्शनम् दशदिव्यसूरिभिः प्रवर्तितोऽभूत्।
भूतँ सरश्च महदाह्वयभट्टनाथश्रीभक्तिसारकुलशेखरयोगिवाहान्।
भक्तांघ्रिरेणुपरकालयतीन्द्रमिश्रान्....।

इमे दशसङ्ख्याकाः दिव्यसूरयः आसन्। दशदिव्यसूरीणागनन्तरम् अस्य दर्शनस्याचार्याणां कालः प्रारब्धो भवति।

अस्य दर्शनस्यालोके वैदुष्यपूर्णरूपेण सर्वप्रथमप्रचारकरूपेण श्रीनाथमुनेः नाम आयाति। अयमेव महाविद्वान् 'न्यायतत्त्वनामकस्य महाप्रवन्धस्य प्रणयनम् कृत्वा विशिष्टाद्वैतदर्शनस्य मूलरूपेण स्थापनामकरोत्। अस्य महापुरुषस्य वंशे श्रीमद्यामुनमुनिनामको महाविद्वान् आत्मसिद्धि–ईश्वरसिद्धि–संवित्सिद्धि–स्तोत्ररत्न–आगम–प्रामाण्य–पुरुषनिर्णयाख्यानां षण्णां ग्रन्थानाम् प्रणेता, शास्त्रार्थमहारथी, ईश्वरभट्टस्यात्मजः अभूत्। यामुनमुनेः सिद्धित्रयनामको ग्रन्थ एव श्रीभाष्यप्रणयनस्य मूलमभूत्।

श्रीमद्यामुनमुनेः पञ्चसु शिष्येष्वन्यतमस्य महापूर्णाचार्यस्य शिष्यः श्रीभाष्यवेदान्तदीपादीनाम् नवानां ग्रन्थानाम् प्रणेता, केशवयज्वानामकस्य मखिनः कान्तिमत्याः दक्षिणकुक्षौ समुत्पन्नः, विशालबुद्धिः विशिष्टाद्वैतदर्शनस्य भाष्यकारः—

'यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहतस्तदितराणि तृणाय मेने।
अस्मद्गुरोर्भगवतोऽस्य दयैव सिन्धोः
रामानुजस्य चरणौ शरणं प्रपद्ये॥'

इति श्लोकरत्नेन समभिष्टुतचरणः शेषावतारस्य प्रथया सुप्रथितः श्रीमद्रामानुजाचार्यः अस्य मतस्य पूर्णरूपेण प्रतिष्ठामकरोत्।

ब्रह्मसूत्रस्य 'अथातो ब्रह्मजिज्ञासा' इति सूत्रस्य श्रीभाष्ये ब्रह्मशब्दं व्याकुर्वता श्रीभाष्यकारेणाभिहितम्—

'ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासङ्ख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते। सर्वत्र बृहत्त्वगुणयोगे नहि ब्रह्मशब्दः। बृहत्त्वं च स्वरूपेण गुणैश्च यत्रानवधिकातिशयम् सः अस्य मुख्योऽर्थः।' इति।

भगवता रामानुजाचार्येण प्रवर्तितं दर्शनम् विशिष्टाद्वैतसिद्धान्तः, रामानुजदर्शनमित्यभिधीयते। तत्र विशिष्टाद्वैतसिद्धान्तशब्दोऽत्र मनाङ् विव्रीयते—

प्रामाणिकतया परिगृहीतमर्थमभिदधाति सिद्धान्तशब्दः। स एष मतमितमित्यर्थे वर्तते इति गृह्यताम्। द्वयोर्भावो द्विता, द्वितैव द्वैतम्। अत्र स्वार्थे अण् प्रत्ययः। इति हि द्वैतशब्दनिष्पत्तिः, भेद इत्यर्थो निर्गलितः। न द्वैतमद्वैतम्। अभेद इत्यर्थः। विशिष्टस्याद्वैतम् विशिष्टाद्वैतम्। समस्तचेतनाचेतनविशिष्टस्यैकत्वस्य सिद्धान्ते स्वीकारात्। तथा चोक्तं भगवत्पादेन वेदार्थसंग्रहे—

'अशेषचिदचिद्वस्तुशेषिणे शेषशायिने।
निर्मलानन्तकल्याणनिधये विष्णवे नमः॥' इति।

चेतनाचेतनविशिष्टस्य ब्रह्मणोऽद्वैतमेव विशिष्टाद्वैतपदवाच्यता। वस्तुतश्चिदचिदाख्यतत्त्वद्वितयं नैवेति, ब्रह्मैकमेव सत्यमिति कथयतां परेषां मतं व्यावर्त्य त्रीण्यपि तत्त्वानि वस्तुतः सत्यमिति कथनम् सिद्धान्तेऽत्र सारभूतम्।

तथा चाह न्यायसिद्धाञ्जने श्रीमद्वेदान्तदेशिकाचार्यः—'अशेषचिदचित्प्रकारं ब्रह्मैकमेव तत्त्वम्। इदमेव चेत्थम्भूतम् सामान्यतः प्रमाविषयतया विशेषतः प्रकर्षेण मेयतया च प्रमेयमित्युच्यते। तत्र प्रकारप्रकारिणोः प्रकाराणां च मिथोऽत्यन्तभेदेऽपि विशिष्टैक्यादिविवक्षया ऐक्यव्यपदेशः तदितरनिषेधश्च।'

यदत्र कैश्च सयूथ्यैरभिधीयते—'विशिष्टं च विशिष्टं च विशिष्टे सूक्ष्मचिदचिद्विशिष्टं ब्रह्म स्थूलचिदचिद्विशिष्टं ब्रह्म च, 'विशिष्टे' इत्यनेन विवक्षिते। विशिष्टयोरद्वैतम् विशिष्टाद्वैतम्; सूक्ष्मचिदचिद्विशिष्टस्य ब्रह्मणः स्थूलचिदचिद्विशिष्टस्य च ब्रह्मणः ऐक्यप्रतिपादनाद्विशिष्टाद्वैतमिति व्यपदेशः'। इति। नात्र विशेषत उपपत्तीरभियुक्ता अभिमन्यन्ते विशिष्टस्याद्वैतमित्येव सुशोभनम्।

श्रुतिवाक्येष्वभिधीयमानेषु तत्र द्वैविध्यमवलोक्यते। कानिचन श्रुतिवाक्यानि स्पष्टमेव प्रतिपादयन्ति। कानिचन तु स्पष्टमभेदमवबोधयन्ति। तथाहि—'क्षरं प्रधानममृताक्षरं हरः क्षरात्मानावीशते देव एकः।' 'पृथगात्मानं प्रेरितारं च मत्त्वा' 'ज्ञाज्ञौ द्वावजावीशनीशौ' 'नित्यो नित्यानां चेतनश्चेतनानाम्' 'द्वा सुपर्णा सयुजा सखाया, समानं वृक्षं परिषस्वजाते'। 'तयोरन्यः पिप्पलं स्वादवन्ति अनश्नन् अन्यो अभिचाकशीति।' इत्यादीनि श्रुतिवाक्यानि चिदचिदीश्वररूपतत्त्वत्रयसद्भावबोधनद्वारा भेदं प्रतिपादयन्ति। 'नेह नानास्ति किञ्चन' 'सदेव सोम्येदमग्र आसीत्' 'सर्वं खल्विदं ब्रह्म' 'ऐतदात्म्यमिदं सर्वम्' 'तत्त्वमसि' इत्यादीनि वाक्यानि नानावस्तु-

सद्भावनिषेधद्वारा अभेदमाचक्षते । एवं च श्रुतिवाक्येषु क्वचिद् भेदप्रतिपादनम्, क्वचिदभेदप्रतिपादनमिति मिथो विरोधो विस्पष्टः विरुद्धार्थबोधकत्वरूपमवद्यं श्रुतिषु नैव लब्धास्पदं भवितुमर्हति। विरोधस्तु स्पष्टमीक्ष्यते इति प्रदर्शितम् । विरोधनिरसनपूर्वकम् समन्वयसम्पादनमावश्यकं श्रुतिधनानां विवेकिनाम् ।

ब्रह्मैकमेव सत्यमिति वदन्तो द्वैतिनस्तावत् अभेदप्रतिपादकान्येव श्रुतिवाक्यानि प्राधान्येन परिगृह्य भेदप्रतिपादिकाः श्रुतीरुपैक्षन्त । एवं द्वैतिनो भेदप्रतिपादकान्येव श्रुतिवाक्यानि प्राधान्येन परिगृह्णन्तः अद्वैतबोधिनी श्रुतीर्व्यसृजन् ।

मध्ये अन्यदपि वक्तव्यमेव शिष्यते—'यस्यात्मा शरीरम्, यस्य पृथिवी शरीरम्' 'य आत्मनि तिष्ठन्' इत्यादीनि भगवतः पृथिव्याद्यात्मान्तं सकलवस्त्वन्तर्यामित्वप्रतिपादकानि श्रुतिवाक्यानि तु व्यसृजन् सुबालोपनिषदाद्यन्तर्यामि ब्राह्मणवाक्यानाम् उभयेषामपि मते नास्ति खल्वादरणम्। एवञ्च मतान्तरद्वितये अनेकश्रुतिवाक्यानाम् अमुख्यार्थकल्पनात्मकमुपेक्षणम् विसर्जनं वा बलीयान् दोषः ।

विशिष्टाद्वैतिनः उपर्युक्त त्रैविध्यान्यपि श्रुतिवाक्यानि समरूपमाद्रियन्ते । नैकस्मिन्नपि श्रुतिवाक्ये अमुख्यार्थकल्पनां सहन्ते । कथमिति चेत् अन्ततः प्रदर्शितानाम् 'यस्यात्मा शरीरमि'त्यादीनां श्रुतिवाक्यानां घटकश्रुतिरिति संज्ञा । भेदमभेदं चाविरोधेन घटयितुम् शक्तान्यन्तर्यामि ब्राह्मणवाक्यानि इति हेतुना एतेषु घटकश्रुतिसंज्ञा सुघटिता । अद्वैतश्रुतिप्रतिपन्नस्य अभेदस्य, द्वैतश्रुतिप्रतिपन्नस्य भेदस्य च इत्थं घटना भवति—

'मिथो भेदं तत्त्वेष्वभिलपति भेदश्रुतिरथो,
विशिष्टैक्यादैक्यश्रुतिरपि च सार्था भगवति ।
इमावर्थौ गोप्तुं निखिलजगदन्तर्यमयिता,
निरीशो लक्ष्मीशः श्रुतिभिरपराभिः प्रणिदधे' ॥ इति ।

विशिष्टाद्वैतदर्शने निम्नप्रकारेण पदार्थानां विभागः स्वीक्रियते—

सर्वं पदार्थजातं प्रमाणप्रमेयभेदेन द्विधा भिन्नम्। प्रमाणानि त्रीण्येव। प्रमेयं द्विविधम्—द्रव्याद्रव्यभेदात् । द्रव्यं द्विविधम्—जडमजडं चेति । जडं च द्विविधम् —प्रकृतिः । कालश्चेति। प्रकृतिश्चतुर्विंशतितत्त्वात्मिका । कालस्तु—उपाधिभेदेन त्रिविधः। अजडं तु द्विविधम्—पराक् प्रत्यक् चेति। प्रत्यगपि द्विविधः—जीवेश्वरभेदात् । जीवस्त्रिविधः—बद्धमुक्तनित्यभेदात् । बद्धोऽपि द्विविधः—बुभुक्षुमुमुक्षुभेदात् । बुभुक्षुर्द्विविधः अर्थकामपरो धर्मपरश्चेति । धर्मपरो द्विविधः—देवतान्तरपरो भगवत्परश्चेति । मुमुक्षुर्द्विविधः—कैवल्यपरो मोक्षपरश्चेति । मोक्षपरो द्विविधः—भक्तः प्रपन्नश्चेति । प्रपन्नश्च द्विविधः—एकान्ती परमैकान्ती चेति । परमैकान्ती द्विविधः—दृप्तार्तभेदात् ।

ईश्वरः पञ्चधा—परव्यूहविभवान्तर्याम्यर्चावतारभेदात् । पर एकधा । व्यूहश्चतुर्धा—वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धभेदात् । केशवादि व्यूहान्तरमत्रैवान्तर्भवति । मत्स्यादयो विभवा पुनरनन्ताः । अन्तर्यामी प्रतिशरीरमवस्थितः । अर्चावतारस्तु—श्रीरङ्गवेङ्कटाद्रिहरिगिरियादवाद्रिघटिकाचलादिषु सकलमनुजनयनविषयतां गतो मूर्तिविशेषः । अद्रव्यं तु—सत्त्वरजस्तमश्शब्दस्पर्शरूपरसगन्धसंयोग शक्तिभेदाद् दशधैव ।

(यतीन्द्रमतदीपिका)

अस्य मतस्य प्रचारका अनेके आचार्या अभूवन् । किन्तु तेषु वेदान्तदेशिकाचार्यः, श्रुतप्रकाशिकाचार्यः, श्रीरङ्गरामानुजाचार्यः लोकाचार्यश्च प्रख्याततमाः सन्ति ।

धन्यासि वैदर्भिगुणैरुदारैः

वैदर्भी ललितक्रमा ।
समग्रगुणसम्भिन्ना वैदर्भी रीतिः ।

विशिष्टो लेखनप्रकार एव रीतिशब्देनाभिधीयत साहित्यशास्त्रे । सर्वप्रथमं वामन एव स्वकीये काव्यालङ्कारनामके ग्रन्थे रीतेः स्थानमुल्लेखयामास । वामनात् पूर्ववर्तिनः आचार्याः रीतिम् मार्गशब्देनाभिदधुः । काव्यादर्शकारः आचार्यो दण्डी रीतिं मार्गशब्देनाह । अलङ्कारशास्त्रस्याद्याचार्यो भामहः वैदर्भगौडमार्गयोः विस्तरेण समालोचनामकार्षीत् । रीतिशब्दस्य लोकप्रियता तु तदा बभूव यदा वामनाचार्यः काव्यालङ्कारनामके स्वकीये ग्रन्थे 'रीतिरात्मा काव्यस्य' इत्युक्त्वा, रीतेः काव्यात्मत्वं संस्थापयामास । पुनः रीतिं परिभाषमाणेन तेनाभिहितम्—'विशिष्टा पदरचना रीतिः' (काव्या० १।२।७)। विशेषं च निरूपयन्नाचार्यो वामनः प्रावोचत्—'विशेषो गुणात्मा' इति । इत्थम् ओजः प्रसादादिकाः गुणाः यस्यां रचनायां वैशिष्टचमुचत्पादयन्ति सा पदरचनैव रीतिशब्दवाच्या भवतीति वामनस्याभिप्रायः ।

ध्वन्यालोककारः रीतिम् संघटनाशब्देनाभिधत्ते । सम्यक् घटनैव सङ्घटना कथ्यते । अतएव साहित्यदर्पणकार आचार्यो विश्वनाथः प्राह—

"पदसंघटना रीतिरङ्गसंस्थाविशेषवत् ।
उपकर्त्री रसादीनाम्··· ··· ··· ··· ····॥"

रीतेः रसैः साकम् नेदिष्ठस्सम्बन्धो वर्तते इतीममर्थं ध्वन्यालोककार आनन्दवर्धन एव प्राह । रीतिसम्प्रदायस्याचार्यैस्तु अस्य तत्त्वस्याति अल्पं विवेचनं कृतवन्तः । तथाहि—

अस्फुटस्फुरितकाव्यतत्त्वमेतद् यथोदितम् ।
अशक्नुवद्भिर्व्याकर्तुं रीतयः संवर्तिताः ॥ इति ।

आनन्दवर्धनाचार्यः रीते स्वरूपं निरूपयन्नाह—

'गुणानाश्रित्य तिष्ठन्ती माधुर्यादीन् व्यनक्ति सा । रसान्....।' इत्थं रीतिगुणयोः सम्बन्धमपि सर्वप्रथमम् आनन्दवर्धनाचार्य एव विशदयामास ।

रीतीनाम् संख्या सामान्येन तिस्र एव वर्तते—वैदर्भी गौडी पाञ्चाली चेति । प्रतीयते यत् एतासां रीतीनाम् नामानि तत्तद्देशाश्रितानि सन्ति । यथा विदर्भदेशभवत्वात् वैदर्भी, पाञ्चालदेशभवत्वात् पाञ्चालीति, गौडदेशभवत्वात् गौडीति । किन्तु अत्राचार्यो वामनो वक्ति यत्—

'विदर्भादिषु दृष्टत्वात् तत्समाख्या विदर्भगौडपाञ्चालेषु तत्रत्यैः कविभिर्यथास्वरूपमुपलब्धत्वात् तत्समाख्या । न पुनर्देशैः उपक्रियते काव्यानाम् ।' इति ।

रुद्रटः चतुर्थीम् लाटीयामपि रीतिं स्वीकृतवान् । आनन्दवर्धनाचार्यः रीतीनाम् रूपनियामकवृत्तीनां परस्परसम्बन्धस्य विशदां चर्चामकरोत् ध्वन्यालोके ।

वैदर्भी रीतिः—तिसृषु वृत्तिषु माधुर्यगुणाश्रिता भवति वैदर्भी रीतिः । वैदर्भी रीतिं परिभाषमाण आचार्यो वामनः प्राह—

'अस्पृष्टदोषमात्राभिः समग्रगुणगुम्फिता ।
विपञ्चीस्वरसौभाग्या वैदर्भी रीतिरिष्यते' ।। इति ।

अस्या रीते रचना माधुर्यगुणसम्पन्ना, सुकुमारवर्णवती, समासरहिता अथवा मध्यसमासा सौकुमार्यवती च भवति । अभिहितं चापि काव्यप्रकाशे—

'मूर्ध्निवर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू ।
आवृत्तिर्मध्यवृत्तिर्वा माधुर्ये घटना तथा ।।'

तथा चास्या उदाहरणम्—

'अनङ्गं रङ्गप्रतिमं तदङ्गं भङ्गीभिरङ्गीकृतमानताङ्ग्याः ।
कुर्वन्ति यूनाः सहसा यथैताः स्वान्तानि शान्तापरिचिन्तितानि' ।।

आचार्यो दण्डी वैदर्भमार्गस्य प्राणरूपेण स्वीकरोति दशगुणान् । तथाहि—

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजः कान्तिसमाधयः ।
इति वैदर्भमार्गस्य प्राणा दशगुणाः स्मृताः ।।

आचार्यो वामनः वैदर्भ्याः रीतेरुदाहरणं अभिज्ञानशाकुन्तलस्य निम्नांकितम् श्लोकम् स्वीचकार—

'गाहन्ताम् महिषाः निपानसलिलं शृङ्गैर्मुहुस्ताडितम्
छायाबद्धकदम्बकं मृगकुलं रोमन्थमभ्यस्यतु ।

विश्रब्धं कुरुतां वराहततिभिर्मुस्ताक्षतिः पल्वले
विश्रान्तिं लभतामिदं च शिथिलज्याबन्धमस्मद्धनुः' ।। इति

इयमेव वैदर्भी रीतिः कविभिर्ग्राह्या भवति एतस्यां गुणानां साकल्यात् । तथा चोक्तम् वामनेन—

'तासां पूर्वाग्राह्या गुणसाकल्यात् ।
न पुनरितरे स्तोकगुणत्वात् ॥' (काव्या० २–१४, १५)

कविराजो विश्वनाथः निम्नप्रकारेण वैदर्भी रीतिं निरूपयति—

माधुर्यव्यञ्जकैर्वर्णैः रचना ललितक्रमा ।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते ॥

इयमेव रीतिः कविजनानां प्रशंसास्पदा भवति। इमामेव रीतिमाश्रित्य महाकविः कालिदासः कविकुलगुरोः प्रथया प्रथितो वभूव । अस्या एव रीतेर्धन्यतां प्रतिपादयन् महाकविः श्रीहर्षः नैषधीयचरिते प्रावोचत्—

'धन्यासि वैदर्भिगुणैरुदारैः यया समाकृष्यत नैषधोऽपि ।
इतः स्तुतिः का खलु चन्द्रिकायाः यदब्धिमप्युत्तरलीकरोति' ॥
(नैषधीयः ३।११६)

अपि च—

गुणानामास्थानीं नृपतिलकनारीति विदितां
रसस्फीतामन्तस्तव च तव वृत्ते च कवितुः ।

भवित्री वैदर्भीमधिकमधिकण्ठं रचयितुम्
परिरम्यक्रीडा चरणशरणामन्वहमयम् ॥

नवसाहसाङ्कचरितप्रणेता पद्मगुप्तपरिमलस्तु वैदर्भमार्गानुसरणमतिकठिनं मनुते। अस्य कवेर्मतानुसारेण वैदर्भमार्गो निस्त्रिंशधारेव वर्तते । तथाहि—

'तत्त्वस्पृशास्ते कवयः पुराणाः
श्रीभर्तृमेण्ठप्रमुखा जयन्ति ।

निस्त्रिंशधारासदृशेन येषाम्
वैदर्भमार्गेण गिरः प्रवृत्ताः ॥' इति ।

विदर्भदेशवासिनां प्रशंसां कुर्वन् आचार्यो नीलकण्ठदीक्षितः प्रवक्ति—

अनभ्रवृष्टिः श्रवणामृतस्य सरस्वतीविभ्रमजन्मभूमिः ।
वैदर्भिरीतिः कृतिनामुदैति सौभाग्यलाभप्रतिभूः पदानाम् ॥ इति ।

अतएव नूनं समग्रगुणपूर्णा वैदर्भी रीतिः ।

वृत्तयो नाट्यमातरः

सर्वेषामेव काव्यानां वृत्तयो मातृकाः स्मृताः ॥ (नाट्यशास्त्र)

नाट्यशास्त्रस्य द्वाविंशतितमेऽध्याये वृत्तीनां विस्तृतं वर्णनं समुपलभ्यते । नाट्यशास्त्रानुसारेण यदा प्रलयकाले भगवान् विष्णुः शेषशय्यां सुप्त आसीत् तदात्वे युद्धेप्सू मधुकैटभौ ब्रह्माणमाह्वयताम् । तदा ब्रह्मा भगवन्तम् विष्णुं प्रबोधयामास । तस्मिन् काले भगवान् विष्णुः तयोर्हननाय याः याः चेष्टा अकार्षीत् तास्ताः एव वृत्तिशब्देनाभिधीयन्ते स्म । ताश्च वृत्तयः चतस्रः सन्ति—भारती, सात्त्वती, कैशिकी आरभटी च । तथाहि—

'ततो देवेषु निक्षिप्तो द्रुहिणेन महात्मना ।
पुनर्नाट्यप्रयोगे च नानाभावरसान्विता ॥

वृत्तिसंज्ञाकृता ह्येषा नाना भावरसाश्रया ।
चरितैस्तस्य देवस्य द्रव्यं यद् यादृशं कृतम् ॥

ऋषिभिस्तादृशी वृत्तिः कृता वाक्याङ्गसम्भवा ।
नाट्यवेदसमुत्पन्ना वागङ्गाभिनयात्मिका' ॥

भारत्याः वृत्तेरुत्पत्तिविषये नाट्यशास्त्रकारः प्राह—

'भूमिसंस्थानसंयोगैः पदन्यासैस्तदा हरेः ।
अतिमारोऽभवद् भूमेः भारती तत्र निर्मिता' ॥ इति ।

सात्त्वत्याः वृत्तेरुत्पत्तिविषये नाट्यशास्त्रकारेणाभिहितम्—

'वल्गितैः शार्ङ्गधनुषः तीव्रैर्दीप्तिकरैरथ ।
सत्त्वाधिकैरसम्भ्रान्तैः सात्त्वती तत्र निर्मिता ॥' इति ।

कैशिक्या विषये भरतमुनिनाऽभिहितम्—

'विचित्रैरङ्गहारैस्तु देवो लीलासमुद्भवैः ।
बबन्ध यच्छिखापाशं कैशिकी तत्र निर्मिता ॥' इति ।

आरभट्याः विषये चाभिहितं नाट्यशास्त्रकारेण—

'संरम्भवेगबहुलैः नानाचारीसमुत्थितैः ।
नियुद्धकरणैश्चित्रैः निर्मितारभटी ततः ॥' इति ।

भरतमुनिनेदमप्यभिहितम्—भारत्या उद्भवः ऋग्वेदात्, सात्त्वत्याः यजुर्वेदात्, कैशिक्याः सामवेदात् आरभट्याश्चाथर्वभेदात् समभवत् ।

वृत्तेः स्वरूपं निरूपयताचार्येणाभिनवगुप्तपादेनाभिहितम्—अभिनवभारत्याम् ।

'तस्माद् व्यापारः पुमर्थसाधको वृत्तिः । स च सर्वत्र वर्ण्यते इत्यतो वृत्तिः काव्यस्य मातृका इति । न किञ्चिद्व्यापारशून्यं वर्णनीयमस्ति ।'

किन्तु वृत्तिरियम काव्यमात्रे सीमिता नास्ति । अभिनवगुप्तपादानुसारेण तु सम्पूर्णे जगति व्याप्ताः सन्ति चतस्रो वृत्तयः । तथाहि—"आस्तां काव्यार्थः सर्वो हि संसारो

वृत्तिचतुष्केण व्याप्तः ।'' अतएव सः प्राह—'कायवाङ्मनसां चेष्टा एव सह वैचित्र्येण वृत्तयः ।' भोजराजोऽपि वृत्तिलक्षणमतिमनोज्ञमाह सरस्वतीकण्ठाभरणे—

'या विकाशेऽथ विक्षेपे संकोचे विस्तरे तथा ।
चेतसो वर्तयित्री स्यात् सा वृत्तिः···· ···· ···· ।' इति ।

दशरूपककारो धनञ्जयो वक्ति—'तद् व्यापारात्मिका वृत्तिः ।' इति । अस्य वाक्यस्य व्याख्यायां धनिको वक्ति—प्रवृत्तिरूपो नेतृव्यापारस्वभावो वृत्तिः ।

नाटचदर्पणस्य प्रणेता रामचन्द्रो वक्ति यत् भरतमुनिना नाटकप्रसङ्गे कृतं वृत्तीनां वर्णनं तूपलक्षणमात्रं वर्तते । सा तु अभिनेयानभिनेययोरुभयप्रकारयोरेव काव्येषु समुपलभ्यते । वृत्तिशून्यस्य व्यापारस्यासंभवात् । तथाहि—

'नाटच इति प्रस्तावापेक्षम् । तेनानभिनेयेऽपि काव्ये वृत्तयो भवन्त्येव । नहि व्यापारशून्यं वर्णनीयमस्ति ।

नाटचकर्तुः कवेरन्तःकरणं यदा वृत्तिभिरभिभूतं भवति तदैव तस्य तूलिका काव्यरत्नं प्रस्तौति । अतएव भरतमुनिः वृत्तीः काव्यमातृरूपेणाह—

'सर्वेषामेव काव्यानां वृत्तयो मातृकाः स्मृताः ।
एवमेते बुधैर्ज्ञेया वृत्तयो नाटचमातरः ॥' इति च ।

ता इमा वृत्तयश्चतस्रः सन्ति—भारती, सात्त्वती कैशिकी आरभटी च । तत्र भारतीवृत्तिः शब्दप्रधाना भवति । तद्व्यतिरिक्तास्तिस्रश्चार्थप्रधाना भवन्ति वृत्तयः ।

भारतीम् व्युत्पादयन् भरतमुनिराह—'भाषतो वाक्यभूयिष्ठा भारतीयं भविष्यति ।' इति । धनञ्जयानुसारेण तु—नटो भरत इत्यभिधीयते । एतेषां नटानां वाग्विन्यासाश्रिता भवति भारती वृत्तिः । तथाहि—भारती संस्कृतप्रायो वाग्व्यापारो नटाश्रयः ।' इति । कविराजो विश्वनाथस्तु—'भारती संस्कृतप्रायो वाग्व्यापारो नराश्रयः ।' इति वृत्तेर्लक्षणं भवति । एतासां वृत्तिव्युत्पत्तीनां समालोचनेन ज्ञायते यत् वृत्तिः संस्कृतमयी वाक्प्रधाना च भवति । नाटचशास्त्रे चाभिहितम्—

'या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतवाक्ययुक्ता ।
स्वनामधेयैर्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः ॥' इति ।

अस्याः भारतीवृत्तेः चत्वारो भेदाः भवन्ति—प्ररोचना, आमुखम्, वीथी, प्रहसनञ्चेति । सात्त्वतीं वृत्तिं निरूपयन् भरतमुनिराह नाटचशास्त्रे—

'या सात्त्वतेनेह गुणेन युक्ता, न्यायेन वृत्तेन समन्विता च ।
हर्षोत्कटा संहृतशोकभावा सा सात्त्वतो नाम भवेत्तु वृत्तिः' ॥

अस्याः अपि वृत्तेश्चत्वारि अंगानि भवन्ति—

उत्थापकः, परिवर्तकः संलापकः संघातकश्च ।

कैशिकीवृत्तेः सम्वन्धम् भरतमुनिः भगवतो विष्णोः केशपाशसंयमनेन सह प्रादर्शयत् भरतमुनिः । अस्याः स्वरूपनिरूपणे मुनिनाभिहितम्—

‘या श्लक्ष्णनेपथ्य विशेषचित्रास्त्रीसंयुता या बहुनृत्तगीता ।
कामोपभोगप्रभवोपचारा तां कैशिकीं वृत्तिमुदाहरन्ति ॥’ इति ।

कैशिक्या अपि नर्म-नर्मस्फूर्ज-नर्मस्फोट-नर्मगर्भाख्याः चत्वारो भेदा भवन्ति ।

साहस्यथत्रोद्धपुरुषवाचकादारभटशब्दात् आरभट्याः वृत्तेर्व्युत्पत्तिस्स्वीक्रियते । अस्याः स्वरूपनिरूपणे नाट्यशास्त्रकारो भरतमुनिराह—

प्रस्तावपातप्लुतलङ्घितानि
चान्यानि मायाकृतमिन्द्रजालम् ।

चित्राणि युक्तानि च यत्र नित्यम्
तां तादृशीमारभटीं वदन्ति ॥

अस्याश्चत्वारो भेदाः—संक्षिप्तक–अवघातक–वस्तुस्थापन–संफेटाख्यास्सन्ति वर्णिताः ।

सहृदयानाम् रसभावादिकानाम् संचारणायैव नाटकेषु वृत्तीनां योजना क्रियते । रसाविकरणमेव प्रधानं लक्ष्यं भवति नाट्यस्य । अतएव भरतमुनिस्तस्याः तस्याः वृत्तेः संवन्धं तेन तेन रसेन साकम् संस्थापयन् प्राह नाट्यशास्त्रे—

शृङ्गारे चैव हास्ये च वृत्तिः स्यात् कैशिकीति सा ।
सात्त्वती नाम सा ज्ञेया वीररौद्राद्भुताश्रया ।
भयानके च वीभत्से रौद्रे चारभटी भवेत् ।
भारती चापि विज्ञेया करुणाद्भुतसंश्रया ॥

अलङ्कारशास्त्रे वृत्तिशब्देन शब्दस्य अभिधालक्षणाव्यञ्जनाख्याः वृत्तयः, अनुप्रासस्य प्रकाराः समासयुक्तपदानाम् प्रकाराः, भारत्यादि पूर्वोक्ता नाट्यवृत्तयश्चाभिधीयन्ते ।

ध्वन्यालोककारस्यानन्दवर्धनस्याभिनवगुप्तपादाचार्यस्य च मतम् वृत्तीनाम् विषयेऽत्यन्तमौलिकम् वर्तते । आनन्दवर्धनाचार्येणाभिहितम् यत् काव्येषु द्विप्रकारवतीनाम् वृत्तीनामुपयोगः क्रियते—कैशिक्यादि नायवृत्तीनाम् परुषादि अनुप्रासजातीनाञ्च । तत्र कैशिक्यादि वृत्तयः रसानुगुणाः औचित्युक्तार्थरूपाश्च सन्ति । अनुप्रासजातयश्च रसानुकूलशब्दव्यवहारस्वरूपास्सन्ति । तथाहि—

रसानुगुणत्वेन व्यवहारोऽर्थशब्दयोः ।
औचित्यवान् यस्ता एव वृत्तयो द्विविधाः हि स्मृताः ॥ इति ।

(ध्वन्यालोकः)

अतएव रसानुकूलत्वस्वरूपमेव वृत्तीनां वृत्तित्वम् वर्तते। उपनागरिकाद्या वृत्तयः शब्दतत्त्वाश्रिताः सन्तिः, कैशिकाद्या वृत्तयश्च अर्थतत्त्वाश्रिताः।

शब्दतत्त्वाश्रयाः काश्चिदर्थतत्त्वयुगोऽपराः।
वृत्तयोऽपि प्रकाशन्ते ज्ञातेऽस्मिन् काव्यलक्षणे॥ इति।

(ध्वन्यालोकः)

अभिनवगुप्तपादाचार्यानुसारेण तु—'वर्तन्ते अनुप्रासभेदाः आसु इति वृत्तयः' इत्येवास्ति वृत्तिशब्दस्य व्युत्पत्तिः। रीतिवृत्त्योः गुणेभ्यो नतिरिक्तत्वं प्रतिपादयन् अभिनवगुप्तपादाचार्यः प्राह लोचने—

'नैव वृत्तिरीतीनां गुणव्यक्तित्वं सिद्धम्। तथाहि—अनुप्रासनामेव दीप्तमसृणमध्यमवर्णनीयोपयोगितया परुषत्वललितत्वमध्यमत्वस्वरूपविवेचनाय वर्गत्रयसम्पादनार्थम् तिस्रोऽनुप्रासजातयो वृत्तयः इत्युक्ताः।

इत्थम् अभिनवगुप्तपादानुसारेणानुप्रासास्त्रेधा भवन्ति—परुषानुप्रासः, मसृणानुप्रासः, मध्यमानुप्रासश्च। तत्र परुषानुप्रासस्य दीप्तानां वर्णनप्रसङ्गे भवति। इत्थं परुषावृत्तिः वीररौद्रवीभत्सरसानां वर्णनानुकूला भवति। अस्याः आरभटया साकम् पूर्णरूपेण सामञ्जस्यो वर्तते। मसृणानुप्रास एव उपनागरिकावृत्तिः कथ्यते। अस्याः प्रयोगो ललितविषयाणां वर्णनप्रसंगे क्रियते। मध्यमानुप्रास एव ग्राम्या अथवा कोमलावृत्तिशब्देनाभिधीयते। अस्याः प्रयोगः हास्यरसस्य वर्णने क्रियते। तथा चोक्तम् ध्वन्यालोकलोचने—

नागरिकया उपमिता अनुप्रासवृत्तिः शृङ्गारादौ विश्राम्यति। परुषा दीप्तेषु रौद्रादिषु। कोमला कोमले अस्यादौ। तथा 'वृत्तयः काव्यमातर' इति यदुक्तं मुनिना तत्र रसोचित एव चेष्टाविशेषो वृत्तिः। इति।

अनेनायं स्पष्टो भवत्यर्थो यत् आनन्दवर्धन–अभिनवगुप्तयोरनुसारेण वृत्तयः काव्यसौन्दर्यसाधनभूतास्सन्ति।

काव्यप्रकाशकारानुसारेण तु वृत्तयस्तिस्रो भवन्ति—उपनागरिका परुषा कोमला च। तथा चोक्तं काव्यप्रकाशकारेण—

'माधुर्यव्यञ्जकैर्वर्णैः उपनागरिकेष्यते।
ओजः प्रकाशकैस्तैस्तु परुषा कोमला परैः'॥ (का० प्र० ९।३)

मम्मटानुसारेणेमा वृत्तयः एव रीतिशब्देनाभिधीयन्ते। तेनाभिहितमपि—

केषाञ्चिदेता वैदर्भी–प्रमुखा रीतयो मताः।
एतास्तिस्रो वृत्तयो वामनादीनां मते वैदर्भी–गौडीया–
पाञ्चाल्याख्या रीतय उच्यन्ते। (काव्यप्रकाशः ९।४)

भोजस्तु—गम्भीरा, [ओजस्विनी, प्रौढा, मधुरा, निष्ठुरा, मधुरा, श्लथा, कठोरा,

कोमला, मिश्रा, परुषा, ललितामिता चेति द्वादश भेदान् वृत्तीनां स्वीकृतवान् । सः द्वादश भेदान् अनुप्रासवृत्तीनामपि स्वीकृतवान् । ते च भेदा इमे सन्ति–कार्णाटी, कौन्तली, कङ्की, कोकणी, वाणवासिका, द्राविणी, माथुरी, मात्सी, मागधी ताम्रलिप्तिका, औड्री, पौण्ड्री च । एतासाम् अनुप्रासवृत्तीनां नामानि भोजराजः भौगोलिकाधारानुसारेण चकार ।

वृत्तिविषयकानेन विवेचनेनायमर्थः स्पष्टो भवति यत् काव्येषु वृत्तिविषयकास्त्रयः सिद्धान्तास्सन्ति । प्रथमवारं तु कैशिकी, भारती, आरभटी, सात्त्वती चेति चतस्रो नाटचवृत्तयो निरूपिता अभूवन् । अलङ्कारिकाः उपयोगित्वमनुभूय काव्येष्वपि केनचिद् वैशिष्टचेन साकमासां प्रयोगमकार्षुः । अनुप्रासस्य रसानुकूलवर्णसन्निवेशोऽपि वृत्तिशब्देनाभिहितोऽभूत् । उद्भटादयः अनुप्रासवृत्तीनां विस्तृतं विवरणमकार्षुः । रुद्रट-आनन्दवर्धनाभिनवगुप्ताः स्वग्रन्थेषु वृत्तीनां काव्येषु स्वतन्त्र सत्तां स्वीकृतवन्तः इति ।

भाषायाः स्वरूपम्

भाषायाः परिभाषाः—भाषाशब्दो हि भाषणार्थकाद् भाष् धातोर्हि व्युत्पद्यते । पाश्चात्यो विद्वान् प्लेटो वक्ति यत् विचार आत्मनः मूकोऽथवा ध्वन्यात्मको वार्तालापो वर्तते, किन्तुया सः नैजं ध्वन्यात्मकं रूपमादाय मुखेनाभिव्यज्यते तदा सा भाषेत्यभिधीयते । प्रसिद्धो भाषावैज्ञानिकः स्वीटो वक्ति यत्—'ध्वन्यात्मकैः शब्दैः विचाराणामभिव्यञ्जनमेव भाषेत्यभिधीयते ।

कृष्णयजुर्वेदे भाषाया विषयेऽभिहितम्—

'वाग्वै पराक्यव्याकृतावदन्ते देवा इदमाब्रुवन् इमां नो वाचं व्याकुर्वन्ति सोऽब्रवीद् वरं वृणै मह्यं चैवैष वायवे च सह गृह्लता इति तस्मादैन्द्रवायवः सह गृह्यते तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत् तस्मादियं व्याकृता वागुद्यते ।' इति ।

तैत्तिरीयब्राह्मणग्रन्थेऽप्यभिहितम्—

वाचं देवा उपजीवन्ति विश्वे वाचं गन्धर्वाः पशवो मनुष्याः ।
वाचीमा विश्वा भुवनान्यर्पिता सा नो हवं जुषतामिन्द्रपत्नी ।। इति ।

डॉ० मङ्गलदेवशास्त्रिमहोदयानुसारेण तु—भाषा मनुष्याणां सा चेष्टा अभिधीयते यथा मानवः स्वोच्चारणोपयोगिभिः शरीरावयवैरुच्चारितानां पदानां माध्यमेन स्वविचारान् प्रकटयति ।

भाषायाः व्यापकोऽर्थः—भाषाशब्दस्य प्रयोगः व्यापकसंकुचितयोरुभयोरेवार्थयोः भवति । व्यापकेऽर्थे भाषा सर्वेषां प्राणिनां विचारस्याथवा भावनाया अभिव्यक्तेः साधनस्वरूपा वर्तते । येन साधनेन यो जीवः स्वविचारान् भावान् वा अन्यस्मै जीवाय प्रकाशयति तत्साधनमेव भाषेत्यभिधीयते ।

भाषाशब्दस्य संकुचितोऽर्थः—भाषाशब्दस्य संकुचिते अर्थे भाषाविज्ञाने भवति। अस्मिन् अर्थे भाषायाः क्षेत्रम् मानवसमाजमात्रे सीमितं वर्तते । अतएव ते सार्थकध्वनयः भाषाशब्देनाभिधीयन्ते येषां माध्यमेन कश्चन मानवं मानवान्तरं प्रति स्वविचारं प्रकटयति ।

भाषायाः आधारद्वयम्—

(क) **भौतिकोऽधारः**—भाषा तालवादि उच्चारणावयवैः उच्चार्यंते, सा च श्रोत्रेण श्रूयते। अयमेव भाषायाः भौतिक आधार अभिधीयते। उच्चारणोपयोगीनि अवयवानि तु सिद्धान्तकौमुद्यामनेन प्रकारेण निर्दिष्टानि—

'अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । ऌतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ऐदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकानुस्वारस्य ।' इति ।

(ख) **मानसिक आधारः**—भाषायाः संवन्धो विचारेणापि भवति । अयम् विचारसंवन्ध एव मानसिक आधारो भवति भाषायाः । स च द्वेधा भवति—(१) तेषां तेषां वर्णात्मकानां शव्दानामुच्चारणे श्रवणे च साधनभूताः श्रोतृवक्त्रोः मानसिका व्यापाराः । (२) शव्दैः वक्तॄणां श्रोतृणां च मनःसु उत्पद्यमाना अर्था विचारा वा ?

अस्माभिरुच्चार्यमाणानाम् शव्दानाम् अर्थः मानसिकी प्रतिभा चास्माकं मनस्सु पूर्वतः एव भवति । तम् तम् अर्थं संस्मृत्यैव वयं तेषां तेषां शव्दानामुच्चारणं कुर्मः । श्रुत्वा च तेषां शव्दानाम् अर्थस्मरणञ्च कुर्मः ।

भाषायाः सामान्यस्वरूपस्य विश्लेषणम्—

(क) भाषा ध्वनिचिह्नरूपेण मनुष्याणां विचारविनिमयस्य साधनमास्ते ।

(ख) यदा ध्वनिचिह्नैः अस्माकं विचाराः पूर्णरूपेण नहि व्यक्ता भवन्ति तदा वयम् भावैः, इङ्गितैः, चेष्टितैः, काक्वा चस्वविचारान् प्रकटयामः । अतएव इमान्यपि साधनानि भावानां परस्परविनिमये सहायकाः भवन्ति ।

(ग) ध्वनिचिह्नव्यतिरिक्तान्यन्यपि चिह्नानि सन्ति, यैर्भवति विचाराणां प्रकाशनम् । तेषु लेखवद्धाक्षरं प्रधानतमं वर्तते ।

(घ) वैज्ञानिकदृष्टचा भाषा केवलं विचारविनिमयस्यैव साधनं नास्ति अपितु विचारस्यापि साधनमस्ति ।

(ङ) ध्वनयो विचारैरुद्भवन्ति ध्वनयश्च विचारैः । परन्तु तयोर्मध्ये प्रतिभा भवति । इयं प्रतिभैव ध्वनिविचारयोः संवन्धं संस्थापयन्ति ।

(च) मनुष्ये निसर्गतः भाषाग्रहणस्य सामर्थ्यं वर्तते । अनुकूलं वातावरण-

मवाप्य मानवः भाषां गृह्णाति । भाषां मनुष्यः स्वसमुदाय एव गृह्णाति इदमेव तस्य सांस्कृतिकस्य विकासस्य द्योतकम् ।

(छ) वालकः स्वप्रतिवेशिभिर्मानवैः भाषां स्वयमेव गृह्णाति । तत्र क्रमत्वात् भाषायां विकारः परिवर्तनम् आवश्यकं भवति ।

(झ) ध्वनयो विश्लेषणसह्या भवन्ति। ध्वनीनां विश्लेषणं सर्वप्रथमं वैयाकरणैः कृतम् ।

(ञ) भाषायाः द्योतिका वाणी भवति। उच्चारणस्य प्रधानसाधनत्वाद् जिह्वाऽपि वाक्शव्देनाभिधीयते ।

भाषाया विशेषताः—

(क) भाषा पैतृकी सम्पत्तिर्नास्ति—भाषा पैतृकी सम्पत्तिरस्तीति केषांचन मतम् । सम्पत्तिमिव पुत्रः पितुर्भाषामपि प्राप्नोतीति तेषां तर्कः । परञ्चेयं स्थितिर्नास्ति । भोजपुरक्षेत्रे निवासिनः संस्कृतज्ञस्य पितुर्भाषामप्राप्यैव वालः भोजपुरीं भाषां गृह्णातीति लोके दृश्यते ।

(ख) भाषा अर्जिता सम्पत्तिरस्ति—भाषा सन्निकटवर्तिभिः मनुष्यैरज्यते इत्यवलोकयामो वयम्। भारतवर्षीयोऽपि वालः विदेशं गत्वा वैदेशिकी भाषामवगच्छति ।

(ग) भाषा सामाजिकं वस्तु वर्तते—भाषायाः पूर्णरूपेण संवन्धः समाजेन साकं भवति । य वालकः यस्मिन् समाजे निवसति तस्यैव समाजस्य भाषां शिक्षते ।

(घ) भाषा परम्परान्विता भवति—तस्या अर्जने एव व्यक्तिः समान्यतः क्षमो भवति । तस्योत्पादनं कर्तुं नहि प्रभवति मानवः । समाजः परम्परा च तामुत्पादयतः ।

(ङ) भाषाया अर्जनमनुकरणेन द्वारा भवति—वालकस्य समक्षम् मातापित्रादिकाः तत्तद् वस्तु तेन तेन शव्देन कथयन्ति। चन्द्रं चन्द्रशव्देन, दुग्धं दुग्धशव्देन। मातापित्रादिकानां शव्दान् श्रुत्वा वालकः तानि तानि वस्तूनि तैः तैः शव्दैरभिधत्ते ।

(च) भाषा चिरपरिवर्तनशीला वर्तते—अनुक्रियमाणायामपि भाषायाम् द्वयोर्मनुष्ययोर्भाषा समाना नहि भवति । एकस्य मनुष्यस्य भाषा अपरस्य मनुष्यस्य भाषातो भिद्यते ।

(छ) भाषा स्वभावेनैव काठिन्यमपहाय सारल्यमनुगच्छति—इति भाषाया इतिहासाध्ययनेन ज्ञायते । वैदिककाले संस्कृतभाषाया यादृशं काठिन्यमासीत् तादृशं काठिन्यम् वर्तमानकालिके संस्कृते नह्यवलोक्यते ।

(ज) भाषा स्थौल्यमपहाय सौक्ष्म्यम्, अप्रौढिं च विहाय प्रौढिमनु-

गच्छति--आदौ भाषा स्थूला भवति तया सूक्ष्माणां विचाराणां प्रकाशने काठिन्यं भवति। किन्तु यदा भाषाया विकासो भवति तदा तया सूक्ष्मातिसूक्ष्मविचाराणां प्रकाशने काठिन्यं नहि जायते। अयं भाषाया विकास एव तस्याः प्रौढावस्था कथ्यते।

(ञ) भाषा स्वकीयां संयोगावस्थां विहाय वियोगावस्थामाप्नोति--संस्कृतभाषायाम् दृश्यते यत् सुप्तिङ्विभक्तयः शब्देन साकं संयुक्ताः भवन्ति। अतएव व्याकरणाचार्यः पाणिनिः वक्ति--'सुप्तिङन्तं पदम्' इति। किन्तु संस्कृतस्य यदा विकासः हिन्द्यामभूत् तदा विभक्तयः पृथकता गताः। यथा--रामस्य पुत्रः आयाति। इति संस्कृतवाक्यस्य हिन्द्याम्--'राम का पुत्र आता है।' इति अभवत्। कथ्यते।

भाषायाः विविधानि रूपाणि--भाषायाः विभिन्नानाम् रूपाणाम् आश्रयाः इतिहासरूपा भूगोलरूपाश्च भवन्ति। आसीत् कश्चन कालो यदा भारतीयाः समे जनाः संस्कृतभाषिणः अभूवन्। पुनः पालिभाषायाः प्रचारोऽभवत्। पुनः प्राकृत-अपभ्रंश-भाषयोः समय अगात्। इमे समे भेदाः भाषायाः ऐतिहासिकाः सन्ति। अनेनैव प्रकारेण--पंजाबी, हिन्दी, गुजराती, महाराष्ट्री, बङ्गाली, कन्नड़, तमिल, तेलगू प्रभृतीनां भाषाणां तु रूपाणि भौगोलिकान्येव सन्ति। अनेनैव प्रकारेण जातीयभाषा, साहित्यिकी भाषा, राजनयिकभाषा, परिनिष्ठितभाषा, टकसालीभाषा, साधुभाषा, प्रभृतयो भाषाणाम् अनेके भेदाः सन्ति।

इत्थम् ज्ञायते यत् विचाराणाम् आदानप्रदानयोः साधनभूताया भाषायाः रूपाणि सदा परिवर्तितानि भवन्ति। भाषा इतिहास-भूगोल-प्रयोग-साधुत्व-प्रचल-निर्मातृणां भेदाच्चापि भिद्यते।

भाषोत्पत्ति विषयकाः वादाः

मानवः भाषाया एव माध्यमेन स्वविचाराणाम् प्रकाशनम् कस्यचनापि समक्षम् करोति। सत्स्वपि विचारस्य प्रकाशनस्यानेकेषु साधनेषु भाषैव प्रमुखतमं साधनम् वर्तते। विना भाषां नास्ति किमपि तथाविधम् साधनम् येन साधनेन मानवः स्वविचाराणाम् सरलतया प्रकाशनं कस्यापि समक्षम् कुर्यात्। बोद्धापि च तस्य विचारान् अवगच्छेत्।

परन्तु इयम् भाषा केन प्रकारेणोद्भूताऽभूदिति विचारकाणां विवादस्य विषयो वर्तते। ते ते विचारकाः भाषायाः उत्पत्तिविषये तेन तेन प्रकारेण स्वविचारान् प्रकाशयामासुः। तेषु विचारेषु केचन विचारा अधस्तात् प्रस्तूयन्ते—

(१) दैवीउत्पत्तिसिद्धान्तः—भाषाणामुत्पत्तिविषयक अयम् प्राचीनतमः सिद्धान्तो वर्तते। अस्य सिद्धान्तस्यानुगन्तृणां मतम् वर्तते यत् सृष्टेरादौ परमात्मैव भाषामुत्पादयामास। येन प्रकारेण मनुष्यः स्वभावतः श्वासप्रश्वासादिकं गृह्णाति तेनैव

प्रकारेण उत्पन्नः सन् मानवो वदति स्म । अत्र तस्य वार्तालापक्रियायामीश्वरेच्छैव प्रधाना वर्तते । सर्वेषु धर्मेषु भाषायाः दिव्योत्पत्तिविषयको विचारः समुपलभ्यते । ऋग्वेदस्यैको मन्त्रो वक्ति—

'देवीं वाचमजनयन्त देवास्तां विश्वरूपाः पशवो वदन्ति ।
सा नो मन्द्रेषमूर्जं दुहाना धेनुर्वागस्मानुपसुष्ठुतैतु ॥'

बौद्धधर्मानुसारेण कल्पस्यादिकालतः पालिभाषैव त्रैलोक्यस्य भाषाऽऽसीत् । वाइविलग्रन्थानुसारेण सम्पूर्णायाः पृथिव्या एकैव भाषासीत् प्राचीनकाले महर्षिः पाणिनिर्वक्ति यत् चतुर्दशसूत्राणि माहेश्वराणि सन्ति । एभिरेव सूत्रैः सम्पूर्णस्य वाङ्मयस्य निर्मितिर्भवति । तानि च सूत्राणि सन्ति—

'अइउण्, ऋऌक्, एओङ्, ऐऔच्, हयवरट्, लण्, ञमङणनम्, झभञ्, घढधष्, जवगडदश्, खफछठथचटतव्, कपय्, शषसर्, हल् ।' इति ।

अन्यत्राप्युक्तम्—

'नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।
उद्धर्तुकामः सनकादिसिद्धान् एतद् विमर्शे शिवसूत्रजालम् ॥' इति ।

अस्य सिद्धान्तस्य विषये प्रो० देवेन्द्रनाथ शर्मा प्राह—यदि भाषा ईश्वरप्रदत्ता वर्तते, तदा तासु तासु भाषासु तथाविधाः भूयांसो भेदाः कस्मादुपलभ्यन्ते । पृथिव्याः सर्वे काकाः समानरूपेण वदन्ति । समे श्वानाश्च समानरूपेण बुक्कन्ति च । अनेनैव यदि भाषा ईश्वरप्रदत्ता स्यात् तर्हि सर्वेषां मानवानां भाषा समानरूपा स्यात् ।

(२) सांकेतिक उत्पत्तिवादः—अस्य मतस्यानुसारेण यदा मनुष्यः भाषां नह्यज्ञासीत् तदा सः स्वकीयानि कार्याणि इंगितैः चेष्टितैश्च सम्पादयामास । यदा अस्या क्रियायाम् बाधा समजायत तदा मानवा एकत्रीभूय ध्वनीनामाविष्करणमकार्षुः । ते तेभ्यः तेभ्यो वस्तुभ्यः तेषां तेषां सांकेतिकानां ध्वनीनां निश्चयमकार्षुः । तस्मादेव कालात् भाषाया आरम्भोऽभूत् ।

अस्य सिद्धान्तस्य समीक्षायां डॉ० भोलानाथ तिवारी महोदयः प्राह यत्—यद्यादौ भाषा नासीत् तदाजनाः एकत्रिताः कथमभूवन् ? एकत्रिताश्चापि ते शब्दानां निर्माणं कथमकार्षुः ? विचारविनिमयं विना न तु एकत्रीभवनं संभवमास्ते न वा प्रतीकभूतानां शब्दानां निर्णय एव ।

(३) रणनसिद्धान्तः—अस्य सिद्धान्तस्य संकेतं तु प्लेटो एवाकार्षीत् किन्त्वस्य सिद्धान्तस्य पल्लवनं मैक्समूलरमहोदय अकरोत् । रणनसिद्धान्तानुसारेण शब्दार्थयोरेको नैसर्गिकः रहस्यात्मकश्च संबन्धो वर्तते । संसारस्य प्रत्येकवस्तुनः स्वकीय एको ध्वनिर्भवति, यो हि तस्मिन् वस्तुनि आहते सत्युद्भूयते । यथा—केनचन प्रहरणेन प्रहारे कृते सति—प्रस्तर-काष्ठ-धातु-इष्टिकादिभ्यो भिन्नो भिन्नो ध्वनिरुद्भवतीति दृश्यते । तम् ध्वनिं श्रुत्वैव मनुष्यो जानाति यदयमस्य वस्तुनो ध्वनिरस्तीति । परोक्षे

आपतितस्य वस्तुनो ध्वनिमेव श्रुत्वा वयम् जानीमो यत् अमुकं वस्तु पतितमस्तीति । सो ध्वनिरेव रणनेत्यभिधीयते ।

सृष्टेरादौ मानवो वाण्याहीन आसीत् । किन्तु यदा सः तेषां तेषां वस्तूनां सान्निध्यमलभत तदा तेषां वस्तूनां ध्वनिमेव श्रुत्वा तस्य मुखात् तस्य वस्तुनो बोधकः शब्दः सहसा निरगात् । यथा प्रवहमानं जलप्रवाहं प्रेक्ष्य सो नदीत्यवोचत् । शीघ्रतया धावन्तं पशुविशेषं दृष्ट्वा सः तमश्वः इत्याह । अनेन प्रकारेण संसारस्य सर्वेभ्यो वस्तुभ्यः शब्दानां निर्मितिः संजाता । भाषायाः निर्माणे संजाते सति मानवस्य सा स्वाभाविकी शक्तिर्विलुप्ताभूत् । यथा एकस्य वस्तुनो ध्वनिरपरस्माद् वस्तुनो भिद्यते तथैवैकस्य वस्तुनो वाचकः शब्दः अपरस्य वस्तुनो वाचकात् शब्दात् भिद्यते ।

किन्त्वयमपि सिद्धान्तः परीक्षकेषु लब्धास्पदो माभूत् । भाषायाम् केचनानुरणनमूलकाः शब्दाः समुपलभ्यन्ते किन्तु तेभ्यः शब्देभ्यः भाषायाः निर्मितिः असंभाविनी वर्तते ।

(४) आवेगसिद्धान्तः अथवा मनोभावाभिव्यञ्जकतावादः--(Pooh-Pooh Theory) अस्य सिद्धान्तस्यानुसारेण मानव आदौ विचारप्रधानो नास्ति अपितु सः भावप्रधान आसीत् । दुःख-विषाद-विस्मय-घृणादीनाम् भावावेशेन तस्य मुखात्—धिक्, ओह, आह, छीः इत्यादिकाः शब्दाः सहसैव निरगमन् कालक्रमेणेभिरेव शब्दैः भाषायाः निर्मितिरभवत् ।

किन्त्वयमपि सिद्धान्तः परीक्षको गोष्ठ्याम् एतस्मादेव कारणात् मान्यताप्राप्तो नहि बभूव यत् भाषायाम् विस्मयादिबोधकानाम् शब्दानां स्थानम् नगण्यम् भवति । एतादृशानामभिव्यक्तिः तु तदा भवति यदा मनोभावैरभिभूतो मानवः किमपि तस्य विषये वक्तुं क्षमो न भवति । एतादृशानाम् शब्दानाम् सङ्ख्या भाषायामतीवाल्पीयसी वर्तते ।

(५) श्रमध्वनिसिद्धान्तः अथवा श्रमपरिहारमूलकतावादः—अस्य सिद्धान्तस्य स्थापकस्य न्वायरनामकस्य विदुषः कथनमस्ति यत् यदा मानवः शारीरिकं श्रमं करोति तदा तस्य श्वासप्रश्वासयोः वेगो वर्द्धते । विभिन्नरूपेण कम्पितास्तस्य स्वरतन्त्रिणः यस्य ध्वनेरुच्चारणं कुर्वन्ति तेन सः किमपि सुखमनुभवति । एतादृशानाम् शब्दानाम् निरन्तरोच्चारणेन किञ्चिद् गायनमिवानुभूयते । एतादृग्भिरेव शब्दैः भाषाया निर्माणोऽभूदिति अस्य सिद्धान्तानुकर्तॄणां मतम् ।

किन्त्वेदृशानामपि शब्दानाम् तेनैव प्रकारेण भाषायाम् नगण्यं स्थानं वर्तते, येन प्रकारेणावेगबोधकानाम् शब्दानाम् । एतादृशैः शब्दैः भाषाया निर्मितेः कल्पना युक्तितर्कपराहता वर्तते, इति अस्य सिद्धान्तस्य समीक्षकाः प्राहुः ।

(६) अनुकरणमूलकतावादः अथवा अनुकरणसिद्धान्तः—अस्य सिद्धान्तस्यानुसारेण यस्मात् शब्दात् यो ध्वनिः उत्पद्यत तदेव तस्य नामाभूत् । यथा—का,

कां, इति रटतः पक्षिणो नाम काकोऽभवत् । को-को इति रटतः पक्षिणो नाम कोकिलोऽभवत् । दर् दर् ध्वनिं कुर्वतः जीवविशेषस्य नाम दर्दुरोऽभवत् । तथा चोक्तम् निरुक्तकारेण यास्केनापि—'काक इति शब्दानुकृतिः' तदिदं शकुनिषु बहुलम् ।

किन्तु समीक्षकाः इममपि सिद्धान्तम् निरर्थकमाहुः ।

(७) प्रतीकवादः अथवा इंगितसिद्धान्तः—अस्य सिद्धान्तस्यानुसारेण मानवः स्वाङ्गचेष्टानामनुकरणं कृत्वा येषां ध्वनीनामुच्चारणमकार्षुः तैरेव शब्दैः भाषाया निर्मितिः संजाता । सर्वास्वेव भाषासु घटनानां क्रियायाम् वा प्रतीकभूताः शब्दाः समुपलभ्यन्ते । आदौ मानवः संकेतैरेव विचाराणां विनिमयमकार्षीत् तदात्वे सः कस्यचन ध्वनिविशेषस्यापि प्रयोगमकरोत् । इति एतस्य मतस्यानुयायिनः प्राहुः । एभिरेव शब्दैः भाषायाः निर्माणं ते स्वीकृतवन्तः ।

अस्य मतस्य समीक्षणं कुर्वता हार्डरनामकेन विदुषा अभिहितम् यत् एतादृशेषु शब्देषु पूर्णतया परिष्कृतेषु सुव्यवस्थितेष्वपि, एभिः शब्दैः भाषायाः निर्माणम् नहि स्वीकर्तुं शक्यते; तथाविधेषु शब्देषु बौद्धिकतायाः अभावात् ।

(८) स्वीटमहोदयस्य समन्वयसिद्धान्तः—स्वीटः आदिभाषायाः शब्दानाम् त्रेधा विभागमकरोत् । अनुकरणात्मकाः शब्दाः मनोभावाभिव्यंजकाः शब्दाः, प्रतीकात्मकाः शब्दाश्च । सः प्रतीकात्मकान् शब्दान् अपेक्षाकृतमधिकव्यापकान् स्वीचकार । सः प्रावोचत् यत् आदौ एतादृशैः त्रिप्रकारकैरेव शब्दैः भाषायाः निर्मितिः संजाता । तदनन्तरमुपचारवशात् अनेकेषां शब्दानाम् अर्थस्य विकाशोऽभूत् । तदर्थम् नवीना अपि शब्दाः प्रचलने आगच्छन् भाषोत्पत्तिसिद्धान्तानाम् समीक्षणप्रसंगे प्रो० देवेन्द्रनाथ शर्मा प्रावोचत् यत्—सर्वेषां भाषोत्पत्तिविषयकाणामेषां सिद्धान्तानाम् समन्वये कृतेऽपि भाषयः अत्यन्तसाधारणस्यैवांशस्य समाधानम् भवितुमर्हति । भाषायाः निस्सीमव्यापकताम् गम्भीरताम् चावलोक्य प्रतीयते यत् इमे समे सिद्धान्ताः कल्पनायाः विकासस्वरूपा एव वर्तन्ते ।

अतएव एतेभ्यः सर्वेभ्यः सिद्धान्तेभ्यो भाषोत्पत्तेः समस्यायाः समाधानं भवितुं नार्हति ।

भाषापरिवर्तनस्य हेतवः

भाषा सर्वदा सर्वदा परिवर्तिता भवतीति भाषाविज्ञानं विदामपि मति । भाषायाम् परिवर्तनमेव भाषायाः विकास इत्यभिधीयते । भाषायाः इदम् परिवर्तनम् पञ्चधा भवति—ध्वनिपरिवर्तनम्, वाक्यपरिवर्तनम्, शब्दपरिवर्तनम्, रूपपरिवर्तनम्, अर्थपरिवर्तनञ्च । भाषायाः परिवर्तनम् अतिप्राचीनकालादेव विचारस्य विषयो वर्तते । प्राचीनभारतीयाचार्येषु—कात्यायनपतञ्जलि-कैयट-वामन-जयादित्यप्रभृतीनाम् भारतीयविदुषां नामानि प्रख्यातानि सन्ति ।

योरपमहादेशस्य डैनिश विद्वान् जे० एच० ग्रेड्सडाफं महोदयः सर्वप्रथममस्मिन् विषये व्यवस्थितरूपेणाध्ययनमकरोत् ।

भाषायाः परिवर्तनस्य कारणानां द्वेधा विभागः कर्तुं शक्यते—आभ्यन्तरवर्गः बाह्यवर्गश्च । आभ्यन्तरवर्गे भाषायाः काठिन्यमपहाय सारल्याभिमुखी स्वाभाविकी गतिः प्रयोक्तुः शारीरिकमानसिकयोग्यतायाः संबन्धीनि कारणानि चायान्ति । बाह्यवर्गे तानि करणानि आयान्ति यानि बाह्यतो भाषाम् प्रभावयन्ति ।

आभ्यन्तरवर्गस्य भाषापरिवर्तनस्य कारणानि—अस्मिन् वर्गे तानि कारणानि समायान्ति यानि बाह्यतो भाषां नहि प्रभावयन्ति । तानि च कारणानि अधस्ताद् व्याक्रियन्ते ।

(१) प्रयोगाधिक्यजन्यं परिवर्तनम्—येन प्रकारेण प्रयोगाधिक्येन संसारस्यान्यानि वस्तूनि परिवर्तितानि भवन्ति तेनैव प्रकारेण भाषाऽपि प्रयोगाधिक्येन परिवर्तिता भवति । एतादृशं परिवर्तनम् स्वयम्भुपरिवर्तनमित्यभिधीयते ।

(२) बलम्—यस्मिन् ध्वन्यै अर्थे वा अधिकं बलं प्रदीयते, सः ध्वनिरर्थो वा अन्यान् ध्वनीनर्थान् वा दूर्बलयति अथवा विनाशयति । अतएव बलेन द्वाराऽपि भाषायाम् परिवर्तनं भवति ।

(३) प्रयत्नलाघवम्—इदम् भाषापरिवर्तनस्याथवा भाषाविकासस्य सर्वाधिक महत्त्वपूर्णम् कारणमस्ति । अतएवानेन हेतुना नवतिप्रतिशतमथवा ततोऽप्यधिकानि परिवर्तनानि अनेनैव द्वारा भवन्ति । प्रयत्नलाघवस्यापरं नाम मुखसुखमपि वर्तते । स्वभावत एव मानवः अल्पेनैव प्रयासेनाधिकं कार्यं कर्तुमीहते । अनेनैव प्रकारेण अल्पेनैव प्रयासेन मानवः शब्दोच्चारणमपि चिकीर्षति । अस्मिन्नेव प्रयासे सः शब्दम् अल्पं करोति । यथा कृष्णशब्दस्य कान्ह इति नाम । प्रसादः इत्यस्य पसाद इति उच्चारणम्, स्टेशनशब्दस्य टेशन इत्युच्चारणम् । त्वया इत्यस्य तू इत्युच्चारणं च ।

इदं प्रयत्नलाघवमनेकप्रकारकं भवति—(क) स्वरलोपः—यथा—एकादश इत्यस्य ग्यारह इत्युच्चारणम् । (ख) व्यञ्जनलोपः यथा—स्थानमित्यस्य थानमित्युच्चारणम् । (ग) अक्षरलोपः—यथा—शहतूत इत्यस्य तूत इत्युच्चारणम् । (घ) स्वरागमः—यथा—कृपा इत्यस्य किरिपा इत्युच्चारणम् । (ङ) व्यंजनागमः—अस्थि इत्यस्य स्थाने हड्डीशब्दस्य प्रयोगः । (च) विपर्ययः—यथा—वाराणस्याः बनारसकथनम् । (छ) समीकरणम्—यथा शर्करा इत्यस्य शक्करकथनम् । (ज) विषमीकरणम्—काकस्य काग इति कथनम् ।

अनेनैव प्रकारेण अनुनासिकता, घोषीकरणम्, अघोषीकरणम्, अभिश्रुतिः, महाप्राणीकरणम्, अल्पप्राणीकरणम्, अपश्रुतिः, अग्रागमः, स्वरभक्तिः, उभयसम्मिश्रणम्, स्थानविपर्ययः, मात्राभेदः, उष्मीकरणमित्यादीन्यपि प्रयत्नलाघवस्यैव रूपाणि सन्ति ।

(४) मानसिकी स्थितिः—वक्तृणाम् मानसिकस्थितौ परिवर्तने जाते सत्येव विचारेषु परिवर्तनम् भवति । विचारेषु च परिवर्तने जाते सति अभिव्यञ्जनायाः प्रकारोऽपिपरिवर्तनं भवति । तेन भाषापि प्रभाविता भवति । तस्य च स्पष्टः प्रभावः अर्थपरिवर्तने भवति ।

(५) अनुकरणस्यापूर्णता—भाषार्जिता संपत्तिर्भवति । सा चानुकरणेन द्वारा गृह्यते । यदि अनुकरणं पूर्णं भवति तदा मनुष्योऽनुकृतं शब्दम् सम्यक्तया गृह्णाति। किन्तु अनुकरणम् प्रायः अपूर्णमेव भवतीति दृश्यते । तेनापि अर्थे परिवर्तनम् भवति । भाषायामपि जायते च परिवर्तनम् ।

अनुकरणस्यापूर्णताया अनेकानि कारणानि भवन्ति । तेषु कानिचनात्र प्रस्तूयन्ते—

(क) शारीरिकविभिन्नता—ध्वनीनामुच्चारणम् तेभ्यस्तेभ्य उच्चारणउच्चारणस्थानेभ्यः क्रियते । परन्तु सर्वेषां जनानामुच्चारणस्थानानि सामान्येव नहि भवन्ति । अतएवानुकरणम् पूर्णतया नहि भवति ।

(ख) ध्यानस्य नैयून्यम्—अस्यापि हेतोः अनुकरणे अपूर्णता आयाति । अस्यापि प्रभावः भाषायां भवति । यच्च कालान्तरेण संलक्ष्यते ।

(ग) शिक्षाया अभावः—अशिक्षायाः अपि हेतोरनुकरणमपूर्णं भवति । यथा अज्ञानवशात् सकारस्य शकारोच्चारणम् । देशः इत्यस्य देस इत्युच्चारणम् । शिक्षाशब्दस्य शिच्छेत्युच्चारणम् ।

(घ) ज्ञात्वैव परिवर्तनकरणम्—समये समये तद्भाषाविज्ञा अपि भाषायाः इति शब्देषु परिवर्तनम् कुर्वन्ति । यथा—प्रसादनामको हिन्दीभाषाया विद्वान् अलेक्जेण्डर इत्यस्य अलक्षेन्द्र इति कृतवान् । इदं परिवर्तनं स्वाभाविकं नहि भवति । अनेनैव प्रकारेण अनेकेषाम् देशजानाम् वैदेशिकानाञ्च शब्दानाम् संस्कृतज्ञाः संस्कृतीकरणमकार्षुः ।

भाषापरविर्तनस्य बाह्यवर्गस्य कारणानि—अस्य वर्गस्य प्रमुखानि कानिचन कारणानि निम्नाङ्कितानि सन्ति—

(१) भौतिकं वातावरणम्—भाषायामस्य सर्वाधिकः प्रभावो भवति । अनेनैव हेतुना एकस्या भाषाया वह्वयः उपभाषाः भवन्ति । भौतिकस्य वातावरणस्य प्रभाव अनेकधा भवति ।

(क) शीतोष्णतयोराधिक्येन नैयून्येन च जीविका, स्वभावः, आचरणादिकाश्च नैकधाः प्रभाविता भवन्ति । भाषा चैतेषु सर्वेष्वाश्रिता भवति ।

(ख) दृश्यते यत् समतलभूमौ जनानां दूरं यावत् सम्बन्धो भवति तेन च

दूरं यावत् भाषायामेकरूपता भवति । किन्तु पर्वतीयभागेषु यत्रावागमनस्य सौविध्यं नहि भवति तत्र तु—तस्याः तस्याः भाषायाः क्षेत्रम् अतीव सङ्कीर्णम् भवति । अतएव अनेकधा च भिद्यतेभाषा ।

(ग) उर्वरायां भूमौ निवासिनां जनानां भाषा विकसिता भवति किन्तु अनुर्वरभूमौ निवासिनां जनानां भाषा तथा समृद्धिमती नहि भवति । अतएव भूमेरुर्वताया अपि भाषायाः परिवर्तने कारणता भवति ।

(घ) सांस्कृतिकः प्रभावः—संस्कृति समाजस्य प्राणस्वरूपा वर्तते । अतएव तस्या अपि प्रभावो भवति भाषायाम् । तेन च भवति भाषायाम् परिवर्तनमथवा विकासः । अत्रापि प्रभावः निम्नप्रकारैः भवतुमर्हति—

(क) सांस्कृतिकसंस्थाः—इमाः संस्था प्राचीनानां शब्दानां प्रयोगं प्रख्यापयन्ति, तेन च जायते विचारेषु परिवर्तनम् । एतेनाभिव्यक्तिशैल्य अपि प्रभाविताः भवन्ति । अस्मिन् विंशतिशताब्दे हिन्द्याम् संस्कृतशब्दानामत्यधिकः प्रयोगः जातः तेन च नूनम् हिन्दीभाषायाः रूपमपि परिवर्तितमभूत् । साम्प्रतम् संस्कृतभाषायामपि वैज्ञानिकाः आंग्लभाषायाः शब्दा आदीयन्ते तेन संस्कृतभाषा अपि प्रभाविता भवति ।

(ख) महद् व्यक्तित्वम्—महाकवेः गोस्वामिनः तुलसीदासस्य अवधी भाषा पूर्णतया प्रभाविताभूत् । महाकवेः सूरस्य भाषया च व्रजभाषा प्रभाविताभूदिति नास्ति तिरोहितं विपश्चिदपश्चिमेभ्यः ।

(ग) संस्कृतीनां सम्मिश्रणम्—व्यापार-राजनीति-धर्मप्रचारादिभिश्चापि समये समये संस्कृत्योः सम्मिश्रणम् भवति । अस्यापि भाषायाः परिवर्तनं भवति । भारते वर्षे पञ्चधा प्रधानरूपेण संस्कृत्योः सम्मिश्रणम् जातम् । तथाहि—

(१) आष्ट्रिकद्रामिडानां संस्कृत्योः सम्मिश्रणम् ।
(२) द्राविडानामार्याणां च संस्कृत्योः सम्मिश्रणम् ।
(३) आर्याणां यवनानां च संस्कृत्योः सम्मिश्रणम् ।
(४) भारतीयानां यवनानां च संस्कृत्योः सम्मिश्रणम् ।
(५) भारतीयानाम् योरोपीयानाञ्च संस्कृत्योः सम्मिश्रणम् ।

आसां संस्कृतिसम्मिश्रणानां भाषायाम् द्विप्रकारेण परिवर्तनं संजातम् । प्रत्यक्षमप्रत्यक्षञ्चेति ।

तत्र प्रत्यक्षे यथा—(१) शब्दानामादानप्रदानम्—अस्मादेव हेतोः भारतीयभाषासु तासां तासां भाषाणां शब्दाः समुपलभ्यन्ते ।

(२) ध्वनेरागमनम्—मूलयोरोपीयभाषायाम् टवर्गीयाः ध्वनयः नासन्, किन्तु भारते द्राविडानां प्रभावेण, आर्यभाषायामेतेषां ध्वनीनां समावेशः संजातः । हिन्द्यामपि यवनानामांग्लानां च सम्पर्केण बहूनां ध्वनीनां समावेशः संजातः ।

(आ) अप्रत्यक्षः प्रभावः—विचारविनिमयेन द्वारा परस्परम् साहित्यानि कलाश्चादिकाः प्रभाविताः भवन्ति । तेन चापि भाषा प्रभाविता भवति ।

(३) सामाजिकी व्यवस्था—सामाजिकीं व्यवस्थामेवाश्रित्य समाजे शान्तिरशान्तिर्वा भवति । तस्य जीवनस्य सर्वाण्यङ्गानि प्रभावितानि भवन्ति । तस्य च प्रभावः भाषायामपि भवति । युद्धेन भाषायाः ध्वनयोर्विशेषरूपेण प्रभाविताः भवन्ति ।

(४) वक्तृणामभ्युन्नतिः—वक्तृणामभ्युन्नतिः संजाते सति भाषायाम् परिवर्तनम् भवति ।

(५) सादृश्यम्—एकस्याः भाषायाः सदृशाः शब्दा अन्यस्यामपि भाषायाम् प्रयुक्ताः भवन्ति । तेन च जायते भाषायाम् परिवर्तनम् ।

भारतीयविदुषाम् भाषाविज्ञानेऽवदानम्

विश्वे भाषायाः वैज्ञानिकमध्ययनम् सर्वप्रथमम् भारतवर्षेऽभवत् । वैदिककालतः एव भाषायाः वैज्ञानिकमध्ययनम् भारते वर्षे दृश्यते । योरपेषु भाषाविज्ञानविषयकमध्ययनं तु वहोः कालादनन्तरमेव संजातम् । १७८६ खीष्ट्राब्दे सर विलियम जोन्स नामको योरोपीयो विद्वान् संस्कृतभाषायाः अध्ययनेन साकम् भाषावैज्ञानिकमध्ययनं प्रारब्धवान् ।

१७८६ ख्रैष्टाब्दे विलियम जोन्स नामको विद्वान् भाषाविज्ञानस्य वर्तमानस्वरूपस्यारम्भणमकरोत् । सः संस्कृत–ग्रीक–लैटिन आदिषु भाषासु अत्यधिकं साम्यमवलोक्य भाषाणाम् तुलनात्मकस्याध्ययनस्य प्रारम्भमकरोत् । अत एव भारतवर्षे एव सर्वप्रथमं भाषायाः वैज्ञानिकमध्ययनमभवत् ।

प्रो० देवेन्द्रनाथशर्मा लिखति यत् अस्माकम् पूर्वजाः भाषाया वैज्ञानिकाध्ययनविषये एतादृशा जागरूकाः आसन् येन ते वेदानामध्ययनाय तस्य षण्णामङ्गानाम् निर्माणमकार्षुः । तानि चाङ्गानि शिक्षा–कल्प–व्याकरण–निरुक्त–ज्योतिष्–छन्दोविचितिनामकानि सन्ति । तत्र—शिक्षा–निरुक्त–व्याकरण–छन्दसां तु सम्बन्धः भाषैव साकमास्ते । शिक्षा ध्वनिविवेचनात्मिका वर्तते व्याकरणेन पदवाक्ययोः विवेचनम् भवति, निरुक्तम् व्युत्पत्तेरभूतपूर्वं साधनम् वर्तते छन्दसश्च वेदमन्त्राणां सम्यक् पाठेन सह सम्वन्धो वर्तते ।

ऋक्प्रातिशाख्यस्य व्याख्याता विष्णुमित्रः शिक्षाम् स्वरवर्णोपदेशकशास्त्रमाह । अतएव शिक्षाशास्त्रं साम्प्रतिकध्वनिविज्ञानस्य पर्यायभूतम् वर्तते । कस्य वर्णस्य केन प्रकारेणोच्चारणम् इति शिक्षणमेव शिक्षाया उद्देश्यम् ।

प्राचीनकाले भारते भाषावैज्ञानिकं कार्यम्—वैदिककाले भारते वर्षे

भाषावैज्ञानिकमतिमहत्त्वपूर्णं कार्यमभवत्। तस्य कार्यस्य निम्नाङ्कितेषु शीर्षकेषु विभागं कृत्वाऽध्ययनं कर्तुं शक्यते।

(१) शब्दानाम् व्युत्पत्तिः—महर्षयो वैदिकानां शब्दानां स्थिरत्वाय संहिताया मन्त्राणाम्—पदपाठ–क्रमपाठ–जटापाठ–घनपाठ–मालापाठादिभेदेषु विभागं कृत्वा वैदिकानां पदानां सुरक्षामकार्षुः। इमे सर्वे ऋषिभिः कृता उपायाः शब्दानाम् व्युत्पत्तये आसन्। अयम् संस्कृतभाषायां विश्लेषणस्य प्रथमः प्रयास आसीत्।

(२) स्वराणामुच्चारणम्—वेदमन्त्राणाम् शुद्धोच्चारणाय उदात्तानुदात्तस्वरिताख्यानाम् स्वराणाम्, ह्रस्वदीर्घप्लुतानाञ्च स्वराणाम् व्यवस्थाऽक्रियत। उदात्तादिकाः विशेषरूपेण वैदिकास्स्वराः आसन्। एतेषां विश्लेषणम् कुर्वन् महर्षिः पाणिनिराहाष्टाध्याय्याम्—'उच्चैरुदात्तः'। अस्य सूत्रस्य व्याख्यायाम् भट्टोजिदीक्षितः सिद्धान्तकौमुद्यां लिखति—'ताल्वादिषु सभागेषूर्ध्वभागे निष्पन्नोऽजुदात्तसंज्ञः स्यात्। अनुदात्तस्वरस्य विषये महर्षिः पाणिनिर्लिखति–नीचैरनुदात्तः। ताल्वादिषु सभागेऽधोभागे निष्पन्नोऽजनुदात्तसंज्ञः स्यात्। स्वरितस्य स्वरस्य विषये महर्षिः पाणिनिः लिखति—'समाहारः स्वरितः' इति। अस्य सूत्रस्यार्थो वर्तते यत् उदात्तत्वानुदात्तत्ववर्णधर्मौ समाह्लियेते यस्मिन् सोऽच् स्वरितसंज्ञः स्यात्।

(३) वैदिकानां शब्दानां संग्रहः—इदं कार्यं निघण्टोः माध्यमेन कृतमभूत्।

(४) वेदार्थसंरक्षणम्—वेदार्थानां सुरक्षायै तेषां तेषां मन्त्राणां संहितारूपेण संहिताः क्रियन्ते स्म। ताश्च संहिताः चतस्रः सन्ति। ऋग्वेदसंहिता, यजुर्वेद संहिता, सामवेदसंहिता, अथर्ववेदसंहिता च।

(५) वेदार्थनिरुक्तिः—इदं कार्यम् निरुक्तस्य माध्यमेनाक्रियत। महर्षिः यास्कः निघण्टौ संगृहीतानाम् सर्वेषां शब्दानाम् व्याख्या स्वकीये निरुक्तनामके ग्रन्थेऽकार्षीत्। अनेन ग्रन्थेन द्वारा सम्प्रदायप्राप्तस्य वेदार्थस्य सुरक्षा सुकराभूत्। अस्मिन् ग्रन्थे महर्षिः यास्कः शब्दानाम् नामाख्यातोपसर्गनिपाताख्येषु चतुर्षु भागेषु विभागं कृत्वा अध्ययनमकरोत्।

(६) वैदिकलौकिकसंस्कृतयोः व्याकरणस्य निर्माणम् प्रायः ५५० ई० पू० ख्रैष्टाब्दे महर्षिः पाणिनिः वैदिकलौकिकसंस्कृतयोः सुरक्षायै अष्टाध्यायीनामकस्य व्याकरणस्य सूत्रग्रन्थस्य निर्माणमकरोत्। अस्य ग्रन्थस्य रचनाशैली दृष्ट्वैव महर्षेः पाणिनेः सूक्ष्मेक्षिकायाः अनुमानं कर्तुं शक्यते। अयमल्पकायोऽप्येक एव ग्रन्थः सम्पूर्णस्य वैदिकलौकिकसंस्कृतवाङ्मयस्य विशदं विवरणं प्रस्तौति।

वार्तिकभाष्यग्रन्थयोः निर्याणम्—पाणिनेरनन्तरं महर्षिः कात्यायनः वार्तिकग्रन्थस्य प्रणयनमकरोत्। महर्षिः पतञ्जलिः महर्षिपाणिनिप्रवर्तितस्य व्याकरणस्य

विशदां व्याख्यां व्याकरणमहाभाष्यस्य माध्यमेनाकार्षीत् । व्याकरणस्य महाभाष्यस्य व्याख्या प्रद्योतोद्योताभ्याम् कैयटेन कृता । महाभाष्यस्यैवालोके काशिकायाः निर्माणम् पाणिनिसूत्राणां व्याख्यारूपेण वामनजयादित्यौ अकुरुताम् । काशिकायाः न्यासपदमञ्जरीरूपेण व्याख्ये अतीव मनोज्ञे स्तः ।

पुनर्भट्टोजिदीक्षितः कुमुद्याः माध्यमेन पाणिनिसूत्राणां वार्तिकानां च वृत्तिउदाहरणादीनां माध्यमेनाकरोत् । कौमुद्याः स्वयम् व्याख्यामकार्षीत् भट्टोजिदीक्षितः प्रौढमनोरमाद्वारा । कुमुद्याः एवालोके नागेशभट्टः शब्देन्दुशेखरस्य परिभाषेन्दुशेखरस्य च निर्माणमकरोत् । ज्ञानेन्द्रसरस्वतीकृता तत्त्वबोधिनी नामिका व्याख्या स्वकीयं स्वतन्त्रं महत्त्वं बिभर्ति । कौमुद्याः बालमनोरमानाम्नी व्याख्याऽप्यतीव सुगमा सर्वाङ्गपूर्णा च वर्तते ।

संस्कृतभाषाविषयकम् समादरणीयम् गौरवान्वितं च विवेचनम् भर्तृहरिनामको विद्वान् वाक्यपदीये अकरोत् । वाक्यपदीयस्य ब्रह्मकाण्डे तु व्याकरणस्य दार्शनिकं विवेचनं वर्तते । किन्तु शब्दकाण्डे वाक्यकाण्डे तु संस्कृतभाषायाः प्रौढं भाषावैज्ञानिकं विवेचनं कृतं वर्तते ।

मया उपर्युक्तं यत् महर्षयः मन्त्रपाठ–पदपाठ–क्रमपाठ–जटापाठ–घनपाठानाम् माध्यमेन वेदस्य भाषावैज्ञानिकमध्ययनमकार्षुः ।

वेदाध्ययनस्याङ्गरूपेण शिक्षाशास्त्रस्याध्ययनं क्रियते स्म । शिक्षया वैदिकभाषायाः ध्वनीनां अध्ययनं सम्पद्यतेस्म । उच्चारणस्थान–करणप्रयत्नानामाधारेण ध्वनीनां विश्लेषणं शिक्षाशास्त्रस्य प्रमुखं लक्ष्यं वर्तते । यद्यपि प्राक् पञ्चषष्ठिसंख्याकाः शिक्षाग्रन्था आसन् किन्तु तेषु अधिकानां लुप्तत्वात् अत्यल्पसंख्यायां शिक्षाग्रन्था समुपलभ्यन्ते ।

शिक्षाया अनन्तरम् वैदिकसंस्कृताध्ययनप्रक्रियायां प्रातिशाख्यग्रन्थानाम् स्थानमायान्ति शिक्षाशास्त्रप्रतिपादितानां विषयाणां विशदं विवेचनमेव प्रातिशाख्यग्रन्थानामुद्देश्यम् । महाभाष्यानुसारेण वेदानाम् ११३० शाखा आसन् । प्रत्येकशाखायाम् मन्त्रोच्चारणे प्रकारभेदो भवति । अस्योच्चारणभेदस्य विशदं विवेचनं प्रातिशाख्यग्रन्थेषु क्रियते । अतएव समालोचकाः प्रातिशाख्यग्रन्थान् प्रायोगिकध्वनिविज्ञानशब्देनाहुः । वेदस्य सर्वासां शाखानाम् प्रातिशाख्यग्रन्थाः भिन्नाः भिन्ना आसन् । सम्प्रति निम्नाङ्किताः षट्संख्याकाः प्रातिशाख्यग्रन्थाः समुपलभ्यन्ते— (१) शौनककृतम् ऋक्प्रातिशाख्यम्, (२) कात्यायनकृतम् शुक्लयजुःप्रातिशाख्यम्, (३) यजुर्वेदस्य मैत्रायणीयप्रातिशाख्यम्, (४) तैत्तिरीयप्रातिशाख्यञ्च, (५) सामवेदस्य पुष्पसूत्रम्, (६) शौनककृतमथर्वप्रातिशाख्यञ्च ।

निरुक्तम् वेदाध्ययनस्यान्यतमभङ्गं वर्तते । भाषाविज्ञानस्यार्थविज्ञानम् रूप-

विज्ञानञ्च विर्वेचितं भवति निरुक्ते द्वारा । निरुक्तेन वाक्यविज्ञानस्य व्यवस्थितं विवेचनं क्रियते ।

अनेन प्रकारेण दृश्यते यत् भारतीयाः विद्वांसः भाषाविज्ञानस्य क्षेत्रे महत्तममवदानमकार्षुः ।

वैदिकलौकिकसंस्कृतयोः साम्यं वैषम्यं च

भाषाविज्ञानविदः प्राचीनभारतीयार्यभाषायाः कालम् आर्याणां भारते प्रवेशकालादारभ्य ५०० ई० पू० खैष्टाब्दं यावत् स्वीक्रियते । अस्य युगस्य भाषा संस्कृतमासीत् । संस्कृतभाषा द्वेधा विभज्यते । वैदिकं लौकिकं संस्कृतम् च ।

भाषावैज्ञानिकेषु प्रख्यातो देवेन्द्रनाथशर्मा लिखति यत् यस्यां भाषायां ऋग्वेदस्य निर्माणमभूत् सा भाषा तस्य कालस्य परिनिष्ठिता सुसंस्कृता च भाषाऽऽसीत् । लौकिकवैदिकसंस्कृतयोर्नामकरणविषये पं० मङ्गलदत्तशास्त्री लिखति यत् अनेके विद्वांसः वेदस्य भाषां संस्कृतभाषामनुक्त्वा वैदिकीं भाषां कथयन्ति । कालिदासादीनामेव भाषां ते संस्कृतम् अभिदधति ।

किञ्च संस्कृतभाषायै प्राचीने काले संस्कृतभाषाशब्दस्य प्रयोगो नासीत् । महर्षिः पाणिनिः अष्टाध्याय्याम् 'पूर्वं तु भाषायाम्' इति सूत्रे भाषाशब्दस्य प्रयोगं करोति । अनेनैव प्रकारेण महर्षिः यास्कोऽपि लिखति निरुक्तग्रन्थे—'नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायाम् ।' इति । अत्रापि लौकिकसंस्कृताय भाषाशब्दस्य प्रयोगः कृतः । अत्र भाषाशब्दस्य प्रयोगः व्याहारव्यवहारयोः भाषायै कृतो वर्तते ।

इत्थम् यास्कपाणिनीभ्यां पूर्वस्य संस्कृतम् वैदिकं संस्कृतमभिधीयते, तत्पश्चात्कालवर्ति संस्कृतम्, यस्य प्रयोगो दृश्यते काव्येषु नाटकेषु च तत् संस्कृतम् लौकिकं संस्कृतमित्यभिधीयते ।

वैदिकभाषायाः स्वरूपम् ऋग्वेदे सुरक्षितम् वर्तते । तस्य संस्कृतस्य क्रमिको विकासः संहितासु ब्राह्मणग्रन्थेषु आरण्यकग्रन्थेषु उपनिषत्सु च संजातः । उपनिषदां सूत्राणां च भाषा व्याकरणरूपाणां सारल्यहेतोः संस्कृतस्य समीपतरं वर्तते । पाणिनिरष्टाध्याय्यां आर्यभाषायाः विकसितरूपस्य संस्कृतं रूपं प्रस्तुतवान् या भाषा संस्कृतमित्यभिधीयते ।

लौकिकसंस्कृते एव वाल्मीकीयरामायणस्य, महाभारतस्य, पुराणानाम्, भासकवेर्नाटकानाम् महाकविकालिदासादिकस्य च महाकाव्यादिकस्य रचना अभूत् ।

वैदिकलौकिकसंस्कृतयोर्निम्नाङ्किताः भेदास्सन्ति—(१) रूपात्मकदृष्टया वैदिकसंस्कृते प्रातिपदिकानाम् धातूनां च रूपाणि लौकिकात् संस्कृतादनेकधा भिद्यते । तद्यथा—

वैदिकसंस्कृतस्य रूपाणि		लौकिकसंस्कृतरूपाणि
मर्त्यासः	मर्त्याः	मर्त्याः
देवासः	देवाः	देवाः
अग्नी	अग्ना	अग्नी
पूर्वेभिः	पूर्वैः	पूर्वैः
देवेभिः	देवैः	देवैः

अनेनैव प्रकारेण धातुरूपाणामपि विषये वैदिकं संस्कृतम् लौकिकात् संस्कृतात् भिद्यते । तद्यथा—

वैदिकसंस्कृतस्य धातुरूपाणि		लौकिकसंस्कृतस्य धातुरूपाणि
इमसि	इमः	इमः
स्मसि	स्मः	स्मः
ईष्टे, ईशे,	ईशते	ईष्टे
श्रृधि,	शुणुधि	श्रृणु
श्रृणुहि	श्रृणु	

(२) लौकिकसंस्कृते यस्मिन्नर्थे 'तुमुन्' प्रत्ययस्य प्रयोगो भवति तस्मिन्नेवार्थे वैदिके संस्कृते असे, तवै, ध्यै प्रभृतीनां प्रत्ययानां प्रयोगो दृश्यते । यथा—जीवसे, एतवै, पातवै, चरध्यै, गमध्यै इत्यादिकाः प्रयोगाः ।

(३) शब्दावलीदृष्टयाऽपि वैदिकभाषाया अनेके शब्दाः लौकिके संस्कृते विलुप्ताः जाता अथवा वैदिकादर्थात् भिन्ने अर्थे प्रयुज्यन्ते । वैदिकाः शब्दाः येषां लौकिके संस्कृते उपलब्धिर्नहि भवति ते अधस्तात् अर्थेण साकमधस्ताद् उद्धृयन्ते—

वैदिकाः शब्दाः	तेषामर्थाः	वैदिकाः शब्दाः	तेषामर्थाः
दर्शत	दर्शनीयः	अमीवा	व्याधिः
दृशीकः	सुन्दरः	रः	मूढः
अमूरः	वुद्धिमान्	अक्तः	रात्रिः रश्मिर्वा ।

केषांचन वैदिकानाम् शब्दानाम् लौकिके संस्कृते निम्नप्रकारेणार्थपरिवर्तनमभूत्—

शब्दाः	तेषां वैदिकार्थाः	लौकिके संस्कृतेऽर्थपरिवर्तनम्
अरातिः	शत्रुता, कृपणता	शत्रुः
वधः	शस्त्रविशेषः	हननम्
मृडीकः	कृपा, अनुग्रहः	शिवस्यनाम विशेषः
न	यथा, नहि	नहि
अरिः	ईश्वरः, धार्मिकः, शत्रुः	शत्रुः

क्षितिः—	निवासस्थानम्, गृहम्, मनुष्यः	पृथ्वी

(४) ध्वनेर्दृष्टयाऽपि वैदिकलौकिकसंस्कृतयोर्भेदो वर्तते । तथाहि—वैदिकभाषायां द्विपञ्चाशत् संख्याकाः ध्वनयः सन्ति किन्तु लौकिकसंस्कृते अष्टचत्वारिंशदेव ध्वनयः सन्ति ।

(५) स्वराघातवलाघातयोर्दृष्टयाऽप्युभयोर्भाषयोर्भेदो वर्तते । तथाहि—वैदिकीभाषा स्वराघातप्रधानाऽसीत् किन्तु लौकिकं संस्कृतं वलाघातप्रधानं वभूव ।

(३) वैदेशिकशव्दसम्पत्तिः—वैदिके संस्कृते अत्यल्पानां वैदेशिकानां शव्दानां सन्निवेशो दृश्यते, किन्तु लौकिकसंस्कृते अत्यधिकानां वैदेशिकानां शव्दानां सन्निवेशो वभूव ।

इत्थम् वैदिकलौकिकसंस्कृतयोरनेकधा वैषम्यमवलोक्यते ।

पालिभाषायाः स्वरूपनिरूपणम्

मध्यकालीनभारतीयार्यभाषायाः प्रथमयुगस्य पालिभाषा वर्तते । इयम् देशभाषाऽथवा प्रथमप्राकृतभाषाशव्देनाप्यभिधीयते । अस्याः भाषायाः कालम् केचनजनाः ई० पू० षष्ठशतकादारभ्य ख्रैष्टाव्दस्य प्रथमशतकं यावत् स्वीकुर्वन्ति ।

अस्याः पालिनामाधिकृत्य विचारकाणां मतभेदो दृश्यते । चतुर्थशताव्दस्य दीपवंसनामके पालिग्रन्थे पालिशव्दस्य प्रयोगो वुद्धवचनरूपेऽर्थे कृतो वर्तते । तदनन्तरमाचार्यो वुद्धघोषोऽपि पालिशव्दस्य प्रयोगः अस्मिन्नेवार्थेऽकरोत् । सुदीर्घकालं यावत् पालिभाषायै मगधभाषाशव्दस्याथवा मागधीशव्दस्य प्रयोगः अभवत् । सिंहलवासिनः इदानीमपि पालिम् मागधीशव्देन व्याहरन्ति ।

विधुशेखरशर्मण अनुसारेण पालिशव्दस्य सम्वन्धः संस्कृतभाषायाः पंक्तिशव्देन वर्तते । एके विचारकाः वदन्ति यत् वैदिकसंस्कृतयोरपेक्षया पल्लिशव्दस्य सम्वन्धः ग्रामभाषया सह वर्तते । पालिशव्दः पल्लिशव्दस्य विकसितम् रूपम् वर्तते । अन्ये विचारकाः पालिभाषा प्राचीनतमा प्राकृतभाषा वर्तते । कोसाम्वीनामको वौद्धविद्वान् पालिशव्दस्य सम्वन्धं रक्षार्थकात् पालधातोः मनुते । भिक्षुः सिद्धार्थः वुद्धपाठेन साकं पालिशव्देन साकं स्वीकरोति । राजवाडे महोदयः पालिशव्दस्य सम्वन्धं प्रकटशव्देन सह स्वीकरोति । भिक्षोः जगदीशकश्यपानुसारेण पालिशव्दस्य सम्वन्धं पर्यायार्थकात् परिचायशव्देन सह स्वीकरोति ।

पालिभाषायाः आधाराः—पालिभाषा कस्य स्थानस्य भाषा वर्तते, अयमपि प्रश्नः अतीव विवादास्पदो वर्तते । अत्र कानिचन मतानि प्रस्तूयन्ते ।

(१) उपर्युक्तं यद् सिंहलवासिनो जनाः भाषामिमां मागधीमाहुः। गियर्सन–चाइल्डर्स–विडिश–गाइगरप्रभृतयो विद्वांसः अपि इममेव मतम् स्वीचक्रुः। (२) वेटरगार्ड–ई० कुह्न–फ्रैंकस्टैनकोनो प्रभृतयो विद्वांसः पाल्याः उद्गमं उज्जयिन्याः अथवा विन्ध्यप्रदेशसमीपवर्तिनी भाषाश्रितां स्वीकुर्वन्ति। (३) ओल्डनवर्ग ई० मूलरौ इमां कलिंगदेशस्य भाषामाहतुः। (४) रीज डेविड महोदयः पालिभाषाया आधारं षष्ठ–सप्तमशतकयोः कोसलस्योपभाषां स्वीकरोति।

पालिभाषायाः काश्चन प्रमुखाः विशेषताः—वैदिकभाषायाः अधिकान ध्वनीनां प्रयोगः पालिभाषायां तु भवति; किन्तु ऋ, ॠ, ऌ, ऐ, औ, श्, ष्, विसर्ग–जिह्वामूलीयोपध्मानीयानां ध्वनीनां लोपः अस्यां भाषायामभवत्। किञ्चास्यां भाषायां ह्रस्व एकारस्य, ह्रस्व ओकारस्य च विकासोऽभवत्। संस्कृतभाषायाः पालिभाषायाश्च ध्वनिषु सर्वाधिको भेदः अयमभूत् यत् वैदिकसंस्कृतस्य ळ ळ्ह् इमौ ध्वनी लौकिकसंस्कृते नहि समुपलभ्येते किन्तु पालिभाषायामनयोर्ध्वन्योः सद्भावो वर्तते। वैदिकाथवा संस्कृतभाषाया अपेक्षया पालिभाषायाम् ध्वनिपरिवर्तनस्य वह्वयः प्रवृत्तयो दृश्यन्ते। यथा स्वरान्तराले विद्यमानयोः डकारढकारयोः पाल्यां क्रमशः ळकार ळ्हकारौ भवतः; अनेके चाघोषवर्णाः घोषाः भवन्ति। पाल्यां स्वरभाक्तिः समीकरणम् विषमीकरणञ्चापि भवन्ति।

(२) ध्वनिरूपयोरुभयोरेव दृष्ट्या पालिभाषायाम् तत्कालीनानां वह्वीनामुपभाषाणां तत्त्वानि विद्यमानानि सन्ति। (३) ध्वनिरूपयोरुभयोरेव दृष्ट्या पालिभाषा वैदिकसंस्कृतस्य सन्निकटतरा वर्तते। (४) पालिसाहित्यस्य पर्यालोचनेन प्रतीयते यद् पालिभाषाया आद्यन्तम् एकमेव रूपम् नास्ति। पालिभाषायां न्यूनातिन्यूनं चत्वारि प्रतीयन्ते। पालिभाषायाः प्रथमं पर्व त्रिपिटिकग्रन्थस्य गाथासु, द्वितीयं पर्व त्रिपिटिकग्रन्थस्य गद्यभागेषु, तृतीयं पर्व अट्ठकथाप्रभृतिषु तदुत्तरवर्तिगद्येषु, चतुर्थं च पर्व उत्तरकालीनेषु दीपवंस–महावंसादिकेषु काव्येषु समुपलभ्यते। पालिभाषायाः चतुर्थे पर्वणि संस्कृतस्य प्रचुरः प्रभावः प्रतीयते। (५) पालिभाषायां तद्भवशब्दानाम् प्रयोगोऽधिको दृश्यते। अस्यां भाषायां वैदेशजानां शब्दानाम् संख्या स्तोकतरा वर्तते। (६) पालिभाषायाः नामरूपेषु शब्दरूपेषु च द्विवचनस्य प्रयोगो नास्ति किन्तु लिङ्गानि त्रीणि सन्ति। (७) अस्यां भाषायां समवेतरूपाणि न्यूनान्यासन्। (८) व्यञ्जनान्तानि प्रातिपदिकानि न्यूनानि आसन्। (९) आत्मनेपदम् केषुचन एव रूपेषु अवशिष्यते।

भाषावैज्ञानिकमर्थविज्ञानम्

येभ्यो वक्तॄणां मानसिको भावोऽवगम्यते क्रियायास्तानि रूपाणि अर्थशब्देनाभिधीयन्ते। यथा—त्वमुपविश अत्राऽज्ञा प्रतीयते। अर्था इमे प्रधानतया पञ्चधा

भवन्ति—निश्चयार्थका अर्थाः, सम्भावनार्थकाः, सन्देहार्थकाः, आज्ञार्थकाः संकेतार्थकाश्च ।

अर्थस्य दृष्ट्या प्रत्येकस्य पदस्य योऽह्यर्थो भवति। सः अर्थ इत्यभिधीयते। पदार्थ एवार्थशब्दवाच्यो भवति । वेली (Bally) नामको भाषावैज्ञानिकः अर्थतत्त्वम् शुद्धं कोषजन्यार्थबोधकं प्रतीकविशेषं मनुते । अर्थविज्ञानस्यैवापरं नामार्थतत्त्वमस्ति ।

अयमर्थः सर्वदा परिवर्तितो भवति एकस्य शब्दस्य कालभेदादर्थोऽपि भिद्यते । यथा—प्राचीने कालेअभियुक्तशब्दस्यार्थः प्रामाणिक आसीत् किन्तु कालान्तरवर्तमाने काले अभियुक्तशब्दस्य सापराधपुरुषस्यार्थे प्रयोगो भवति । इदमर्थपरिवर्तनमेवार्थविकासशब्देनाथवार्थविकारशब्देनाभिधीयते ।

अस्यार्थपरिवर्तनस्य तिस्रो दिशः भाषावैज्ञानिकैः निरूपितः—अर्थविस्तारः, अर्थसङ्कोचः अर्थादेशश्च । एतद्व्यतिरिक्ताः केचन तादृशा अपि शब्दाः समुपलभ्यन्ते येषु अर्थस्योत्कर्षो दृश्यते अथवा अर्थस्यापकर्षो दृश्यते ।

सांस्कृतिकेन विकासेनैव साकम् भाषयोः प्रत्येकाङ्गोपाङ्गेषु परिवर्तनं जायते । पूर्वतो विद्यमानानामेव शब्दानाम् नवीनेषु अर्थेषु प्रयोगो भवति । तेषु तेषु नवीनेषु शब्दानाम् व्यवहारप्रवर्तकाः आचार्या एव भवन्ति । तथा चोक्तम् महाभाष्ये—

> आचार्याचारात् संज्ञासिद्धिः । आचार्याणां व्यवहारात् । इहापि
> कृतः पूर्वैरभिसम्बन्धः । कैः ? आचार्यैः ?

तासामर्थपरिवर्तनस्य तिसृणाम् दिशाम् मनाङ् विवेचनमधस्तात् क्रियते—

(१) **अर्थविस्तारः**—(Expanson of Ncrning) शब्दानामर्थस्य विस्तारो भवति । तेषां मौलिक अर्थस्तु स्थित एव भवति, पुनस्तस्यार्थस्य विस्तारो भवति। यथा—अभ्यासशब्दः पूर्वम् बाणप्रक्षेपणाभ्यासाय प्रायुज्यत । तथा चाह भट्टहलायुधः—

‘बाण भुक्तिर्व्यवच्छेदो दीप्तिर्वेगस्य तीव्रता ।
अभ्यासः कथ्यते योग्या श्रमस्थानं खलूरिका ॥’

किन्तु साम्प्रतम् सर्वप्रकारकाणां कार्याणामभ्यासः अभ्यास शब्देनाभिधीयते । अनेनैव प्रकारेण तैलशब्दः तिलजन्यस्य स्नेहमात्रस्य वाचक आसीत् किन्तु साम्प्रतम् अस्य शब्दस्य सर्वप्रकारकबीजरसाय क्रियते । यथा—सर्षपतैलम्, विषतैलम्, सर्पतैलम् इत्यादिकम् ।

डॉ० तारापुरवाला महोदयस्यानुसारेण विशिष्टे शब्दे सामान्यस्यार्थस्य स्थापनमेव अर्थविस्तार इत्यभिधीयते । अत्रार्थविस्तारस्य कानिचनोदाहरणानि प्रस्तूयन्ते—

शब्दः	मौलिकः अर्थः	विस्तृत अर्थः
गवेषणा	गोरन्वेषणम्	शोधकार्यम्, अन्वेषणम् ।
प्रवीणः	वीणावादन चतुरः	चतुरः ।
द्रव्यम्	काष्ठनिर्मितं वस्तु	धनम्, गुणाश्रयः पदार्थः ।

अर्थसंकोचः—अर्थसङ्कोचे शब्दस्यार्थो न्यूनायते । यथा—प्राक् गोशब्दः चरतां समेषां प्राणिनाम्, इन्द्रियाणाम् , वेदवाणीनाम्, गवाम् रश्मीनां च कृते प्रायुज्यत; किन्तु वर्तमाने काले गोशब्दस्य प्रयोगः गोत्वावच्छिन्नाय प्राणिविशेषाय कृते भवति । वेदना शब्दः पूर्वकाले सर्वप्रकारकस्य ज्ञानस्य वाचक आसीत् किन्तु वर्तमानकाले अस्य शब्दस्य प्रतिकूलप्रतीतिरूपाय दुःखायैव भवति ।

डॉ० मङ्गलदेवशास्त्री अर्थसङ्कोचस्य निम्नाङ्कितान्युदाहरणान्युपन्यस्तवान्—

शब्दः	मौलिकार्थः	संकुचितार्थः
वेदः	सर्वविधाः विद्याः	ऋग्वेदादिकाश्चत्वारो वेदाः
पर्वतः	पर्ववान् मेघः पर्वतः	पर्वतः
यात्रा	कुत्रापि गमनम्	तीर्थाटनम्
वरम्	अभ्यर्थितं वस्तु	वरः
पयः	दुग्धम् जलम् च	दुग्धम्
धान्यम्	अन्नमात्रम्	धान्यम्

अर्थसङ्कोचोऽनेकधा भवति । अर्थस्य सङ्कोचः अथवा अर्थस्य विशेषावस्थानम् समासे भवतीत्याह भर्तृहरिः यथा—अब्भक्षः, वायुभक्षः, कर्णेजपः, त्र्यम्बकः, कण्ठेकालः, पश्यतोहरः इत्यादिषु शब्देषु ।

किञ्चोपसर्गस्य संयोगेनापि अर्थसङ्कोचोऽथवा विशेषावस्थानं भवति । यथा—आहार-विहार-संहार-विहारादिषु । अनेनैव प्रकारेण भूधातोरपि उपसर्गसम्बन्धेन प्रभावानुभाव-विभाव-सम्भावादिषु शब्देषु ऊहनीयम् ।

विशेषणानामपि संयोगेनार्थसङ्कोचो भवतीति दृश्यते । यथा—शुक्लो पटः, शुक्लो गौः शुक्लोऽश्वः इत्यादिषु । अतएव हि विशेषणनामर्थसङ्कोचकत्वरूपं व्यावर्तकत्वं स्वीक्रियते । तथा चोक्तं महर्षिणा पतञ्जलिना—

'सर्वश्च शब्दोऽन्येन शब्देनाभिसम्बध्यमानो विशेषवचनः सम्पद्यते ।' इति ।

महर्षिणा पतञ्जलिनाभिहितम् यत् शब्दानामर्थाः लोकप्रसिद्धिमप्याश्रित्य संकुचिता भवन्ति । तथाहि—

'युक्तं पुनर्यत् नियतविषया नाम शब्दाः स्युः । बाढं युक्तम् । अन्यत्रापि नियतविषयाः शब्दाः दृश्यन्ते ।' इति ।

(३) अर्थादेश: (Tramsfesence of Meaning) डॉ० देवेन्द्रनाथशर्मा लिखति यत् आदेशशब्दस्यार्थः परिवर्तनम् वर्तते । अर्थादेशे शब्दस्यार्थः संकुचितः अथवा विकसितो नहि भवति अपि तु तस्यार्थस्य स्थाने अर्थान्तरमायाति । अर्थादेशात् प्राक् शब्दः कस्यचन अन्यस्यार्थस्य वाचको भवति, अर्थादेशे जाते च तस्माद्भिन्नस्यैवार्थस्य वाचको भवति । यथा—वेदेषु असुरशब्दः देवानाम् वाचक आसीत् परन्तु परवर्तिसाहित्ये सोऽयं शब्दः दैत्यानाम् वाचको बभूव । अभियुक्तशब्दः पूर्वं प्रामाणिकस्य अथवाप्तपुरुषस्य वाचकः आसीत् किन्तु परिवर्तिकाले सोऽयं शब्दः सापराधस्य पुरुषस्य वाचको बभूव ।

अत्र डॉ० भोलानाथ तिवारी महोदयो लिखति यत् भावसाहचार्यवशात् कदाचित् शब्दस्य प्रधानेनार्थेन साकम् गौण अप्यर्थः प्रचलितो भवति । कालक्रमेण तस्य शब्दस्य प्रधान अर्थो लुप्यते, गौड एवार्थः प्रचलितो भवति । इत्थम् एकस्य अर्थस्य लोपे सपि नवीनस्यार्थस्य प्रचलनमेव अर्थादेश इत्यभिधीयते ।

डॉ० मङ्गलदेव शास्त्री अर्थादेशस्य त्रीन् पर्यायवाचिनः शब्दान् निर्दिष्टवान् अर्थान्तरणम्, अर्थसंक्रमणम् अर्थविपर्ययश्च । सः अर्थादेशस्य निम्नाङ्कितान्युदाहरणानि उपस्थापयामास—

शब्दः	मौलिकार्थः	नवीनार्थः
अनुग्रहः	साहाय्यकरणम्	दया ।
अनुक्रोशः	कस्यचन रोदनानन्तरं रोदनम्	सहानुभूतिः ।
गौः	पशुः	किरणानि, पृथ्वी
शुश्रूषा	श्रोतुमिच्छा	सेवितुमिच्छा

अर्थस्य परिवर्तनमर्थोत्कर्षापकर्षाभ्यामपि सम्भवति—अर्थोत्कर्षविषये डॉ० भोलानाथ तिवारी महोदयो लिखति यत् शब्दाः उन्नताः भवन्ति । यथा पूर्वं मुग्धशब्दः मूढस्य वाचक आसीत् किन्तु साम्प्रतम् मुग्धशब्दस्य मनोज्ञरूपेऽर्थे भवति प्रयोगः ।

अर्थापकर्षः—समयानुसारेण अर्थस्य परिवर्तनम् अर्थापकर्षरूपेणापि भवति । यथा—वेदेषु असुरशब्दस्यार्थः देवता अथवा सूर्यः आसीत् किन्तु परवर्तिकाले सोऽयं शब्दः राक्षस्य वाचको बभूव । अयमेवार्थपकर्षो वर्तते शब्दस्य ।

भाषावैज्ञानिकं व्युत्पत्तिशास्त्रम्

भाषाविज्ञानस्य वाक्यविज्ञानशाखायाम् व्युत्पत्तिशास्त्रस्याध्ययनं क्रियते । व्युत्पत्तिशास्त्रे शब्दानाम् मूलमवचीयते । अध्ययनमिदं शब्दानाम् रूपध्वन्यर्थाणाम् विचारेण द्वारा सम्पद्यते । इत्थम् शब्दानाम् रूपध्वन्यर्थाणाम् समन्वितरूपं व्युत्पत्तिशास्त्रमित्यभिधीयते । शब्दस्य प्रकृतिप्रत्ययविभागज्ञानेनैवास्पष्टरचनावतां शब्दानाम् ज्ञानं

सम्पद्यते । भारतवर्षे व्युत्पत्तिशास्त्रविषयकं महत्कार्यं कृतम् वैयाकरणैः । शब्दानाम् व्युत्पत्तिविधायकं शास्त्रं निरुक्तं वर्तते । निरुक्तस्य गणना संस्कृतविद्वद्भिः वेदाङ्गेष्वन्यतमत्वेन कृता । यास्कप्रणीतं निरुक्तम् व्युत्पत्तिशास्त्रस्य प्रप्रथमो ग्रन्थो वर्तते । निरुक्ते शब्दस्य त्रयः प्रकारा निर्दिष्टाः सन्ति । तथाहि—

'त्रिविधा हि शब्दप्रवृत्तयः—प्रत्यक्षकृता,परोक्षकृतः अतिपरोक्षकृता च' ।

निरुक्तशब्दो हि व्युत्पत्तिपरः । निरुक्तग्रन्थे शब्दस्यार्थरूपतरत्वयोर्निरूपणं कृतं वर्तते । निरुक्तस्य पञ्चभेदाः निर्दिष्टाः सन्ति—वर्णागमः, वर्णविपर्ययः, वर्णविकारः, वर्णनाशः धातोरर्थविस्तारश्च । तथाहि—

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ इति ।

निरुक्तस्य द्वौ खण्डौ स्तः, निरुक्तम् निघण्टुश्च । निघण्टौ अर्थदृष्टया कठिनानां वैदिकानां शब्दानां संग्रहो वर्तते । निरुक्तभागे च निघण्टौ संगृहीतानां वैदिकानां शब्दानाम् प्रकृतिप्रत्यययोः विश्लेपणं वर्तते ।

पाश्चात्यदेशेषु प्लेटोमहोदयस्य समये किञ्च तस्मादपि पूर्वकाले ग्रीसदेशे च दर्शनशास्त्रस्याङ्गरूपेण व्युत्पत्तिशास्त्रस्याध्ययनं प्रचलितमासीत् । प्लेटो स्वकीये क्रेटीलस नामके ग्रन्थे व्युत्पत्तेः प्रकारस्य समीक्षामकरोत् ।

शब्दव्युत्पत्तेः साधारणाः नियमाः—डॉ॰ मङ्गलदेव शास्त्री तुलनात्मक भाषाविज्ञाननामके स्वकीये ग्रन्थेऽलेखीत् यत् व्युत्पत्तेर्निर्धारणस्यानेके नियमा नहि भवितुमर्हन्ति । तस्य तु केचन साधारणा एव नियमाः कर्तुं शक्यते । श्री शास्त्रीमहोदयानुसारेण व्युत्पत्तेः साधारणाः नियमाः त्रयो भवितुमर्हन्ति निम्नाङ्किताः—

(१) व्युत्पत्तेर्निर्धारणमनुसन्धानयाथात्म्यमाश्रयति अतएव व्युत्पत्तेः कल्पना स्वेच्छया नहि कर्तुं शक्यते । अतएव कस्यचन शब्दस्य मूलनिर्धारणात् प्राक् तस्यैतिहासिकपरम्परायाः सम्बन्धस्य वा निश्चय आवश्यको भवति ।

(२) सर्वासाम् भाषाणां परिवर्तनम् केषांचन वर्णविकारविषयकाणां नियमानामायत्तं भवति, अतएव भिन्नायाः भाषायाः भिन्नो नियमो भवति ।

(३) शब्दानां व्युत्पत्तौ शब्दानां रूपाणीव तेषामर्थस्यापि परीक्षा कर्तव्या । तथा चात्र कानिचनं प्रामाणिकानां वचांसि भवन्ति ।

(१) रूपसामान्यादर्थसामान्यं नेदीय । [गोपथब्राह्मण १।१।२६]
(२) अर्थं नित्यं परीक्षेत् । [निरुक्त २।१]
(३) अर्थसामान्यं वलीयः शब्दसामान्यात् । [निरुक्तस्य दुर्गवृत्तिः]

व्युत्पत्तेरेतेषां नियमानामुपेक्षणं कृत्वा शब्दसामानतामात्रेण स्वेच्छया व्युत्पत्तिकरणं भ्रामकं भवति। व्युत्पत्तेः कार्ये शब्दस्य मूलस्यान्वेषणं, तस्य स्वरूपस्य विचारश्च, महत्त्वपूर्णे स्तः। अर्थरूप-ध्वनीनां सादृश्यस्याधारेणैव शब्दस्य व्युत्पत्तिरौचित्यमावहति। व्युत्पत्तौ ध्वनि नियमस्यापि महत्त्वं भवति। संस्कृत वैयाकरणानामनुसारेण शब्दस्य प्राक् प्रकृतिरन्वेषणीया, तदनन्तरम् प्रत्ययस्य विचारः करणीयः। अयमेव शब्दव्युत्पत्तेः साधारणोम् नियमः।

शब्दशक्तयः

कमपि शब्दं श्रुत्वार्थविशेषस्य स्मृतिर्भवति इति दृश्यते, यथा घटशब्दं श्रुत्वा कम्बुग्रीवादिमतः पदार्थस्य, गौशब्दं श्रुत्वा गलकम्बलादिविशिष्टस्यार्थस्य। एतेन ज्ञायते यत् तेषु तेषु शब्देषु अर्थविशेषस्य बोधनस्य शक्तिवर्तते इति। अतएव निसर्गतः केचनात्रानुयोगा उदियन्ति? तथाहि नाम शब्दस्य शक्तिः? केन प्रकारेण सा तेषां तेषामर्थानां बोधने क्षमा भवति? सर्वेषु शब्देषु शक्तिः एक एव अथवा भिन्नः भिन्नः? शक्तेर्नामानि कानि च? इत्यादिकाः।

एतेषां समेषामनुयोगानां समाधानं प्रामाणिकानां निम्नाङ्कितैर्वाक्यैः भवति।

विषयत्वमनापन्नैः शब्दैर्नार्थः प्रकाश्यते।
न सत्तथैव तेऽर्थानामगृहीताः प्रकाशकाः॥

इति। प्राह वाक्यपदीयकारः। विषयत्वमापन्ना एव शब्दाः अर्थान् प्रकाशयन्ति। तथा चाह महाभाष्यकारः पतञ्जलिः—

शब्दः उपलब्धोऽर्थं प्रकाशयति न सत्तामात्रेण।

शब्दस्यार्थबोधिकायाः स्वरूपं निरूपयन् कैयटः महाभाष्योद्योते प्राह—

'शब्दार्थयोस्तदात्म्यमेव शक्तिः' इति। शक्तेः स्वरूपविषये नैयायिका वदन्ति 'इदं पदमिममर्थं बोधयेत्' अथवा—'अस्माच्छदादयमर्थो बोद्धव्यः' इत्याकारकः संकेत एव शक्तिः। नागेशानुसारेण तु पदतदर्थयोः सम्बन्धविशेष एव शक्तिरित्यभिधीयते। सा च वाच्यवाचकस्वरूपा भवति। पदपदार्थयोरभेदज्ञानेन च शक्तिग्रहः सम्पद्यते। सा च पदता शक्तिः संकेतितमर्थं बोधयति। अतएव शब्दस्य शक्तिरेवार्थबोधिका।

अत्र काव्यप्रकाशकारः शब्दस्य भेदत्रयं स्वीकृत्य तेषां शब्दानां शक्तीनां भेदमपि त्रिधा स्वीकृतवान्। तथाहि—'स्याद् वाचको लाक्षणिकः शब्दोऽत्र व्यञ्जकस्त्रिधा।' तत्र अभिधा–लक्षणा–व्यञ्जना चेति शब्दानां शक्तयोऽपि तिस्रो भवति। तत्र वाचकः शब्दः अभिधाशक्तता वाच्यार्थम्, लक्षणाशक्त्या लक्षकः शब्दो लक्ष्यार्थम् व्यञ्जनाशक्त्या च व्यञ्जकः शब्दो व्यङ्ग्यार्थम् बोधयति। तथा चाह साहित्यदर्पणकारः—

'वाच्योऽर्थोऽभिधया बोध्यो लक्ष्यो लक्षणया मतः ।
व्यङ्ग्यो व्यञ्जनया ताः स्युः तिस्रः शब्दस्य शक्तयः' ।। इति ।

तासु तिसृषु शक्तिषु अभिधा नाम्नी शक्तिस्सा भवति या संकेतितमर्थं बोधयति । तथा चोक्तं कविराजेन विश्वनाथेन—

'तत्र संकेतितार्थस्य बोधनादग्रिमाभिधा ।' इति ।

अत्रायं प्रश्नः उदेति यत् संकेतः कुत्र गृह्यत' इति । व्यक्तौ व्यक्तेरुपाधिषु वा ? उपाधीनां चतुष्ट्वं निरूपयता महाभाष्यकारेणाभिहितम्—'गौः शुक्लश्चलो डित्थः इत्यादौ चतुष्टयी शब्दानां प्रवृत्तिः' इति उपाधिष्वेव संकेतो गृह्यत इतीममेवार्थं निरूपयन् साहित्यदर्पणकारः प्राहः—

'संकेतो गृह्यते जातौ गुणद्रव्यक्रियासु च' ।

जातिर्गोपिण्डादिषु गोत्वादिका । गुणो विशेषाधानहेतुः, सिद्धो वस्तुधर्मः । शुक्लादयो हि गवादिकं सजातीयेभ्यः कृष्णगवादिभ्यो व्यावर्त्तयन्ति । द्रव्यशब्दा एकव्यक्तिवाचिनो हरिहरडित्थडवित्थादयः । क्रियाः साध्यरूपा वस्तुधर्माः पाकादयः । एष हि अधिश्रयणावश्रयणाद्यन्तादिपूर्वापरीभूतो व्यापारकलापः पाकादिशब्दवाच्यः । एष्वेव हि व्यक्तेरुपाधिषु संकेतो गृह्यते, न व्यक्तौ आनन्त्यव्यभिचारदोषापातात् ।

अयमाशयः—संकेतग्रहकालादृष्टव्यक्तावपि बोध्यस्य कार्यस्य सत्त्वाद् व्यक्तिसंकेतग्रहरूपकारणस्य सिद्धत्वाद् व्यभिचारः । गवादिव्यक्तीनां नानात्वान्नानाव्यक्तिषु नानाशक्तिकल्पनस्यावश्यकत्वेन गौरवं स्यादित्यभिप्रायः साहित्यदर्पणकारस्य ।

लक्षणाभिधानां शब्दशक्तिं निरूपयन् साहित्यदर्पणकारः प्राह—

मुख्यार्थबाधे तद्युक्तो ययान्योऽर्थः प्रतीयते ।
रूढेः प्रयोजनाद् वाऽसौ लक्षणाशक्तिरर्पिता ।।

मुख्यार्थबाधे सति तद्युक्तत्वे सति रूढिप्रयोजनान्यतरहेतुकत्वं लक्षणायाः लक्षणम् । तत्र लक्षणायाम् मुख्यार्थस्य बाध आवश्यको भवति । विना मुख्यार्थबाधं लक्षणायाः प्रवृत्तिरसम्भाविनी मुख्यार्थस्य बाधश्च अन्वयानुपपत्त्या भवतीति केषांचन मतम् । यथा गङ्गायां घोषः इत्यादौ गङ्गापदस्य जलप्रवाहरूपो मुख्यार्थः सप्तम्याः अधिकरणत्वरूपोऽर्थः । घोषपदस्य कुटीररूपोऽर्थः, प्रथमायाः आधेयत्वरूपोऽर्थश्च भवति । अनेन प्रकारेण जलप्रवाहनिष्ठाधिकरणतानिरूपिताधेयतावान् घोषः । इति वाक्यार्थः उपपद्यते । परन्तु जलप्रवाहस्य कुटीराधिकरणत्वासम्भवादत्रान्वयः अनुपपन्नो भवति । तेन गङ्गापदस्य प्रवाहेन युक्तः तटरूपोऽर्थः क्रियते शब्दस्य लक्षणया वृत्त्या ।

न च तटरूपमर्थं शब्दस्याभिधाशक्त्येव बोधयतु इति वाच्यम, शब्दबुद्धिकर्मणां

विरम्य व्यापाराभावात्, शब्दस्य च स्खलद्गतित्वात् । अतएव तटरूपस्यार्थस्य बोधः लक्षणयैव वृत्त्या सम्भवः । न च लक्षणावृत्तिः तटव्यतिरिक्तरूपमर्थं बोधयतु इति शङ्कनीयम्, लक्षणायाः वृत्तेः मुख्यार्थसम्बद्धस्यैवार्थस्य बोधकत्वात् । जलप्रवाहेन च तटस्यैव सम्बद्धत्वात् तस्यैव च कुटीराधारत्वयोग्यतायुक्तत्वात् ।

न च गङ्गातटे घोषः इत्यर्थस्य लक्षणया वृत्त्या बोधनार्थम् गङ्गायाम् घोषः इति कथनापेक्षया गङ्गातटे घोष इति कथनीयमिति चेन्न, तत्र वस्तुप्रयोजनविशेषस्य सत्त्वात् । तच्च प्रयोजनम् शैत्यपावनत्वातिशय्यबोधनरूपं वर्तते । यादृशं शैत्यं पावनत्वं च गङ्गायाः प्रवाहे भवति तादृशं शैत्यम् पावनत्वं चास्मिन् कुटीरे वर्तत इतीममर्थं बोधयितुमेव वक्ता 'गङ्गायां घोषः' इति वक्ति । गङ्गातटे घोषः इति कथनेन तस्य प्रयोजनस्य पूर्तेरसम्भवात् । गङ्गातटे तु उष्मायाः अपवित्रतायाश्चापि सम्भवात् । तस्याः लक्षणायाः द्वौ भेदौ भवतः उपादानलक्षणा लक्षणलक्षणा चेति । तथा चाहात्र काव्यप्रकाशकारः—

> 'स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम् ।
> उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा ॥'

अयमर्थः—वाक्ये प्रयुक्तस्य पदविशेषस्यान्वयसिद्धये मुख्यार्थव्यतिरिक्तस्यार्थस्यार्थस्याक्षेप एवोपादानलक्षणेत्यभिधीयते, परस्यान्वयसिद्धये मुख्यार्थस्य परित्यागश्च लक्षणलक्षणेत्यभिधीयते । इयमुभयभेदवती लक्षणा शुद्धैव भवति सादृश्येतरसम्बन्धयुक्तत्वात् । गौणी लक्षणा तु तत्र भवति यत्र लक्षणायाः प्रयोजकः सम्बन्धः सादृश्यरूपो भवति । कुन्ताः प्रविशन्ति इत्युपादानलक्षणाया उदाहरणम् । अस्य वाक्यस्य कुन्तधारिणः पुरुषाः प्रविशन्ति इति लाक्षणिकत्वात् । कुन्तस्य गहनत्वं तीक्ष्णत्वं चात्र प्रयोजनम् । 'गङ्गायां घोषः' इत्यत्र तटस्य घोषाधिकरणत्वसिद्धये गङ्गाशब्दः स्वार्थमर्पयति इत्येवमादौ लक्षणेनैषा लक्षणा ।

शुद्धायाः गौण्याश्चोभयविधायाः लक्षणायाः द्वौ द्वौ भेदौ भवतः—साध्यावसाना सारोपा च । उक्तश्चापि काव्यप्रकाशकारेण मम्मटभट्टेन—

> 'सारोपान्या तु यत्रोक्तौ विषयो विषयस्तथा ।'

'आरोप्यमाणः आरोपविषयश्च यत्रानपह्नुतभेदौ सामानाधिकरण्येन निर्दिश्येते सा लक्षणा सारोपा ।

> 'विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यावसानिका ।'

'विषयिणारोप्यमाणेनान्तःकृते निगीर्णे अन्यस्मिन्नारोपविषये सति साध्यावसाना स्यात् ।'

> 'भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा ।'
> 'गौणौ शुद्धौ च विज्ञेयौ····॥'

'इमौ आरोपाध्यवसानरूपौ सादृश्यहेतू भेदौ 'गौर्वाहिकः' इत्यत्र 'गौरयम्' इत्यत्र च ।

'लक्षणा तेन षड्विधा ।' इति ।

साहित्यदर्पणकारस्तु लक्षणायाः अशीतिभेदान् कल्पयामास । ते च भेदास्तत्रैवावलोकनीयाः ।

शब्दस्य व्यञ्जनां शक्तिं वर्णयन् विश्वनाथ कविः निम्नां कारिकां प्राह—

विरतास्वभिधाद्यासु यथार्थो बोध्यतेऽपरः ।
सा वृत्तिर्व्यञ्जनानाम शब्दस्यार्थादिकस्य च ॥'

अस्याः कारिकायाः व्याख्यायाम् विश्वनाथेन कविनाभिहितम्—'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः ।' इति नयेन अभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वं स्वमर्थं बोधयित्वा उपक्षीणासु, ययाऽपरः अन्योऽर्थः बोध्यते सा शब्दस्यार्थस्य प्रकृतिप्रत्ययादेश्च वृत्तिर्व्यञ्जन–ध्वनन–गमन–प्रत्यायनादिव्यपदेशविषयो व्यञ्जना नाम ।' इति ।

तत्र शाब्दी लक्षणा द्विधा भवति—अभिधामूला लक्षणामूला च । तत्राभिधामूलां व्यञ्जना निर्दिशन् कविराजो विश्वनाथस्त्वाह—

'अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते ।
एकत्रार्थेऽन्यधीर्हेतुर्व्यञ्जना साभिधाश्रयाः ॥' इति ।

अनेकार्थकानाम् शब्दानाम् एकत्रार्थे नियामकान् निरूपयन्नाहाचार्यो विश्वनाथः—

'संयोगो विप्रयोगश्च साहचर्यं विरोधिता ।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥

सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः ।
शब्दार्थस्थानवच्छेदे विशेषस्मृतिहेतवः' ॥ इति ।

लक्षणामूलां व्यञ्जनाम् निम्नप्रकारेण निरूपयामास आचार्यो विश्वनाथः—

लक्षणोपास्यते यस्य कृते तत्तु प्रयोजनम् ।
यया प्रत्याय्यते सा स्यात् व्यञ्जना लक्षणाश्रया ॥ इति ।

आर्थ्याः व्यञ्जनायाः विषये आचार्यो विश्वनाथस्त्वाह—

वक्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः ।
प्रस्ताव–देश–कालानां काकोश्चेष्टादिकस्य च ॥
वैशिष्ट्यादन्यमर्थं या बोधयेत् सार्थसम्भवा ॥' इति ।

अनेन प्रकारेणायमर्थः सिद्धो यद् आलङ्कारिकामन्ववाये शब्दस्य तिस्रः शक्तयः स्वीक्रियन्ते—अभिधा, लक्षणा, व्यञ्जना च ।

शाकुन्तलं सेव्यताम्

कालिदासस्य सर्वस्वमभिज्ञानशाकुन्तलम् ।

महाकविकालिदासप्रणीतेपु अभिज्ञानशाकुन्तलमपरिमितं सौन्दर्यम्, अविस्मरणीयमानन्दमयं रसप्रवाहम्, नाट्योचितनिखिलतत्त्वसन्निवेशम्, सामाजिकहृदयावर्जनोपयोगि अलौकिकं चमत्कारम् च विभर्ति इति नास्ति तिरोहितं काव्यसमीक्षकेभ्यः ।

नाटकं तु दृश्यकाव्यत्वात् सहृदयानाम् श्रोत्रनेत्रान्तःकरणानामावर्जकत्वात् रम्यतामाविष्करोति । तत्रापि रससिद्धकविकर्मतां गतस्य नाटकस्य तु चारुता वर्द्धत एव । तत्रापि कविकुलगुरुणा कवितायाः विलासेन महाकविना कालिदासेन प्रणीतानां तु नाटकानाम् चारुता निसर्गत एव हृदयहारिणी भवति । यद्यपि सन्ति महाकविकालिदासस्य विक्रमोर्वशीयमालविकाग्निमित्राभिज्ञानशाकुन्तलाख्यानि त्रीणि नाटकानि तथाप्यभिज्ञानशाकुन्तलं तु रसपाकदृष्ट्या, कथासंयोजनदृष्ट्या, भारतीयसंस्कृतिनिरूपणदृष्ट्या, पात्राणां चरित्राङ्कनवैशिष्ट्यदृष्ट्या च स्वेतरे कालिदासीये नाटके नूनमतिशेते ।

अभिज्ञानशाकुन्तलस्य सौन्दर्यातिशयमवेक्ष्यैव केनचन समीक्षकेणाभिहितम्—

'वासन्तं कुसुमं फलं च युगपद् ग्रीष्मस्य सर्वं च यद् ।
यच्चान्यन्मनसो रसायनमतः सन्तर्पणं मोहनम् ।
एकीभूतमभूतपूर्वमथवा स्वर्लोकभूलोकयोः
ऐश्वर्यं यदि वाञ्छसि प्रियसखे शाकुन्तलं सेव्यताम्' ।। इति ।

अभिज्ञानशाकुन्तले महाकविः कालिदासो वर्णयति भारतीयानां राज्ञां शालीनता सर्वप्रथमम् । मृगयाव्यसनी पुरुवंशीयो राजा दुष्यन्तः कस्यचन मृगस्य यदा रथेनातिजवेनानुसरणं करोति तदैव कस्यचन वैखानसस्य—'राजन् आश्रममृगोऽयं न हन्तव्यो न हन्तव्यः' ।

'न खलु न खलु बाणः सन्निपात्योऽयमस्मिन्
मृदुनि मृगशरीरे तूलराशाविवाग्निः ।
क्व बत हरिणकानां जीवितं चातिलोलं
क्व च निशितनिपाता वज्रसाराः शरास्ते ।।'

इति वाक्यं श्रुत्वा दुष्यन्तः शीघ्रमेव स्वबाणस्योपसंहरणं करोति । आश्रमे प्रवेशं च करोति सः विनीतवेशैव । सः स्वयमेव सूतं वक्ति—'सूत ! विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम ।

यद्यपि राजा प्रकृतिसुकुमार्याः शकुन्तलाया अप्रतिमं सौन्दर्यं विलोक्य प्रथम एव दर्शने तस्यामाकृष्टमना भवति वक्ति च—

'सरसिजमनुविद्धं शैवलेनापि रम्यं,
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति ।

इयमधिकमनोज्ञा वल्कलेनापि तन्वी,
किमपि हि मधुराणां मण्डनं नाकृतीनाम्' ॥

अथापि सः कुत्रापि स्वकीयां सौम्यतां नहि जहाति । सः यावत्कालम् पूर्णतया नहि जानाति यत् शकुन्तला कुलपतेः कण्वस्यासवर्णक्षेत्रसम्भवा सुकुमारी वर्तते तावत् स्वमनोभिलाषं संवृणोत्येव । यदा सः अनसूयायाः मुखेन जानाति यत् शकुन्तला महर्षेः विश्वामित्रात् मेनकायामुत्पन्ना वर्तते तदैव सा ताम् स्वप्रेयसित्वाय कामयते । तथा तथा च चेष्टते । शकुन्तलातो वियुक्तः सः स्वाभिज्ञानाय तां नैजमङ्गुरीयकं प्रददाति ।

महर्षेः दुर्वाससः शापाद्ग्रस्तः शकुन्तलां विस्मृत्यापि पञ्चमाङ्के मुनेः कण्वस्य शिष्ययोः कटुकोक्तिमपि श्रुत्वा क्रोधं नहि करोति । षष्ठाङ्के पुनः स्वाङ्गुरीयकमाप्नोति तदा तु शकुन्तलां संस्मृत्य राजा उन्मत्तवद् भवति । तावत्कालं नहि धैर्यं बध्नाति यावत्कालं सः पुनः शकुन्तलां नहि प्राप्नोति ।

अस्मिन् नाटके महाकविः कालिदासः भारतीयायाः नार्याः स्वरूपम्, भारतीयस्य श्वसुरस्य स्वरूपम्, भारतीयस्य जामातुः स्वरूपम् च न्यरूपयत् । भारतीयः पिता पुत्रीवियोगजन्यां कीदृशीं व्यथामनुभवतीति वर्णयन् महाकविः कालिदासः प्राह मुनिकण्वस्य मुखेन—

संसाराद् विरक्तोऽपि महर्षिः कण्वः स्वपालिताम् सुताम् तस्याः पतिगृहे प्रेषणकाले वक्ति—

'यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
① कण्ठःस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः,
पीडयन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥' इति ।

पिता स्वपुत्र्यै किं कामयते इति महाकविः कालिदासः कण्वमुखेन वक्ति—

'ययातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
सुतं त्वमपि सम्राजं सेव पुरुमवाप्नुहि' ॥

पुत्री जामातुः प्रियतमा भवेत् लभेत च स्वपत्यनुकूलं पुत्रम् इत्येव मात्रं कामयते भारतीयः पिता । अस्यैवार्थस्योपस्थापनं महाकविनात्र श्लोके कृता ।

महर्षिः कण्वो वने निवसति। शकुन्तला तस्य प्रकृतिप्रिया पुत्री वर्तते। येषां वृक्षाणां गुल्मानां लतानां वनमृगाणां मध्ये सा इदानीं यावत् आश्रमजीवनं व्यतीवती, तानपि वृक्षादीन् महर्षिः कण्वः शकुन्तलायाः पतिगृहगमनकाले आह्वयति—

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
(२) नादत्ते प्रियमण्डनोऽपि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः,
सेयं याति शकुन्तला पतिगृहे सर्वैरनुज्ञायताम् ॥'

महर्षिणा कण्वेन यो हि सन्देशः राज्ञे दुष्यन्ताय प्रेषयामास सः सन्देशः भारतीय-श्वसुरहृदयस्य वर्तते। कश्चनापि पिता कामयते यत् मदीया पुत्री मया जामात्रा तेनैव प्रकारेण समादृता भवेत् येन प्रकारेण सः स्वकीया अन्या अपि पत्नीः सम्मानयति। महर्षिः कण्वोऽपि राजानं दुष्यन्तं सन्दिशति—

'अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मनः
(३) त्वय्यस्याः कथमप्यवान्धवकृतां स्नेहप्रवृत्तिं च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद् वाच्यं वधूबन्धुभिः ॥' इति।

यदा स्वपितुर्गृहात् पुत्री स्वपत्युः गृहं गच्छति तदा तस्याः बान्धवाः व्याहार-व्यवहारविषयकमुपदेशं दिशन्ति। महर्षिः कण्वोऽपि स्वपुत्रीं शकुन्तलां तेनैव प्रकारेणोपदिशति—

'शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने,
(४) पत्युर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥' इति।

अनेन विवेचनेनायमर्थः पूर्णरूपेण स्पष्टो भवति यत् अभिज्ञानशाकुन्तलं भारतीय-संस्कृतेः सम्यक्तयोपदेशं करोति। इमे इदानीं यावत् मयोद्धृताः चत्वारः श्लोकाः एतस्मादेव कारणात् प्रख्याताः सन्ति, यत् ते भारतीयसंस्कृतेः प्रातिनिध्यं कुर्वन्ति। अर्थगौरवगरिम्णा परिपूर्णा अपि इमे श्लोकाः भारतीयजीवनमूलस्य महार्घतां प्रस्तुवन्ति।

भारतीयसंस्कृतौ अतिथिसमादरस्यातीव महत्त्वं वर्तते, शकुन्तलां विहाय दुष्यन्तः स्वराजधानीं प्राविशत् किन्तु शकुन्तला सर्वकालं दुष्यन्तमेव चिन्तयन्ती, समागतम् महर्षि दुर्वाससमपि नह्यवैति। तेन रुष्टो महर्षिः ताम्—'अतिथिदेवो भव' इति वाक्योक्तसंस्कृतेस्च्युतां ज्ञात्वा शपति—

'विचिन्तयती यमनन्यमानसा,
तपोधनं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न स वोधितोऽपि सन्
कथां प्रमत्तः, प्रथमं कृतामिव ।।'

भारतीयसंस्कृतौ विवाहसंस्कारः जीवनस्य अतीव महत्तमः संस्कारो वर्तते । अनेन संस्कारेणैव द्वारा गार्हस्थ्यजीवनं प्रारब्धं भवति । अत एवायं संस्कारः स्वज्ञातिजनानां समक्षमेव सम्पादनीयो भवति । स्त्रीजनेन तु अस्मिन् विषये अत्यधिकसावधानेन भाव्यम्, नो चेत् जीवनं कलङ्कितं स्यात् प्रत्याख्याने कृते । रहसि सम्पादितः दाम्पत्यसम्वन्धो दुःखदो भवति । शकुन्तला दुष्यन्तावपि गान्धर्वेण विधिना स्वोद्वाहसंस्कारं सम्पादितवन्तौ । एतस्योदर्कमपि दुःखदमभूत् । महर्षिशापाभिभूतो दुष्यन्तः स्वपत्न्याः प्रत्याख्यानमकरोत् । यदाङ्गुरीयकदर्शनेन दुष्यन्तस्यापि स्मृतिः पुनर्जागरिता वभूव तदा दुष्यन्तोऽपि शकुन्तलावियोगव्यथया व्यथितः सन् तावत्कालपर्यन्तं शान्तिम् नह्यवाप यावत्कालपर्यन्तं सः शकुन्तलाम् पुनर्नह्यवाप ।

अस्मिन् अभिज्ञानशाकुन्तले काव्योचितानां सर्वेषामावश्यकानां तत्त्वानां सन्निवेशो विलोक्यते । रसपाकस्तु पदे पदे उदीर्णो भवति । उपमायाः लालित्यं पात्राणां चरित्रचित्रणस्य सूक्ष्मेक्षिका प्रभृतयः अस्य नाटकस्य प्रधानवैशिष्टचता गताः । वैदर्भीरीत्या निवद्धेऽस्मिन् नाटके कुत्रापि अर्थाववोधे काठिन्यं नहि भवति । भावानुकूलायाः भाषायाः तथैव विपुलं लावण्यं विभाति सर्वत्र येन प्रकारेण विश्वस्य द्वितीयसुन्दर्याः सौन्दर्यम् स्वेतरानखिलान् स्त्रीजनानतिशेते । इत्थं स्पष्टं वर्तते यत् 'अभिज्ञानशाकुन्तलम्' नाटकम् महाकवेः कालिदासस्य सर्वस्वम् वर्तते इति ।

संस्कृतगद्यकाव्यविकासः

अथवा—संस्कृतगद्यकाव्यपरम्परा ।

संस्कृतवाङ्मये गद्यसाहित्यस्येतिहास अतीव प्राचीनो वर्तते । संस्कृतगद्यस्य प्राचीनं रूपं कृष्णयजुर्वेदे, ब्राह्मणग्रन्थेषु, उपनिषत्सु, निरुक्ते, महाभारते, श्रीमद्भागवतमहापुराणे च समुपलभ्यते । व्याकरणमहाभाष्ये तु संस्कृतगद्यस्योदात्तं स्वरूपं समुपलभ्यते । तदुत्तरवर्तिव्याख्यासु, कथाकाव्येषु, आख्यायिकाग्रन्थेषु, चम्पूग्रन्थेषु नाटकेषु च संस्कृतगद्यस्य प्रौढं रूपं प्रस्फुटितं वभूव । दर्शनग्रन्थेषु ज्योतिषग्रन्थेषु, व्याकरणशास्त्रस्यापि ग्रन्थेषु संस्कृतगद्यम् विकसितं वभूव ।

यद्यपि सन्ति काव्यान्यतिप्राचीनकालतः एव पद्येषु तथापि समालोचकाः गद्ये प्रवन्धरचनायाः एव प्रशंसामकार्षुः । महाभाष्यस्याध्ययनेन प्रतीयते यत् महाभाष्यकारः पतञ्जलिः वासवदत्तया, सुमनोत्तरया, भैमरथ्या चाख्यायिकया पूर्णरूपेण

परिचित आसीत् । महाकविर्वाणः भट्टारहरिचन्द्रनामकस्य गद्यकारस्योल्लेखमकरोत्—

'पदबन्धोज्ज्वलो हारी कृतवर्णक्रमस्थितिः ।
भट्टारहरिचन्द्रस्य गद्यवन्धो नृपायते ॥'

इत्यस्मिन् हर्षचरितस्य श्लोके । डल्हणः—

'तौ शूद्रककथाकारौ वंद्यौ रोमिलसौमिल्लौ ।
ययोर्द्वयोः काव्यमासीदर्धनारीश्वरोपमम् ॥'

इत्यस्मिच्छ्लोके रोमिलसौमिल्लयोः नामोल्लेखमकरोत् । तिलकमञ्जरीकारः धनपालः—'पुण्या पुनाति गंगेव गान्तरङ्गवती कथा ।' इत्यस्मिन् श्लोकार्थे तरङ्गवतीकथायाः नामोल्लेखमकरोत् ।

एतेषां कथानामेव लोके सुवन्ध्वादिकाः विद्वांसः वासवदत्तादिकानाम् गद्यकाव्यानाम् प्रणयनमकार्षुः ।

अनेनैव प्रकारेण दर्शनशास्त्रस्यापि क्षेत्रे संस्कृतगद्यस्य विकासो वभूव । शवरस्वामी कर्ममीमांसायाः वृहत्तमं भाष्यमकरोत् । शङ्कराचार्यः, रामानुजाचार्यः, वल्लभाचार्यः इत्यादिका आचार्याः गद्ये एव ब्रह्मसूत्रस्य भाष्याणि प्रणीतवन्तः । न्यायदर्शनस्य वैशेषिकदर्शनस्यापि भाष्याणि गद्ये एव प्रणीतानि अभूवन् ।

संस्कृतगद्यस्य वैभवशालिरूपं तु दण्डि–सुवन्धु–वाणभट्टानाम् काव्येषु समुपलभ्यते । आचार्यो दण्डी गद्यकाव्यस्य भेदद्वयमकार्षीत्—आख्यायिका कथा चेति । अमरकोषकारः कथाख्यायिकयोः स्वरूपविषयेऽलिखत्—

आख्यायिकोपलब्धार्थी प्रबन्धकल्पना कथा ।' इति ।

कथाकाव्यस्य वक्तैव नायको भवति किन्तु आख्यायिकाकाव्यस्य नायक एव तस्याः वक्ता भवति । इत्थमाख्यायिका आत्मकथास्वरूपा भवति । आख्यायिकाऽध्यायेषूछ्वासेषु वा विभक्ता भवति । कुत्रचन तस्यां वक्त्रापवक्त्रयोश्छन्दसोः अपि भवति सन्निवेशः । वाणप्रणीते श्रीहर्षचरितनामके गद्यकाव्ये आख्यायिकायाः सर्वाणि लक्षणानि समुपलभ्यन्ते ।

कथाकाव्यस्य विषयः अपहरण–युद्ध–वियोग–प्रकृति–वर्णनैः सम्वद्धो भवति ।

गद्यकाव्यस्य समृद्धं रूपम् सर्वप्रथमम् महाकवेः दण्डिनः काव्ये 'दशकुमारचरित'-नामके समुपलभ्यते । दण्डिप्रणीते दशकुमारचरिते चित्रितानि भौगोलिकानि राजनीतिकानि च वातावरणानि सम्राजः हर्षवर्द्धनस्य स्थितिकालिकानि प्रतीयन्ते । राजशेखरः शार्ङ्गधरपद्धत्याम् दण्डिनम् त्रयाणां ग्रन्थानाम् प्रणेतारमाह । तथाहि—

त्रयोऽग्नयस्त्रयो वेदाः त्रयो देवास्त्रयो गुणाः ।
त्रयो दण्डिप्रवन्धाश्च त्रिषु लोकेषु विश्रुताः ॥ इति ।

दण्डिनः अनन्तरम् गद्यकाव्यप्रणेतृषु वाणभट्टसुवन्ध्वोः नाम्नी उपस्थिते भवतः। राघवपाण्डवीयकारः कविराजः सुवन्धुम् पूर्ववर्तिनम् वाणभट्टं च पश्चाद्वर्तिनम् आह। तदनन्तरम् वाक्पतिराजः 'गउडवहो' नामके प्राकृते काव्ये सुवन्धोर्नामातिशयेनादरेण साकं उद्धृतवान्, किन्तु सः वाणभट्टस्य चर्चामपि नह्यकरोत्।

वासवदत्तानामकं गद्यकाव्यं वर्तते सुवन्धुना प्रणीतम्। इदं गद्यकाव्यम् प्रत्यक्षरश्लेषाय प्रख्यातं वर्तते। वासवदत्तायाः कथा निर्जीवा सुवन्धोर्मस्तिष्ककल्पिता च वर्तते अस्यां कथायां लोककथानां कांश्चन रुढीनामुल्लेखो भवति। ताश्च रूढयो निम्नाङ्किता भवन्ति—

(१) नायकनायिकयोः परस्परस्वप्नदर्शनोद्वोधनेन प्रणयोद्वोधेन भवति। (२) शुकपक्षी नायकनायिकयोः सम्मीलने साहाय्यं करोति। (३) शुकनामकः पक्षी कथायाः कस्यचनांशस्य वक्ता वर्तते। (४) नायकनायिके मनोजव-अश्ववेगेन पलायनं कुरुतः। (५) शापेन द्वारा वासवदत्ता शिला भवति। (६) आत्महत्यां कर्तुमुद्यतो नायकः आकाशवाणीं श्रुत्वा आत्महत्यातो विरतो भवति।

वासवदत्तायाः कथा संक्षिप्ता निर्जीवा च वर्तते, परन्तु तस्याः कथायाः वर्णनसंयोजनेन द्वारा सुवन्धुस्तां कथां चमत्कारपूर्णामकरोत्। वासवदत्तायां अलङ्काराणां चमत्कारः श्लेषाणां प्राचूर्यं, वक्रोक्तेः सन्निवेशश्च दृश्यते। स्वयमेव सुवन्धुराह—

सुश्लेषवक्रघटनापटु सत्काव्यविरचनामिव।' इति।

सुवन्धोः गद्यशैली अतिशयोक्त्यनुसारिभिः परिपूर्णा, समासप्रधाना, गौडीयाया रीतेरुदाहरणभूता च वर्तते। भट्टवामनः सुवन्धोः प्रशंसायामाह—

प्रतीकावभेदनवाणः कवितारुगहनविहरणमयूरः।
सहृदयलोकसुवन्धुर्जयति श्रीभट्टवाणकविराजः॥' इति।

सुवन्धोरनन्तरं भट्टवाणस्य स्थानमायाति संस्कृतगद्यकाव्यप्रकाशे। वाणः हर्षचरितस्य प्राथमिकेषु त्रिषूच्छ्वासेषु कादम्बर्याः मङ्गलश्लोकेषु च स्वकीयम् परिचयम् स्वयमेवोपस्थापयामास। वाणस्य पितुर्नाम चित्रभानुः मातुश्च नाम राज्यदेव्यासीत्। वाल्यकाल एव तस्य पितरौ दिवंगतावभूताम्। वाणभट्टः हर्षवर्धनस्य सभापण्डितः आसीत् अतएव हर्षस्य समयः खृष्टाव्दस्य सप्तमशतकस्य पूर्वार्द्धं स्वीक्रियते।

वाणभट्टस्य हर्षचरितम् कादम्वरी च द्वे कृती प्रसिद्धे स्तः। आभ्यां व्यतिरिक्तान्यपि चण्डीशतकम् पार्वतीपरिणयः मुकुटताडितकमित्यादिकाः ग्रन्थाः वाणभट्टस्य कृतिरूपेण प्रख्याताः सन्ति। वाणः हर्षचरितम् स्वयमेव आख्यायिकारूपेण स्वीचकार कथारूपेण चाह कादम्वरीम्। कादम्बर्याः कथा कल्पनाप्रसूता वर्तते। महाकविः वाणभट्टः कादम्वरीमपूर्णमिव परित्यज्य दिवं जगाम। तस्या पूर्ति वाणपुत्रः अकरोत्। कादम्बर्याः उत्तरार्द्धस्यादौ आह चापि वाणपुत्रः—

याते दिवं पितरि तद्वचसैव सार्धं
विच्छेदामपि भुवि यस्तु कथाप्रबन्धः ।
दुःखं सतां तदसमाप्तिकृतं विलोक्य,
प्रारब्ध एव स मया न कवित्वदर्पात् ॥ इति ।

कादम्वर्यामपि लोककथायाः काश्चन रूढयः समुपलभ्यन्ते । यथा—कादम्वर्याः शुकः सर्वशास्त्रविशारदः मनुष्यस्य भाषायां वक्ति । महात्मा जावालिः त्रिकालदर्शी वर्तते, किन्नराः हिमालयस्य स्वर्गीयवातावरणे निवसन्ति च । कादम्वर्याः पात्राणि निर्वाधगत्या, चन्द्रलोक–गन्धर्वलोक–मर्त्यलोकेषु च सञ्चरणं कुर्वन्ति । कादम्वर्याः पात्राणि आदर्शवादिनः सन्ति किन्तु तेषां सञ्चालने महाकविर्वाणः नैजमतुलनीयं कौशलं प्रादर्शयत् । कादम्वर्यां वर्णनवैविध्यं समुपलभ्यते । स कुशलतापूर्वकम् नगर–उद्यान–राजमार्ग–अन्तःपुर–आपण–कला कौशलानां च विशदतया वर्णनम् करोति ।

कादम्वर्याः वाक्यानि समासवहुलानि, दीर्घाणि च सन्ति तथापि महाकविर्वाणः नियमतः एकस्य द्वयोर्वा दीर्घवाक्ययोरनन्तरमेकस्य लघुवाक्यस्य समासरहितस्य गुम्फनं करोति । कादम्वर्यामर्थानुरूपेणैव शव्दस्य गुम्फनमवलोक्यते । वसन्तवर्णनसमये महाकविर्वाणः सुकुमारवर्णानां विन्यासं करोति । तथाहि—

'अशोकतरुताऽनरमणीमणिनूपुरझङ्कारसहस्रमुखरेषु सकलजीवलोकहृदयानन्ददायकेषु मधुमासदिवसेषु ।' इति ।

किन्तु विन्ध्याटव्याः वर्णनसमये महाकविर्वाणः समासवहुलानां विकटशव्दानां प्रयोगं करोति । तथाहि—

'क्वचित् प्रयलवेलेव महावराहदंष्ट्रासतमुखातधरणिमण्डला, क्वचित् उन्मत्तमृगयतिनादभीतेव कण्टकिता ।' इति ।

ख्रिष्टाव्दस्य दशमशतके धनपालः तिलकमञ्जर्याः वादीभसिंहः एकादशे शतके गद्यचिन्तामणेः, तस्यैव शतकस्य सोड्ढलः उदयसुन्दरीकथायाः, पञ्चदशशतकस्यादौ वर्तमानः अगस्त्यः कृष्णचरितस्य, सप्तदशशतकस्य वामनभट्टवाणः वेमभूपालचरितस्य च रचनामकार्षुः ।

उनविंशतिशतकस्योत्तरार्द्धे विद्यमानः पं० हृषीकेशभट्टाचार्यः प्रवन्धमञ्जर्याः, पं० अम्विकादत्तव्यासश्च शिवराजविजयनामकस्यगद्यकाव्यस्य प्रणयनम् कृतवन्तौ ।

इत्थम् संस्कृतगद्यस्य इतिहासः अतीव गौरवमयो विद्यते ।

संस्कृतरूपकाणामुद्भवविषये प्रचलितमतानां समीक्षणम्

नाटकोत्पत्तिविषयकाणां मतानाम् विश्लेषणम् ।

प्राचीनाचार्याः काव्यस्य द्वेधा विभागं कृतवन्तः—श्रव्यं दृश्यं च । श्रव्यकाव्येषु गद्यकाव्यानि पद्यकाव्यानि, चम्पूकाव्यानि चान्तर्भवन्ति । दृश्यकाव्येषु च रूपकाणामुपरूपकाणाञ्चान्तर्भावो भवति । यद्यपि नाटयशास्त्रे परिगणितेषु दशविधेषु रूपकेषु नाटकमेको भेदो वर्तते किन्तु अर्वाचीनसंस्कृतसाहित्ये सर्वाणि रूपकाणि नाटकशब्देनैवाभिधीयन्ते ।

संस्कृतसाहित्ये नाटकानामेका विशिष्टा परम्परा वर्तते । किन्तु संस्कृतसाहित्ये नाटकानामुत्पत्तिः कदा केन च प्रकारेणाभूदिति विषयो विवादास्पदो वर्तते । संस्कृतनाटकानामुत्पत्तिविषये विद्यमानानां मतभेदानाम् भेदा विभज्याध्ययनं कर्तुं शक्यते । (१) परम्परागतवादः, (२) धार्मिकभावनावादः, (३) लौकिकलीलावादश्च ।

अधस्तादेतेषां त्रयाणामपि विचाराणां समीक्षणं क्रियते—

(१) परम्परागतवादः—भरतमुनिप्रणीतस्य नाटयशास्त्रस्य प्रथमे अध्याये वर्णितमस्ति यत् सांसारिकान् खिन्नान् वीक्ष्येन्द्रादिकाः देवाः ब्रह्माणमुपगम्य तथाविधस्य शास्त्रस्य निर्माणं कर्तुं प्रार्थयामासुः येन शास्त्रेण वेदानधिकारिणां स्त्रीशूद्रादीनामपि मनोरञ्जनं सम्पद्येत । तच्छ्रुत्वा पितामहः तेषां तेषां वेदानाम् अंशानादाय पञ्चमस्य नाटयवेदस्य रचनामकरोत् । इन्द्रानुरोधेन भरतमुनिः तं वेदं गृहीत्वा स्वपुत्रान् शिक्षयामास । प्रयोगः भारती–सात्त्वती–आरभटीनामासु वृत्तिषु प्रारब्धोऽभूत् । तदनन्तरम् कैशिकी वृत्तिः योजिता बभूव । कैशिक्याः प्रदर्शनं स्त्रीपात्रं विनाऽसम्भवमस्ति । अतएव अप्सरसां कल्पना कृताऽभूत् । ब्रह्मण आदेशानुसारेण सर्वप्रथमम् नाटयवेदस्य प्रदर्शनम् इन्द्रस्य ध्वजोत्सवे सम्पन्नम् । तद्दृष्ट्वा प्रसन्ना देवाः पात्रेभ्योऽनेकानि वस्तून्युपहारयामासुः । इन्द्रविजयस्य प्रदर्शनं प्रेक्ष्य देवाः प्रसन्ना अभूवन् दैत्याश्च रुष्टाः । दैत्यानामुपद्रवं प्रेक्ष्येन्द्रः विश्वकर्माणं नाटयगृहस्य निर्माणायादिदेश । नाटयमिदं त्रैलोक्यस्य भावानां कीर्तनं वर्तते । अत्र सर्वेषाम् वस्तूनां प्रदर्शनं कर्तुं शक्यते ।

अनेन विचारेणायमर्थः स्पष्टो भवति यत् भारतीया विचारकाः नाटकस्योत्पत्तौ देवानाम् साहाय्यं स्वीकुर्वन्ति । यद्यपि अर्वाचीनाः समालोचकाः सिद्धान्तमिमं महत्त्वहीनं स्वीकुर्वन्ति; किन्तु अनेन सिद्धान्तेन निम्नाङ्किताः अर्थाः प्रकाशिता भवन्ति—

(१) नाटयवेदस्य रचनायाम् चतूर्णाम् वेदानाम् सहयोगो वर्तते ।

(२) प्राचीनानि रूपकाणि धार्मिकाभ्यां सन् धार्मिकेषु पर्वसु च अभिनीतान्यभूवन् ।

(३) नाटकेषु नराः नार्यश्च भागं गृहीतवन्तः । अतएवास्य मतस्य महत्त्वहीनता नहि स्वीकर्तुं शक्यते ।

(२) मृतकपूजावादः—डॉ० रिजवे महोदयानुसारेण सम्पूर्णे संसारे नाटकानामुद्भवः मृतात्मनः प्रति प्रकटितश्रद्धास्वरूपो विद्यते । अत एव रिजवे महोदयानुसारेण सर्वेषां धर्माणां मूलम् भावास्सन्ति । तन्मतानुसारेण विश्वस्य सर्वेषु देशेषु मृतात्मनां प्रसन्नतायै सर्वे जनाः प्राचीनकालतः एव नृत्यगीतादिकस्याचरणमकार्षुः । अत एव मृतकानां पूजायै नाटकानि प्रणयनमभूत् । तन्मतानुसारेण रामलीला-कृष्णलीलादिकेष्वप्ययमेव भावो विद्यमानो वर्तते । परञ्चास्य मतस्य समादरं पाश्चात्येष्वपि देशेषु नहि भवति ।

(३) यथार्थवादः अथवा मे पोलवादः—अस्य मतस्यानुसारेण नाटकानामुत्पत्तिः मे पोल नामकान्नृत्याद् बभूव । अस्य समर्थकाः कथयन्ति यत् पाश्चात्यदेशेषु मई मासोऽत्यन्तानन्दपूर्वकं याप्यते । तत्रानेकेषामुत्सवानामायोजनं भवति यत्र जनाः नृत्यन्ति कूर्दन्ते च । किञ्च जनाः एकमुच्छ्रायं वंशं खनित्वा तत्रैकत्रीभूय सर्वे जनाः नृत्यन्ति । भारतेऽपि इन्द्रध्वजमहोत्सवः एतादृश एव भवति । एतेनानुमीयते यत् नाटकानामुत्पत्तिः वसन्तेषु आयोज्यमानानुत्सवानाश्रित्यैव जाता । परञ्चेदमपि मतम् भ्रान्तिपूर्णमेव वर्तते । अस्य मतस्य पोषकाः इन्द्रध्वजमहोत्सवस्य सम्वन्धं मे पोल महोत्सवेन साकं स्थापयामासुरित्येतत् मतस्य महती त्रुटिः । मे पोलमहोत्सवस्तु मई मासे भवति किन्त्विन्द्रध्वजमहोत्सवः वर्षाया अन्ते भवति । अयमुत्सवः इन्द्रस्य विजयसूचको वर्तते ।

(४) कृष्णोपासनावादः—अस्य मतानुसारेण भारतीयनाटकानां सम्वन्धः कृष्णोपासनया सह वर्तते । इदं तु तथ्यम् वर्तते यत् कृष्णोपासनाया अनेकेषामङ्गानाम् नाटकोद्भूतौ महदवदानम् वर्तते । यथा—रथयात्रायाः, रासलीलायाः वा । संस्कृतनाटकानामुत्पत्तिरपि कृष्णस्य शूरसेनदेशे संजाता । अत एव संस्कृतनाटकेषु शौरसेनीप्राकृतस्य महत्त्वमधिकं वर्तते । अथापि अस्मिन् मते त्रुटयः सन्ति । तद्यथा—

(क) कृष्णसम्वन्धीनि नाटकान्येव प्राचीनतमानि सन्ति इत्यर्थविषयकं प्रमाणं यावत्कालं नोपलभ्यते तावत्कालं कृष्णोपासनायाः नाटकोत्पत्तौ मूलत्वं नहि स्वीकर्तुं शक्यते ।

(ख) अत्रैतद् नहि विस्मर्तव्यं वर्तते यत् येन प्रकारेण कृष्णोपासनायाः नाटकेषु प्रभावस्समजायत तेनैव प्रकारेण शिवस्य, विष्णोश्चाप्युपासनायाः प्रभावो नाटकोत्पत्तौ भवितुमर्हति । किन्तु एतस्य मतस्य अस्मिन् विषये पूर्णरूपेणोपेक्षाबुद्धिर्दृश्यते ।

(५) लोकप्रियस्वाङ्गवादः—हिलब्रैण्टमहोदयः सेनकोनोमहोदयश्च स्वीकुरुतः

यत् प्राचीने भारते लोकप्रियस्वाङ्गस्य प्रचुरः प्रचार आसीत्। कालान्तरे एभिः स्वाङ्गैः साकम् रामायणमहाभारतयोः कथायाः सम्मिश्रणं कृत्वा रूपकस्य रचना संजाता। किन्तु डॉ० कीथमहोदय अस्य मतस्य तीव्रं विरोधं प्रकटयामास कीथमहोदयेनाभिहितम् यत् रूपकाणां प्रचारात् पूर्वं स्वाङ्गानां प्रचार आसीत्। इत्यत्र किमपि प्रमाणं नास्ति।

(६) काष्ठपुत्तलिकानृत्यवादः—पाश्चात्यः जर्मनदेशीयो विद्वान् पिशेलमहोदयः नाटकानामुत्पत्तिं काष्ठपुत्तलिकानाम् नृत्यात् स्वीकरोति। एतन्मतानुसारेण सर्वप्रथमम् नृत्यानामुत्पत्तिर्भारत एव संजाता। भारतीया एव विदेशेष्वपि नृत्यस्य प्रचारमकार्षुः। संस्कृतनाटकेषु प्रयुज्यमानैः सूत्रधार-स्थापकादिभिरप्यस्यैव मतस्य पुष्टिर्भवति। सूत्रधारस्थापकयोः उभयोरेव सम्बन्धः पुत्तलिकानृत्येनैव साकं वर्तते। अस्य मतस्य तीव्रं विरोधम् हिलब्रैण्डमहोदयः कृतवान्। तेनाभिहितम् यत् पुत्तलिकानृत्यस्य प्रचारात् पूर्वमपि भारते वर्षे नाटकानाम् स्थितिरासीत्। तानि नाटकान्येवाश्रित्य पुत्तलिकानृत्यस्य प्रचारः संजातः।

(७) छायानाटकवादः—प्रो० लुडर्समहोदयस्य मतानुसारेण संस्कृतनाटकानां विकासः छायाभिः क्रीडाप्रदर्श्यमानायाः क्रीडायाः प्रथमाऽभूत्। रूपकशब्दस्य सर्वाधिकान्वितिरनेनैव मतेन साकम् भवति। किन्त्वस्य मतस्य विरोधे डॉ० कीथमहोदयेनाभिहितम् यदस्य मतस्याधारः महाभाष्यस्यैकस्य प्रसङ्गस्याशुद्धोऽर्थो वर्तते।

(८) संवादसूक्तवादः—ऋग्वेदे पञ्चदशसङ्ख्याकान्येतादृशानि सूक्तानि सन्ति येषां सम्बन्धः धानिक्या भावनया लोकव्यवहारेण च साकं वर्तते। सर्वप्रथमम् १८९६ खृष्टाब्दे मैक्समूलरमहोदयः एतेषां सूक्तानामध्ययनं कृत्वा तेषाम् नाटकोत्पत्तेर्मूलत्वं प्रत्यपीपदत्। कश्चन् कालान्तर प्रो० लेवी महोदयः प्रो० मैक्समूलरमहोदयस्य मतस्य समर्थनमकरोत्। तेनाभिहितम् यदेतेषु सूक्तेषु धार्मिकभावनायुक्तानि नाटकानां दृश्यानि समुपलभ्यन्ते। तदनन्तरं श्रोदरमहोदयेनापि सश्रमं साधितम् यदेतेषु सूक्तेषु रहस्यात्मकानाम् नाटकानाम् सूचना समुपलभ्यते। डॉ० हार्टले महोदयेन त्वभिहितम् यत् वैदिकनाटकानाम् विकासस्य मूलं रूपं सुपर्णाध्याये सुरक्षित वर्तत इति।

किन्तु इदमपि मतम् पूर्णरूपेण प्रामाणिकं नास्ति। अर्वाचीनाः अनेके विद्वांसः वैदिकं संवादमेव नाट्यसाहित्यस्य प्राथमिकं रूपं स्वीकुर्वन्तीत्यन्या कथा।

(९) वैदिकानुष्ठानवादः—ऋग्वेदस्य मरुत्सूक्तस्य व्याख्याप्रसङ्गे मैक्समूलरमहोदयेन प्रमाणीकृतं यत् संस्कृतनाटकानामुत्पत्तिः वैदिककर्मकाण्डादेवाभूदिति। अस्य मतस्य समर्थने प्रो० हंसराजमहोदयेन तु कथितम्—

(१) नाटकस्यावश्यकान्यङ्गानि संवादनृत्यगीतानि सन्ति। ऋग्वेदे नृत्यानामुल्लेखः समुपलभ्यते। यथा विवादसूक्ते—पुरध्र्यः नवदाम्पत्योरायुष्यार्थं नृत्यं

कुर्वन्ति । सर्व एव पर्यालोचकाः गीतस्य सत्तां सामवेदे स्वीकुर्वन्ति । ऋग्वेदस्य संवादसूक्तेषु च संवादाः सन्ति ।

(२) वैदिकानुष्ठानि वह्वीनां लघुक्रियाणां समवायस्वरूपाणि आसन् । तत्रानेकानि नाटकीयान्यपि तत्त्वान्यासन् ।

(३) महानुष्ठानम् नाटकस्यैव रूपान्तरमासीत् । अस्मिन्ननुष्ठाने कुमारिकाः अग्निम् परितो नृयन्तिस्म । शूद्रवैश्ययोः प्रकाशार्थं कलाहः नाटकीयाभिनय एवास्ति ।

(४) यज्ञसूक्तानामन्तरालेषु यज्ञमण्डपे उपविष्टानाम्, यजमानानां याचकानां च मनोरञ्जनार्थं वार्तालापमयानि सूक्तानि पठन्तेस्म । अस्याः धारणायाः पुष्टिर्हरिवंशपुराणेनापि भवति ।

(५) अनेकेषां विदुषां मतानुसारेण महाव्रतानुष्ठानमवेक्ष्यैव नाटकेषु गद्यमयानां संवादानां वृद्धिः क्रियते स्म । अस्य मतानुसारेण नाटकस्य सर्वाणि तत्त्वानि वैदिकानुष्ठानेषु समुपलभ्यन्ते ।

इत्थम् भारतीयाः विद्वांसः वैदिकानुष्ठानादेव नाटकानामुत्पत्तिः स्वीकुर्वन्ति । किन्तु पाश्चात्या अनेके विद्वांस अस्य मतस्य विरोधं कुर्वन्ति ।

(१०) **रूपकाणाम्, युनानी-उद्भवविषयको विचारः**—अनेके पाश्चात्याः विद्वांसः संस्कृतनाटकानामुत्पत्तिम् युनानीरूपकेभ्यः स्वीकुर्वन्ति । सर्वप्रथमं वेवरमहोदयः संस्कृतनाटकेषु ग्रीकप्रभावं स्वीचकार । वेवरमहोदयानुसारेण संस्कृतसाहित्ये नाटकानामुपादानान्यतीवाल्पीयांसि सन्ति तेभ्यो नाटकसदृशस्य उद्भवो नहि भवितुमर्हति । महतः सिकन्दरस्यागमनानन्तरम् अनेके यूनानदेशवासिनः समुद्रतटेषु स्ववसतिं चक्रुः । ते स्वमनोरञ्जनार्थं यान्युपादानि एकत्रितान्यकार्षुः तेष्वेकं नाटकमप्यासीत् । नाटकानामभिनयं दृष्ट्वा भारतीया अपि नाटकस्य प्रेरणामापुः ।

वेवरस्यास्य मतस्य दृढतया खण्डनं जर्मनदेशीयो विद्वान् पिशेलमहोदय अकार्षीत् । तदनन्तरं विडिशमहोदयः भारतीयनाटकेषु जवनिकाशब्दस्य प्रयोगं दृष्ट्वा तस्य व्युत्पत्तिं युनानदेशीयाद् यवनशब्दात् स्वीकृत्य भारतीयनाटकेषु युनानीनाटकानां प्रभावं समर्थयामास । परञ्चेदं मतम् सर्वथाऽप्रामाणिकतम् वर्तते । ऐतिह्यं किमपि साक्ष्यं नास्ति येन प्रमाणितं भवेत् यत् महतः सिकन्दरस्यागमनानन्तरमेव भारते रूपकाणामुत्पत्तिर्बभूव ।

एतेषु समेषु नाटकोत्पत्तिविषयकेषु मतेषु किञ्चिदेकम् मतम् पूर्णतया प्रामाणिकं भवितुं नार्हति । संस्कृतनाटकानाम् विकासः अनेकेषु शतकेषु जातः । अत एव संस्कृतनाटकेषु अनेकविधः प्रभावस्तु स्वीकरणीयम् । इदमपि तथ्यं वर्तते यत् संस्कृतनाटकेषु वैदिकानुष्ठानानां सर्वाधिकः प्रभावो वर्तते ।

भासस्य नाटकचक्रम्

नाटकस्य सङ्गीतनृत्यवाद्यानि प्रधानान्यङ्गानि वैदिककाले विद्यमानान्यासन् । कालान्तरे तान्येव नाटकरूपेण परिणतान्यभूवन् । अतएव संस्कृतनाटकानामुत्पत्तौ वेदानाम् महत्त्वपूर्णमवदानमस्ति । वेदानाम् प्रचीनतामवलोक्यैव नाटकसाहित्यस्यापि तत्समकालिकीप्राचीनतामवलोक्यैव नाटकसाहित्यस्यापि तत्समकालिकीप्राचीनतास्वीकरणीयैव ऋग्वेदस्य सङ्केतैरवगम्यते यत् वैदिकयुगेऽपि नाटकान्यासन् । ऋग्वेदस्य सोमविक्रयकालिकेनाभिनयेन, महाव्रतस्तोत्रे कुमारिकाणां अग्निक्रमया, शुक्लयजुर्वेदस्य वाजसनेयसंहितायाः त्रिंशत्तमेऽध्याये प्रयुक्तशैलुषशब्देन, सामवेदस्य रागवद्धसङ्गीतेन च वैदिककाले नाटकीयतत्त्वानाम् प्राचूर्यमनुमीयते ।

वाल्मीकीयरामायणे—नट—नर्तक—नाटक—नृत्य—कुशीलवप्रभृतीनामनेकत्रोल्लेखो दृश्यते । श्रीमद्भागवते महापुराणेऽप्यभिनेतुरुल्लेखः समुपलभ्यते । बौद्धसाहित्यस्यावदानशतके कस्यचनैकस्य रूपकस्य रङ्गमञ्चे प्रदर्शनस्योल्लेखः समुपलभ्यते ' सम्प्रदायस्य 'सत्तपसेणीय सुत्त' नामके आगमग्रन्थे महावीरस्वामिनः वन्दनां कुर्वतः सूर्याभदेवेन द्वारा द्वात्रिंशत् प्रकारकाणां अभिनयात्मकनाम् नाटकानाम् प्रदर्शनस्य उल्लेखः समुपलभ्यते । कौटिल्यार्थशास्त्रेऽपि नाटकमण्डलीनां कार्याणां तासाम् व्यवस्थायाश्चाल्लेखः समुपलभ्यते । वात्स्यायनकामसूत्रे प्राचीनानां नाटककारणामुल्लेखः समुपलभ्यते । व्याकरणसूत्रकारः पाणिनिरपि शिलालिकृशाश्वयोः नटसूत्रकारयोरुल्लेखमकरोत् । महाभाष्यकारः पतञ्जलिरपिकंसवध—बालिवधनाम्नोः नाटकयोः रंगमञ्चे प्रदर्शनस्य चर्चामकरोत् ।

अनेन विवरणेनायमर्थः सिद्धयति यत् नाटकस्योत्पत्तिः भारते एव वैदिकात् कालादारभ्याभूत् । किन्तु भारतस्य प्राचीनतमो नाटककारो कः इति निर्णयः कठिनम् वर्तते ।

यद्यपि मैकडॉनलमहोदयानुसारेण कालिदास एव सर्वप्रथम नाटककारो वर्तते यस्य कृतिः साम्प्रतम् समुपलभ्यते किन्तु महामहोपाध्यायस्य श्री टी० गणपतिशास्त्रस्य गवेषणया अयमर्थः निश्चितो भवति यत् भासकवेरेव नाटकानि प्राचीनतमानि सन्ति । मालविकाग्निमित्रनाटके महाकविः कालिदासोऽपि भासं ससम्मानं संस्मरन्नाह—'प्रथितयशसां भाससौमिल्लकविपुत्रादीनां प्रबन्धानतिक्रम्य कथं वर्तमानस्य कवेः कालिदासस्य कृतौ वहुमानः ।' गणपतिशास्त्रिमहोदयानुसारेण त्रयोदशसङ्ख्याकानि नाटकानि साम्प्रतं समुपलभ्यन्ते । भासस्यैतेषां त्रयोदशसङ्ख्याकानां नाटकानां विषये विदुषां त्रीणि प्रकारकाणि मतानि सन्ति ।

(१) प्रथममतानुसारेण उपलभ्यमानानि त्रयोदशसङ्ख्याकानि नाटकानि निश्चितरूपेण भासस्यैव सन्ति ।। तेषां रचनाकालोऽपि कालिदासात् पूर्वकालिको विद्यते ।

(२) द्वितीयमतानुसारेणैव तेषां नाटकानां प्रणेता 'मतविलासप्रहसनस्य प्रणेता युवराजो विक्रमः आसीदथवा 'आश्चर्यचूडामणि'नाटकस्य प्रणेता शीलभद्रः। प्रो० सिलवाँ लेवी, प्रो० विण्टरनिट्ज़ः, प्रो० सी० आर० देवधरश्चास्यैव मतस्य समर्थकाः सन्ति।

(३) तृतीयमतानुसारेणेमानि त्रयोदशसङ्ख्याकानि नाटकानि भासस्य तु सन्ति, परञ्चैतेषां समुलभ्यमानानि रूपकाणि रङ्गमञ्चोपयोगितादृष्ट्या संक्षिप्तानि सन्ति। दासगुप्तमहोदयः अस्य मतस्य प्रतिपादनमकार्षीत्।

डॉ० भोलाशङ्कर व्यासः एतेषां नाटकानां भासकविप्रणीतत्वं प्रमाणयन्नाह—

(१) इमानि सर्वाणि नाटकानि—'नान्द्यन्ते प्रविशति सूत्रधारः' इति वाक्येन प्रारब्धानि सन्ति। किन्तु कालिदासस्यापि नाटकेषु सर्वप्रथमं नान्दीपाठो भवति। बाणभट्टः भासस्य नाटकानि सूत्रधारकृतारम्भाणि लिखति स्म।

(२) एतेषु भासस्य नाटकेषु प्रस्तावना स्थापनाशब्देनाभिहिता वर्तते।

(३) एतेषु नाटकेषु स्थापनायां नाटकस्याथवा नाटककारस्य नामानि नहि समुपलभ्यन्ते। अतएवेमानि नाटकानि शास्त्रीयसंस्कृतनाटकस्य परम्परातः प्राचीनानि सन्ति।

(४) सर्वेषां नाटकानाम् भरतवाक्यानि प्रायेण—'इमामपि महीं कृत्स्नां राजसिंहः प्रशास्तु नः' इति वाक्येनाथवास्य वाक्यभावेन समाप्तानि भवन्ति।

(५) सर्वेषां नाटकानां संघटना सदृशी वर्तते। केषाञ्चन नाटकानां प्रारम्भिके पद्ये मुद्रालङ्कारो वर्तते।

अनेन प्रकारेणानेकानि प्रमाणानि एतेषां नाटकानां भासप्रणीतत्वपक्षे श्रीव्यासमहोदयः समुपस्थापयामास।

भासनाटकानाम् प्रत्येकस्य नाटकस्य संक्षिप्ततमः परिचयो निम्नाङ्कितो वर्तते।

(१) प्रतिज्ञायौगन्धरायणम्—अस्मिन्नाटके चत्वार अङ्कास्सन्ति। अस्मिन् नाटके उदयनवासवदत्तयोः परिणयो प्रणयश्च वर्ण्येते। (२) स्वप्नवासवदत्तम्—अस्मिन् नाटके षट् अङ्कास्सन्ति। उदयनस्य प्रियतमा पत्नी वासवदत्ताऽग्निदाहे मृता इति प्रवादं प्राचार्य यौगन्धरायणः स्वप्रयासेन उदयनस्योद्वाहसंस्कारं मगधराजस्य पुत्र्या पद्मावत्या सह सम्पाद्य पुनः अरिविजिराज्यावाप्तेरनन्तरं वासवदत्तां पद्मावत्याः पार्श्वे न्यासरूपेण निक्षिप्तां वासवदत्ताम् उदयनेन साकम् मेलयामास। (३) उरुभङ्गम्—अस्मिन्नाटके एकाङ्को विद्यते। द्रौपद्याः परिभवमुद्दिश्य नूनं सुयोधोरू नाशयिष्यामीति कृतां प्रतिज्ञां भीमो गदायुद्धे दुर्योधनोरू भङ्क्त्वा निर्वर्तयामासेति वर्णितमस्मिन् नाटके। (४) दूतवाक्यम्—एकाङ्किनाटकमिदम्। महाभारतयुद्धात्

पूर्वं सन्धिकरणाय भगवान् श्रीकृष्णः युधिष्ठिरस्य दूतरूपेण दुर्योधनस्य सन्धिवार्तायै जगाम अथापि भगवतः प्रयत्नो विफलो बभूवेति वर्तितमास्ते । (५) पञ्चरात्रम्—अस्मिन् नाटके त्रयः अङ्काः सन्ति । यज्ञस्यान्ते आचार्यो द्रोणो पाण्डवेभ्यः राज्यस्यार्धं दक्षिणारूपेण याचतेस्म दुर्योधनम् । तच्छ्रुत्वा दुर्योधनः प्राह—यदि पञ्चरात्राभ्यन्तरे पाण्डवानाम् समाचारः समुपलप्स्यते तदा राज्यार्धं प्रदास्यामि। तदनन्तरं पञ्चरात्राभ्यन्तरे पाण्डवानां प्राप्तिर्भवति । ततो दुर्योधनः पाण्डवेभ्यः राज्यार्धं ददौ । (६) वालचरितम्—अत्र नाटके पञ्च अङ्कास्सन्ति । अस्मिन् नाटके भगवतः श्रीकृष्णस्य वाल्यकालादारभ्य कंसवधं यावत् कथा वर्णिता वर्तते । (७) दूतघटोत्कचम्—इदम् नाटकम् एकाङ्कि वर्तते । अभिमन्योर्मरणानन्तरम्, भगवतः श्रीकृष्णस्य प्रेरणया दौत्यमाश्रित्य पाण्डवानां घटोत्कचः धृतराष्ट्रस्यान्तिकं जगाम । तत्र दुर्योधनो यदा घटोत्कचस्यावमाननामकरोत् तदा घटोत्कचः प्राह—'प्रतिवचो ते दास्यामि सायकैः' । इति । (७) कर्णभारम्—इदमेकाङ्कि नाटकम् । यदा ब्राह्मणस्य वेपमादायेन्द्रः कर्णस्य सविधे याचकरूपेणागात् तदा महादानी कर्णः तस्मै नैजं दिव्यं कुण्डलं चार्पयामास । (९) मध्यमव्यायोगः—इदमपि नाटकम् एकाङ्कि । मध्यमपाण्डवो भीमः मध्यमनामकमेकम् ब्राह्मणपुत्रं घटोत्कचात् त्रायते स्म । तदनन्तरम् अप्रत्यक्षदर्शनेन भीमस्यानन्दावाप्तिः पत्न्या हिडिम्बायाश्च समागमः । (१०) प्रतिमानाटकम्—अस्मिन् नाटके सप्त अङ्काः सन्ति । श्रीरामस्य वनवासादारभ्य रावणस्य वधपर्यन्तस्य कथाऽत्र वर्णिता । दशरथस्य प्रतिमां प्रेक्ष्य भरतो जानाति यत् तस्य पिता दशरथो निधनमुपगतः । (११) अभिषेकनाटकम्—अस्मिन्नाटके षट् अङ्काः सन्ति । अस्मिन्नाटके किष्किन्धाकाण्डादारभ्य युद्धकाण्डपर्यन्तस्य कथा वर्णिता वर्तते । रावणस्य वधानन्तरम् रामस्य राज्याभिषेकस्सम्पद्यते । (१२) अविमारकम्—अस्मिन्नाटके षट् अङ्कास्सन्ति । राजकुमारस्याविमारकस्य राज्ञः कुन्तिभोजस्य दुहित्रा कुरङ्ग्या सह प्रणयपरिणयोऽत्र वर्णितः । (१३) चारुदत्तम्—अत्र चत्वार अङ्कास्सन्ति । उदारचरितो चारुदत्तः नैजं विपुलं वित्तम् वितीर्णयामास । अस्मिन् नाटके चारुदत्तस्य वसन्तसेनां नाम्न्या वाराङ्गनया सह प्रणयविवाहोऽस्ति वर्णितः ।

सर्वे समीक्षकाः स्वीकुर्वन्ति यत् महाकविः भासः कथावस्तुनो विन्यासे पात्राणां चरित्रचित्रणविषये च प्रतिभासम्पन्नो नाटककारो वर्तते । भासस्य नाटकानां परिशीलनेन ज्ञायते यत् भासस्य प्रतिभा सर्वतोमुखी वर्तते ।

उत्तरे रामचरिते भवभूतिर्विशिष्यते

नाटककारो भवभूतिः संस्कृतसाहित्यस्य महान् कलाकारो वर्तते । सः नैजया कलात्मिकया प्रतिभया नैसर्गिकतया कालिदासेन सह तौल्यतामाप्नोति । महाकवि-

कालिदासस्त्रयाणां रूपकाणां प्रणयनमकरोत्। भवभूतिरपि त्रयाणां नाटकानां—मालतीमाधवम्, महावीरचरिम्, उत्तररामचरितञ्चेति। भवभूतेरेतेषु त्रिषु नाटकेषु उत्तररामचरितम् संघटना–शैली–भाषा–भाव–रसोद्रेकाणां दृष्टचातिशायि वर्तत। अस्मिन्नुत्तरे रामचरिते महाकविर्भवभूतिः करुणरसस्य धारां प्रवाहयामास। यस्यां धारायाम् सहृदयानां हृदयान्याप्लावितानि भवन्ति। मालतीमाधवे तु शृङ्गाररसस्य धारा प्रवाहिताभूत्, महावीरचरितनाटके च वीररसस्य। किन्तु उत्तररामचरितस्य करुणरसधारा तु सर्वातिशायिनी वर्तते। यस्यां धारां यां सर्वेषां रसानामन्तर्भावः सुकरो भवति।

इदमुत्तररामचरितनामकं नाटकम् सप्तानामङ्कानामेकम् विज्ञाननाटकं वर्तते। अस्मिन् नाटके भवभूतिः रामायणस्य कथायाम् मौलिकानि कल्पनाप्रचुराणि परिवर्तनानि कृत्वा चमत्कारातिशयं जनयामास। भवभूतिः कविः निम्नप्रकारेण रामायणस्य कथायाम् परिवर्तनानि कृतवान्—

(१) रामायणम् दुखान्तम् वर्तते। सीतारामायणस्यान्ते पातालं प्रविशति यद्दृष्ट्वा दुःखातिशयमनुभवन् श्रीरामचन्द्रः उन्मतः इव भवति। किन्तु महाकविः भवभूतिः नाट्यशास्त्रस्यादर्शं अनुकृत्य ताम् कथाम् सुखान्तामकरोत्। उत्तररामचरितस्यान्ते—राम–सीता–लव–कुशादीनां सम्मिलनं भवति।

(२) प्रथमाङ्के वर्णिता चित्रवीथ्याः कथा नाटककर्त्रा भवभूतिना नवीनतया कल्पिता वर्तते। तत्र रामसीतयोर्जीवनस्य पूर्वार्द्धे घटितानां सर्वासां घटनानां वर्णनं कृत्वा महाकविः भवभूतिः भावनानां पृष्ठभूमिमुपस्थापयामास।

(३) श्रीरामम् पुनः पञ्चवटीं नेतुम्, व्यतीताः घटनाश्च स्मारयितुम् शम्बूक-प्रसङ्गस्यावतारणा मौलिकतामयी वर्तते।

(४) तृतीयेऽङ्के छायासीतायाः कल्पना अपूर्वा, मौलिकी नाटकीयदृष्ट्या महत्त्वपूर्णा च वर्तते। अस्मिन् तृतीयाङ्के एव वासन्त्या सह रामस्य मिलनम् अतीव हृदयहारकं वर्तते। अनेन प्रसङ्गेन द्वारा करुणरसस्य भावना दर्शकानाम् समक्षम् उद्रिक्ता भवति। अयं प्रसङ्गः भवभूतेः मौलिकी कल्पना वर्तते। अत्रैव श्रीरामः स्वकीयम् भग्नं हृदयं दर्शकानाम् समक्षम् उद्घाटयितुमवसरं लभते।

(५) यज्ञीयाश्वापहारः लवचन्द्रकेत्वोर्युद्धम् च रामं रङ्गे नेतुम् मौलिके कल्पने स्तः। अनयोरस्माद्धेतोर्महत्त्वं वर्तते यत् आभ्यां द्वारा नाटककारः स्वनायकस्य मानसिकीं स्थितिं प्रस्तोतुमवसरं लभते।

(६) सप्तमाङ्के कविना गर्भाङ्गस्य निवन्धनमपि नाटककारेण नूतनतया कल्पितं वर्तते।

(७) यद्यप्यस्य नाटकस्याङ्गीरसः करुणो वर्तते अथाप्यत्र शृङ्गारर-हास्य-वीराद्भुतानामङ्गरूपेण निवन्धनं कृतं वर्तते।

(८) भाषायामपि भवभूतेरेकाधिकारो वर्तते। नाटककारः सर्वत्र भावपात्रयोरनुसारेणैव भाषाया अपि गुम्फनम् करोति।

(९) भवभूतिः अस्मिन् नाटके पवित्रतमस्य प्रेम्णः आविष्करणमकरोत् रामसीतयोः। उभयोरेव सर्वत्र त्यागसमर्पणयोर्भावनावलोक्यतेऽखिले नाटके।

(१०) भवभूतिः गद्यपद्ययोः प्रचुरतया प्रयोगमलङ्काराणां नहि करोति, सर्वत्र सामान्यरूपेणैवालङ्काराणामन्विताः सन्तः नाटके विच्छत्तिविशेषं जनयन्ति।

(११) उत्तररामचरिते नाटके प्रकृतिः प्रधाना इवाभाति। सर्वाणि कार्याणि प्रकृत्या संश्लिष्टानि सन्ति। अत एवात्र प्रकृतिः स्वतन्त्रालम्बनरूपेण चित्रिता वर्तते। चतुर्थस्याङ्कस्य प्रकृतिरुद्दीपनकारिणी वर्तते। अयम् कविः स्वभावेनैव चिरपरिचितानि मधुराणि दृश्यानि परित्यज्य प्रचण्डानां घोराणां दृश्यानां चित्रणं करोति। यद्यपि कालिदासः प्रकृतेः केवलस्य रम्यस्यैव रूपस्य वर्णनां करोति तथापि नाटककारो भवभूतिः प्रकृतेः रम्यकठोरयोरेव रूपयोः वर्णनम् करोति इति भवभूतेर्नैसर्गिकी विशेषता वर्तते। भवभूतिः प्रकृतेः यथार्थम् रूपम् वर्णयति। अतएव भवभूतिः प्रकृतेः सूक्ष्मविवेचको वर्तते। सः प्रकृतेरुभयप्रकारकयोरेव रूपयोः पथाभ्यामवगच्छति।

(१२) भवभूतिकविः उत्तररामचरिते रामसीतयोर्दाम्पत्यस्नेहस्यापूर्वतया वर्णनम् करोति। श्रीरामः सीतायाः महत्त्वम् स्वजीवने वर्णयन् वक्ति—

'इयं गेहे लक्ष्मीरियममृतवर्तिर्नयनयोः,
असावस्याः स्पर्शो वपुषि बहुलश्चन्दनरसः।

अयं बाहुः कण्ठे शिशिरमसृणो मौक्तिकसरः
किमस्या न प्रेयो यदि परमसह्यस्तु विरहः॥'

सीताया दाम्पत्यस्य दुर्लभत्वं वर्णयन् भगवान् श्रीरामो वक्ति यत्—इदम् दाम्पत्यं तु महतः पुण्यस्य फलम् वर्तते। तथा चाभिहितम् रामेण—

'अद्वैतं सुखदुःखयोरनुगुणं सर्वास्ववस्थासु यत्,
विश्रामो हृदयस्य यत्र जरसा यस्मिन्नहार्यो रसः।

कालेनावरणात्ययात् परिणते यत्स्नेहसारे स्थितम्,
भद्रं तस्य सुमानुषस्य कथमप्येकं हि तत्प्राप्यते॥

अस्मिन् नाटके नाटककारः तादृशायाः करुणधारायाः प्रवाहं प्रवर्तयामास यत्र प्रस्तरा अपि रुदन्ति। अत्र वज्रस्यापि हृदयम् गलितं भवति। तथा चोक्तम्—

'अपि ग्रावा रोदित्यपि दलति वज्रस्य हृदयम्।'

अत्र भवभूतिः स्वयमेव वक्ति यत्—एक एव करुणरसो वर्तते, तस्यैव विवर्तभूतास्सन्ति—शृङ्गार-हास्य-रौद्र-वीर-भयानकादिका रसाः। तथाहि प्रोक्तम्—

'एको रसः करुण एव निमित्तभेदात्,
भिन्नः पृथक् पृथगिवाश्रयते विवर्त्तान् ।
आवर्त्तबुद्बुदतरङ्गमयान् विकारान्,
अम्भो यथा सलिलमेव हि तत् समग्रम् ॥'

सम्पूर्णे नाटके श्रीरामो रोदिति। एभिरेवाश्रुविन्दुभिः श्रीरामसीतयोः सुखदस्य सम्मिलनस्य मूलं सीञ्चितं भवति। श्रीरामस्य रोदनेनैवाभाति यत् सीतायाः वियोगजन्यं कीदृशं दुःखम् हृदयेनानुभवति श्रीरामः।

नाटककारः नाटकीयया दृष्टया नाटकमिदं परिपूर्णं चकार। अस्य नाटकस्य, नायको धीरोदात्तो वर्तते नायिका च स्वकीया वर्तते। अस्मिन् नाटके प्रतिनायकस्य प्रतिनायिकायाश्चान्तर्भावो वर्तते। अत्रार्थप्रकृतीनाम् कार्यावस्थानाञ्च समन्वयः पूर्णरूपेणात्र वतते। अस्मिन्नाटके करुणरसस्य विप्रलम्भशृङ्गारस्य च प्राधान्यं वर्तते। अत्र कथासूत्राणां सफलनिर्वाहाय विष्कम्भकानाम् पताकास्थानानाम्, गर्भाङ्कानाम् छायासीतायाश्च सन्निवेशमकरोत्। एतेषां तत्त्वानां सन्निवेशे नाटककारो भवभूतिरद्वितीयो वर्तते। अस्य नाटकस्य इमा एव विशेषतारवलोक्य समीक्षकैः अभिहितम्—'उत्तरे रामचरिते भवभूतिर्विशिष्यते।' इति।

जनतन्त्रवादः

जनतन्त्रस्यापरं नाम लोकतन्त्रम् वर्तते। लोकतन्त्रम् परिभाषमाणः अब्राहमलिङ्कननामको विद्वान् वक्ति यत् लोकतन्त्रम् जनतायाः, जनताद्वारा जनतायै च सर्वकारो वर्तते।

It is a government of the poeple, by the people and for the people. —Abraham Lincon.

ब्राइसनामको विद्वान् वक्ति यत्—'जनतन्त्रम् सर्वकारस्य (प्रशासनस्य) तद् स्वरूपं विद्यते यस्मिन् राज्यस्य प्रशासकीयशक्तिः कस्यचन वर्गविशेषस्याधिकारे नहि भवति अपितु सा शक्तिः सम्पूर्णजनसमाजस्य प्रतिनिधीनामायत्ता भवति।

It is the form of government in which the ruling power of state is segally vestcel, not in any particular class but in the members of community as a whole. —Bryce

डायसीमहोदयानुसारेण लोकतन्त्रम् प्रशासनस्य तद्रूपम् वर्तते यत्र प्रशासनशक्तिः सम्पूर्णस्य राष्ट्रस्य महतोंऽशस्यायत्ता भवति।

Democracy is a form of government in which governing body is comparatively in Large fraction of the tntire nation.

—Dicey

प्रो० पुण्ताम्वेकरमहोदयो वक्ति—लोकतन्त्रम् शासनस्य सः प्रकारो वर्तते यत्र जनसमाजः एकम् निश्चितम् प्रवन्धोचितं रूपं धत्ते । स्वेच्छायाः एवाधिकारस्य च क्रियान्वयनाय तस्यैकं संघटनं भवति । यद्यपि सङ्घटनमिदं जनतायाः अल्पसंख्यायत्तम् भवति परञ्चेयमल्पीयसी संख्या जनतायाः प्रातिनिध्यं करोति । किञ्च तस्याः चयनमपि जनतैव करोति । अस्य संघटनस्य स्वकीयः कश्चनाप्यधिकारो नहि भवति । तच्च संघटनम् वहुसंख्यामाश्रित्य जायते । वहुसंख्यामेवाश्रित्य, तस्याः समर्थनेनेदं शासनं करोति ।

एतेषां जनतन्त्रलक्षणानामध्ययनेनेदं ध्वनितं भवति यत् जनतन्त्रम् कस्यचन राज्यस्याथवा शासनस्य प्रकारविशेषो वर्तते ।

शासनस्य प्रकाररूपेण लोकतन्त्रस्याभिप्रायः तया शासनप्रणाल्या वर्तते यत्र जनता प्रत्यक्षरूपेणाथवा परोक्षरूपेण प्रशासनं सञ्चालयति । सीमिताः प्रशासकाः जनतायाः प्रातिनिध्यं कुर्वन्ति, ते जनतया समर्थिताः भवन्ति । प्रशास्तृपुरुषाणां पृथक्तया कश्चन स्वकीय अधिकारो नहि भवति ।

राजस्य प्रकाररूपेण लोकतन्त्रस्याभिप्रायः तथाविधेन राज्येन भवति यत्र राज्यस्य सम्प्रभुता जनतायां निहिता भवति । सर्वेषु राजनीतिकविषयेषु जनतायाः इच्छायाः प्राधान्यं भवति ।

समाजस्य प्रकाररूपेण लोकतन्त्रस्याभिप्रायः एतादृश्या सामाजिकया व्यवस्थया भवति यत्र सर्वेषां जनानाम्, जातीनाम्, धर्माणाम्, वर्गाणां च समानरूपेणाधिकारो भवति । लोकतन्त्रीयः समाजः व्यक्तीनां समानताश्रितो भवति । अत्र सर्वेषां सौविध्यं समानरूपेणापेक्ष्यते ।

किन्तु वर्तमाने युगे लोकतन्त्रस्यार्थः शासनप्रकारविशेषेणाभिप्रेतो वर्तते ।

लोकतन्त्रस्य गुणाः

लोकतन्त्रशासनस्य गुणाः अत्यधिकाः प्रशंसार्हाश्च सन्ति । तेषु केषांचन गुणानामधस्तादुल्लेखः क्रियते—

(१) सर्वेषां जनानाम् हितस्य सुरक्षा—लोकतन्त्रप्रशासनस्योद्देश्यमेवं भवति प्रजानां हितस्य संरक्षणम् । अत्र सर्वस्य जनानां हितस्य सुरक्षा क्रियते ।

(२) सर्वेषां स्वप्रतिभायाः विकासायात्रावसरो भवति—लोकतन्त्रीयं प्रशासनम् यतः प्रजासु समानतायाः सिद्धान्तमाश्रित्योद्भवति अतएवास्मिन् प्रशासने

सर्वेषां समानरूपेण स्वप्रतिभायाः विकासस्यावसरो भवति। कश्चनापि नागरिकः स्वप्रतिभाबलेन सर्वोच्चं पदं लब्धुं समर्थो भवति।

(३) स्वतन्त्रतायाः संरक्षणम्—लोकतन्त्रीयं प्रशासनं प्रजानां स्वातन्त्र्यस्य पूर्णरूपेण सुरक्षां करोति। अन्यासु शासनप्रणालीषु तु प्रजा स्वातन्त्र्ये शासनप्रतिबन्धेनाशंकिता भवति किन्तु लोकतन्त्रे तु एतादृश्या शङ्काया अवसर एव नहि भवति।

(४) इदं प्रशासनादर्शनागरिकताया उत्तमा पाठशाला भवति—लोकतन्त्रीये प्रशासने नागरिकेषु सेवायाः, आत्मनिर्भरतायाः, स्वावलम्बनस्य, सहिष्णुतायाः, बन्धुत्वस्य च भावनाः उदियन्ति।

(५) राजनैतिकी जागृतिः—लोकतन्त्रीये प्रशासने जनेषु राजनैतिकी चेतना भूयसी जागृता भवति। जनता स्वकीयमधिकारम् कर्तव्यं च ज्ञात्वा प्रशासने अभिरुचियुक्ता भवति।

(६) असन्तोषविद्रोहयोरल्पीयसी सम्भावना—लोकतन्त्रशासने प्रायेण प्रजानां प्रतिनिधयः एव प्रशासकाः भवन्ति, अतएवास्याम् व्यवस्थायाम् सन्तोषस्य विद्रोहस्य वा सम्भावना क्षीयते।

(७) देशभक्तेर्भावनाया उदयः—यतो लोकतन्त्रप्रशासनम् जनतायाः भवति, जनतायैव भवति, जनतया च भवति, अतएव जनानाम् देशविषये भक्तेर्भावना उदेति।

(८) बन्धुत्वस्य भावनाया विकासः—समानतायाः स्वतन्त्रतायाश्च सिद्धान्तमाश्रित्य यतो भवति लोकतन्त्रशासनमतएवास्मिन् प्रशासने लोकबन्धुत्वस्य भावना प्रबलायते।

(९) राष्ट्रियचरित्रस्योन्नतिः—लोकतन्त्रप्रशासने प्रजासु स्वाभिमानस्य आत्मसम्मानस्य च भावना प्रबला भवति तेन च भवति राष्ट्रियचरित्रस्य अभ्युन्नतिः।

(१०) सर्वकारस्योत्तरदायित्वम्—लोकतन्त्रे प्रशासका जनतया चयनिताः भवन्ति अतएव ते मनोयोगपूर्वकं जनतायाः हितसंरक्षणे स्वोत्तरदायित्वमनुभवन्ति। फलतः प्रशासकानां कुशलता वर्द्धते।

(११) सर्वकारस्य प्रगतिशीलता—अस्मिन् प्रशासने प्रशासनं प्रगतिशीलम् भवति। जनताया आवश्यकताया ज्ञानं सहसैव प्राप्नोति च। फलतः परिस्थित्यनुसारेण प्रशासने परिवर्तनमपि सुकरं भवति।

(१२) वर्तमानपरिस्थितौ तस्योपयुक्तता—इदं वैज्ञानिकं युगम् वर्तते।

अतएव विश्वस्मिन् विश्वे लोकतन्त्रस्य प्राधान्यम् प्रशासनेऽवलोक्यते । अस्य कारणमस्ति यत् जनता साम्प्रतम् प्रतिवन्धाधिक्यम् सोढुम् उद्यता नास्ति । सर्वत्र स्वातन्त्र्यमपेक्षितं भवति नागरिकाणाम् । अस्यां परिस्थितौ लोकतन्त्रमेव सर्वाधिकोपयुक्तं शासनमाभाति ।

लोकतन्त्रस्य दोषाः

विश्वस्य सर्वाणि वस्तूनि गुणदोषमिश्रितानि सन्ति । येन प्रकारेण लोकतन्त्रस्यानेके गुणास्सन्ति, तेनैव प्रकारेण लोकतन्त्रस्यानेके दोषा अपि सन्ति । अधस्तात् लोकतन्त्रस्य केषांचन दोषानाम् विवेचनम् प्रस्तूयते ।

(१) **संघटनकाठिन्यम्**—इदानीं यावत् लोकतन्त्रप्रशासनस्य संघटनस्य किमपि स्वरूपं नास्ति निर्णीतम् । लोकतन्त्रस्य किमपि एतादृशं प्रशासनम् नहि भवति यस्मिन् सकलानां जनानामभिमतिः भवेत् ।

(२) **मूर्खाणामयोग्यानाञ्च प्रशासनम्**—सर्वेष्वेव देशेषु मूर्खाणाम् अयोग्यानाम् च संख्या भूयसी भवति योग्यानां विदुषां च संख्याऽल्पीयसी भवति । अयोग्यैर्मूर्खैरेव चयनिताः प्रतिनिधयः तेषामेव संरक्षणे व्यापृता भवन्ति । अतएवारस्तूमहोदयेनाभिहितम् यत् लोकतन्त्रम् मूर्खाणाम् प्रशासनम् भवति ।

(३) **संख्यायाः महत्त्वम्**—लोकतन्त्रे सर्वेषां समानाधिकारो भवति । अतएव प्रशासनम् तस्यैव वर्गस्य हितसंरक्षणे जागरूकं भवति यस्य वर्गस्य संख्या भूयसी भवति ।

(४) **दलस्य महत्त्वम्**—लोकतन्त्रे दलस्य महत्त्वमधिकं भवति । अद्य भारते कांग्रेसस्य प्रशासनं वर्तते अतएव कांग्रेसदलस्य महत्त्वमधिक मनुभूयतेसर्वकारेण ।

(५) **सार्वजनिकधनस्य समयस्य चापव्ययः**—अस्मिन् प्रशासने सार्वजनिकधनस्यात्यधिकमपव्ययो भवति । छन्दाकलनकर्मणि तु अत्यधिकं धनं व्ययितं भवति ।

(६) **नैतिकम् पतनम्**—लोकतन्त्रे कस्यचन दलविशेषस्य जनाः अपरस्य दलस्य जनेषु मिथ्यैव दोषारोपणम् कुर्वन्ति । तेन च तेषां नैतिकं पतनं सम्पद्यते ।

(७) **नीतेरस्थैर्यम्**—लोकतन्त्रे प्रशासनमस्थिरम् भवति । अतएवास्मिन् प्रशासने नीतिषु दार्ढ्यमायाति एव नहि । दलविशेषस्य सर्वकारस्य परिवर्तने संजाते अपरस्य दलस्य नूतनाः नीतयः आयान्ति ।

(८) **सर्वकारीयकार्येषु विलम्बः**—लोकतन्त्रे प्रजानामनुरञ्जनमनिवार्यं भवति तेन च सर्वकारः कस्यचन कार्यस्य करणे सर्वाधिकानाम् जनानामनुमतिमावश्यकमनुभवति । तदर्थम् परामर्शक्रियायाम् वहुकालो भवति व्ययितः ।

(९) सांस्कृतिकविकासकर्मण्यवरोधः—प्रजातन्त्रे प्रायेण अयोग्या एव जनाः प्रशासकाः भवन्ति, फलतः अस्मिन् प्रशासने साहित्यस्य, संगीतस्य कलायाः वा शैघ्र्येण विकासो नहि भवति प्रशासकानाम् प्रोत्साहनाभावात् ।

अनेन विवेचनेनायमर्थः स्पष्टो भवति यत् लोकतन्त्रप्रशासने अनेके दोषा अनेके गुणाश्च सन्ति । अरस्तूनामको विद्वान् लिखति यत् प्रजातन्त्रम् तु सत्प्रशासनेषु सर्वाधिकारमसत् असत्प्रशासनेषु च सर्वाधिकं सत् वर्तते । परन्तु वास्तविकता इयम् वर्तते यत् जनतायाः प्रतिनिधयः यदि कुशला योग्याश्च भवन्ति तदा तु लोकतन्त्रीयं प्रशासनं सर्वाधिकं कुशलं भवति । अतएव लोकतन्त्रे प्रशासने जनताया जागृतिनिरनिवार्या भवति । अतएव लोकतन्त्रस्य सफलतायाः सफलतायै नैतिकस्तरस्योन्नतिरनिवार्या भवति । प्रशास्तृभिः कर्तव्यपरायणैर्भाव्यम्, ते सत्यभाषिणो भवेयुः, तेषां बौद्धिकं स्तरमभ्युन्नतं स्यात् । तेषु लोकहितपक्षे निर्णयस्य शक्तिः स्यात् । इत्थं संजाते सति न्यायपूर्णस्य समाजस्य व्यवस्था सेत्स्यति लोकतन्त्रं च सफलं भविष्यति ।

अधिनायकवादः

वर्तमानयुगः लोकतन्त्रस्य युगो वर्तते । राजतन्त्रस्य दिनानि त्वतीतानि । अथापि तस्यैकं नवीनं रूपम् समुपलभ्यते । राजतन्त्रस्य रूपम् अधिनायकवादशब्देनाभिधीयते । अधिनायकवादः बाह्यतः तु राजतन्त्रात् भिद्यते किन्तु अन्तरतः सः राजतन्त्रमेवानुसरति । अधिनायकवादेऽपि राजसत्ता कस्यचन व्यक्तिविशेषस्यायत्ता भवति । सम्पूर्णं च शासनम् तस्यैवेच्छामनुसरति ।

एलफ्रेडकार्वनमहोदयानुसारेण—अधिनायकतन्त्रीयं शासनं तस्य व्यक्तिविशेषस्य शासनं भवति, यत्र प्रशासकः स्वपदं पैतृकधनेनाथवा परम्परातः नहि प्राप्नोति अपितु सः शक्त्या स्वीकृत्या वाथवोभययोः सहयोगेन प्राप्नोति । प्रशासकः निरंकुशो भवति । राजनीतिकशक्तीनां स्रोतांसि तस्येच्छामनुसरन्ति । सः शक्तीनां प्रयोगम् नियमरूपेण नहि अपि त्वादेशरूपेण करोति ।

विंशतिशताब्दः जनतन्त्रस्य युगो वर्तते अथाप्यस्मिन् युगे अधिनायकवादो विश्वे अगात् । १९२२ ईस्व्याम् जर्मनीदेशे नाजीदलस्य शासने संजाते हिटलरः अधिनायको बभूव । यूगोस्लावियादेशे राजा एजेग्जेण्डरः संसदं भंक्त्वा शासनं पूर्णतया स्वायत्तमकरोत् । १९३१ ईस्व्याम् रुमानियादेशे सम्राट् करोलः अधिनायकवादस्य स्थापनामकरोत् । पुनः पूर्तगाल-हंगरी-आस्ट्रिया-टर्की-प्रभृतिषु देशेष्वपि अधिनायकवादस्य स्थापना बभूव । अनेन प्रकारेण विश्वस्य महति भागेऽधिनायकवादस्य स्थापना बभूव । अधिनायकवादस्य कानिचन वैशिष्ट्यानि निम्नांकितानि सन्ति—

(१) राज्यस्य प्रमुखता—अधिनायकवादे राज्यस्य प्रामुख्यं भवति । देशस्य सम्पूर्णा सम्पत्ती राज्याधीना भवति । तत्र राज्यशक्तिः सर्वोच्चशक्तिर्भवति ।

(२) वैयक्तिकस्वातन्त्र्यस्याभावः—अधिनायकवादे व्यक्तिः साधनमात्रं भवति। व्यक्तया राज्यस्य कल्याणापेक्षितानि सर्वाणि कार्याणि कर्तव्यानि भवन्ति। अस्मिन् वादे राजकीयनियमानां पालनमनिवार्यं भवति। अस्मिन् वादे भाषणस्याथवा मुद्रणालयस्य स्वातन्त्र्यं नहि भवति। कश्चनापि जनः राज्यस्य विरोधकरणे नहि प्रभवति।

(३) प्रजातन्त्रस्य विरोधः—अधिनायकवादः प्रजातन्त्रविरुद्धं वर्तते। अधिनायकवादे स्वनियमानुसारेण जनानां कार्यस्य निर्णयः क्रियते। सर्वे जना राज्यनिश्चितकार्याणि कुर्वन्ति, तत्र कस्यचन विरोधकरणस्य अधिकारो नहि भवति। हिटलरेणाभिहितम् स्वराज्ये—यो जनः जर्मनीदेशेन सह, देशेन द्वारा च निवसितुमिच्छति, तेन जर्मनीराष्ट्रस्याज्ञायाः पालनं कर्तव्यम्, सर्वाधिकारपूर्णराज्यानुकूलं भवितव्यञ्च।

(४) अधिनायकवादे राज्यप्रशासनयोर्भेदो नहि भवति—उभयोरैक्यं सम्पद्यते। अधिनायकेन लुईचतुर्दशेनाभिहितम्-अहम् राज्यमस्मि।'

(५) अधिनायकवादे दलनेतृकार्यक्रमाणामैक्यं भवति—अधिनायकवादे प्रशासकस्यैव दलम् भवति, अन्यानि दलानि प्रतिबन्धितानि भवन्ति। अधिनायकवादे जनाः एकस्मिन्नेव नेतरि विश्वसन्ति। सर्वे जनाः तस्यैवाज्ञायाः पालनं कुर्वन्ति। अधिनायकवादे सम्पूर्णे देशे एक एव राजनीतिकः कार्यक्रमो भवति।

(६) समाजवादस्य विरोधः—अधिनायकवादः समाजवादस्य विरोधी वर्तते। अस्मिन् प्रशासने हडतालादिकस्य आज्ञा नहि भवति। अस्मिन् वादे सर्वे धनिकाः श्रमिकाश्च राज्याधीना भवन्ति।

(७) धर्मविरुद्धवादः—अधिनायकवादस्य धर्मे श्रद्धा नहि भवति। रूसदेशे धर्मस्य किमपि उपयोगिता नहि स्वीक्रियते स्म।

(८) युद्धस्य माहात्म्यम्—राष्ट्रियसम्मानस्य सुरक्षायै, राष्ट्रस्य समृद्धये च युद्धमावश्यकं स्वीक्रियतेऽधिनायकवादे। हिटलरेणाभिहितम्—निरन्तरेण युद्धेन मानवता एधते।

(९) साम्राज्यस्य समर्थनम्—अधिनायकवादे उपनिवेशवादस्य वृद्धिर्भवति। अस्मिन् वादे साम्राज्यविस्तृतीकरणमावश्यकं भवति।

अधिनायकवादस्य गुणाः

(१) कुशलशासनव्यवस्था—अधिनायकवादे सुदृढशासनव्यवस्थायाः स्थापना भवति। अत्र वादविवादो नहि क्रियते अपितु सर्वाणि कार्याणि शीघ्रतया सम्पाद्यन्ते। एकेन विदुषाभिहितम् यत्—लोकतन्त्रम् अधिनायकवादतः वर्षद्वयं पश्चगामी भवति।

(२) एकतायाः भावना सुदृढा भवति—अधिनायकवादे दलनेतृकार्यक्रमाणामैक्यात् सर्वेषां जनानाम् एकस्मिन्नेव दले एकस्मिन् एव नेतरि, एकस्मिन्नेव कार्यक्रमे च भवति विश्वासः ।

(३) युद्धकालाय सर्वोत्तमा व्यवस्था—युद्धकाले सर्वे निर्णयाः एकपुरुषनिर्णयाश्रिताः भवन्ति । इत्थं कृते सति कस्मिश्चिदपि कर्मणि शैथिल्यं नह्यायाति, कार्यक्रमाणां रहस्यभेदोऽपि नहि जायते । अतएव युद्धकालाय तु अधिनायकवादीयैव व्यवस्था सर्वोत्तमा भवति ।

(४) अपव्ययस्यावसर एव नहि भवति—लोकतन्त्रे तु व्यर्थकार्यक्रमेषु वहु धनं व्ययितं भवति, किन्तु अधिनायकवादे अपव्ययस्यावसर एव नहि भवति । अधिनायकवादे एकस्य प्रशासकस्य मनोऽनुकूलं राज्यस्याखिलं कार्यं क्रियते ।

(५) राष्ट्रस्य प्रतिष्ठा वर्धते –अधिनायकवादः राष्ट्रियभावनाया प्रतिष्ठापने सहायको भवति । हिटलरस्यैव प्रशासने जर्मनी देशः अभ्युन्नतेः चरमां काष्ठां स्पृशति स्म । इटली-रूसदेशावपि अधिनायकवादीव्यवस्थायामेव उन्नतेः काष्ठामचुम्वताम् ।

(६) उचितनियमाश्रितो भवति अधिनायकवादः—अधिनायकवादानुसारेण राज्यस्य सर्वे जनाः प्रशासनकर्माणि समर्थाः नहि भवन्ति । अतएव कुशलप्रशासकेनैव राष्ट्रस्य प्रशासकेन भाव्यम् । अधिनायकवादे स्वीक्रियते यत् सर्वसामान्या जनता ज्ञानहीना स्वार्थपरायणा च भवति ।

(७) सर्वाङ्गीणाभ्युन्नतेः समृद्धेश्च पोषकः—अधिनायकवादे देशस्य चतुरस्रो विकासो भवति । हिटलरः जर्मनीदेशे भ्रष्टाचारं समापयामास । इटलीदेशे मुसोलिनीमहोदयस्य शासनकाले जनतायाः अत्यधिकं आर्थिकमुन्नयनमभूत् ।

अधिनायकवादस्य दोषाः

येन प्रकारेणाधिनायकवादे अनेके गुणाः सन्ति तेनैव प्रकारेणास्मिन् वादे अनेके दोषा अपि सन्ति । लोकस्य सर्वेषामेव वस्तूनां गुणदोषमयं पक्षद्वयं भवति । अधस्तात् अधिनायकवादस्य केषांचन दोषाणां चर्चा क्रियते ।

(१) जनानाम् अधिकाराः स्वातन्त्र्यं च विनश्यन्ति—अधिनायकवादे भाषणस्य कुत्रापि गमनस्य वा जनानाम् स्वेच्छया अधिकारो नहि भवति । जनानां सर्वे अधिकाराः राज्येण समाप्यन्ते । प्रशासकस्येच्छानुसारमेव जनानां सर्वश्रेष्ठं कर्तव्यम् भवति । कश्चनापि मनुष्यः प्रशासनस्य विरोधकरणे समर्थो नहि भवति । हिटलरः जर्मनीदेशे जनानां सर्वानधिकारान् समापयामास ।

(२) निरंकुशशासनस्य स्थापना—अधिनायकवादे शासनोपरि कश्चनापि अंकुशो नहि भवति । प्रशासकः स्वेच्छया सम्पूर्णे राष्ट्रे कार्यक्रमान् प्रचालयति । अतएव जनतायाः कश्चनापि अभिरुचिः प्रशासने नहि भवति ।

(३) साम्राज्यवादस्य नीतेः पोषणम्—अधिनायकवादी प्रशासकः साम्राज्यविस्तारोपयोगीनि सर्वाणि कार्याणिकरोति। अत्र युद्धस्य महत्त्वं प्रदीयते। हिटलर-मुसोलिनीमहोदयोरेव नीतेर्हेतोः विश्वयुद्धम् वभूव।

(४) अन्तरराष्ट्रियतायाः विरोधः—अयम् युगः विश्वबन्धुत्वस्य युगो वर्तते। सर्वत्र मानवस्नेहस्य महत्त्वं प्रदीयते। किन्तु अधिनायकवादे विश्वबन्धुत्वस्य महत्त्वमेव नहि भवति। स्वसाम्राज्यस्य येन केनापि प्रकारेण विस्तार एव प्रशासकस्य लक्ष्यम् भवति।

(५) योग्यानामुत्तराधिकारिणामभावो भवति—अधिनायकवादीशासनव्यवस्थायाम् योग्यानामुत्तराधिकारिणामभावो भवति। अधिनायकः स्वशासनकाले कमपि पुरुषम् प्रशासनकर्मणि नियोजयति एव नहि, फलतः कस्यचनान्यस्य प्रशासनानुभव एव नहि भवति। अतएव अधिनायकस्य उत्तराधिकारिणः योग्यतायाः नैश्चित्यमेव नहि भवति।

(६) विद्रोहस्य क्रान्तेश्च भयम्—अधिनायकवादीशासनव्यवस्थायाम् विद्रोहस्य भयम् भवति। कस्यचनैकस्य प्रशासकस्य आज्ञापालनेन व्याकुलाः जनाः विद्रोहम् कुर्वन्ति। अतएव इदं निश्चितं नहि भवति यत् अधिनायकवादे राज्ये कदा विद्रोहो भविष्यति।

(७) संकटकाले नैर्बल्यम्—समीक्षकाणामयम् भ्रम एव वर्तते यत् युद्धकाले सर्वाधिकोपयोगी भवति अधिनायकवादीप्रशासनम्। वस्तुतः संकटकाले इदं प्रशासनं अतीव निर्बलं भवति। यदि अधिनायकवादी प्रशासको म्रियते, तदा तेनैव साकम् अधिनायकवादी प्रशासनं समाप्तिमेति। हिटलरेणैव साकं जर्मनीदेशे अधिनायकवादस्य व्यवस्था समाप्तिमगात्।

वस्तुतः अधिनायकवादस्य व्यवस्थायाम् दोषा एव अधिकाः सन्ति। अतएव अनया व्यवस्थया देशस्य जनता व्याकुला भवति। वस्तुतो जनतन्त्रमेव सर्वैः समर्थनीयम् वर्तते।

साम्राज्यवादः

(Imperialism)

साम्राज्यवादः एक एतादृशः शब्दो वर्तते यस्य प्रयोगम् संसारस्य सर्वे जनाः येन केनापि प्रकारेणाकार्षुः। शक्तेः हिंसायाश्च प्रयोगेण कस्यचन राष्ट्रस्य नागरिकेषु वैदेशिकस्य शासनस्य स्थापनैव प्रायेण साम्राज्यवादशब्देनैवाभिधीयते।

साम्राज्यवादं परिभाषमाणः प्रो० शर्मा महोदयः प्राह—शक्त्या हिंसया वा कस्यचन राष्ट्रस्य नागरिकेषु वैदेशिकस्य शासनस्यारोप एव साम्राज्यवादः।

Imperialism is the imposition by scince forw and violence of alian rule upon subject people depite of all moralising and prentions to the country.

सामाजिकं विज्ञानविश्वकोशे ग्रन्थे तु अभिहितम्—सामाज्यवादः कश्चन नीतिविशेषो वर्तते यस्योद्देश्यम् कस्यचन सामाज्यस्य उत्पादनम् संघटनम् स्थापनम् च भवति। अस्यायमभिप्रायोऽस्ति यत् कस्यचन तथा विशालराज्यस्य स्थापनम् साम्राज्यवादोऽभिधीयते यस्मिन् केन्द्रेण शासितान्यनेकानि राज्याणि भवन्ति।

Imperialism is a policy which aims of creating orgunising and maintaining am empire, that is a state of vast sixe compasid of varios more bss distinct national units and subject to a single centralised will.

प्रथमविश्वयुद्धस्यानन्तरम् व्रिटिशसाम्राज्यम् सर्वाधिकं विशालं साम्राज्यमासीत्। परन्तु साम्प्रतिके काले साम्राज्यवादी विलुप्यते। सम्पूर्णे विश्वे नवीनायाश्चेतनायाः जागरणम् भवति। साम्राज्यवादो हि राजनैतिक–व्यापारिक–नैतिक-शोषणानां समन्वितं रूपमात्रमास्ते। अयं हि दूषितं संघटनमात्रं वर्तते। विजयिन्या सत्तया विजिताया सत्तायाः शोषणाय साम्राज्यवादः स्थाप्यते।

साम्राज्यवादस्य गुणानां कीर्तनं कुर्वता सी० डी० वर्न्स महोदयेन तु अभिहितम्—साम्राज्यवादः संकुचितग्रामीणराजनीतेरन्तं विधाय सार्वभौमिकं नागरिकत्वम् विश्ववन्धुत्वं च प्रसारयति। अयम् लोकहितस्य साधनमस्ति। सभ्याः देशाः असभ्यदेशोपरि नैजं शासनं स्थापयित्वा तं देशं सभ्यं कुर्वन्ति। अत्र संकीर्णा राष्ट्रिया सीमा विनश्यति विस्तृतसम्पर्कस्य सौविध्यं ददाति प्रोत्साहयति चार्थिकं संवन्धम्। साम्राज्यवादः शान्ति व्यवस्थापयति। अयं वादः पराजितजातिषु राष्ट्रियां चेतनाम्, आत्मनिर्माणस्य महत्त्वाकांक्षाञ्चोद्भावयति।

साम्राज्यवादस्य कारणानि

यद्यपि साम्राज्यवादस्यानेकानि कारणानि सन्ति, तथापि तत्र द्वे कारणे उल्लेखनीये वर्तते—(१) उग्रराष्ट्रवादः, (२) आर्थिकोन्नतेरुत्कटा लालसा च। अधस्तात् साम्राज्यवादस्य केषांचन कारणानां चर्चा क्रियते—

(१) उग्रः राष्ट्रवादः—उग्रराष्ट्रवादिनो देशाः स्वदेशस्य विचारसरणीमनेकेषु देशेषु प्रचारेप्सया स्वसैन्यसहायेन स्वविचारप्रचारे समर्थाः भवन्ति। उग्रराष्ट्रवाद एव कालान्तरे साम्राज्यवादरूपेण परिणतो भवति।

(२) आर्थिकोन्नतेरुत्कटाभिलाषा—सामाज्यवादस्य स्थापनाया इदमन्यतमं

कारणं वर्तते । अनया इच्छया कश्चन देशविशेषः व्यापारं नैजं प्रसारयति सम्प्रभुता द्वारा अन्यस्मिन् देशे ।

(३) धर्मप्रचारस्य भावना—धर्मप्रचारस्य भावनाऽपि साम्राज्यवादस्य स्थापनाया जननी वर्तते । ऐतिह्यविद्भ्यो नास्तीदं तिरोहितम् यत् अनेके आक्रमणकारिणः स्वधर्मस्य दूरदेशेषु प्रचारायैवान्येषु देशेष्वाक्रमणमकार्षुः । यद्यपि वर्तमानकाले स्वधर्मप्रचारस्य भावनाया अधिकं महत्त्वं नास्ति, अथापि साम्राज्यवादस्य स्थापनायाः कारणेषु धर्मप्रचारस्य भावनाप्येकं कारणं वर्तत एव ।

(४) सांस्कृतिकाधिपत्यलालसा—सांस्कृताधिपत्यलालसाऽपि साम्राज्यवादस्य कारणेषु एका वर्तते । अनयाऽपि लालसया अनेके सम्राजः अन्येषु देशेषु आक्रमणं कृत्वा, तान् पराजित्य तेषां स्वातन्त्र्यापहरणं कृत्वा तेषु देशेषु स्वदेशस्य संस्कृतेः प्रचारं कारयामासुः । आंग्लानां तेषु तेषु देशेषु स्वोपनिवेशस्थापनायामेषाऽपि भावना प्रबलाऽऽसीत् ।

(५) सैन्यबलाश्रितो भवति साम्राज्यवादः—साम्राज्यवादे सैन्यबलस्याधिकं महत्त्वम् भवति । हिटलरोऽपि साम्राज्यवादी आसीत् ।

(६) धनस्यात्यधिकं केन्द्रीयकरणम्—धनस्य केन्द्रीयकरणस्य प्रवृत्तिरपि साम्राज्यवादिनीं प्रवृत्तिम् वर्द्धयति ।

महादेवप्रसादशर्मामहोदयानुसारेण साम्राज्यवादस्य निम्नांकिताः दोषाः सन्ति—

(१) परायत्तजातीनामार्थिकं शोषणम्—साम्राज्यवादे परायत्ता जातयः शोषिता भवन्ति । परायत्ताः देशाः साम्राज्यवादिदेशेभ्यः अपक्वं वस्तु उत्पादयन्ति । साम्राज्यवादिषु देशेषु उत्पन्नानि वस्तूनि उपभोक्तुं बाध्याश्च भवन्ति परायत्ता देशा जातयश्च ।

(२) परायत्तादेशस्य संस्कृतिर्विनश्यति—साम्राज्यवादिनो देशाः पराधीनदेशस्य संस्कृतिम् विनाश्य स्वस्य देशस्य संस्कृतेस्तत्र प्रचारं कारयन्ति ।

(३) परायत्तदेशेषु साम्प्रदायिकी भावनोत्पद्यते—साम्राज्यवादिनो देशाः स्वकुटिलया नीत्या परायत्ते देशे साम्प्रदायिकी भावनामुद्भाव्य, परायत्तदेशस्य जनेषु परस्परं कलहञ्चोत्पाद्य तस्मिन् देशे प्रशासनं कुर्वन्ति ।

(४) पराधीनदेशस्य विकासोऽवरुद्धयते—साम्राज्यवादिनो देशाः पराधीनस्य देशस्य विकासे नानाविधं प्रत्यवायमुपस्थाप्य तेन प्रकारेण प्रयतन्ते येन तेषां तेषां देशानां विकासोऽवरुद्धो भवति ।

(५) युद्धविभीषिकायाः बाहुल्यम्—प्रथमद्वितीयविश्वयुद्धयोः कारणानां विश्लेषणेनावगम्यते यदिमे युद्धे तु साम्राज्यवादिप्रवृत्तेः फलभूते आस्ताम् ।

साम्राज्यवादिनो देशाः स्वसाम्राज्यप्रसाराय अन्येन देशेन साकं युद्धं कुर्वन्ति। परस्परहितावरोधे समुपस्थिते साम्राज्यवादिनो देशा परस्परमपि युद्धं कुर्वन्ति।

(६) विश्वशान्तौ बाधा—साम्राज्यवादिनां देशानां युद्धप्रवृत्त्या विश्वस्य शान्तिराहता भवति। समुत्पद्यन्ते अनेकविधाश्चास्यां प्रवृत्तौ ऽपद्रवाः।

अनेन विश्लेषणेनायमर्थः सिद्धयति यत् साम्राज्यवादो मानवताया विघातको वर्तते। अनेन विश्वशान्तिविरोधिनी प्रवृत्तिर्विजृम्भते।

संयुक्तराष्ट्रसंघः

१९४४ खैष्टाब्दस्य अगस्तमासे अमेरिकादेशस्य वाशिंग्टननामकस्य नगरस्य सविधे डाम्वर्टन ओक्स नामके स्थाने काचनैका समितिः समायोजिता बभूव, यस्याम् अमेरिका-ब्रिटेन-चीन-सोवियतसंघाख्यानां देशानां प्रतिनिधयः सम्मिलिता अभूवन्। इमे प्रतिनिधयः विश्वसंघटनस्य योजनाम् उपस्थापयामासुः। पुनः २५।४।१९४५ दिनाङ्कादारभ्य २५।६।१९४५ दिनाङ्कं यावत् सेनफ्रांसिसको नाम्नि नगरे विभिन्नानां राष्ट्रप्रतिनिधीनां सम्मेलनमभूत्, तेनैव राष्ट्रसंघनामकस्य विश्वसंघटनस्योदय अभूत्। तस्य सम्मेलनस्य घोषणापत्रे एकपञ्चाशत् राष्ट्राणाम् प्रतिनिधयः हस्ताक्षराण्यकार्षुः। तेनैव २४।१०।१९४५ दिनाङ्के संयुक्तराष्ट्रसंघस्य सविधि स्थापनाऽभूत्।

संयुक्तराष्ट्रसंघस्योद्देश्यम्—अस्याः संस्थाया उद्देश्यानि निम्नाङ्कितानि सन्ति—

अन्तरराष्ट्रियशान्तेः स्थापनम्, शान्तिव्यवस्थायाः सुदृढीकरणायोपायानामन्वेषणम्, तेषु तेषु राष्ट्रेषु मैत्रीपूर्णस्य सम्बन्धस्य संस्थापनम्, जातिधर्मगतानां भेदानामपनोदनम्, अन्तरराष्ट्रियपक्षे त्रेषु राजनीतिक-आर्थिक-सामाजिक-सांस्कृतिकादिकानाम् समस्यानाम् समन्वयनम् तदर्थमनेकेषां राष्ट्राणाम् सहयोगावाप्तयोः प्रयासकरणञ्च मुख्यरूपेण संयुक्तराष्ट्रसंघस्योद्देश्यानि सन्ति। अयं संयुक्तराष्ट्रसंघः तावत् कालपर्यन्तम् कस्यचनापि देशस्यान्तरिकेषु विषयेषु हस्तक्षेपं नहि करोति यावत् कालं सोऽयम् हस्तक्षेपोऽनिवार्यो नहि भवति।

संयुक्तराष्ट्रसंघस्य सदस्यतायाः नियमाः—संयुक्तराष्ट्रस्य सदस्यतायै आवश्यको भवति यत् तस्य सदस्यता कामयमानेन देशेन शान्तिप्रियेण, संघस्य नियमपालकेन च भाव्यम्। सदस्यतायै राष्ट्रसंघस्यावेदनपत्रप्रपूरणमावश्यकं भवति। तस्यावेदनपत्रस्य विषये सुरक्षापरिषदि साधारणसभायां च विचारो भवति। स्वीकृते च सति तस्मिन्नावेदनपत्रे सो देशो संयुक्तराष्ट्रसंघस्य सदस्यो भवति।

संयुक्तराष्ट्रसंघस्य प्रमुखान्यङ्गानि—संयुक्तराष्ट्रसंघस्य मुख्यरूपेण षडङ्गानि सन्ति, येषाम् अधस्तात् संक्षेपेण वर्णनं क्रियते—

(१) साधारणसभा—संयुक्तराष्ट्रस्यास्यां सभायां सर्वेषां सदस्यभूतानां

प्रतिनिधयो भवन्ति । कश्चनापि सदस्यभूतो देशोऽस्यां सभायाम् स्वकीयान् पञ्चप्रतिनिधीन् प्रेषयितुमनुमतो भवति, किन्तु तेषां समेषामेकमेव मतम् गण्यते । अस्याः सभायाः अधिवेशनम् एकं वारम् नूनम् भवति । सत्यामावश्यकतायामस्याः सभायाः एकाधिकवारमपि अवश्यं भवति । साधारणसभा सर्वेषामन्तरराष्ट्रियविषयाणामुपरि विचारं कर्तुं निर्णेतुञ्चाधिकृता वर्तते । महत्त्वपूर्णानाम् निर्णयानां विषये ६६%. षट्षष्टिप्रतिशतम् मतमनिवार्यम् भवति । आय-व्ययकस्यापि निर्णयम् सामान्यैव सभा करोति ।

(२) सुरक्षा-परिषद्—अस्याः परिषदः एकादशसंख्याकाः सदस्या भवन्ति । तत्र पञ्च सदस्याः स्थायिनो भवन्ति षट् च अस्थायिनः । तत्र चीन–फ्रांस–रूस–यूनाइटेडकिंगडम–संयुक्तराष्ट्रअमेरिका चास्याः परिषदः स्थायिनः सदस्याः सन्ति । एकस्य मतस्याधिकारं परिषत् स्वयमेव धत्ते । कार्यक्रमस्य विषयाणां निर्णयः सप्तानां सदस्यानां बहुमतेन भवति । मूलविषयाणामपि निर्णयाय सप्तानां मतानामावश्यकता भवति । किन्त्वेतेषां विषयाणां विषये पञ्चानां स्थायिसदस्यानां सहमतिरनिवार्या भवति ।

लक्षणा तेन षड्विधा

अथवा—लक्षणाशक्तिः ।

आलङ्कारिका विद्वांसः शब्दस्य शक्तित्रयीम् स्वीकुर्वन्ति—अभिधाशक्तिम् लक्षणाशक्तिं व्यञ्जनाशक्तिञ्च । तत्र लक्षणाशक्तेः स्वरूपं निरूपयताऽऽचार्येण मम्मटेनाभिहितम्—

‘मुख्यार्थबाधे तद्योगे रूढितोऽर्थप्रयोजनात् ।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणारोपिता क्रिया’ ॥

अयमाशयो यत् मुख्यार्थबाधे सति, तद्युक्तत्वे सति, रूढिप्रयोजनान्यतरहेतुकत्वे सति अन्यर्थलक्षकत्वम् लक्षणात्वम् इति लक्षणाया लक्षणम् ।

तत्र मुख्यार्थस्य बाधो हि द्वेधा भवति—‘1 अन्वयानुपपत्त्या, 2 तात्पर्यानुपपत्त्या च । यथा गङ्गायाम् घोषः अस्य वाक्यस्य गङ्गापदस्यार्थः जलप्रवाहरूपो भवति । सप्तम्याः अधिकरणरूपोऽर्थो वर्तते । घोषस्याभीरपल्लीरूपोऽर्थः, प्रथमायाश्चाधेयतारूपोऽर्थः । इत्थम् सम्पूर्णस्य वाक्यस्य—‘भगीरथरथखातावच्छिन्नजलप्रवाहनिष्ठाधिकरणतानिरूपिताधेयतावान् घोषः’ इति वाक्यार्थो भवति । किन्तु घोषस्याश्रयता जलेऽसम्भवात् घोषजलप्रवाहयोः आधाराधेयभावोऽनुपपन्नः । अतएव मुख्यार्थानुपपत्त्याऽत्र मुख्यार्थस्य बाधो भवति ।

किन्त्वन्येषामालङ्कारिकाणां मतानुसारेण मुख्यार्थस्य बाधस्तात्पर्यानुपपत्त्या भवति लक्षणायाः स्थले । अन्यथा काकेभ्यो दधि रक्ष्यतामित्यादौ अन्वयानुपपत्तेरभावात्

मुख्यार्थस्य बाधाभावाल्लक्षणा न स्यात्। तत्र तु तात्पर्यानुपपत्त्यैव मुख्यार्थस्य वाधः, काकपदस्य दध्युपघात्वावच्छिन्ने तात्पर्यादेव मुख्यार्थस्य बाधः।

मुख्यार्थस्य वाधे संजाते सति मुख्यार्थसंयुक्त एवार्थे भवति। यथा गङ्गायाम् घोषः इत्यादौ गङ्गापदस्य मुख्यार्थसंयुक्ते गङ्गातटरूपे एवार्थे लक्षणा भवति।

इदानीयं प्रश्न उदेति यत् गङ्गातटे घोष इत्यनुक्त्वा गङ्गायाम् घोषः इति वाक्य-कथनेन को लाभो भवति। अर्थस्तु गङ्गातटे घोष इत्येव क्रियते। अत्रोच्यते यत्—लक्षणायाः कारणम् प्रयोजनमथवा रूढिर्भवति। यथा गङ्गायाम् घोषः इति कथनस्यायमभिप्रायो वर्तते यत् यादृशं शैत्यं पावनत्वं च गङ्गायाः प्रवाहे भवति तादृशमेव शैत्यं पावनत्वं चास्मिन् घोषे वर्तते। अतएव शैत्यपावनत्वातिशय्य-द्योतनमेवात्र प्रयोजनम्। 'गङ्गातटे घोषः' इति वाक्येन द्वाराऽस्यार्थस्य द्योतना-सम्भवात्।

अस्याः कारिकायाः 'लक्ष्यते यत् सा' इति वाक्यांशस्य 'यत्' द्वितयी व्याख्या क्रियते। प्रथमव्याख्यानुसारेण—'यदिति यया इत्यर्थे लुप्तकरणं तृतीयान्तमव्ययम्। तथा च सति—'यया शब्दशक्त्या अन्योऽर्थो लक्ष्यते सा लक्षणा।' इति वाक्यार्थो भवति। द्वितीयव्याख्यानुसारेण यदिति पदम् क्रियाविशेषणम् वर्त्तते। तथा च सति यत् लक्ष्यते—'प्रतिपाद्यते सा लक्षणा' इति अर्थो भवति। द्वितीयायां व्याख्यायाम् लक्ष्यते-पदम् णिजन्तम् वर्त्तते। णिच्प्रत्ययस्यात्र अर्थः 'प्रयोजकव्यापारहेतुरूपो भवति। तथा च सति 'प्रयोजकप्रतिपत्तिहेतुव्यापारो लक्षणा' इत्यर्थो भवति।

अस्याः कारिकायाः व्याख्यायाम् काव्यप्रकाशकारो वक्ति—

"'कर्मणि कुशलः' इत्यादौ दर्भग्रहणाद्ययोगात्, गङ्गायां घोषः इत्यादौ च गङ्गादीनां घोषाद्याधारत्वासम्भवात् मुख्यार्थस्य बाधे, विवेचकत्वादौ सामीप्ये च सम्बन्धे रूढितः प्रसिद्धेः तथा गङ्गातटे घोष इत्यादेः प्रयोगात् येषां न तथा प्रतिपत्तिस्तेषां पावनत्वादीनां धर्माणाम् तथा तत्प्रतिपादनात्मनः प्रयोजनाच्च मुख्येन अमुख्योऽर्थो लक्ष्यते यत् सः आरोपितः शब्दव्यापारः सान्तरार्थनिष्ठो लक्षणा।" इति

काव्यप्रकाशकारः लक्षणायाः प्रप्रथमं भेदद्वयं करोति—उपादानलक्षणा लक्षण-लक्षणा चेति। अनयोर्लक्षणयोः स्वरूपनिरूपणप्रसङ्गे काव्यप्रकाशकारेणाभिहितम्—

'स्वसिद्धये पराक्षेपः परार्थं स्वसमर्पणम्।
उपादानं लक्षणं चेत्युक्ता शुद्धैव सा द्विधा'॥

अयमाशयो यत्—यत्र शब्दः स्वान्वयसिद्धये अन्यस्यार्थस्याक्षेपं करोति स्वयं तत्र विद्यमानो भवति तत्र उपादानलक्षणा भवति। इयं हि लक्षणाया अन्वर्थसंज्ञा।

यथा 'कुन्ताः प्रविशन्ति' इत्यादौ कुन्तादीनाम् प्रवेशक्रियायामन्वयसिद्धये कुन्तधारिणाम् पुरुषादीनामाक्षेपो भवति अतएव तत्रोपादानलक्षणा ।

यत्र तु वाक्यस्य कश्चन शब्दः वाक्ये कस्यचन शब्दस्यान्वयसिद्धये स्वार्थं परिजहाति तत्र लक्षणलक्षणा भवति । यथा—'गङ्गायाम् घोषः' इत्यादौ गङ्गाशब्दः घोषपदस्यान्वयसिद्धये स्वार्थमपहाय स्वसामीप्यसम्बन्धेन तटरूपमर्थं बोधयति । अतएव तत्र लक्षणलक्षणा ।

इमावुभावपि लक्षणायाः भेदौ शुद्धाया एव लक्षणायाः स्तः । काव्यप्रकाशकारमतानुसारेण शुद्धा लक्षणा तु तत्र भवति यत्र लक्षणा उपचारेणामिश्रिता भवति यत्र लक्षणा उपचारयुक्ता भवति तत्र तु गौणी लक्षणा ।

उपचारस्य स्वरूपं निरूपयता साहित्यदर्पणकर्त्रा विश्वनाथाचार्येणाभिहितम्—'उपचारो हि नाम अत्यन्तविशकलितयोः पदार्थयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनमात्रम् ।' यथा—'सिंहो माणवकः' इत्यादौ । अत्रौपचारिकी लक्षणा ।

अनेन प्रकारेण मम्मटमतानुसारेण शुद्धगौण्योः लक्षणयोर्भेदको धर्मोऽस्ति उपचारः किन्तु मुकुलभट्टानुसारेणोपचारस्य मिश्रणमुभयत्र हि भवति शुद्धायामपि गौण्यामपि । अतएव हि काव्यप्रकाशकारेण मुकुलभट्टस्य मतप्रत्याख्यानावसरे कथितम्—

अनयोर्लक्ष्यस्य लक्षकस्य च न भेदरूपं ताटस्थ्यम् ; तटादीनां हि गङ्गादिशब्दैः प्रतिपादने तत्त्वप्रतिपत्तौ हि प्रतिपिपादयिषितप्रयोजनसम्प्रत्ययः । गङ्गासम्बन्धप्रतिपत्तौ तु 'गङ्गातटे घोषः' इति मुख्यशब्दाभिधानाल्लक्षणायाः को भेदः ।' इति ।

सारोपा-साध्यवसाने इति द्वौ भेदावुपर्युक्तयोः लक्षणयोर्भवतः । तथा चाहाचार्यो मम्मटः—

'सारोपान्या तु यत्रोक्तौ विषयी विषयस्तथा ।
विषय्यन्तः कृतेऽन्यस्मिन् सा स्यात् साध्यवसानिका ॥' इति ।

पुनश्चाह काव्यप्रकाशकारः—

'भेदाविमौ च सादृश्यात् सम्बन्धान्तरतस्तथा ।
गौणौ शुद्धौ च विज्ञेयौ लक्षणा तेन षड्विधा ॥' इति ।

तत्र सादृश्यहेतू इमौ सारोपासाध्यवसानरूपौ भेदौ 'गौर्वाहिकः' इत्यत्र 'गौरयमि'-त्यत्र च ।

एतेषु षट्सु भेदेषु यत्र लक्षणा रूढेः कारणात् भवति तत्र तु लक्षणा व्यङ्ग्येन रहिता भवति । यत्र च सा प्रयोजनाद् भवति तत्र तु लक्षणा व्यङ्ग्येन सहिता ।

तच्च लक्षणायाः प्रयोजनभूतं व्यङ्ग्यं द्विप्रकारकं भवति—गूढव्यंग्यमगूढव्यंग्यं च। इत्थं व्यंग्यस्य दृष्ट्या लक्षणायाः त्रयो भेदाः भवन्ति—अव्यंग्या लक्षणा, गूढव्यंग्या लक्षणा अगूढव्यंग्या लक्षणा च।

व्यञ्जनाशक्तिः

आलङ्कारिकाणां निकाये शब्दस्य तिस्रः शक्तयः स्वीक्रियन्ते—अभिधाशक्तिः, लक्षणाशक्तिः व्यञ्जनाशक्तिश्च। तत्र शब्दस्य व्यञ्जनाशक्तिनिरूपणावसरे आचार्येण विश्वनाथेनाभिहितम्—

'विरतास्वभिधाद्यासु ययाऽर्थो बोध्यते परः।
सा वृत्तिर्व्यञ्जना नाम शब्दस्यार्थादिकस्य च ॥' इति।

अस्याः कारिकायाः विवरणावसरे आचार्येण विश्वनाथेनाभिहितम्—'शब्दबुद्धिकर्मणां विरम्य व्यापाराभावः।' इति नयेनाभिधालक्षणातात्पर्याख्यासु तिसृषु वृत्तिषु स्वस्वमर्थं बोधयित्वोपक्षीणासु यया अन्योऽर्थो बोध्यते सा शब्दस्यार्थप्रकृतिप्रत्ययादेश्च शक्तिर्व्यञ्जन-ध्वनन-गमन-प्रत्याययादि व्यपदेशविषया व्यञ्जना नाम।

इत्यम् प्रधानतया व्यञ्जनायाः द्वावेव भेदौ भवतः—शाब्दीव्यञ्जना, आर्थीव्यञ्जना च। तत्र शाब्द्याः व्यञ्जनाया द्वौ भेदौ भवतः—अभिधामूला शाब्दीव्यञ्जना, लक्षणामूला शाब्दीव्यञ्जना च। अभिधामूलायाः शाब्दीव्यञ्जनायाः स्वरूपं निरूपयताऽऽचार्येण विश्वनाथेनाभिहितम्—

अनेकार्थस्य शब्दस्य संयोगाद्यैर्नियन्त्रिते।
एकत्रार्थेऽन्यधीहेतुर्व्यञ्जना साभिधाश्रया' ॥ इति।

अनेकार्थानाम् शब्दानामेकस्मिन्नर्थे नियामकाः संयोगादिकाः के सन्ति ? इति शङ्काम् समाधातुम् विश्वनाथाचार्येण वाक्यपदीयग्रन्थस्य निम्नाङ्किते द्वे कारिके उद्धृते—

संयोगो विप्रयोगश्च साहचर्यं विरोधिता।
अर्थः प्रकरणं लिङ्गं शब्दस्यान्यस्य सन्निधिः ॥
सामर्थ्यमौचिती देशः कालो व्यक्तिः स्वरादयः।
शब्दार्थस्यानवच्छेदे विशेषस्मृतिहेतवः' ॥ इति।

एतेषां समेषां संयोगादिकानाम् विवेचनमपि सोदाहरणं साहित्यदर्पणकारेण निम्नप्रकारेण कृतम्। तथाहि—

'सशंखचक्रो हरिः' इति शङ्खचक्रयोगेन हरिशब्दो विष्णुमेवाभिधत्ते। 'अशङ्खचक्रो हरिः' इति तद्वियोगेन तमेव। 'भीमार्जुनौ' इति अर्जुनः पार्थः। 'कर्णार्जुनौ' इति कर्णः सूतपुत्रः। 'स्थाणुं वन्दे' इति स्थाणुः शिवः। 'सर्वं जानाति देवः' इति

देवो भवान् । कुपितो मकरध्वजः इति मकरध्वजः कामः । देवः पुरारिः इति पुरारिः शिवः । 'मधुना मत्तः पिकः' इति मधुर्वसन्तः । पातु वो दयितामुखम् इति मुखम् साम्मुख्यम् । 'विभाति गगने चन्द्रः ।' इति चन्द्रः शशी । 'निशि चित्रभानुः' इति चित्राभानुः वह्निः । 'भाति रथाङ्गम्' इति नपुंसकव्यक्तया रथाङ्गं चक्रम् ।
एव विशेषप्रतीतिकृत्, न काव्ये इति तस्य विषयो नोदाहृतः ।

लाया: व्यञ्जनाया: स्वरूपनिरूपणप्रसङ्गे कविराजेन विश्वनाथेना-

णोपास्यते यस्य कृते तत्तु प्रयोजनम् ।
प्रत्याय्यते सा स्याद् व्यञ्जना लक्षणाश्रया ॥' इति ।

घोषः' इत्यादौ जलमयाद्यर्थबोधनादभिधायां तटाद्यर्थबोधनाच्च लक्ष-
यां यया शैत्यपावनत्वाद्यतिशयादिर्बोध्यते सा लक्षणामूला व्यञ्जना ।
ञ्जनाया विवेचनं कुर्वताऽऽचार्येण विश्वनाथेनाभिहितम्—

क्तृबोद्धव्यवाक्यानामन्यसन्निधिवाच्ययोः ।
स्तावदेशकालानाम् काकोश्चेष्टादिकस्य च ।
शिष्टयादन्यमर्थं या बोधयेत् साऽर्थसम्भवा ॥' इति ।

तृवाक्यप्रस्तावदेशकालवैशिष्टयं आर्थीव्यञ्जनाया उदाहरणं स्वकीय-
न्यस्तवान् विश्वनाथः । तथाहि—

लो मधुः कुपित एष च पुष्पधन्वा,
रा वहन्ति रतिखेदहराः समीराः ।
लीवनीयमपि वञ्जुलकुञ्जमञ्जु-
पतिः कथय किं करणीयमद्य ॥ इति ।

प्रति शीघ्रं प्रच्छन्नकामुकस्त्वया प्रेष्यताम् इति सखीं प्रति कयाचिद्

ष्टये आर्थ्याः व्यञ्जनायाः उदाहरणप्रसङ्गे विश्वनाथाचार्येणो-

शेषच्युतचन्दनं स्तनतटं निर्मृष्टरागोऽधरः
दूरमनञ्जने पुलकिता तन्वी तवेयं तनुः ।
मथ्यावादिनि दूति बान्धवजनस्याज्ञातपीडागमे
पीं स्नातुमितो गताऽसि न पुनस्तस्याधमस्यान्तिके ॥

न्तिकमेव गताऽसि इति विपरीतलक्षणाया लक्ष्यम् । तस्य च रन्तुमिति
पाद्य दूती वैशिष्टयाद् बोध्यते ।

348 to 368
35 pts

उक्तस्वरूपो भावादिरसंलक्ष्यक्रमव्यंग्यप्रतीतेः विभावादेः प्रतीतिकारकत्वात् क्रमोऽवश्यमस्ति, किन्तूत्पलपत्रशतव्यतिभेदवल्लाघवान्न संलक्ष्यते । एषु रसादिषु च एकस्यापि भेदस्यानन्तत्वात् संख्यातुमशक्यत्वादसंलक्ष्यक्रमव्यंग्यध्वनिर्नाम काव्यमेकभेदमुक्तम् । तथाहि—शृंगारस्यैकोऽपि सम्भोगरूपो भेदः, परस्परालिंगनाधरपानचुम्बनादिभेदात् प्रत्येकं च विभावादिवैचित्र्यात् संख्यातुमशक्यः, का गणना सर्वेषाम् ?

संलक्ष्यक्रमव्यंग्याख्यो अभिधामूलध्वनिकाव्यस्यापरो भेदः । तस्य निरूपणे साहित्यदर्पणकारः प्राह—

'शब्दार्थोभयशक्त्युत्थे व्यङ्ग्येऽनुस्वानसन्निभे ।
ध्वनिर्लक्ष्यक्रमो व्यङ्ग्यस्त्रिविधः कथितो बुधैः ॥' इति ।

अयमाशयो यत् संलक्ष्यक्रमव्यंग्यध्वनिकाव्यस्यापि त्रयो भेदाः भवन्ति—(१) शब्दशक्त्युत्थसंलक्ष्यक्रमव्यंग्यध्वनिकाव्यम् , (२) अर्थशक्त्युत्थसंलक्ष्यक्रमव्यंग्यध्वनिकाव्यम्, (३) शब्दार्थोभयशक्त्युत्थसंलक्ष्यक्रमव्यंग्यध्वनिकाव्यम् च । तत्रापि शब्दशक्त्युत्थध्वनिकाव्यस्यापि द्वौ भेदौ भवतः—(१) वस्तुस्वरूपशक्त्युत्थसंलक्ष्यक्रमव्यंग्यध्वनिकाव्यम् , (२) अलङ्कारस्वरूपशब्दशक्त्युत्थसंलक्ष्यक्रमव्यंग्यध्वनिकाव्यम् ।

अनेनैव प्रकारेण अर्थशक्त्युत्थसंलक्ष्यक्रमव्यंग्यध्वनिकाव्यस्यापि द्वादशभेदास्संभवन्ति । तथा चाह साहित्यदर्पणकर्त्रा—

'वस्तु वालङ्कृतिर्वापि द्विधार्थः सम्भवी स्वतः ।
कवेः प्रौढोक्तिसिद्धो वा तन्निबद्धस्य चेति षट् ॥
षड्भिस्तैर्व्यज्यमानस्तु वस्त्वलङ्काररूपकः ।
अर्थशक्त्युद्भवो व्यङ्ग्यो याति द्वादशभेदताम् ॥

अर्थशक्त्युत्थसंलक्ष्यक्रमव्यंग्यध्वनिकाव्यं तु एकमेव । अनेन प्रकारेण ध्वनिकाव्यस्य अष्टादशभेदाः भवन्ति । इमे एव ध्वनिकाव्यस्य प्रमुखाः भेदाः सन्ति । अन्ये तु ध्वनिकाव्यस्य गौणाः भेदाः अनेके भवन्ति । साहित्यदर्पणकारानुसारेण तु ध्वनिकाव्यस्य इषुबाणाग्निसायकाः (५३५५) भेदाः भवन्ति ।

गुणीभूतव्यङ्ग्यकाव्यम्

गुणीभूतव्यङ्ग्यकाव्यस्य निरूपणं कुर्वता काव्यप्रकाशकारेणाभिहितम्—

अतादृशि गुणीभूतव्यङ्ग्यं व्यङ्ग्ये तु मध्यमम् ।'

अयमर्थो यत् यत्र वाच्यार्थापेक्षया व्यंग्यार्थः चमत्कारिको नहि भवति तत्र गुणीभूतव्यंग्यनामकं काव्यम् भवति । अतादृशिपदस्याभिप्रायो वर्त्तते वाच्यार्थसदृशः

वाच्यार्थापेक्षया न्यूनचमत्कारिको वा । गुणीभूतकाव्यस्योदाहरणम् निम्नांकितम् श्लोकं प्रदर्शितवान् काव्यप्रकाशकारः—

'ग्रामतरुणं तरुण्या नववञ्जुलमञ्जरीसनाथकरम् ।
पश्यन्त्या भवति मुहुर्नितरां मलिना मुखच्छाया' ॥

अत्र वञ्जुललतागृहे दत्तसंकेता नागतेऽतिव्यङ्ग्यं गुणीभूतम्; तदपेक्षया वाच्यस्यैव चमत्कारित्वात् ।

काव्यप्रकाशकारो मम्मटो गुणीभूतव्यंग्यस्याष्टौ भेदान् स्वीकरोति । ते च भेदाः निम्नांकितास्सन्ति—

'अगूढमितरस्याङ्गं वाच्यसिद्धयङ्गमस्फुटम् ।
सन्दिग्धतुल्यप्राधान्ये काक्वाक्षिप्तमसुन्दरम् ।
व्यङ्ग्यमेवं गुणीभूतव्यङ्ग्यस्याष्टौ भिदाः स्मृताः' ॥

आभ्यां कारिकाभ्यां गुणीभूतव्यङ्ग्यस्याष्टौ भेदाः भवन्ति—

(१) अगूढव्यंग्यम्, (२) इतराङ्गभूतं व्यङ्ग्यम्; (३) वाच्यसिद्धयंगव्यंग्यम्, (४) अस्फुटं व्यङ्ग्यम्, (५) सन्दिग्धप्राधान्यव्यङ्ग्यम्, (६) तुल्यप्राधान्यव्यङ्ग्यम्, (७) काक्वाक्षिप्तं व्यङ्ग्यम्, (८) असुन्दरव्यङ्ग्यम् च ।

एतेष्वष्टप्रकारकेषु व्यङ्ग्येषु गूढागूढव्यंग्ययोरपि गणना कृता वर्त्तते । यतः ध्वनिकाव्यगुणीभूतकाव्ययोः निर्धारणम् सहृदयानामनुभवमेवमाश्रित्य क्रियते । यत्र व्यंग्यं सहृदयमात्रसंवेद्यम् भवति तत्र ध्वनिकाव्यम् भवति, यत्र तु व्यंग्यकाव्यम् भवति तत्र व्यंग्यस्य गूढत्वागूढत्वयोः प्राधान्याभावात् । अनेनैव प्रकारेण यस्य व्यंग्यस्य प्रतीतिः सहृदयानामपि कृते सुकरा नहि भवति तत्रापि ध्वनिकाव्यं नह्यपि तु गुणीभूतव्यंग्यकाव्यमेव भवति ।

व्यंग्यसौन्दर्यस्य कामिनीकुचकलशन्यायेन निरूपयता केनचित् कविनाऽभिहितमपि—

'नान्ध्रीपयोधर इवातितरां प्रकाशो,
नो गुर्जरीस्तन इवातितरां निगूढः ।
अर्थो गिरामपिहितः पिहितश्च कश्चित्
सौभाग्यमेति मरहट्टवधूकुचाभः' ॥ इति ।

एतेषामष्टविधानाम् गुणीभूतव्यंग्यकाव्यानाम् निम्नांकितान्युदाहरणानि प्रस्तौतिस्म काव्यप्रकाशकारः—

(१) अगूढव्यङ्ग्यस्योदाहरणम्—

यस्यासुहृत् कृततिरस्कृतिरेत्य तप्त-
सूचीवधव्यतिकरेण युनक्ति कर्णौ ॥

काञ्चीगुणग्रथनभाजनमेष सोऽस्मि,
जीवन्न सम्प्रति भवामि किमावहामि ॥ इति ।

अत्र जीवन् इति पदम् निन्दितजीवनरूपार्थान्तरे संक्रमितम्। व्यंग्यार्थस्यात्यन्तागूढत्वात् गुणीभूतव्यंग्यकाव्यमत्र ।

(२) अपरांगभूतव्यंग्यनामकस्य गुणीभूतव्यंग्यकाव्यस्य विवेचनप्रसंगे काव्यप्रकाशकारेणाभिहितम्—अपरस्य रसादेर्वाच्यस्य वा वाक्यार्थीभूतस्य अंगं रसादि अनुरणनरूपं वा । तद्यथा—

'अयं स रशनोत्कर्षी पीनस्तनविमर्दनः ।
नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः' ॥ इति ।

अत्र श्रृंगारः करुणस्यांगतां गत अतएवात्र गुणीभूतव्यंग्यकाव्यम् ।

(३) वाच्यसिद्ध्यंगभूतस्य व्यंग्यस्योदाहरणं निम्नाङ्कितमुपस्थापितवान्नाचार्यो मम्मटः—

'भ्रमिमरतिमलसहृदयतां मलयं मूर्धा तमः शरीरसादम् ।
मरणं च जलदभुजगजं प्रसह्य कुरुते विषं वियोगिनीनाम् ॥'

वाच्यसिद्ध्यंगं नाम गुणीभूतव्यंग्यकाव्यम् द्विधा भवति एकवक्तृक्तं पदवाच्यांगमन्यवक्तुकपदवाच्यांगं च । तत्रेदमुदाहरणमाद्यस्यैव सख्याः नायिकावस्थां नायकाय निवेदयितुम् सामान्यतो वर्षावर्णनमिदम्। अत्र हालाहलं व्यंग्यम् भुजगरूपस्य वाच्यस्य सिद्धिकृत् ।

(४) अस्फुटव्यंग्यनामकस्य गुणीभूतव्यंग्यकाव्यस्योदाहरणप्रसंगे काव्यप्रकाशकारः प्राह—

'अदृष्टे दर्शनोत्कण्ठा दृष्टे विच्छेदभीरुता ।
नादृष्टेन न दृष्टेन भवता लभ्यते सुखम्' ॥ इति ।

कस्याश्चित् प्रियं प्रत्युक्तिरियम् । भवतेति पदे हेतौ तृतीया ।

अत्रादृष्टो यथा न भवसि, वियोगदुःखं च यथा नोत्पद्यते तथा कुर्या इति व्यंग्यं सहृदयस्यापि न स्फुटं भासते, व्युत्पन्नानामपि विलम्ववेद्यत्वात् इत्यस्फुटव्यंग्यं गुणीभूतव्यंग्यकाव्यमिदम् ।

(५) सन्दिग्धप्राधान्याख्यस्य गुणीभूतव्यंग्यकाव्यस्योदाहरणरूपेण काव्यप्रकाशकारः निम्नाङ्कितम् कुमारसम्भवमहाकाव्यस्य श्लोकमुदाहृतवान्—

'हरस्तु किञ्चित् परिवृत्तधैर्यः
चन्द्रोदयारम्भ इवाम्बुराशिः ।
उमामुखे बिम्बफलाधरोष्ठे,
व्यापारयामास विलोचनानि' ॥ इति ।

अत्राधरं परिचुम्बितुमैच्छदिति व्यंग्यम्, युगपल्लोचनत्रयव्यापारणं वाच्यम्, तयोश्चचमत्कारप्रयोजकत्वरूपे प्राधान्ये साधकबाधकमानाभावेन सन्देहः। वाच्यस्याऽलौकिकत्वेन चमत्कारकारित्वात् उत्कण्ठातिशयव्यञ्जकत्वाच्चेति सन्दिग्धप्राधान्यम् गुणीभूतव्यंग्यकाव्यमिदम्।

(६) तुल्यप्राधान्यव्यंग्यनामकस्य गुणीभूतव्यंग्यकाव्यस्योदाहरणरूपेण काव्यप्रकाशकारो मम्मटाचार्यः वीरचरितनाटकस्य द्वितीयाङ्कस्य निम्नाङ्कितम् श्लोकमुदाहृतवान्। तथाहि—

'ब्राह्मणातिक्रमत्यागो भवतामेव भूतये।
जामदग्न्यस्तथा मित्रम् अन्यथा दुर्मनायते'॥ इति।

अत्र जामदग्न्यः क्षत्रियाणामिव रक्षसामपि क्षयं करिष्यतीति दण्डरूपं व्यंग्यमिव, भूत्यूपदेशो मित्रत्वाभिधानरूपं च वाच्यमपि प्रधानमेव। 'दुर्मनायते' इति गम्भीरोक्त्या वाच्यस्यापि चमत्कारित्वात् विग्रहवत् संधेरपि अनर्थनिवारकत्वेन विवक्षितत्वाच्चेति तुल्यप्राधान्यम् गुणीभूतकाव्यमिदम्।

(७) काक्वाक्षिप्तस्य गुणीभूतव्यंग्यकाव्यस्योदाहरणरूपेण काव्यप्रकाशकार आचार्यो मम्मटः—वाणीरकुडंगुड्डी॰ इत्यादिकां गाथामुदाहृतवान्। गाथाया अस्याः संस्कृतच्छाया निम्नाङ्किता भवति—

'वानीरकुञ्जोड्डीन शकुनिकोलाहलं शृण्वत्याः।
गृहकर्मव्यापृताया वध्वाः सीदन्त्यङ्गानि'॥

गृहपार्श्ववर्ति वेतसनिकुञ्जे दत्तसंकेतायाः निकुञ्जोड्डीनपक्षिकोलाहलतर्कितनायकप्रवेशायाः गुरुजनपारतन्त्र्येण गृहकर्मव्यापृततया च तत्र गन्तुमशक्नुवन्त्या अवस्थावर्णनमिदम्। सीदन्तीति वर्तमाननिर्देशादवसादस्याविरामः वर्तमानप्रत्ययाभ्याम् श्रवणावसादरूपयोः कारणकार्ययोः पौर्वापर्यविपर्ययरूपातिशयोक्तिरलङ्कारः तेन चोत्कण्ठातिशयो व्यंग्यमित्युद्योतकारः।

(८) असुन्दरव्यंग्यनामकमष्टमं गुणीभूतव्यंग्यकाव्यम् भवति, तस्योदाहरणं नोपन्यस्तवान्, काव्यप्रकाशकारः। अनेन प्रकारेण गुणीभूतव्यंग्यकाव्यस्याष्टौ भेदाः सम्भवन्ति। एतेषाम् अष्टभेदभिन्नानां गुणीभूतव्यंग्यकाव्यानामपि तेनैव प्रकारेण भेदास्सम्भवन्ति। तथा चाह काव्यप्रकाशकारः—

'एषां भेदाः यथायोगं वेदितव्याश्च पूर्ववत्'। इति।

काव्यगुणाः

येन प्रकारेण काव्यस्य शब्दार्थौ शरीरम् तेनैव प्रकारेण काव्यस्योत्कर्षहेतवः सन्ति गुणालङ्काराः। गुणालङ्कारयोः भेदविषये मम्मटपूर्ववर्तिनामाचार्याणां

द्विप्रकारकं मतम् वर्तते । भामहप्रणीतस्य 'काव्यालङ्कार'ग्रन्थस्य भामहविवरणव्याख्यायाम् भट्टोद्भटः भेदम् मिथ्याकल्पनारूपम् स्वीकरोति । तन्मतानुसारेण गुणालङ्कारयोर्नास्ति कश्चन भेदः । तथा चाह भट्टोद्भटः—

'समवायवृत्त्या शौर्यादयः संयोगवृत्त्या हारादयः इत्यस्तु गुणालङ्काराणां भेदः । ओजःप्रभृतीनाम् अनुप्रासोपमादीनां चोभयेषामपि समवायवृत्त्या स्थितिरिति गड्डलिकाप्रवाहेणैवेषां भेदः ।'

किन्तु काव्यालङ्कारसूत्रप्रणेतुः वामनस्य मतानुसारेण तु गुणालङ्काराणां भेदो वर्त्तते । तथा चोक्तम् वामनेन काव्यालङ्कारसूत्रे—

'काव्यशोभायाः कर्त्तारो धर्माः गुणाः ।' ३।१।१

ये खलु शब्दार्थयोः धर्माः काव्यशोभां कुर्वन्ति ते गुणाः । ते च ओजःप्रसादादयः । न यमकोपमादयः । कैवल्येन तेषामकाव्यशोभाकरत्वात्, ओजःप्रसादादीनां तु केवलमस्ति काव्यशोभाकरत्वमिति ।

'तदतिशयहेतवस्त्वलङ्काराः ।' ३।१।२ ।

तस्याः काव्यशोभायाः अतिशयस्तदतिशयः तस्य हेतवः । तु शब्दो व्यतिरेके । अलङ्काराश्च यमकोपमादयः । अत्र श्लोकौ—

'युवतेरिव रूपमङ्गकाव्यं स्वदते शुद्धगुणं तदप्यतीव ।'

विहितप्रणयं निरन्तराभिः सदलंकारविकल्पकल्पनाभिः । यदि भवति वचश्च्युतं गुणेभ्यो वपुरिव यौवनवन्ध्यमंगनायाः । अपि जनदयितानि दुर्भगत्वं नियतमलंकरणानि संश्रयन्ते ॥'

पूर्वे नित्याः ॥ ३।१।३ ।

पूर्वे गुणाः नित्याः तैर्विना काव्यशोभानुपपत्तेः ।' इति ।

ध्वन्यालोकनामकस्य ग्रन्थस्य प्रणेता आचार्यः आनन्दवर्धनस्तु प्राह—

तमर्थमवलम्बते येऽङ्गिनं ते गुणाः स्मृताः ।
अङ्गाश्रितास्त्वलङ्कारा मन्तव्याः कटकादिवत्' ॥ इति ।

अतएवाचार्यानन्दवर्धनस्य मतानुसारेण गुणालंकाराणां भेदो वर्त्तत एव । आनन्दवर्धनाचार्यस्य मतानुसारेणैवाचार्यो मम्मटस्त्वाह—

'ये रसस्याङ्गिनो धर्माः शौर्यादय इवात्मनः ।
उत्कर्षहेतवस्ते स्युः अचलस्थितयो गुणाः' ॥ इति ।

आत्मन एव हि यथा शौर्यादयो नाकारस्य तथा रसस्यैव माधुर्यादयो गुणा न तु वर्णानाम् । क्वचित् तु शौर्यादिसमुचितस्याकारमहत्त्वादेर्दर्शनात् 'आम्ना एवास्य शूरः' इत्यादेर्व्यवहारात् । अन्यत्राशूरेऽपि वितताकृतित्वमात्रेण शूर इति, क्वापि

शूरेऽपि मूर्तिलाघवमात्रेण, 'अशूरः' इति अविश्रान्तप्रतीतयो यथा व्यवहरन्ति तद्वन्मधुरादिव्यञ्जकसुकुमारादिवर्णानां मधुरादिव्यवहारप्रवृत्तेः अमधुरादिरसांगानाम् वर्णानां सौकुमार्यादिमात्रेण माधुर्यादि मधुराररसोपकरणानां तेषामसौकुमार्यादिमात्रेण माधुर्यादि मधुरादिरसोपकरणानां तेषाम् असौकुमार्यादिरसपर्यन्तप्रतीतिवन्ध्यां व्यवहरन्ति । अतएव माधुर्यादयो रसधर्माः समुचितैर्वर्णैर्व्यंज्यन्ते न तु वर्णमात्राश्रयाः ।

गुणानां भेदविषयेऽपि आचार्यस्य मम्मटस्य वामनेन साकं मतभेदो विद्यते । आचार्यो वामनः दश-दशसंख्याकान् शब्दगुणानर्थगुणांश्च स्वीकरोति । वामनाभिमतानाम् शब्दगुणानामर्थगुणानां च नामान्युभयत्र समान्येव सन्ति किन्तु तेषाम् लक्षणानि भिन्नानि भिन्नानि सन्ति । अधस्तात् वामनाभिमतानाम् शब्दगुणानामर्थगुणानाञ्च लक्षणानि प्रस्तूयन्ते—

वामनाभिमतानां शब्दगुणानां लक्षणानि	वामनाभिमतानामर्थगुणानां लक्षणानि
गुणनामानि लक्षणानि	गुणनामानि लक्षणानि
१. ओजः—गाढबन्धत्वमोजः ३।१।५	ओजः—अर्थस्य प्रौढिरोजः ३।२।२।
२. प्रसादः—शैथिल्यं प्रसादः ३।१।६	प्रसादः—अर्थवैमल्यं प्रसादः ३।२।३।
३. श्लेषः—मसृणत्वं श्लेषः ३।१।१०	श्लेषः—घटना श्लेषः ३।२।४।
४. समता—मार्गाभेदः समता ३।१।११।	समता—अवैषम्यं समता ३।२।५।
५. समाधिः—आरोहावरोहक्रमः समाधिः ३।१।१२।	समाधिः—अर्थदृष्टिः समाधिः ३।२।६।
६. माधुर्यम्—पृथक्पदत्वं माधुर्यम् ३।१।२०	माधुर्यम्—उक्तिवैचित्र्यं माधुर्यम् ३।२।१०।
७. सौकुमार्यम्—अजरठत्वं सौकुमार्यम् ३।१।२१	सौकुमार्यम्—अपारुष्यं सौकुमार्यम् ३।२।११।
८. उदारता—विकटत्वमुदारता ३।१।२२	उदारता—ग्राम्यत्वमुदारता ३।२।१२।
९. अर्थव्यक्तिः—अर्थव्यक्तिहेतुत्वमर्थव्यक्तिः ३।१।२३	अर्थव्यक्तिः—वस्तुस्वभावस्फुटत्वमर्थव्यक्तिः ३।२।१३।
१०. कान्तिः—औज्ज्वल्यं कान्तिः ३।१।२४।	कान्तिः—दीप्तरसत्वं कान्तिः ३।२।१४।

आचार्यो मम्मटः वामनोक्तान् गुणान् स्वीकृत्य त्रीनेव काव्यगुणान् स्वीकरोति । तथा चोक्तम् काव्यप्रकाशकर्त्रा—

माधुर्यौजः प्रसादाख्याः त्रयस्तेन पुनर्दश ।' इति ।

एतेषां त्रयाणां गुणानां स्वरूपं निरूपयन्नाहाचार्यो मम्मटः—

'आह्लादकत्वं माधुर्यं शृङ्गारे द्रुतिकारणम् ।'

शृङ्गारे = सम्भोगे । द्रुतिः = गलितत्वमिव । श्रव्यत्वं पुनरोजःप्रसादयोरपि ।'

'करुणे विप्रलम्भे तच्छान्ते चातिशयान्वितम् ।'

अत्यन्तद्रुतिहेतुत्वात् ।

'दीप्त्यात्मविस्मृतेर्हेतुरोजो वीररसस्थितिः ।'

चित्तस्य विस्ताररूपदीप्तत्वजनकमोजः ।

'बीभत्सरौद्ररसयोः तस्याधिक्यं क्रमेण च ।'

वीराद्बीभत्से ततो रौद्रे सातिशयमोजः ।

'शुष्केन्धनादिवत् स्वच्छजलवत् सहसैव यः ।
व्याप्नोत्यन्यत् प्रसादोऽसौ सर्वत्र विहितस्थितिः' ॥

अन्यदिति व्याप्यमिह चित्तम् । सर्वत्रेति–सर्वेषु रसेषु सर्वासु रचनासु च ।

'गुणवृत्त्या पुनस्तेषां वृत्तिः शब्दार्थयोर्गता' ।

गुणवृत्त्या = उपचारेण । तेषाम् = गुणानाम् । आकारे शौर्यस्येव ।

वामनोक्तानां समेषामार्थानां शाब्दानां च गुणानाम् स्वाभिमतेषु त्रिष्वेव गुणेष्वन्तर्भावमभिप्रयन् मम्मटः प्राह––

केचिदन्तर्भवन्त्येषु दोषत्यागात् परे श्रिताः ।
अन्ये भजन्ति दोषत्वं कुत्रचिन्न ततो दश ॥' इति ।
'तेन नार्थगुणा वाच्याः प्रोक्ताः शब्दगुणाश्च ये' ॥

काव्यदोषाः

काव्यस्य रस एवात्मा । शब्दार्थौ तस्य शरीरम् । गुणा शौर्यादिवत् अलङ्काराः कटककुण्डलादिवत् दोषाश्च काणत्वादिवत् । येन प्रकारेण काणत्वादिका दोषा देहद्वारेणात्मानमेव दूषयन्ति तेनैव प्रकारेण शब्दादिनिष्ठा अपि दोषा काव्यात्मानं रसमेव दूषयन्ति इत्यालङ्कारिकाणामभिमतिः ।

काव्यप्रकाशस्य प्रदीपकारेण तु अभिहितम्—'एवं धर्मिणि काव्ये सप्रभेदे निरूपिते प्राप्तावसरतया दोषभावादीनि लक्षणस्थानि विशेषणानि विवेचनीयानि; तेषु च दोषाभावः प्रधानम् , सति दोषे गुणादेरप्यकिञ्चित्करत्वात् यदाह––'स्याद्वपुः सुन्दरमपि श्वित्रेणैकेन दुर्भगमि'तिं । सति तु दोषाभावे गुणादिकं विनापि किञ्चिदाह्लादसम्भवात् । 'अपदोषतयैव विगुणस्य गुणः ।' इति न्यायात् ।' इति

अतएव काव्यप्रकाशकर्त्राऽप्यभिहितम् काव्यलक्षणे––'तददोषौ शब्दार्थौ सगुणावनलंकृतिः पुनः क्वापि ।' अस्य काव्यलक्षणस्यादोषाविति पदम् काव्यस्य दोषरहितत्वमेव आवश्यकम् सूचयति ।

तत्र को नाम दोषः इत्याकांक्षायाम् काव्यप्रकाशकारो मम्मटः प्राह—

'मुख्यार्थहतिर्दोषः रसश्च मुख्यस्तदाश्रयाद्वाच्यः ।
उभयोपयोगिनः स्युः शब्दाद्याः तेन तेष्वपि सः' ॥ इति ।

अस्य लक्षणवाक्यस्य मुख्यार्थहतिशब्दविग्रहः अनेन प्रकारेण ज्ञेयः । मुख्यश्चासावर्थश्चेति कर्मधारयः । मुख्यार्थस्य हतिः मुख्यार्थहतिः । हतिशब्दोऽप्यत्र भावसाधनः । इत्थम्—मुख्यार्थस्य हतिः अपकर्षः यस्मात् स दोषः ।' इति दोषसामान्यस्य लक्षणम् जातम् । तत्र मुख्यार्थोऽत्र कः ? शक्यार्थरूपो वा ? अन्योऽपि वा ? इत्याकांक्षायामाह काव्यप्रकाशकारः—'रसश्च मुख्यः तदाश्रयाद् वाच्यः ।' इति

अयमाशयो यत्—इतरेच्छानधीनेच्छाविषयत्वमेवात्र मुख्यत्वम् , तच्च स्वतः पुरुषार्थे सुखरूपे रसेऽक्षतम् । अतएव रस एव मुख्यः । अत्र रसशब्देन रस्यते आस्वाद्यते इति व्युत्पत्त्या भावादिकमप्युपसंगृह्यते ।

आश्रयः=आश्रयणम् अपेक्षणम् । तथा च तेन रसेनाश्रयणात् उपकारकतया अपेक्षणात् वाच्यः = शब्दबोध्योऽपि मुख्यः । वाच्योऽपि रससाहचर्यात् चमत्कार्येव गृह्यते । न चैवं मुख्यशब्दार्थस्य नानात्वेनाननुगमः इति वाच्यम् , काव्ये प्राधान्येनोद्देश्यप्रतीतिविषयत्वेनानुगमात् । तदेवं रसवति सर्व एव दोषाः; नीरसे तु अविलम्बितचमत्कारिवाक्यार्थप्रतीतिविघातका एव हेयाः ।

हतिशब्दश्चात्रापकर्षपरः न तु विनाशकपरः । शब्दाद्याः इत्यत्रादिपदेन वर्णरचने गृह्येते । इत्थम् रसापकर्षकत्वम् इति दोषसामान्यस्य निष्क्रष्टम् लक्षणम् ।

काव्यप्रकाशकारः दोषाणां प्रधानतया विभागपञ्चकं स्वीकरोति—पददोषाः, पदांशदोषाः, वाक्यदोषाः, अर्थदोषाः रसदोषाश्च ।

तत्र शब्ददोषाणां संख्या षोडश वर्तते—(१) श्रुतिकटुदोषः, (२) च्युतसंस्कारदोषः, (३) अप्रयुक्तत्वदोषः, (४) असमर्थत्वदोषः, (५) निहतार्थत्वदोषः, (६) अनुचितार्थत्वदोषः, (७) निरर्थकत्वदोषः, (८) अवाचकत्वदोषः, (९) त्रिप्रकारकोऽश्लीलत्वदोषः, (१०) सन्दिग्धत्वदोष, (११) अप्रतीतत्वदोषः, (१२) ग्राम्यत्वदोषः, (१३) नेयार्थत्वदोषः, (१४) क्लिष्टत्वदोषः, (१५) अविमृष्टविधेयांशत्वदोषः, (१६) विरुद्धमतिकृतत्वदोषश्च । तथा च काव्यप्रकाशस्य कारिका:—

दुष्टं पदं श्रुतिकटुच्युतसंस्कृत्यप्रयुक्तमसमर्थम् ।
निहतार्थमनुचितार्थम् निरर्थकमवाचकम् त्रिधाश्लीलम् ।
सन्दिग्धमप्रतीतम् ग्राम्यं नेयार्थमथ भवेत् क्लिष्टम् ।
अविमृष्टविधेयांशं विरुद्धमतिकृत् समासगतमेव ॥ इति ।

काव्यप्रकाशानुसारेण वाक्यगतानां दोषाणां संख्या एकविंशतिः वर्त्तते । ते च

दोषास्सन्ति—(१) प्रतिकूलवर्णता, (२) उपहतविसर्गता, (३) विसन्धिः, (४) हतवृत्तता, (५) न्यूनपदता, (६) अधिकपदता, (७) कथितपदता, (८) पतत्प्रकर्षता, (९) समाप्तपुनरात्तता, (१०) अर्थान्तरैकवाचकता, (११) अभवन्मतसम्बन्धता, (१२) अमतयोगता, (१३) अनभिहितवाच्यता, (१४) अस्थानपदता, (१५) अस्थानसमासता, (१३) सङ्कीर्णता, (१७) गर्भितता, (१८) विरोधिता, (१९) भग्नप्रक्रमता, (२०) अक्रमता, (२१) अमतपरार्थता च ।

तथा चाहुः काव्यप्रकाशकारः—

'प्रतिकूलवर्णमुपहतलुप्तविसर्गविसन्धिहतवृत्तम् ।
न्यूनाधिककथितपदम् पतत्प्रकर्षम् समाप्तपुनरात्तम् ॥
अर्थान्तरैकवाचमभवन्मतयोगमनभिहितवाच्यम् ।
अपदस्थपदसमासम् सङ्कीर्णगर्भितम् प्रसिद्धिहतम् ।
भग्नप्रक्रममक्रममतपरार्थं च वाक्यमेव तथा ॥' इति ।

काव्यप्रकाशकारमतानुसारेण ये दोषाः पदस्योपर्यभिहिताः तेषां च्युतसंस्कारासमर्थनिरर्थकाख्यान् त्रीन् दोषान् विहाय अन्ये समे दोषाः पदांशेऽपि भवन्ति वाक्येऽपि भवन्ति । तथाहि—

'अपास्य च्युतसंस्कारमसमर्थं निरर्थकम् ।
वाक्येऽपि दोषाः सन्त्येते पदस्यांशेऽपि केचन' ॥ इति ।

मम्मटाचार्येण प्रदर्शितानामर्थदोषाणां संख्या त्रयोविंशतिर्वर्त्तते । ते च दोषाः निम्नांकिताः सन्ति—(१) अपुष्टत्वदोषः, (२) कष्टत्वदोषः, (३) व्याहतत्वदोषः, (४) पुनरुक्तत्वदोषः, (५) दुष्क्रमत्वदोषः, (६) ग्राम्यत्वदोषः, (७) सन्दिग्धत्वदोषः, (८) निर्हेतुत्वदोषः, (९) प्रसिद्धिविरुद्धत्वदोषः, (१०) विद्याविरुद्धत्वदोषः, (११) अनवीकृतत्वदोषः, (१२) नियमेऽनियमत्वदोषः, (१३) अनियमे नियमत्वदोषः, (१४) विशेषेऽविशेषत्वदोषः, (१५) अविशेषविशेषपरिवृत्तत्वदोषः, (१६) साकांक्षत्वदोषः, (१७) अपदयुक्तत्वदोषः, (१८) सहचरभिन्नत्वदोषः, (१९) प्रकाशितविरुद्धत्वदोषः, (२०) विध्ययुक्तत्वदोषः, (२१) अनुवादायुक्तत्वदोषः, (२२) त्यक्तस्य पुनः स्वीकृतत्वदोषः, (२३) अश्लीलत्वदोषश्च ।

तथा च काव्यप्रकाशकारिका:—

अर्थोऽपुष्टः कष्टो व्याहतपुनरुक्तदुष्क्रमग्राम्याः ।
सन्दिग्धो निर्हेतुः प्रसिद्धिविद्याविरुद्धश्च ॥
अनवीकृतः सनियमानियमविशेषाविशेषपरिवृत्ताः ।
साकाङ्क्षोऽपदयुक्तः सहचरभिन्नः प्रकाशितविरुद्धः ।
विध्यनुवादायुक्तस्त्यक्तपुनः स्वीकृतोऽश्लीलः ॥ इति ।

रसदोषाणां निरूपणं कुर्वाणेन काव्यप्रकाशकारेणाभिहितम्—

व्यभिचारिरसस्थायि भावानां शब्दवाच्यता।
कष्टकल्पनया व्यक्तिरनभावविभावयो:।
प्रतिकूलविभावादिग्रहो दीप्तिः पुनः पुनः।
अकाण्डे प्रथनच्छेदौ अङ्गस्याप्यतिविस्मृतिः॥
अङ्गिनोऽननुसन्धानं प्रकृतीनां विपर्ययः।
अनङ्गस्याभिधानं च रसे दोषाः स्युरीदृशः॥

इत्थम् काव्यप्रकाशकारमतानुसारेण दोषाः पञ्चधा भवन्ति काव्येषु प्रधानतया पद दोषाः, पदांशदोषाः, वाक्यदोषाः, अर्थदोषाश्च।

काव्येषु शब्दालङ्काराः

काव्यप्रकाशकारः काव्येषु अलंकारस्यापि महत्त्वम् निर्दिधारयिषया काव्यलक्षण एवालंकाराणामपि सन्निवेशमकार्षीत्। तथाहि—'तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि।' इत्येव हि काव्यप्रकाशीयं काव्यलक्षणम्। 'अनलंकृती पुनः क्वापि' इति लक्षणांशस्य 'सर्वत्र सालंकारौ क्वचित्स्फुटालङ्कारविरहेऽपि शब्दार्थौ काव्यम् भवतीति अर्थः स्वीक्रियते। अतएव काव्येषु अलंकाराणामपि स्थितिरतीव गौरवमयी विद्यते।

अलंकरोति इति हि अलंकारशब्दस्य व्युत्पत्तिः। इत्थम् शरीरालंकृतिसाधनानि तत्त्वानि अलंकारशब्देन अभिधीयन्ते। यथा—कटककुण्डलहारकेयूरादीनि। अनेनैव प्रकारेण काव्येष्वपि काव्यशरीरशोभातिशय्याधायकाः अनुप्रासोपमादिका अलंकारशब्देनाभिधीयन्ते। येन प्रकारेण लोके अलंकृताः लोकाः उत्कृष्टाः मन्यन्ते तेनैव प्रकारेणालंकारैः समन्वितानि काव्यान्यपि समुत्कृष्टानि मन्यन्ते। गुणास्तु काव्यस्य स्थिराः धर्माः सन्ति, अलंकारस्तु अस्थिरा। एतस्मादेव काव्यप्रकाशकारेणाभिहितम्—

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥ इति।

साहित्यदर्पणकर्त्रा विश्वनाथाचार्येणाप्यभिहितम्—

'शब्दार्थयोरस्थिराः ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥

किन्तु ध्वनिवादिन एव आचार्याः अलंकारान् काव्यस्यास्थिरान् धर्मान् मन्यन्ते। काव्यस्य अलंकारसम्प्रदायावलम्बिनो विद्वांसस्तु अलंकारान् काव्यस्यापरिहार्यांगरूपेण स्वीकुर्वन्ति। तेषां मतानुसारेणालंकाराः काव्यस्य स्थिराः धर्माः सन्ति। अलंकारसम्प्रदायानुयायिनां मतानुसारेण तु अलंकारहितकाव्यस्य कल्पनौष्ण्यरहितस्याग्नेः कल्पनेव निरर्थका वर्त्तते। तथा चोक्तम् जयदेवेन चन्द्रालोके—

अंगीकरोति यः काव्यम् शब्दार्थावनलंकृती ।
असौ न मन्यते कस्मादनुष्णमनलंकृती' ॥ इति

सर्वेऽलंकारिकाः शब्दार्थौ शरीरस्य काव्यमिति स्वीकुर्वन्ति । अलंकाराश्च काव्यशरीरस्य शोभाधायकाः भवन्ति । अतएव शब्दार्थयोः उत्कर्षाधायकत्वमलंकाराणां स्वीकृतमाचार्यैः ।

शब्दस्य परिवर्तनसहत्वासहत्वे एवाश्रित्य शब्दार्थालंकारयोः भेदाः क्रियन्ते । येऽलंकाराः शब्दपरिवर्तनकृतेऽपि पूर्ववदेव तिष्ठन्ति ते तु अर्थालंकाराः कथ्यन्ते, ये च शब्दपरिवृत्ति नहि सहन्ते ते हि शब्दालंकारा भवन्ति ।

अलंकाराणां सङ्ख्याया अपि विषये आचार्याणां मतभेदो विद्यते । आचार्यो मम्मटः एकषष्ठिसङ्ख्याकानर्थालंकारान् स्वीकरोति । किन्तु शब्दालंकाराणां विषये वामनो द्वावेव शब्दालंकारौ स्वीकरोति—अनुप्रासम् यमकञ्च । किन्तु मम्मटस्ताभ्याम् साकम् वक्रोक्तिश्लेषचित्रपुनरुक्तवदाभासाख्यानपि शब्दालंकारान् स्वीकरोति इत्थम् । मम्मटमतानुसारेण शब्दालंकाराणां सङ्ख्यापद वर्तते ।

शब्दालंकारेषु श्लेषपुनरुक्तवदाभासयोरप्यलंकारयोः स्थितिविषये, आचार्याणां मतभेदो वर्त्तते । अलंकारसर्वस्वकारो रुय्यकः पुनरुक्तवदाभासमर्थालंकाररूपेण स्वीकरोति, किन्तु मम्मट-विश्वनाथ-शोभाकरमिश्राः पुनरुक्तवदाभासम् शब्दालंकाररूपेणैव स्वीकुर्वन्ति ।

श्लेषालंकारस्यापि विषये एतत्प्रकारक एव मतभेदः समुपलभ्यते । श्लेषो द्विप्रकारको भवति—सभङ्गश्लेषः अभङ्गश्लेषश्च । अनयोर्विषये त्रिप्रकारकाः विचाराः समुपलभ्यन्ते ।

(क) अलंकारसर्वस्वकाररुय्यकप्रभृतयः केचन आचार्याः सभङ्गश्लेषम् शब्दालंकाररूपेण, अभङ्गश्लेषञ्चार्थालंकाररूपेण स्वीकुर्वन्ति ।

(ख) कुवलयानन्दकाराप्पयदीक्षितादिकाः केचन आलंकारिकाः उभयप्रकारकमपि श्लेषमर्थालंकाररूपेण स्वीकुर्वन्ति ।

(ग) मम्मट-विश्वनाथादिकाः आचार्याः उभयप्रकारकमपि श्लेषम् शब्दालंकाररूपेणाभ्युपयन्ति । यद्यपि मम्मटः अर्थालंकारेष्वपि श्लेषस्य गणनां करोति । किन्तु अयं श्लेष उपर्युक्तोभयप्रकारकाभ्यां श्लेषाभ्यां भिद्यतेतराम् । यत्र शब्दपरिवर्तने कृतेऽपि श्लेषः अवशिष्यते स एव श्लेषः अर्थालंकारेषु गण्यते । एषः श्लेषः उपर्युक्ताभ्यां सभङ्गाभङ्गश्लेषाभ्यां नितरां भिद्यते । शब्दालंकाररूपे श्लेषे जतुकाष्ठन्यायेन द्वौ शब्दौ श्लिष्येते । किन्तु अर्थश्लेषे एकवृन्तगतफलद्वयन्यायेन एकस्मिन्नेव शब्दे द्वावर्थौ श्लिष्येते ।

काव्यप्रकाशकारो यान् षट्सङ्ख्याकान् शब्दालंकारानभ्युपगच्छति तेषाम् समेषां

संग्रहं चकार काव्यप्रकाशस्य व्याख्याकारः सोमेश्वरो निम्नांकितेन श्लोकेन द्वारा। तद्यथा—

वक्रोक्तिरप्यनुप्रासो यमकं श्लेषचित्रके।
पुनरुक्तवदाभासः शब्दालंकृतयस्तु षट्॥ इति।

सरस्वतीकण्ठाभरणकारः चतुर्विंशतिसङ्ख्याकानाम् शब्दालंकाराणां निर्देशं करोति, परन्तु तेषाम् शब्दालंकारत्वं शब्दपरिवृत्ति-असहिष्णुत्वरूपलक्षणाभावात् नहि स्वीकर्तुं शक्यते। तथा चोक्तमपि—

पठन्ति शब्दालङ्कारान् बहूनन्यान् मनीषिणः।
परिवृत्तिसहिष्णुत्वात् न ते शब्दैकभागिनः॥

काव्येषु अर्थालङ्काराः अथवा अर्थालङ्काराः

काव्येषु अलंकाराणाम् महत्त्वमतिगौरवमयं विद्यते इति नास्ति तिरोहितं विपश्चिदपश्चिमेभ्यः। एके तु विद्वांसः प्रतिपादयन्ति यत् अलंकारान् विना काव्यस्य कल्पना तथैव निरर्थका वर्त्तते यथा औष्ण्यरहितस्याग्नेः कल्पना। तथा चाभिहितम् जयदेवेन चन्द्रालोके—

अंगीकरोति यः काव्यम् शब्दार्थावनलंकृती।
असौ न मन्यते कस्मादनुष्णमनलंकृती॥ इति।

अलंकारसम्प्रदायायावलम्बिनां मतानुसारेण काव्येषु अलंकाराणां स्थितिरपरिहार्या भवति। त एव काव्यस्य स्थिराः धर्माः।

ध्वनिवादिन आचार्याः—आनन्दवर्धनमम्मटविश्वनाथादिका आचार्यास्तु अलंकारान् काव्यस्यास्थिरधर्मरूपेण स्वीकुर्वन्ति, किन्तु इमे अप्याचार्याः काव्येषु अलंकाराणां स्थितिम् विच्छितिविशेषाविकर्त्रीरूपेण स्वीकुर्वन्ति। अतएव हि आहाचार्यो मम्मटः—

उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः॥ इति।

साहित्यदर्पणकारेणाप्यभिहितम्—

शब्दार्थयोरस्थिरा ये धर्माः शोभातिशायिनः।
रसादीनुपकुर्वन्तोऽलङ्कारास्तेऽङ्गदादिवत्॥ इति।

इमेऽलङ्काराः प्रधानतया त्रिप्रकारकाः भवन्ति—शब्दालंकाराः, अर्थालंकाराः शब्दार्थोभयालंकाराश्च। तत्र कस्यचन शब्दविशेषस्य सत्त्वे एव येऽलंकाराः भवन्ति, तस्य शब्दस्य परिवर्तने कृते च नहि भवन्ति, तेऽलंकारा शब्दाश्रितत्वादेव शब्दालंकारशब्देनाभिधीयन्ते। ये चालंकाराः कृते सत्यपि शब्दपरिवर्तने, पूर्वार्थमेवाश्रित्य भवन्ति तेऽलंकारा अर्थाऽलंकारेषु गण्यन्ते। ये चालंकाराः शब्दार्थोभयमेवाश्रित्य भवन्ति, ते शब्दार्थालंकारशब्देनाभिधीयन्ते।

अत्र तु अर्थालंकारा एव विवेचनीयाः वर्तन्ते, अतएव तस्य विशिष्य विवेच्यन्ते ।

अलङ्काराणां संख्या—काव्यप्रकाशकारः पञ्चानां शब्दालंकाराणाम्, एकषष्टिसंख्याकानामर्थालंकाराणाम् एकस्योभयलंकारस्य, इत्थम् सम्मिल्य सप्तषष्टि (६७) अलंकाराणाम् काव्यप्रकाशे निरूपणमकार्षीत् । किन्त्वलंकाराणां संख्याया विषये आचार्याणां मतभेदो विद्यते । भरतनाट्यशास्त्रे—उपमा-रूपक-दीपक-यमकाख्यानाम् चतुर्णामेवालंकाराणाम् विवेचनम् समुपलभ्यते । वामनः त्रयस्त्रिंशत् (३३) सङ्ख्याकानामलङ्काराणाम् निरूपणमकरोत् काव्यालंकारसूत्रवृत्तौ । आचार्यो दण्डी पञ्चत्रिंशत्- (३५) सङ्ख्याकानामलंकाराणाम् निरूपणमकरोत् । आचार्यो भामहः एकोनचत्वारिंशत् (३९) सङ्ख्याकानामलंकाराणाम् निरूपणमकरोत् । उद्भटः चत्वारिंशत्- (४०) सङ्ख्याकान् अलंकारान् स्वीकृतवान् । रुद्रटः स्वकीये काव्यालंकारग्रन्थे द्विपञ्चाशत् (५२) सङ्ख्याकानामलंकाराणाम् विवेचनमकार्षीत् । काव्यप्रकाशकारः सप्तषष्टि (६७) सङ्ख्याकानलंकारान् स्वीचकार । आचार्यो जयदेवः स्वकीये चन्द्रालोकनामके ग्रन्थे शत(१००)सङ्ख्याकानामलंकाराणाम् निरूपणमकरोत् । अप्पयदीक्षितः स्वकीये कुवलयानन्दनामके ग्रन्थे चतुर्विंशत्युत्तरशतसङ्ख्याकानामलंकाराणाम् निरूपणमकार्षीत् ।

काव्यप्रकाशकारः निम्नांकितानामर्थालंकाराणाम् नैजे काव्यप्रकाशाख्ये ग्रन्थे वर्णनमकार्षीत्—(१) उपमा, (२) अनन्वयः, (३) उपमेयोपमा, (४) उत्प्रेक्षा, (५) सन्देहः, (६) रूपकम्, (७) अपह्नुतिः, (८) श्लेषः, (९) समासोक्तिः, (१०) निदर्शना, (११) अप्रस्तुतप्रशंसा, (१२) अतिशयोक्तिः, (१३) प्रतिवस्तूपमा, (१४) दृष्टान्तः, (१५) दीपकः, (१६) तुल्ययोगिता, (१७) व्यतिरेकः, (१८) आक्षेपः, (१९) विभावना. (२०) विशेषोक्तिः, (२१) यथासङ्ख्यम्, (२२) अर्थान्तरन्यासः, (२३) विरोधाभासः, (२४) स्वभावोक्तिः, (२५) व्याजस्तुतिः, (२६) सहोक्तिः, (२७) विनोक्तिः, (२८) परिवृत्तिः, (२९) भाविकः (३०) काव्यलिङ्गम्, (३१) पर्यायोक्तिः, (३२) उदात्तः, (३३) परिकरः, (३४) पर्यायः, (३५) अनुमानम्, (३६) परिकरः, (३७) व्याजोक्तिः, (३८) परिसंख्या, (३९) कारणमाला, (४०) अन्योन्यम्, (४१) उत्तरः, (४२) सूक्ष्मः; (४३) सारः, (४४) असङ्गतिः, (४५) समाधिः, (४६) समः, (४७) विषमः, (४८) अधिकः, (४९) प्रत्यनीकम्, (५०) मीलितम्, (५१) एकावली, (५२) स्मृतिः, (५३) भ्रान्तिमान्, (५४) प्रतीपम, (५५) सामान्यम्, (५६) विशेषः, (५७) तद्गुणः, (५८) अतद्गुणः, (५९) व्याघातः, (६०) संसृष्टिः, (६१) संकरश्च ।

अलङ्काराणाम् वर्गीकरणम्—अलंकारसर्वस्वस्य प्रणेता आचार्यो रुय्यकः सप्त-

षष्टिसङ्ख्याकानां निरूपणं कृत्वा तेषां रचना शैल्यनुसारेण सप्तविभागेषु व्यभजत्। पुनः प्रथमं विभागं चतुर्धा विभजितवान्। इत्थमलंकाराणाम् एकादश विभागाः संजाताः । एवम्—विभागानुसारेणालंकाराणां सङ्ख्या अधोङ्किता भवति—

[१] सादृश्यमूलकालङ्काराः—

क–भेदाभेदप्रधानालंकारः चत्वारः (४)

ख–आरोपमूलका अभेदप्रधाना अलंकाराः षट् (६)

ग–अध्यवसायमूलकौ अभेदप्रधानौ अलंकारौ द्वौ (२)

घ–गम्यौपम्यमूलका अलंकाराः सप्तदश (१७)

इत्थम् सादृश्यमूलकानाम् समेषामलंकाराणां सङ्ख्या एकोनत्रिंशत् (२९) भवति ।

[२] विरोधमूलका अलंकाराः एकादश [११]

[३] शृङ्खलाबन्धमूलका अलंकाराः त्रय [३]

[४] तर्कन्यायमूलकौ अलंकारौ द्वौ [२]

[५] वाक्यन्यायमूलका अलंकाराः अष्टौ [८]

[६] लोकन्यायमूलका अलंकाराः सप्त [७]

[७] गूढार्थप्रतीतिमूलका अलंकाराः सप्त [७]

इत्थं सादृश्यातिरिक्तमूलकानामलंकाराणां सम्पूर्णा सङ्ख्या अष्टात्रिंशतिः [३८] भवति ।

एतेषु वर्गेषु अन्तर्भूतानामलंकाराणाम् नामानि वर्गानुसारेणाधस्तात् प्रस्तूयते—

[१] क–सादृश्यमूलकाः भेदाभेदप्रधानाः चत्वारोऽलंकाराः उपमा, उपमेयोपमा, अनन्वयः स्मरणम् च ।

ख–आरोपमूलकाः अभेदप्रधानाः सादृश्यमूलकाः षट् अलंकारा—रूपकम्, परिणामः, ससन्देहः, भ्रान्तिमान् उल्लेखः, अपह्नुतिश्च ।

ग–अध्यवसायमूलकौ अभेदप्रधानौ सादृश्यमूलकौ अलंकारौ उत्प्रेक्षा, अतिशयोक्तिश्च ।

घ–गम्यौपम्याश्रिताः सादृश्यमूलकाः सादृश्यमूलकाः सप्तदश अलङ्काराः—तुल्ययोगिता, दीपकः, प्रतिवस्तूपमा, दृष्टान्तः, निदर्शना, व्यतिरेकः, श्लेषप्रधाना सहोक्तिः विमोक्तिः, समासोक्तिः, विशेषणविच्छित्याश्रयः परिकरः, विशेष्यविच्छित्याश्रयः परिकरांकुरः, विशेषणविच्छित्याश्रयः श्लेषः, अप्रस्तुतप्रशंसा, अर्थान्तरन्यासः, पर्यायोक्तिः, व्याजस्तुतिः, आक्षेपश्च ।

[२] विरोधमूलकाः—एकादश अलंकाराः, विरोधः, विभावना, विशेषोक्तिः, असङ्गतिः, विषमः, समः, विचित्रम्, अधिकः, अन्योन्यम्, विशेषः, व्याघातश्च ।

[३] शृंखलाबन्धमूलकाः—त्रय अलंकारः, कारणमाला, एकावली सारश्च ।

[४] तर्कन्यायमूलकौ द्वावलङ्कारौ—काव्यलिङ्गम् अनुमानञ्च ।

[५] वाक्यन्यायमूलका अष्टौ अलङ्काराः—यथासङ्ख्यम् पर्यायः, परिवृत्तिः, परिसङ्ख्या, अर्थापत्तिः, विकल्पः, समुच्चयः, समाधिश्च ।

[६] लोकन्यायमूलकाः सप्तालङ्कारः—प्रत्यनीकाः प्रतीपम्, मीलितम्, सामान्यम्, तद्गुणः, अतद्गुणः, उत्तरम् च ।

[७] गूढार्थप्रतीतिमूलकाः सप्तालङ्काराः—सूक्ष्मः, व्याजोक्तिः, वक्रोक्तिः, स्वभावोक्तिः, भाविकाः, संसृष्टिः, संकरश्च ।

एतेषु समेषु रुय्यकेन सप्तविभागेषु विभक्तेषु अलंकारेषु षट् निम्नांकिता अलंकाराः काव्यप्रकाशकारेण नहि निरूपिताः सन्ति—(१) परिणामः, (२) विचित्रम्, (३) अर्थापत्तिः, (४) अर्थापत्तिः, (५) परिकरांकुरः, (६) विकल्पश्च ।

अनेन विवेचनेन स्पष्टो भवति यत् अर्थालंकाराणाम् शब्दालंकारापेक्षया सङ्ख्या भूयसी वर्त्तते । अलंकाराः काव्यस्य स्थिराः धर्मास्सन्ति ।

महाकविकालिदासस्य परिचयः

समयः—निखिलकविचक्रचूडामणिः कविकुलगुरुः, समाभ्यधिकरहितकविताकामिनीविलासः महाकविः कालिदासः इमां मानवीं मेदिनीं नैजया नवनवोन्मेषशालिन्या प्रतिभया कदा समलञ्चकार इति अद्यापि निश्चप्रचं नास्ति ।

[क] फ्रेंचविद्वान् 'हिपोलाइटफासः' रघुवंशे वर्णितस्य राज्ञो अग्निवर्णस्य मरणानन्तरमुत्पन्नस्य पुत्रस्य समकालिकमेनं मत्वाऽस्य महाकवेः समयं ख्रीष्टाव्देः प्राक् अष्टमशताव्दं स्वीकरोति ।

[ख] भोजप्रवन्धस्य प्रणेता महाकविः वल्लालः ख्रीष्टाव्देः द्वादशशताव्द्यां उज्जयिन्यधीशस्य सभायाः नवरत्नरूपेण स्वीकरोति । परञ्चेमे मते तर्कप्रमाणपराहतत्वात् नादर्तव्ये ।

[ग] मालविकाग्निमित्रनामकस्य नाटकस्य नायकः शुंगवंशीयो राजा अग्निमित्रो वर्तते । अयमग्निमित्रः मौर्यवंशमुन्मूल्य साम्राज्यं स्वायत्तीकर्त्तुः सेनापतेः पुष्यमित्रस्य पुत्र आसीत् । अग्निमित्रः ख्रीष्टाव्दस्य ५० वत्सरेभ्यः प्रागवर्तिष्ट, अतः कालिदासस्य समयः ख्रीष्टाव्दस्य १५० वत्सरात्पूर्वो नहि भवितुमर्हति ।

[घ] सम्राजो हर्षवर्द्धनस्य (६०६–६४७ ई०) सभाकविः बाणभट्टः हर्षचरिते—"निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु । प्रीतिर्मधुरसान्द्रासु मञ्जरीष्विव जायते ।" इति श्लोके कालिदासस्य नामोल्लेखं करोति । अतएव कालिदासस्य समयः ईस्व्याः सप्तमशत्या पूर्वार्द्धादधिकोऽपि नहि भवितुमर्हति ।

[ङ] पुलकेशिन् द्वितीयस्य (६३४ ई०) ऐहोलशिलालेखे कालिदासस्य नामोल्लेखादपि ईस्व्या सप्तमशताब्द्याः पूर्वार्द्धस्यार्वागेव कालिदासस्य समयः सिद्ध्यति ।

श्रीरमाशंकरतिवारीमहाभागाः कनिष्कस्य (७८ ई०) सभापण्डितस्याश्वघोषस्योत्तरकालवर्तिनं कालिदासं स्वीकरोति ।

देशः—(क) कालिदासः भारतवर्षस्य कं प्रदेशमलञ्चकार इत्यपि नास्ति निश्चितम् । वंगदेशीयानां मतानुसारेणायं महाकविः काल्या भक्त आसीत् । अतएवास्य नाम कालिदासः प्रथितोऽभूत् । काल्याः भक्तत्वादयम् वंगदेशीयः प्रतीयते इति वंगनिवासिनो विवेचकाः तर्कयन्ति । (ख) कालिदासस्य ग्रन्थेषु सर्वापेक्षया विदिशायाः विदर्भस्य च सर्वाङ्गपूर्णं वर्णनं समुपलभ्यते; अतएव हि केचन पण्डिताः कालिदासं विदर्भवासिनं मेनिरे । (ग) पिटर्सनप्रभृतयो विद्वांसो वदन्ति यत् 'मालविकाग्निमित्रे' विदर्भराजकुमार्याः मालविकायाः रघुवंशे विदर्भाधिपतेः पुत्र्याः इन्दुमत्याः स्वयंवरवर्णनस्य मनोज्ञमकार्षीत् । इन्दुमत्याः प्रणयवर्णनञ्च अतिमनोरममवेक्ष्य सिद्ध्यति यदयं महाकविः वैदर्भ एवासीत् । (घ) पण्डितचन्द्रबलिपाण्डेयानां मतानुसारेण कालिदासः विन्ध्यभूमावेवाऽवात्सीत् । सः वैदर्भ एवासीत् । (ङ) प्रो० परांजपे महोदयोऽपि एनं विदिशानिवासिनं मनुते । डॉ० रमाशंकर तिवारी महोदया अपि कालिदासम् उज्जयिनीवासिनं मन्वन्ते । वस्तुतः उज्जयिनीम् प्रति प्रेम्ण अतिरेकादेव कालिदासस्य यक्षः मेघं भवत्यपि वक्रे पथि उज्जयिनीं गमयति । वक्रः पन्था यदपि भवतः प्रस्थितस्योत्तराशां सौधोत्संगप्रणयविमुखो मास्मभूरुज्जयिन्याः विद्युद्दामस्फुरितचकितस्तत्र पौराङ्गनानां, लोलापाङ्गैर्यदि न रमसे लोचनैर्वञ्चितोऽसि ॥

(पू० मे० २९)

कालिदासस्य देशकालयोरिव जीवनचरितमपि अनुमानैकगम्यमास्ते । जनश्रुतेरनुसारेणायं ब्राह्मणवंशावतंस आसीत् । आसीत् प्राक् वपुषा सुन्दरोऽप्ययं पूर्णो मूर्ख आसीत् । पण्डिताः काञ्चिद्राजकुमारीं वञ्चयित्वा तया साकमस्योद्वाहं सम्पादयामासुः । पत्न्या अनादृतोऽयं भगवतीं समाराध्य कविकुलस्य चिराराध्योऽभूत् । गुप्तकालीनानां राज्ञां सभापण्डितोऽयम् स्वनवनवोन्मेषशालिन्या प्रतिभया तात्कालिकीं समृद्धिं देशस्य वर्णयामास काव्यानाम् माध्यमेन ।

कालिदासस्य ग्रन्थाः—कालिदासस्य प्रतिभा चतुरस्रा आसीत् । अयं महाकविः

काव्यानां खण्डकाव्यानां नाटकानाञ्च प्रणयनमकार्षीत् । रघुवंशकुमारसम्भवाख्ये द्वे महाकाव्ये कालिदासस्य स्तः । अस्य महाकवेः द्वे खण्डकाव्येऽपि स्तः ऋतुसंहार-मेघदूताभिधे । अस्य महाकवेः त्रीणि नाटकानि सन्ति मालविकाग्निमित्रम् विक्रमोर्वशीयम्, अभिज्ञानशाकुन्तलञ्च ।

तत्र रघुवंशनाम्नि महाकाव्ये दिलीपादारभ्य अग्निवर्णपर्यन्तानां राज्ञाम् वर्णनमकार्षीत् कविः । कुमारसम्भवाख्ये महाकाव्ये शिवपार्वत्योः प्रणयः मनोरमतमायां शैल्यां निरूपितवान् कालिदासः । ऋतुसंहारे तात्कालिकस्य समाजस्य परां समृद्धिमवर्णयत् । मेघदूते प्रियतमाविप्रयुक्तो यक्षः आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं प्रेक्ष्य तं अलकायां प्रेषयत् स्वसन्देशेन साकम् । विदर्भराजदुहितुः मालविकायाः प्रणयः अग्निमित्रेण साकं वर्णितोऽस्ति विक्रमोर्वशीये नाटके उर्वश्याः प्रणयः पुरूरवसा सह । संस्कृतसाहित्यस्य सर्वोत्तमे नाटके अभिज्ञानशाकुन्तले दुष्यन्तशकुन्तलयोः प्रणयस्य यादृशं मनोज्ञं वर्णनमास्ते तादृशं प्रणयस्य मनोज्ञं वर्णनम् सर्वथाऽनुपलभ्यमास्ते अन्यत्र ।

मम्मटस्य परिचयः

(सं० सं० वि० वि० १९७८)

अलङ्कारशास्त्रस्य ग्रन्थेषु 'काव्यप्रकाश'स्य स्थानमतिमहत्त्वपूर्णं वर्तते । स्वपूर्ववर्तिभिराचार्यैर्निर्धारितानां समेषां सिद्धान्तानां पर्यालोचनपुरस्सरम् काव्यस्य सर्वेषामङ्गानां यथावद्विवेचनम् काव्यप्रकाशेऽकार्षीन्मम्मटः । आनन्दवर्द्धनः 'काव्यस्यात्मा ध्वनिरिति मतम् संस्थापितवान् ध्वन्यालोके । तदनन्तरम् भट्टनायकेन महिम्नभट्टेन च महता प्रयासेन ध्वनिसिद्धान्तस्य खण्डनं कृतम् । वाग्देवताया अपरावतारो मम्मटः भट्टनायकमहिमभट्टयो युक्तीः पूर्णतया निराकृत्य—ध्वनिसिद्धान्तं संस्थाप्य, ध्वनिप्रस्थापनाचार्यस्य विरुदेन विभूषितोऽभूत् ।

मम्मटः स्वयं स्वीयकौटुम्बिकवृत्तस्य विषये किमपि नह्युलेखीत् । काश्मीरीयाणां पण्डितानामनुसारेण मम्मटः काश्मीरनिवासी तथा नैषधीयचरितस्य प्रणेतुः श्रीहर्षस्य मातुलः आसीत् । परञ्चायं प्रवादमात्रमास्ते, यतः श्रीहर्षः स्वयमेव काश्मीरीयो नासीत्; अतएव काश्मीरीयो मम्मटस्तस्य मातुलः कथं स्यात् । मम्मटस्य पिता काश्मीरनिवासी जैयट आसीत् । काव्यप्रकाशस्य सुधापारनाम्न्या व्याख्यायाः कर्ता भीमसेनोऽलेखीत्—

श्रीमज्जैयटगेहिनीसुजठराज्जन्माप्य युग्मानुजः ।।
श्रीमन्मम्मटसंज्ञया श्रिततनुं सारस्वतीं सूचयन् ।।

× × ×

श्रीमान् कैयटऔव्वटौ ह्यवरजौ यच्छात्रतामागतौ ।
भाष्याब्धिं निगमं यथाक्रममनुव्याख्याय सिद्धिं गतौ ।।

एतेन सिद्धचति यदस्य पितुर्नाम जैयटः आसीत्। अस्य द्वावनुजावप्यास्ताम् कैयटऔव्वटौ यौ क्रमेण महाभाष्यस्य व्याख्यां यजुर्वेदस्य च व्याख्यामकुरुताम् । उव्वटस्य मम्मटानुजत्वं नौचित्यं विभर्ति, यतः वाजसनेयिसंहितायाः भाष्यकारः उव्वटः स्वयमेव—'आनन्दपुरवास्तव्यः वज्रटाख्यस्य सूनुना । मन्त्रभाष्यमिद क्लृप्तं भोजे पृथ्वीं प्रशासति ॥' इत्यस्मिञ्छ्लोके आत्मानं वज्रटस्य पुत्रं वक्ति ।

मम्मटकालः—मम्मटः स्वीये काव्यप्रकाशे अभिनवगुप्तम् (१०१५ ई०) नवसाहसांकचरितस्य प्रणेतुः महाकविं पद्मगुप्तम् [१०१० ई०] च उद्धृतञ्चकार । उदात्तालंकारस्योदाहरणे भोजस्य दानशीलताया उल्लेखमकार्षीत् अतएव सिद्धचति यदयं भोजात् परवर्त्यासीत् । किञ्च मम्मटस्य काव्यप्रकाशस्य संकेतनाम्नीं व्याख्यां ११६० ईस्व्याम् माणिक्यचन्द्रसूरिः चकार । रुय्यकः अलंकारसर्वस्वे मम्मटस्य मतं प्रत्याचक्षीत । अनेन विवेचनेन सिद्धचति यत् मम्मटः भोजस्य (१०५१) रुय्यकस्य (११५० ई०) मध्ये काले भारतभुवमलञ्चकार । इत्थम् मम्मटस्य कालः ईस्व्याः एकादशशताब्द्या उत्तरार्धः सिद्ध्यति ।

मम्मटस्य ग्रन्थः—केवलं काव्यप्रकाश एव मम्मटस्य ग्रन्थो वर्तते । अस्मिन् ग्रन्थे दश उल्लासाः सन्ति । सम्पूर्णेऽस्मिन् ग्रन्थे १४२ कारिका २११ सूत्राणि च सन्ति । पाण्डित्यस्य गाम्भीर्यस्य च निकषभूतोऽयं ग्रन्थः सूत्रशैल्यां निवद्धत्वात् दुरवगाह्यो वर्तते । काव्यप्रकाशस्य संस्कृत हिन्द्याश्च ७० टीकासु सत्स्वप्यस्य दुरवगाहता पूर्ववदेवावतिष्ठते । अतएवावितथमेवोक्तं केनचित्—'काव्यप्रकाशस्य कृता गृहे-गृहे टीकास्तथाप्येषः तथैव दुर्गमः ।'

काव्यप्रकाशस्य प्रथम उल्लासे काव्यस्य हेतुः, काव्यलक्षणम्, काव्यभेदाश्च वर्णितास्सन्ति । द्वितीयोल्लासे शब्दशक्तीनां विवेचनम् कृतम् । तृतीयोल्लासे शाब्दी व्यञ्जना व्याकृता । चतुर्थोल्लासे ध्वनेस्समस्तानां भावानाञ्च विस्तृतं विवेचनम् कृतम् । पञ्चमोल्लासे गुणीभूतव्यंग्यकाव्यस्य विवेचनम् कृतम् । पञ्चमोल्लासे गुणीभूतव्यंग्यकाव्यस्य विवेचनम् व्यञ्जनाशक्तेः शक्तिविशेषत्वप्रतिपादनम् प्रौढ्या कृतम् । षष्ठोल्लासे संक्षेपेण चित्रकाव्यं व्याकृतम् । सप्तमोल्लासे दोषाणां प्रभेदा वर्णिताः । अष्टमोल्लासे माधुर्यप्रसादौजसां त्रयाणां गुणानां वर्णनं कृत्वा भरतोक्तानां दशानां शब्दगुणानां दशानाञ्चार्थगुणानां तेष्वेवान्तर्भावञ्चकार । नवमदशमोल्लासयोः क्रमशः शब्दार्थलिंकाराणां वर्णनमास्ते ।

काव्यप्रकाशस्य त्रयो भागास्सन्ति । कारिकाभागः, वृत्तिभागः उदाहरणभागश्च । उदाहरणानि तु विभिन्नेभ्यः काव्यग्रन्थेभ्य उपात्तानि वर्तन्ते । कारिकावृत्तिभागयोर्विषये विदुषां वैमत्यं विद्यते । 'काव्यप्रकाशनिदर्शनाकर्तुः राजानकानन्दस्य (१६८५) अनुसारेण काव्यप्रकाशः मम्मटाल्लटयोस्सम्मिलिता रचना वर्तते । तथाहि—'कृतः श्रीमम्मटा-

चार्यवर्य्यैः परिकरावधिः । ग्रन्थः सम्पूरितः शेषः विधायाल्लटसूरिणा' ॥ एवमेव काव्यप्रकाशस्य 'संकेत' (१२१६ ई०) व्याख्याकारा: माणिक्यचन्द्रसूरिः 'संकेत'-टीकाकारः रुय्यकः, काव्यप्रकाशनिदर्शनाकारः 'राजानाकानन्दः' (१६८१ ई०) अर्जुनवर्मदेवः, 'आदर्श' टीकाकारो विद्याभूषणः प्रभृतयो विद्वांसः काव्यप्रकाशस्य युग्मकतृत्वस्य समर्थका: सन्ति । विद्याभूषणस्तु वक्ति यत् काव्यप्रकाशस्य कारिकाः भरतकृतास्सन्ति । मम्मटः तासां कारिकाणां वृत्तिकर्ता वर्तते । परञ्चेदमखिलं मतम् सर्वथा तथ्यविरहितं वर्तते । सम्पूर्णः काव्यप्रकाशः मम्मटकृत एव वर्तते । यत्र क्वचन क्वचन मम्मटः भरतादीनां वाक्यानि स्वीचकार तत्र स्पष्टरूपेण लिलेख 'उक्तं हि भरतेन' इत्यादीनि वाक्यानि । हेमचन्द्र–जयरथ–विद्यानाथ–अप्पयदीक्षित–पण्डितराजजगन्नाथ–प्रभृतयो विवेचकाः समग्रस्य काव्यप्रकाशस्य कर्तारं मम्मटमेव स्वीकुर्वन्ति । केषांचन विदुषां मतानुसारेण मम्मटः 'शब्दव्यापारविचारनामकस्यापि ग्रन्थस्य रचनां चकार, यस्य प्रकाशनं मुम्बय्याः निर्णयसागरमुद्रणालयतोऽभूत् ।

अभिनवस्य परिचयः

(सं० सं० वि० वि० ८९ ८१)

रसाभिव्यक्तिसम्प्रदायस्य संस्थापकः साहित्य-तन्त्र-शैवदर्शन-मीमांसादिशास्त्राणां पारदृश्वा, अभिनवगुप्तपादाचार्यः साहित्यशास्त्रे ध्वन्यालोकनाटचशास्त्रयोर्व्याख्यातारूपेणात्यन्तप्रसिद्धोऽस्ति ।

प्रौढिपाण्डित्यसूक्ष्मेक्षिकासम्पन्ने अभिनवगुप्तस्य व्याख्ये एतादृशीं मौलिकतां बिभ्रतः येन ते मूलग्रन्थादपि महत्त्वं समादरञ्च समवाप्नुताम् विदुषां समवाये । ध्वन्यालोकस्य स यप्रहस्यं अभिनवगुप्तकृतेन ध्वन्यालोकलोचनेनैवोन्मीलितं भवति । भरतस्य नाटचशास्त्रोपरि अभिनवगुप्तकृता अभिनवभारत्येव व्याख्या प्रसिद्धा आसीत् कदाचित् । इत्थमलंकारशास्त्रस्य क्षेत्रे अभिनवगुप्तस्तमेव प्रख्यातिमलभत यां प्रख्यातिं व्याकरणशास्त्रे महाभाष्यकारः पतञ्जलिर्लब्धवान् ।

अभिनवगुप्तस्येतिवृत्तम्— अभिनवगुप्तस्य देशः कालो जीवनवृत्तञ्च अपरिचितम् नास्ति । स्वयमेव अभिनवगुप्तः स्वग्रन्थानां कालनिर्देशं बहुत्र अकार्षीत् । 'परात्रिंशिकाविवरणम्' नामकग्रन्थानुसारेणाभिनवगुप्तस्य पितामहः वराहगुप्तः, पिता चुक्खुलः, अनुजश्च मनोरथगुप्त आसीत् । अभिनवगुप्तस्य भिन्नानां शास्त्राणां गुरवो भिन्नाः भिन्ना आसन् । तथाहि—शैवदर्शनस्य गुरुः लक्ष्मणगुप्तः, अलंकारशास्त्रस्य भट्टेन्दुराजः, व्याकरणशास्त्रस्य नरसिंहगुप्तः, द्वैताद्वैततन्त्रस्य वामनाथः, द्वैतवादिशैवसम्प्रदायस्य, भूतिराजतनयः, ब्रह्मविद्यायाः, भूतिराजः, नाटचशास्त्रस्य च भट्टतौत आसीत् । एतेभ्यो व्यतिरिक्तानां त्रयोदशसङ्ख्यानामपि स्वगुरूणां नामानि निर्दिष्टवानभिनवगुप्त

एकस्मिञ्छ्लोके । तथाहि—"श्रीचन्द्रशर्मभवभक्तिविलासयोगानन्दाभिनन्दशिवशक्तिविचित्रनाथाः । अन्येऽपि धर्मशिववामनकोद्भटश्रीभूतेशभास्करमुखप्रमुखा महान्तः ।

ध्वन्यालोकलोचने अभिनवगुप्तपादाचार्यः स्थाने स्थाने भट्टेन्दुराजस्य मतस्योल्लेखं करोति । एतेन प्रतीयते यत् भट्टेन्दुराजस्य सविधे ध्वन्यालोकं श्रुत्वैवायमाचार्यः तदुपरि ध्वन्यालोकलोचनं लिलेख ।

अभिनवगुप्तपादस्य लेखनेनैवाभाति यत् शैशवस्य महति प्रत्यूषे अस्य माता दिवंगतोऽभूत् । तथा च—'माताव्ययूजदमुं किल वाल्य एव ।' मातुर्वियोगानन्तरं वैराग्यरागभूषितमनाः अभिनवगुप्तस्य पिताऽपि अत्यल्पकालान्तरमेव स्वर्गं जगाम । मातापित्रोर्वियोगात् संसाराद्विरक्तोऽभिनवगुप्तः गृहस्थाश्रमम् अस्वीकृत्य शिवभक्तिभूतिभूषितान्तःकरणः जीवनं यापितवान् । श्रूयते अभिनवगुप्तः कश्मीरस्य श्रीनागर्य्याः सविधे भैरवनाम्न्या नद्यास्तटेऽवस्थिते भैरवनाम्नि ग्रामे जीवनस्यान्तिमानि दिनानि व्यतीतवान् । यदायं स्वजीवनस्यान्तिमं कालमागतममंस्त तदा भैरवनद्याः सविधे विद्यमानायां भैरवगुहायां प्राविशत् यतः पुनर्नहि प्रत्यागात् ।

अभिनवगुप्तस्य कालः—यद्यपि अभिनवगुप्तस्य पूर्वजाः कश्मीरवासिन एव आसन् तथापि ते कान्यकुब्जाधीशितू राज्ये अगुः कस्माच्चन कारणात् । एतेषामेव वंशेऽत्रिगुप्तनामा कश्चन विद्वान्नभूत् यं कान्यकुब्जेश्वरो यशोवर्मा कश्मीरेश्वरं ललितादित्यं पराकृत्य स्वदेशेऽनयत् । यशोवर्मणः कालः अष्टमशताव्दी ईस्व्याः स्वीक्रियते । अत्रिगुप्तस्यैव वंशे अभिनवगुप्तोऽभूत् । अनेकेषां शास्त्राणां विद्वान् अभिनवगुप्तः क्रमस्तोत्रस्य रचनां ९९० ईस्व्यां भैरवस्तोत्रस्य ९६२ ईस्व्याम् विवृतिविमर्शिन्याश्च १०१४ ईस्व्याञ्चकार । एतासां रचनानां कालान् स्वयमेवाभिनवगुप्तः अलेखीत् । अनेन प्रतीयते यदभिनवगुप्तस्य कालः दशमशताब्द्या अन्तिमो भागः एकादशशताब्द्याश्च प्रारम्भकालो भवितुमर्हति ।

अभिनवगुप्तस्य रचनाः—अभिनवगुप्तपादाचार्यः अनेकेषां ग्रन्थानां प्रणेताऽस्ति । ते च ग्रन्थाः निम्नांकिताः सन्ति इति संस्कृतसाहित्यस्य पर्यालोचनेनाभाति । तथाहि—१–वोधपंचदशिका, २–परात्रिंशिकाविवृतिः, ३–मालिनीवातिकः, ४–तन्त्रालोकः, ५–तन्त्रसारः, ६–तन्त्रवटधानिका, ७–ध्वन्यालोकलोचनम्, ८–अभिनवभारती, ९–भगवद्गीतार्थसंग्रहः, १०–परमार्थसारः, ११–ईश्वरप्रत्यभिज्ञाविमर्शिनी, १२–ईश्वरप्रत्यभिज्ञाविवृतिविमर्शिनी, १३–क्रमस्तोत्रम्, १४–देहस्थदेवताचक्रस्तोत्रम्, १५–भैरवस्तोत्रम्, १६–परमार्थद्वादशिका, १७–अनुभवनिवेदनम्, १८–परमार्थचर्चा, १९–महोपदेशविंशतिका, २०–अनुत्तरशतिका, २१–तन्त्रोच्चयः, २२–घटखर्परकुलकविवृतिः, २३–क्रमकेलिः, २४–शिवदृष्टयालोचनम्, २५–पूर्वपञ्चिका,

२६–पदार्थप्रवेशनिर्णयटीका, २७–प्रकीर्णकविवरणम्, २८–प्रकरणविवरणम्, २९–काव्यकौतुकविवरणम्, ३०–कथामुखटीका, ३१–लघ्वीप्रक्रिया, ३२–भेदवादविदारणम्, ३३–देविस्तोत्रविवरणम्, ३४–तत्त्वार्थप्रकाशिका, ३५–शिवशक्त्यविनाभावस्तोत्रम्, ३६–बिम्बप्रतिबिम्बवादः, ३७–परमार्थसंग्रहः, ३८–अनुत्तरशतकम्, ३९–प्रकरणस्तोत्रम्, ४०–नाट्यालोचनम्, ४१–अनुत्तरतत्त्वविमर्शिनी च । एतेषु समेषु ग्रन्थेषु केचन एव ग्रन्थास्समुपलभ्यन्ते ।

अश्वघोषस्य परिचयः

(सं० सं० वि० वि० ७७, ८०)

आयोध्यिकस्य महाकवेरश्वघोषस्य मातुर्नाम सुवर्णाक्ष्यासीत् । क्षेमेशचन्द्रचट्टोपाध्यायः नैजे 'डेट आफ कालिदास' नाम्नि ग्रन्थे कालिदासाश्वघोषयोः कृतीनां विशदां तुलनां कृत्वा कालिदासपरवर्तिनमश्वघोषं स्वीकरोति । अश्वघोषस्य कृतिषु ब्राह्मणधर्मस्य वैदिकधर्मस्य बौद्धधर्मस्य च वर्णनाया समुपलम्भादनुमीयते यत् प्रागयं वैदिको ब्राह्मण आसीत् तदनन्तरमय बौद्धोऽभूत् । अश्वघोषः दार्शनिकः संगीतज्ञः कविश्चासीत् ।

श्रूयते कनिष्कः (७८ ई०) मगधेश्वरं पराजित्य पुनः तस्य राज्यस्य विजितांशं प्रत्यावर्तयितुं पूर्णरूपेण गौतमबुद्धस्य पात्राणि महाकविमश्वघोषञ्च दातुमादिशत् । मगधेश्वरः गौतमबुद्धपात्राणां दातुमुद्यतोऽभूत् परञ्च महाकविमश्वघोषं दातुं नैच्छत् । राज्ञ इमां मनःस्थितिं दृष्ट्वा मन्त्रिणः चिन्तिता अभूवन् । तदा राजा अश्वघोषस्य महत्त्वं ज्ञापयितुं एकस्मै दिनाय अश्वानां भोजनं न्यषेधयत् । द्वितीयेऽह्नि क्षुत्क्षामानामश्वानां पुरस्तात् तृणानि निधाय अश्वघोषं सगीतं प्रस्तोतुमादिशत् अश्वघोषस्य संगीतं श्रुत्वा बुभूक्षिता अपि अश्वा तृणादनं विहाय स्तब्धकर्णाः सन्तः चित्रलिखिता इव अभूवन् । तस्मादेव कालादश्वघोषः 'अश्वघोषस्य' नाम्ना प्रथितो अभूत् । अस्य वास्तविकं नाम विलुप्तमभूत् ।

'महाकविकालिदास'ग्रन्थस्य प्रणेतारः श्रीरमाशंकर तिवारी महाभागाः कालिदासमश्वघोषपरवर्तिनं स्वीकुर्वन्ति । प्रो० ई० बी० कावेल प्रभृतयः पश्चात्या विद्वांसः अपि कालिदासस्य पूर्ववर्तिनमेवाश्वघोषं साधयन्ति । चीनीयात्री इत्सिगः अश्वघोषं नागार्जुनात्पूर्ववर्तिनं मनुते । तन्मतानुसारेण कनिष्कस्य समकालिको बौद्धानां शून्यवादस्य प्रवर्तकश्चाश्वघोषो नागार्जुनात् पूर्वम् खीष्टाब्देः प्रथमशताब्द्यामभूत् । चीनदेशीयानां तिब्बतदेशीयानाञ्च परम्परानुसारेणाश्वघोषः कनिष्कस्य सभापण्डितः आत्मीयो गुरुश्चासीत् । कनिष्केणायोजितस्य चतुर्थबौद्धसंगीतेरयमाचार्य आसीत् इति विचारकाणां दृढं मतमास्ते ।

मन्मतानुसारेण तु अश्वघोषः कालिदासपूर्ववर्त्यासीत्; यतः कालिदासस्य कुमार-

सम्भवः मेघदूत–रघुवंशप्रभृतिग्रन्थानां श्लोकाः बुद्धचरित-सौन्दरनन्दादि ग्रन्थानां श्लोकैः साकं संवदन्ति भावेन शैल्या च। परञ्च ये विचाराः अश्वघोषस्य वर्णनेषु अस्फुटा आसन् तान् विचारान् परवर्ती कालिदासः मनोज्ञान् विशदांश्चाकार्षीत्। अतएव श्रीरमाशंकर तिवारी महोदयानां विचाराः समीचीना भान्ति यदश्वघोषस्य ऋणी परवर्ती चास्ते कालिदासः। 'बुद्धचरितम्' 'सौन्दरनन्दम्' 'शारिपुत्रप्रकरणम्' चेमे त्रयो ग्रन्थाः अश्वघोषस्य सन्ति इत्यत्र विवेचकानां वैमत्यं नास्ति। एतेषु त्रिषु ग्रन्थेषु आदिमौ महाकाव्ये स्तः अन्तिमं च नाटकम्। चीन–तीव्वतदेशयोः परम्परानुसारेण तूपर्युक्तग्रन्थव्यतिरिक्ताः–सूत्रालंकारः, महायानश्रद्धोत्पादसंग्रहः वज्रसूचिकोपनिषत् गाण्डीस्तोत्रगाथा च इमे चत्वारो ग्रन्था अपि अश्वघोषकृता एव सन्ति। एतेषां चतुर्णां ग्रन्थानां हस्तलेखाः (पाण्डुलिपयः) चीन-तिव्वतदेशयोः सुरक्षितास्सन्ति। परन्तु डॉ० विण्टरनिट्ज, ताकाकुमः ई० एच० जौहवस्टन प्रभृतयो विद्वांसः इमान् चतुरो ग्रन्थानश्वघोषस्य नहि स्वीकुर्वन्ति।

बुद्धचरितमश्वघोषस्य संस्कृतभाषामयं सप्तदशसर्गेषु निवद्धं महाकाव्यमास्ते, यत्र महाकविः महात्मनो बुद्धस्य तस्योपदेशानाञ्च सम्यक्सन्निवेशं चकार। केषाञ्चन विचारकाणां मतमास्ते यदस्य ग्रन्थस्य चतुर्दशसर्गामेव व्यरीरचदश्वघोषः वहोः कालादनन्तरं कश्चनास्य ग्रन्थस्य सर्गत्रयाणां रचनां कृत्वा ग्रन्थमिममपूरयत् एतस्मादेव कारणादस्य ग्रन्थस्य चतुर्दशसर्गाः चीनीभाषाया अनुवादेन सह संवदन्ति।

सौन्दरनन्दमश्वघोषस्य ललितललितायां शैल्यां निवद्धमष्टादशसर्गात्मकं महाकाव्यमास्ते। इक्ष्वाकुवंशीयो राजा नन्दः वौद्धधर्मं स्वीचकार पुनः सुन्दर्याः सौन्दर्येण आकृष्टमनाः सः तामुपयेमे।

निस्सन्देहरूपेणायं महाकविः समकालमेव दार्शनिकः संगीतज्ञः कविश्चासीत्। अयं दार्शनिकानामपि विषयाणां सरससरलभाषायां सर्वजनग्राह्यशैल्यामतीव मनोज्ञरूपेण वर्णनमकार्षीत्। अयम् तत्कालीनानामर्थशास्त्राणां नीतिशास्त्राणाञ्चाभिज्ञ आसीदिति अश्वघोषस्य ग्रन्थानां परिशीलनेनाभाति। अस्य कविता वैदर्भीशैल्या निवद्धा प्रसादगुणभूयिष्ठा वर्तते। केचन विचारकाः अश्वघोषकालिदासयोः कवितायाः प्रसादगुणभूयिष्ठत्वविषये समानरूपतां स्वीकुर्वन्ति। परञ्चास्याः तुलनायाः किमप्यौचित्यं न विद्मो वयम्। यस्य महाकवेः कालिदासस्य मनस्सु सरस्वत्याः निवास आसीत्; यस्य महाकवेः अभिज्ञानशाकुन्तलम् विश्वस्य विश्वस्मिन् वाङ्मये तुलां नो विभर्ति, मेघदूतं प्रेक्षं-प्रेक्षं 'मेघे माघे गतं वयः' इत्यवादिषुः विवेचकाः तस्य महाकवेः का नाम समता अश्वघोषेण साकं भवितुमर्हति ?

दण्डिनः परिचयः

(सं० सं० वि० वि० ७९; ८१)

आचार्यो दण्डी संस्कृतसाहित्याकाशे पदलालित्यस्य सिद्धहस्तकविरूपेण प्रख्यातोऽस्ति। भामहस्यानन्तरं दण्डचेवालङ्कारशास्त्रस्योपरि स्वतन्त्रस्य ग्रन्थस्य रचनामकार्षीत्। अयं केवलमलङ्कारिक एव नहि अपितु सरसकाव्यकलायाः सफलः कविरप्यामीत्। दण्डिनः दशकुमारचरितम् संस्कृतसाहित्ये चारुतायाः पदलालित्यस्य, मनोरञ्जकतायाः सरसतायाश्च निदर्शनमास्ते। काव्यादर्शस्य सर्वाण्युदाहरणानि दण्डिनैव प्रणीतानि सन्ति। अतएव दण्डी समानरूपेण आलङ्कारिकः कविश्चासीत्। एतस्मादेव कारणात् प्राचीनालोचकाः 'कवयस्त्वयि दण्डिनि' इत्युक्त्वा दण्डिनं वाल्मीकिव्यासयोः कोटी संस्थापयामासुः।

दण्डिनः कालः—दण्डिनः कालविषये विवेचकानां वैमत्यमास्ते। आनन्दवर्द्धनो ध्वन्यालोके भामहस्य तूल्लेखञ्चकार किन्तु दण्डिनो नाम कुत्रापि नहि स्मरति। अतएव आनन्दवर्धनात्पूर्वं दण्डिनः स्थितिर्भवितुं नार्हति। ईस्व्याः नवमशताब्द्यां प्रणीतेष्वलंकारशास्त्रीयग्रन्थेषु दण्डी प्रामाणिकोऽलंकारिकविद्वान्रूपेण स्वीकृतोऽस्ति, अतएव दण्डिनः कालः नवमशताब्द्या अर्वाग्भवितुमर्हति। राष्ट्रकूटनरेशेण 'अमोघवर्षनृपतुंगेन' (नवमशताब्द्याः पूर्वार्द्धः) कन्नड़भाषायां प्रणीते 'कविराजमार्ग' नाम्नि ग्रन्थे अलंकाराणां कानिचनोदाहरणानि काव्यादर्शस्याक्षरश उदाहरणानामनुवादरूपाणि सन्ति। काव्यालंकारस्य परिशीलनेन प्रतीयते यत् वामनः (८०० ई०) 'काव्यादर्शात्' परिचितोऽस्ति। यतो दण्डी रीतिद्वयोः प्रतिपादनं चकार वामनस्तृतीयायाः पाञ्चाल्याः प्रतिष्ठापनां कृत्वा स्वमौलिकतायाः परिचयमदात्। इत्थम् दण्डिनः कालः ८०० ईस्वीतः पश्चान्नहि भवितुमर्हति। दण्डी बाणभट्टस्य कादम्बर्याः सरसं सारांशं 'अवन्तिसुन्दर्याः' माध्यमेन वर्णितवान्। इत्थम् वाणभट्ट-भर्तृहरि-माघैः परिचितस्य दण्डिनः कालः सप्तमशताब्द्या उत्तरार्द्धो सिद्धयति।

दण्डिनो ग्रन्थाः—'त्रयोऽग्नयस्त्रयो वेदाः त्रयो देवास्त्रयोगुणाः। त्रयो दण्डिनग्रन्थाश्च त्रिषु लोकेषु विश्रुताः।' इति शार्ङ्गधरपद्धत्यामुद्धृतस्य राजशेखरस्य श्लोकस्यानुसारेण दण्डिनस्त्रयो ग्रन्थाः सिद्धा भवन्ति। काव्यादर्शदशकुमारचरितञ्च सर्वे जना दण्डिनस्स्वीकुर्वन्ति। तृतीयस्य ग्रन्थस्य विषये विदुषां प्राग्वैमत्यमासीत्। केचन विद्वांसः 'छन्दोविचितिम्' दण्डिनस्तृतीयां कृतिं स्वीचक्रुः, केचन च अवन्तिसुन्दरीकथाम् ! परञ्च इदानीं सर्वैः प्रायः 'अवन्तिसुन्दरीकथैव दण्डिनः कृतिः स्वीक्रियते। काव्यादर्शस्य प्राचीना टीकात्रयी समुपलभ्यते कलिकत्तातः मद्रासतश्च प्रकाशिता। कलिकत्तातः प्रकाशिता प्रेमचन्द्रतर्कवागीशस्य टीका प्राचीनतमाऽस्ति। काव्यादर्शस्य तरुणवाचस्पतिकृता टीका वर्तते। तृतीयापि 'हृदयङ्गमा' नाम्नी

काव्यादर्शस्य टीका मद्रासत एव प्रकाशिता अभूत् । कन्नड़भाषायां विरचितः
कविराजमार्गस्तु काव्यादर्शस्यानुवादरूप एवास्ते । आभ्यो टीकाभ्यो व्यतिरिक्ताः
महामहोपाध्यायकृता 'मार्जन' टीका कृष्णकिंकरतर्कवागीशकृता 'काव्यतत्त्वविवेचन-
कौमुदी' टीका वादिरवलविरचिता 'श्रुतानुपालिनी' टीका, मल्लिनाथविरचिता
'वैमल्यविघायिनी' टीका, च काव्यादर्शस्य समुपलभ्यन्ते ।

काव्यादर्शे त्रयः परिच्छेदाः ६६० श्लोकास्सन्ति । प्रथम परिच्छेदे—काव्यलक्षणम्,
काव्यभेदाः, आख्यायिका, कथा, रीतिः—गुणाः कवेरावश्यकीया गुणाश्च समुपवर्णिताः ।
द्वितीये परिच्छेदे अलंकारलक्षणम् ३५ अलंकाराणां विवरणञ्च सोदाहरणं समुप-
वर्णितम् । तृतीये परिच्छेदे १६ प्रहेलिकानाम् १० दोषाणाञ्च सुविस्तृतं वर्णनं
समुपलभ्यते । दशकुमारचरिते च राजवाहनादिदशकुमाराणां जीवनचरितम् ललित-
ललितायां भाषायां वर्णनं कृतम् । अवन्तिसुन्दरीकथा मनोज्ञं गद्यकाव्यमास्ते ।

आगाशे महोदयस्तु केवलं तर्कमेवाश्रित्य 'दशकुमारचरितम्' दण्डिनो रचनामेव
नह्यभ्युपगच्छति । परञ्च आगाशे महोदयस्य तर्काः अनुभवेन, प्रमाणेन, प्रसिद्ध्या
च पराहताः अनुचिता एव सन्ति । दण्डिनः पदलालित्यस्य प्रसिद्धिः दशकुमार-
चरितमेवाश्रित्य तिष्ठति, अतएव दशकुमारचरितस्य दण्डिनः रचनातो बहिष्करणं
सर्वथानुचितमास्ते ।

भरतमुनेः परिचयः

नाटचशास्त्रस्य प्रणेता भरतमुनिः साहित्यशास्त्रस्याचार्येषु प्राचीनतमः आचार्यः
स्वीक्रियते । भरतमुनेर्नाटचशास्त्रं परवर्तिनां सर्वेषामलंकारिकाणामुपजीव्यमास्ते ।
नाटचशास्त्रस्य आंग्लानुवादको 'मनमोहनघोषो वक्ति यत्—भरतमुनिरेकः काल्पनिकः
पुरुषो वर्तते । वस्तुतः भरतमुनिनामकः कश्चन पुरुषो नास्ति। परन्तु मनमोहन-
घोषस्येदं मतं पूर्णरूपेणानादरणीयमास्ते विपश्चिदपश्चिमानां समवाये । अभिनव-
गुप्तप्रभृतयः समे प्रसिद्धा अलंकारिका भरतमुनिं स्वपूर्वाचार्यरूपेण स्वीकुर्वन्ति ।
मत्स्यपुराणस्य चतुर्विंशतितमेऽध्यायेऽपि भरतमुनि असकृदुल्लिखितोऽस्ति । मत्स्य-
पुराणानुसारेण भरतमुनिः देवलोके लक्ष्मीस्वयम्वरनामकस्य नाटकस्याभिनयं कार-
यामास । तत्रोर्वशी नाम्न्यप्सरा लक्ष्म्या अभिनयं चकार । तत्र देवसभायामिन्द्रेण
साकमुपस्थितं पुरूरवसं वीक्ष्य तस्य सौन्दर्येणाकृष्टमानसा उर्वशी अभिनयनाटनमेव
विसस्मार । तेन रोषरूषितो भरतमुनिः पुरूरवसमुर्वशीञ्चोभयं शशाप । विक्रमो-
र्वशीयनामके कालिदासोऽपीममर्थं संकेतितवान् । तथाहि—मुनिना भरतेन यः
प्रयोगो-भवतीष्वष्टरसाश्रयः प्रयुक्तः । ललिताभिनयं तमद्य भर्ता मरुतां द्रष्टुमनाः
सलोकपालः ।

भरतमुनेः कालः—भरतमुनेः कालस्य निर्णयः सर्वथा दुरूहो विषयो वर्तते ।
अभिनवगुप्तः 'अभिनवभारती' नाम्नीं नाटचशास्त्रस्य व्याख्यां ईस्व्याः एकादश-

शताब्द्यां चकार। कालिदासः विक्रमोर्वशीयनाटकस्य २।१८ श्लोके 'भरतमुनिना शब्देन भरतस्य नामग्रहमुल्लेखं चकार। अतएव भरतमुनिः कालिदासात् पूर्ववर्ती सिद्धयति। संस्कृतसाहित्यस्येतिहासे सूत्रकालरूपेण ईस्वीपूर्वस्य चतुर्थशताब्दी स्वीक्रियते। वहवो विद्वांसः भरतस्य समयं विक्रमपूर्वस्य ५०० वत्सरेभ्य आरभ्य प्रथमशताब्दीं यावत् स्वीकुर्वन्ति।

भरतमुनेः ग्रन्थाः—नाटचशास्त्रमेक एव ग्रन्थो भरतमुनेः समुपलभ्यते। सम्पूर्णोऽयं ग्रन्थः षट्त्रिंशदध्यायेषु समुपलभ्यते। अस्मिन् ग्रन्थे ६००० षट्सहस्रसङ्ख्याकाः श्लोकास्सन्ति। अत्र वहवस्तु अनुष्टुप्श्लोकास्सन्ति। क्वचन चार्याछन्दांसि समुपलभ्यन्ते। रसनिरूपणस्य प्रसंगे क्वचन सूत्राणि क्वचन च गद्यव्याख्यानानि समुपलभ्यन्ते। भरतः स्वकारिकानां पुष्टौ 'अनुवंश्यश्लोकानुद्धृतवान्। अभिनवगुप्तस्यानुसारेण शिष्यपरम्परायां समागताः श्लोकाः 'अनुवंश्याः' कथ्यन्ते इमे अनुवंश्यश्लोकाः भरतादपि प्राचीनाः सन्ति। सम्पूर्णो ग्रन्थ सूत्रेषु भाष्येषु कारिकासु च निवद्धोऽस्ति। उत्तरभारतीयपाठानुसारेण नाटचशास्त्रे सप्तत्रिंशदध्यायाः सन्ति। दाक्षिणात्यपाठानुसारेण च षट्त्रिंशत्संख्याकाः अध्यायाः सन्ति। अभिनवगुप्तोऽपि नाटचशास्त्रे षट्त्रिंशदध्यायान्नेव स्वीकरोति। नाटचशास्त्रे छन्दःशास्त्र–अलङ्कारशास्त्र–संगीतशास्त्र–प्रभृतीनां विषयाणां प्राथमिकं विवरणं समुपलभ्यते अत एवेदं प्राचीनललितकलाया विश्वकोश इव आभाति।

नाटचशास्त्रस्य व्याख्याकाराः—अभिनवगुप्तशार्ङ्गदेवौ नाट्यशास्त्रस्य नवानां व्याख्यातॄणां नामोल्लेखमकुरुताम्। ते च भट्टोद्भट-लोल्लट-शंकुक-भट्टनायक-राहुल-भट्टयन्त्र अभिनवगुप्तकीर्तिधर-मातृगुप्ताचार्यास्सन्ति। मन्ये एतेषु केचन काल्पनिकाः केचन च वास्तविका भवेयुः।

भामहस्य परिचयः

(सं० सं० वि० वि० ७७)

जीवनवृत्तम्—भरतस्यानन्तरं भामह एव सर्वप्रथममलंकारशास्त्रीयं ग्रन्थं रचयामास। भरतो नाट्यशास्त्रे अलङ्कारशास्त्रीयाणि तत्त्वानि गौणरूपेण व्याकार्षीत्। भरतानुसारेणाभिनयाश्चतुर्धा विभज्यन्ते; तत्र वाचिकाभिनयेऽलंकारशास्त्रं सन्निविशते। भरतः 'काव्यालंकारनाम्नि ग्रन्थे अलंकारशास्त्रस्य तत्त्वानां स्वतन्त्ररूपेण व्याख्यां चकार। अनेके विद्वांसः भामहं काश्मीरवासिनं स्वीकुर्वन्ति। भामहालंकारानुसारेण भामहस्य पितुर्नाम रक्रिलगोम्यासीत्। कतिपये विद्वांसो रक्रिलगोमीति नाम दृष्ट्वाऽनुमिन्वन्ति यत् भामहस्य पिता वौद्ध आसीत्। चन्द्रव्याकरणानुसारेण गोमिन् शव्दस्य पूज्यार्थे निपातो भवति। चन्द्रव्याकरणस्य प्रणेता चन्द्रगोम्यपि वौद्ध

आसीत् । भामहो मङ्गलाचरणे सार्वं सर्वज्ञः बुद्धस्य नामेति पठत्यमरसिंहः । इत्थं रक्किलगोमी बौद्ध आसीदिति सिद्ध्यति ।

परश्चायं विचारः सर्वथा औचित्यं नो विभर्ति । यद्यपि बुद्धस्य नाम सर्वज्ञाप्यस्ति किन्तु कृशानुरेताः सर्वज्ञो धूर्जटिर्नीललोहितः । इत्यस्मिन् वाक्येऽमरसिंहः शंकरस्य नामसु सर्वज्ञं शब्दं पठति । किञ्च यदि भामहो बौद्धोऽभविष्यत् तदा काव्यालंकारे कुत्रचित् बुद्धस्य वर्णनामप्यकरिष्यत्; यस्मात् कारणात् भामहो तथा अकृत्वा, रामायणस्य महाभारतस्य वृहत्कथायाश्च पात्राणि असकृत् सस्मार काव्यालङ्कारे, तस्मात्कारणाज्ज्ञायते यदयं बौद्धो नासीत्, प्रत्युत सो वैदिकधर्मावलम्बी ब्राह्मण आसीत् ।

कालः—भामहः दण्डिनः पूर्ववर्ती वर्तते इत्यप्रचाल्यैः प्रमाणैः सिद्धमास्ते । तथाहि—बौद्धाचार्यः श्वन्तरक्षितः (अष्टमशतकम्) स्वकीये तत्त्वसंग्रहे' ग्रन्थे भामहस्य मतस्योल्लेखं कृत्वा भामहस्य काश्चन श्लोकानुद्धृतवान् । अतएव भामहः अष्टमशत्याः ईस्व्या पूर्वकालिकोऽस्तीति निश्चप्रचमास्ते । आनन्दवर्द्धनस्य भामहस्य शेषं हिमगिरिस्त्वञ्च महान्तो गुरवः स्थिराः । यदलंघितमर्यादाश्चलन्तीं विभ्रते भुवम् ॥" इति श्लोकं ध्वन्यालोकस्य चतुर्थ उद्योते प्राचीनतरमवोचत् वाणभट्टस्य 'धरणीधारणायाधुना त्वं शेषः इति वाक्यस्यापेक्षया । एतेन वाणभट्टादपि पूर्ववर्ती सिद्धयति भामहः । भामहः ५०९ ईस्व्याः दिङ्नागस्य प्रत्यक्षं कल्पनापोढमिति प्रत्यक्षलक्षणम् काव्यालङ्कारे उद्धृतवान् । किञ्च ६२० ईस्व्याम् धर्मकीर्तिः प्रत्यक्षलक्षणे 'अभ्रान्तम्' पदं योजयामास परन्तु भामहः 'अभ्रान्तम्' पदसहितं प्रत्यक्षलक्षणं नोद्धृत्वा एतेन ज्ञायते यत् भामहः ५०० ईस्व्या आरभ्य ६२० ईस्व्या अन्तराले एव प्रादुर्बभूव । इत्थं भामहस्य कालः षष्ठशताब्द्याः पूर्वकाल एव सिद्धयति ।

भामहस्य ग्रन्थः—भामहस्य काव्यालङ्कार एव एकः प्रसिद्धो ग्रन्थोऽस्ति। काव्यालंकारव्यतिरिक्तोऽपि कश्चन ग्रन्थो भामहेन प्रणीतोऽस्ति अस्मिन् विषये किमपि पुष्टं प्रमाणं नास्ति । किन्तु अभिज्ञानशाकुन्तलस्य 'अर्थद्योतनिका–टीकायां राघवभट्टः तथाविधानि अपि भामहस्य वाक्यान्युद्धृतवान् यानि काव्यालंकारे नोपलभ्यन्ते । नारायणभट्टोऽपि कानिचन वाक्यानि भामहस्य उद्धृतानि चकार वृत्तरत्नाकरस्य स्वकीयायां टीकायां यान्यपि काव्यालंकारे नहि सन्ति । केषांचन विदुषां मतानुसारेण भामहः प्राकृतप्रकाशस्य 'प्राकृतमनोरमाख्यां टीकां प्रणीतवान् । एतेन भाति यत् भामहः काव्यालंकारव्यतिरिक्तानपि ग्रन्थान् व्यरिरचत् ये साम्प्रतं नोपलभ्यन्ते ।

भामहस्य काव्यालंकारे षट् परिच्छेदाः सन्ति । प्रथमपरिच्छेदे–काव्यशरीरस्य वर्णनमास्ते । अस्मिन् परिच्छेदे षष्टिश्लोकेषु काव्यलक्षणं काव्यभेदाः तस्य प्रयोजनादिकञ्च वर्णितमास्ते । द्वितीय–तृतीयपरिच्छेदयोः षष्ठ्युतरशतश्लोकेषु केषांचना-

लंकाराणां विवेचनमास्ते लक्षणोदाहरणसहितम्। चतुर्थपरिच्छेदे पञ्चाशत्श्लोकेषु दोषाणां वर्णनमास्ते। पञ्चमपरिच्छेदे सप्ततिश्लोकेषु न्यायनिर्णयोऽस्ति। षष्ठे परिच्छेदे षष्ठिश्लोकेषु शब्दशुद्धिः प्रदर्शिता।

रुय्यकस्य परिचयः

(सं० सं० वि० वि० ७७)

रुय्यकः मम्मटात्पश्चाद्वर्ती कश्मीरस्य सम्माननीय आलोचकोऽस्ति। रुय्यकमन्येऽलंकारिकाः रुचकस्य नाम्ना संस्मरणं चक्रुः। रुय्यकस्य पूर्णं नाम राजानकरुय्यकोऽस्ति। प्राग् राजानक इत्युपाधिः कश्मीराणामेव विदुषामभवत्। अयम् 'उद्भटविवेककर्तुः राजानकतिलकस्य पुत्र आसीत्।

रुय्यकस्य कालः—रुय्यकस्य कालस्तथाविधो विवादास्पदो नास्ति यथा संस्कृतसाहित्यस्यान्येषां विदुषाम्। रुय्यकः काव्यप्रकाशोपरि 'काव्यप्रकाशसंकेतंनाम्नीं टीकां व्यधात्। अतएवायं मम्मटात् अर्वाचीनः सिद्धयति। रुय्यकः स्वशिष्यस्य शङ्खकस्य श्रीकण्ठचरितात् पद्योदाहरणानि स्वीचकार। श्रीकण्ठचरितस्य रचनाकालः ११४५ ई० वर्तते। अतः रुय्यकस्य कालः ११४५ ईस्व्या अर्वाचीनो भवितुमर्हति। मान्यानां विदुषां मतानुसारेण रुय्यकस्य कालः ईस्व्या एकादशशताब्द्या मध्यभाग एव वर्तते।

रुय्यकस्य ग्रन्थाः—रुय्यकस्य पञ्च ग्रन्था वर्तन्ते। ते च यथा नीचैस्सन्ति।

सहृदयलीला—अस्मिन् अल्पीयसि ग्रन्थे स्त्रीणां सौन्दर्यगुणस्य तासां भूषणानाञ्च विशिष्य वर्णनमास्ते।

अलङ्कारसर्वस्वम्—अयमेवालंकारग्रन्थो रुय्यकस्य ख्यातेस्स्तम्भभूतो वर्तते। अस्मिन् ग्रन्थे रुय्यकः अलंकार-शास्त्रस्य तत्त्वानां विशदं विवेचनञ्चकार। अलंकारनिरूपणविषयकोऽतीवप्रौढोऽयमास्ते ग्रन्थः। अस्मिन् ग्रन्थे रुय्यकः ध्वनिसिद्धान्तानुयायी विभाति। सः मम्मटापेक्षयाधिकानामलंकाराणां विवेचनं प्रस्तौषीत्। अलंकारसर्वस्वे। विकासविचित्रयोरलंकारयोरुत्प्रेक्षको रुय्यक एवास्ते। विश्वनाथाप्पयदीक्षितविद्याधरप्रभृतीनामालंकारिकाणां प्रेरणाप्रदः रुय्यकोऽस्ति।

काव्यप्रकाशसंकेतः—काव्यप्रकाशोपरि रुय्यककृता संकेतनाम्नी टीका टिप्पणीस्वरूपा वर्तते। रुय्यकः अस्यां टीकायामनेकत्र मम्मटस्य मतस्य समीक्षां चकार।

साहित्यमीमांसा—अस्मिन् ग्रन्थे अष्टौ प्रकरणानि सन्ति। अस्मिन् ग्रन्थे

व्यञ्जनावृत्तेरुल्लेखः क्वापि नास्ति। अस्य ग्रन्थस्यानुसारेण तात्पर्यवृत्त्या रसस्यानुभूतिर्भवति। अस्मिन् ग्रन्थे केषाञ्चनेवालंकाराणां वर्णनमास्ते।

व्यक्तिविवेकटीका—महिमभट्टस्य व्यक्तिविवेकस्योपरि रुय्यककृता व्याख्येयं वर्तते।

मम्मटस्यालंकारसर्वस्वविषये विवेचकानां विचारो विविध-प्रकारकोऽस्ति। केचन दाक्षिणात्याः विचारकाः अलंकारसर्वस्वस्य सूत्राणामेव कर्तारं रुय्यकं मन्वन्ते तस्य वृत्तेश्च कर्तारन्ते मङ्खकम् मन्यन्ते। परन्तु मतमिदमौचित्यं नो विभर्ति। विद्याधर-विद्यानाथ-अप्पयदीक्षितप्रभृतयो विद्वांसः काव्यप्रकाशमयव्याख्याकारो भट्टगोपालः, 'अलंकाररत्नाकरस्य' प्रणेता शोभाकरश्च अलंकारसर्वस्वस्य सूत्रवृत्त्योः उभयोरपि कर्तारम् रुय्यकमेव स्वीकुर्वन्ति।

विद्वद्भिः अलंकारसर्वस्वस्य वह्वयः व्याख्याः कृताः सन्ति। व्याख्याकारेषु अलकस्य नाम सर्वप्रथममायाति। परञ्च अलकस्य व्याख्या क्वापि नोपलभ्यते। अलंकारसर्वस्वस्य द्वितीयो व्याख्याकारो जयरथोऽस्ति। अयं जयरथः अनेकेषां ग्रन्थानां प्रणेता ख्यातिलब्धो विद्वान् च वर्तते। रुय्यकस्यालंकारसर्वस्वस्य तृतीयो व्याख्याकारः समुद्रवन्धो वर्तते। श्रीविद्याचक्रवर्ती अलंकारसर्वस्वस्य चतुर्थो व्याख्याकारो वर्तते। चक्रवर्ती कृता 'अलंकारसंजीवनी' व्याख्यापि वर्तते। इत्थमनेकैः विद्वद्भिर्व्याकृतोऽस्ति अलंकारसर्वस्वम्" ग्रन्थः।

पण्डितराजजगन्नाथस्य परिचयः

(सं० सं० वि० वि० ८१, ७९)

संस्कृतसाहित्यस्यालंकारिकेष्वन्तिमः प्रौढतमश्चालंकारिकोऽयमासीत्पण्डितराजो जगन्नाथः। अस्य पिता पेरुभट्टः माता च लक्ष्मीदेव्यासीत्। अप्पयदीक्षितस्य समकालिक तैलंगब्राह्मण आसीत्। यद्यपि पण्डितराजस्य पिता विभिन्नानामाचार्याणां सविधे विभिन्नानां विषयाणामध्ययनमकार्षीत् परञ्चायं नु स्वपितृचरणानामेव सविधे सर्वा विद्या अध्यगात्। श्रूयते पण्डितराजः विभिन्नानां पारदृश्वा, वाक्पटुः अभिज्ञेषूत्तमश्च आसीत्। अस्य वाक्पाटवमेवावेक्ष्य दिल्लीश्वरः एनं स्वसभापण्डितरूपेण नियुनक्तिस्म। यवनराजकुमारं 'दाराशिकोह'मयं संस्कृतमपाठीदित्यपि श्रूयते। स्वयमेव पण्डितराजो दाराशिकोहस्य प्रशंसामलेखीत्। पण्डितराजसम्वन्धिन्यो वह्वयः किंवदन्तयः सन्ति। पण्डितराजः कस्याश्चन यवन्याः रूपेणाकृष्टमनास्तामुपयेमे अनेन कृतेन कर्मणा तत्कालीनो भट्टोजिदीक्षित एनं यवनीसंसर्गदूषितम् मत्वा समाजाद् वहिश्चकार। श्रूयते—वार्द्धक्ये समाजाद् वहिष्कृतः गङ्गातटम् उपविश्य गङ्गालहर्या गङ्गां सस्तुतवान्। पण्डितराजस्य प्रीतिप्रकर्षेण प्रसन्ना भगवती भागीरथी एनं यवन्या साकमात्मसात् चकार।

पण्डितराजस्य कालः—यवनराजः शाहजहाँख्यस्य तत्पुत्रस्य दाराशिकोहस्य समकालिकत्वात् पण्डितराजस्य समयनिर्धारणं सुकरमास्ते। दाराशिकोहस्य प्रशंसायामयं 'जगदाभरणम्' नामकमेकं काव्यमेव व्यरीरचत्। अतएवास्य समयः ईस्व्याः सप्तदशशताब्द्या मध्यभागोऽस्तीति निश्चीयते।

पण्डितराजस्य ग्रन्थाः—पण्डितराजस्य अनेके ग्रन्थास्सन्ति। ते च–भामिनीविलासः, गङ्गालहरी, करुणालहरी, अमृतलहरी, लक्ष्मीलहरी, आसफविलासः, जगदाभरणम्, प्राणाभरणम् सुधालहरी, यमुनावर्णनचम्पूः, मनोरमाकुचमर्दनम्, रसगङ्गाधरः, प्रभृतयस्सन्ति।

पण्डितराजस्य रसगंगाधरः अलंकारशास्त्रस्य प्रसिद्धतमो ग्रन्थोऽस्ति। अस्मिन् ग्रन्थे पण्डितराजस्य पाण्डित्यं परां काष्ठां चुम्बति। अयं ग्रन्थः द्वयोराननयोर्विभक्तोऽस्ति। प्रथमे आनने काव्यलक्षणम्, काव्यभेदाः, रसस्वरूपम्, रसानां भेदाः, रसनिष्पत्तिसूत्रस्याष्टधा व्याख्यानम्, स्थायिनां वर्णनम्, रसदोषाः, गुणाः, प्राचीनोक्तानां शब्दार्थयोः गुणानां ओजःप्रसादमाधुर्येष्वन्तर्भावः, भावानां वर्णनम्, व्यभिचारिणां वर्णनम्, अलक्ष्यक्रमध्वनेश्च वर्णनम् कृतमास्ते।

द्वितीय आनने—संलक्ष्यक्रमध्वनिः, नानार्थशक्तिनियामकानां शब्दशक्तिमूलको ध्वनिः, अर्थशक्तिमूलको ध्वनिः, शब्दार्थोभयशक्तिमूलको ध्वनिः, शक्तीनां निरूपणम्, अलंकाराणां निरूपणम् प्रभृतयो विषयाः सोपष्टम्भं व्याकृताः सन्ति।

रसगंगाधरस्य सर्वाणि उदाहरणानि पण्डितराजकृतान्येव सन्ति। सः एकमप्युदाहरणमन्यकृतं रसगंगाधरे नहि स्वीचकार। पण्डितराजस्स्वयमेवाह रसगंगाधरस्यादौ—

निर्माय नूतनमुदाहरणानुरूपं,
काव्यं मयात्र निहितं न परस्य किञ्चित्।
किं सेव्यते सुमनसां मनसाऽपि गन्धः,
कस्तूरिकाजननशक्तिभूता मृगेण।

रसगंगाधरे पण्डितराजस्य दर्पोक्तयः अपि संलक्ष्यन्ते। यद्यपि ताः दर्पोक्तयः कटुसत्यं विभ्रति। तथाहि—

परिष्कुर्वन्त्वन्ये सहृदयधुरीणाः कतिपये,
तथापि क्लेशं मे कथमपि गतार्थो न भविता।
तिमीन्द्रास्संक्षोभं विदधतु पयोधेः पुनरिमे,
किमेतेनायासो भवति विफलो मन्दरगिरेः।

पण्डितराजः समानरूपेण कविः, वैयाकरणः, काव्यमीमांसकश्चासीत्। न्यायस्तु पण्डितराजस्य प्रियतमो विषयोऽस्ति यस्य सर्वत्र रसागंगाधरे समावेशस्संलक्ष्यते।

मनोरमायाः खण्डनम् मनोरमा–कूचमर्दिन्यां चकार पण्डितराजः । अप्पयदीक्षित 'चित्रमीमांसायाः' खण्डनम् चित्रमीमांसा 'खण्डने' कृतमास्ते । पण्डितराजः अलंकारिकेषु असमः पण्डितोऽस्ति । रसगंगाधरे तत्र तत्र काव्यप्रकाशकाराणामपि मतस्य समालोचनां चकार पण्डितराजः । पण्डितराजानुसारेण रमणीयार्थप्रतिपादकः शब्दः काव्यमिति काव्यलक्षणमास्ते ।

आनन्दवर्द्धनस्य परिचयः

(सं० सं० वि० वि० ७७)

काव्यमार्गे ध्वनिसम्प्रदायस्य प्रवर्तकः आनन्दवर्द्धनाचार्यः अलंकारिकेष्वाचार्येषु प्रधानतमं स्थान विभर्ति । स्वकीये ध्वन्यालोकनाम्नि ग्रन्थे अयम् ध्वनिसिद्धान्तस्य साङ्गोपाङ्गम्; वर्णनमकरोत् ।

अस्य कालविषये वहुधाविवादो नहि दृश्यते । राजतरङ्गिणी करेण कल्हल्-
नायमवन्तिवर्मण साम्राज्ये प्रख्यातकविरूपेणावर्णि । अलेखि च तेन महाकविना—
'मुक्ताकणः शिवस्वामी कविरानन्दवर्धन । प्रथां रत्नाकरश्चागात् साम्राज्येऽ-
वन्तिवर्मणः' । वुह्लरः जैकोवीमहोदयश्चावन्तिवर्मणः राज्यकालं ८५५–८८३ ई०
स्वीकुरुतः । केषाञ्चन विदुषां मतानुसारेणायमानन्दवर्धनः अवन्तिवर्मणः पुत्रस्य
शङ्करवर्मणः राज्यकाले (८८३–९०२ ई०) भुवमिमामलञ्चकार । इदमत्र समाधानं
भवितुमर्हति यदानन्दवर्धनः उभयोः अवन्तिवर्मशङ्करवर्मणोः राज्यकाले अवतिष्ट
इति । अतएव सः यशोवर्मापराभिधानवतः शंकरवर्मणः प्रणीतस्य रामाभ्युदयनाटकस्य
'कृतककुपितैः इत्यादिकश्लोकमुद्धृतवान् । शंकरवर्मणः समसामयिकः जयन्तभट्टः
आनन्दवर्द्धनस्य ध्वनिसिद्धान्तस्यखण्डनप्रसंगे एकत्रालेखिष्ट "एतेन शब्दसामर्थ्यमहिम्ना
सोऽपिवारितः । यमन्यः पण्डितम्मन्यः प्रपेदेक्वचनध्वनिम् । विधेनिषेधावगतिर्विधि-
ध्वधिनिषेधतः । विष्णुपदभट्टाचार्यं आनन्दवर्धनसमयं ९०२ ईस्वीयवर्षं स्वीकरोतिस्म ।"
महामहोपाध्यायः काणे स्वककीये 'संस्कृतसाहित्यस्येतिहास' नाम्नि ग्रन्थे आनन्द-
वर्धनस्य कालमिममेव स्वीकरोति ।

आनन्दवर्धनस्य वंशस्य विषये किंचिज्ज्ञातं नास्ति । देवीशतकानुसारेणास्य पितुर्नाम 'नोण' आसीदिति ज्ञायते ।

आनन्दवर्धनस्य ग्रन्थाः—देवीशतकम्, विषमवाणलीला 'अर्जुनचरितञ्चेति
त्रीणि काव्यानि सन्त्यानन्दवर्द्धनस्य । ध्वन्या लोकस्त्वानन्दवर्धनस्य प्रख्याततमोऽस्ति
ग्रन्थः । अनेनैव ग्रन्थेनायं ध्वनिसम्प्रदायस्याचार्यरूपेण प्रख्यातोऽभूत् । अभिनव-
गुप्तपादाचार्याणामनुसारेण आनन्दवर्धनस्यैकः दार्शनिकोऽप्यस्तिग्रन्थः तत्त्वालोक-
नामकः ।

आनन्दवर्धनस्य ध्वन्यालोकः—अनेनैव सुप्रथितेन ग्रन्थेन आनन्दवर्धनाचार्यः प्रसिद्धेः परां काष्ठामचुम्बत् । अस्मिन् ग्रन्थे आनन्दवर्धनाचार्यः प्रत्यपीपदत् यद् ध्वनि रेवाऽस्ते आत्मा काव्यस्य तत्र ग्रन्थस्यास्य प्रथमकारिकायामवोचदानन्दवर्द्धनो यत् ध्वनिर्सिद्धान्तविरोधिनां मतत्रयमुपलभ्यते—तनि च सन्ति मतानिं—(१) नास्त्येवध्वनिरित्येके प्राहुः, (२) अन्येच ध्वनेर्भात्तत्वमभ्युपजग्मुः, (३) केश्चांच ध्वनेरनिर्वचनीयतामङ्गीचक्रुः । एतेपां समेपामतमपाकृत्यध्वनेस्वरूपमत्र निरूप्यते . तथा च—

'काव्यस्यात्माध्वनिरिति वुधैर्यः समाम्नात् पूर्वः' तस्याभावं जगदुपरेभाक्तमाहुस्तमन्ये । केचिद्वाचां स्थितिमविषये तत्त्वमुचुस्तदीयं तेन ब्रूमः सहृदयमनः तत्वस्वरूपम् ॥' ध्वन्यालोकस्य द्वितीयोद्योते लक्षणामूलध्वनिमभिधामूलध्वनिश्च विशदं विविच्य गुणान् संक्षिप्ततो व्याचकार ध्वनिकारः । तृतीयोद्योते पदेन, वाक्येन, पदांशेन, प्रवन्धेन च ध्वनेः प्रकाश्यताम् प्रतिपाद्यरसानां विरोधाविरोधयोस्सिद्धान्तं न्यभान्त्सीदानन्दवर्धनाचार्यः । चतुर्थे चोद्योते न्यभान्त्सीदानन्दवर्धनाचार्यो यत् ध्वनि—गुणीभूतव्यङ्ग्योः प्रयोगेण काव्ये चमत्कारानन्त्यमुद्भवति । इत्थम् उद्योत्तचतुष्टयात्मके ध्वन्यालोकेऽस्मिन् ग्रन्थे ध्वनिविरोधिमतानि निपुणं निराकृत्य सप्रौढि ध्वनिसिद्धान्तं संस्थापयामास ।

अस्य ध्वन्यालोकग्रन्थस्य भागत्रयमास्ते—कारिकाभागो, वृत्तिभागो—उदाहरणभागश्च । केषाञ्चनालोकानां मतानुसारेण कारिकावृत्तिभागयोः कर्तारौ भिन्नौ स्तः । सहृदयनाम्नाचार्येण भवेद् विनिर्मितः कारिकाभागः वृत्तिभागस्य च कर्ताभवेदानन्दवर्धनः । परञ्चवहुधाऽपि पर्यालोच्य वयम् कारिकावृत्तिभागयोः कर्तरि पार्थक्यं नोद्वीक्षामहे । अतएव च स्वीकुर्महे कारिकावृत्त्योरुभयोरेककर्तृत्वमानन्दवर्धनस्यैवाचार्यस्य । उदाहरणानि वहुकविकृतानि स्वप्रणीतानिचोदाजहार आनन्दवर्धनाचार्य इत्यत्र नास्ति विसंवादलेशोऽपि ।

ध्वन्यालोकस्य व्याख्याद्वयी श्रूयते । तत्रैका चन्द्रिकाभिधा व्याख्या नेदानीमक्षिलक्ष्यी क्रियते । मन्ये कालविप्रकर्षात् विप्रणष्टा सा । ध्वन्यालोकस्य द्वितीया व्याख्या, नैकशास्त्र निष्णातस्य, शास्त्रीय मार्मिकान्तस्तल समुद्वेलनाग्रगण्यस्य अभिनवगुप्तपादाचार्यस्य अन्वर्थाभिधाना ध्वन्यालोकलोचनाख्या साहितीसुधासुहितमानसानां सुमनसां मनीषानिकषायमाणा रारङ्क्ति चेतांसि सहृदयानाम् ।

राजशेखरस्य परिचयः

(सं० सं० वि० वि० ८०)

संस्कृतस्य साहित्यस्य नाटककारेपु अलङ्काररिकेष्वन्यतमो राजशेखरः स्वप्रणीतनाटकानां प्रस्तावनासु स्वकीयं जीवनवृत्तम् विस्तारपूर्वकखीष्ट । महाराष्ट्रीय

ब्राह्मणवंशांवतंसस्यास्य कुलं मायावरस्य नाम्ना प्रसिदमास्ते। अस्य पत्नी अवन्तिसुन्दरी संस्कृतस्य विदुषी कवयित्री चासीत् । राजशेखरः स्वकीये काव्यमीमांसानाम्नि ग्रन्थे, पाकस्यप्रकरणे अवन्तिसुन्दर्याः स्वपत्न्य अपि मतमुल्लेखिष्ट ।

कालः—राजशेखरः काव्यकुब्जेश्वरयोर्महेन्द्रपालमहिपालयोराजगुरुरासीत् । प्रतिहारवंशीयशिलालेखानामनुसारेण महेन्द्रपालस्य दशमशताब्द्याः प्रारम्भे विद्यमानत्वादस्यापि समयः दशमशताब्द्याः प्रारम्भ एव निश्चीयते । राजशेखरः वाल्मीकिभर्तृमेण्ठभवभूतीनामवतारमात्मानंमेने । तथाहि—

> बभूव वाल्मीकिभवः कविः पुरा, ततः प्रपेदे भुवि भर्तृमेण्ठताम् ।
> स्थितः 'पुनर्योभवभूतिरेखया' सवर्तते सम्प्रति राजशेखरः ।
>
> (वालभारतम्)

सोढ्ढलो राजशेखरस्य विषये लिखति यत्—

> 'यायावरः प्राज्ञवरो गुणज्ञैराशंसितः सूरिसमाजवर्यैं ॥
> नृत्यत्युदारं भणिते गुणस्था, नटीवयस्योढरसा पदश्रीः ॥

धनपालस्तिलकमञ्जर्यां लिखति यत्—

> प्रसादगुणशालिन्या, प्रसन्न परिपवित्रमाः ।
> यायावरकवेर्वाचो मुनीनामिव वृत्तयः ॥

रचनाः—राजशेखरः वालरामायणे स्वकीयानां षट्प्रवन्धानां विषये वक्ति—'विद्धिनः षट्प्रवन्धान्' इति ।

ताश्च रचनाः निम्नाङ्कितास्सन्ति—(१) वालरामायणम्–इदं दशांकेषु निर्मितं नाटकमास्ते । (२) वालमहाभारतम्—इदं चतुर्ष्वंकेषु प्रणीता नाटिकास्ति । (३) विद्धशालभञ्जिका—अस्याम् चतूर्णमिंकानां नाटिकायाम्—रामचन्द्रवर्मणामात्मजा-मृगांकावली सम्राजा विद्याधरमल्लेन पर्यणायि-इति वर्णितम् । (४) कर्पूरमञ्जरी–प्राकृतभाषायाम् चतुर्षु यवनिकान्तरेषु विनिमितेय नाटिका प्राकृतभाषा–मयत्वात् सट्टकमित्यभिधीयते । (५) काव्यमीमांसा–संस्कृतकवि–शिक्षाविषयकोऽयं ग्रन्थः सम्प्रति अष्टादशाध्यायेषूपलभ्यमानोऽपि अपूर्ण एव वर्तते । (६) हरविलासः–यद्यप्ययं ग्रन्थो नोपलभ्यते इदानीमथाप्यस्य चर्चा हेमचन्द्रेण स्वकीये काव्यानुशासने कृता । एतेभ्यो ग्रन्थेभ्यो व्यतिरिक्ताः अन्येऽपि चत्वारो ग्रन्थाः राजशेखरेण प्रणीतास्सन्तीत्यास्ते साम्प्रतिकानामन्वेषण परायणानां विचारकाणां मतिः ।

राजशेखरः स्वयमेवात्मानं कविराजमलेखिष्ट । राजशेखरस्य काव्यमीमांसाऽनुसारेण स एव कविराजपदभाग्भवति यः समानरूपेण नैकासां भाषाणां विज्ञो भवति । राजशेखरो विविधासु भाषासु लब्धाधिकारः आसीदिति तदुक्त्येवाभाति—'गिरःश्रव्या दिव्याः प्रकृतिमधुराः प्राकृतधुराः । सुभव्योऽपभ्रंशः सरसरचनं भूत-

वचनम् । विभिन्नाः किमपि कमनीयाश्च त इमे, निबद्धा यस्त्वेषा स खलु निखिलेऽस्मिन्
कविवृषा ।

यद्यपि राजशेखरेण नाटचसाहित्यस्य प्रणयनं कृतम् तथाप्ययं नाटककारापेक्षया
स्वाभाविकः कविरासीदित्यस्य नाटचसाहित्यपर्यालोचनेनैव प्रतीयते । बालरामायणे
नाटके ७४१ श्लोकाः सन्ति । नाटच ग्रन्थे छन्दसां भूयसो संख्या नाटककारस्य
उद्रिक्तकवित्वमेव सूचयति । क्षेमेन्द्रो वक्ति यत् शार्दूलविक्रीडितैरेव प्रख्यातो राज-
शेखरः । 'शिखरीव परं वक्रैः सोल्लेखैरुच्चशेखरः ॥ राजशेखरेण कस्यचनापि
वर्णनेऽतीवनिपुणोऽस्ति । सीतायाः वर्णनं अत्यन्ताकर्षणयुक्तया शैल्या कुर्वन् सो वक्ति—
'सा करोति'—इन्दुर्लिप्त इवाञ्जनेन जडिता दृष्टिर्मृगीणामिव, प्रम्लानारुणिमेव विद्रु-
मलता श्यामेव हेमद्युतिः । पारुष्यं कलया च कोकिलवधूकण्ठेष्विवप्रस्तुतम् ॥
सीतायाः पुरतश्च हन्तशिखिनां बर्हासगर्हा इव ॥'

इत्थं प्रतिभाकाव्यप्रणयनप्रियः, पदे-पदे शब्द चमत्कारसन्निवेशपटुः, शब्दार्था-
लङ्काराणां समुचितप्रयोगचणपः काव्यमीमांसाकारो राजशेखरः सर्वेषां संस्कृता-
धीतिनां प्रियतमः कविर्वर्तते ।

विश्वनाथस्य परिचयः

(सं० सं० वि० वि० ७७)

साहित्यदर्पणाख्यस्य ग्रन्थस्य प्रणेता—श्रीचन्द्रशेखरमहाकविचन्द्रसूनुः अष्टा-
दशभाषावारविलासिनी भुजङ्गः, सहृदयगोष्ठिगरिष्ठानाम् श्रीमतां नारायणदास-
पादानाम्पौत्र महाकविविश्वनाथः, अलङ्कारशास्त्रप्रवक्ताचार्येष्वन्यतम् आसीत् ।

समयादिनिरूपणम्—यद्यपि कविपुंगवस्य विश्वनाथस्य समयादिनिरूपणोपयोगि
किमपि स्फुटतरं प्रमाणं नोपलभामहे, तथापि समुपलब्धानि कानिचन प्रमाणान्या-
धारीकृत्य तन्निरूपणे प्रवर्तामहे । तथा च—साहित्यदर्पणस्य चतुर्थे परिच्छेदे
कविरयम् यवनाधिपत्यल्लावुद्दीनखिलजीनामकम् – सन्धौ सर्वस्वहरणं विग्रहे प्राण-
निग्रहः । अल्लावुदीननृपतौ न सन्धिर्नच विग्रहः' । इति श्लोकस्य माध्यमेन स्मरति ।
अल्लावुद्दीनखिलजीनामकस्य यवनाधिपतेः शासनकालः १२९६ ईस्वीतः १३१६ ईस्वीम्
यावदभूत् । एतेन श्लोकेन प्रतीयते यत् विश्वनाथः अल्लावुद्दीनस्य शासनकालस्य
पश्चादेवाभूत् । साहित्यदर्पणस्य एका १३८४ ईस्व्यां लिखिता हस्तलिखिता प्रतिरपि
समुपलब्धा वर्तते । अनया विश्वनाथस्य कालः १३८४ ईस्वीतोऽर्वागेव निश्चीयते ।
महाकविविश्वनाथः नरसिंहविजयाख्यं काव्यमेकम् व्यधात् । तत्र अल्लावुद्दीनखिलजी-
पराजयितारं कलिङ्ग राज्यभूपतिं नरसिंहरावमस्तौपीत्—'आहवे जगदुद्दण्डराजमण्डल
राहवे' ।

श्रीनृसिंहमहीपाल ! 'स्वस्त्यस्तु तव वाहवे'। अनेननाभातियदयं महाकवि: कस्यचन कलिंगदेशवप्रशासितु: नरसिंहरावभूपते: राज्ये सन्धिविग्रहिक अभूत् ।

महाकवि–विश्वनाथप्रणीतया चन्द्रकला––नाटिकया आभाति यदयं कवि: कस्यचन भानुदेवनृपतेरपि सन्धिविग्रहिकोऽभूत् ।

एभि: सर्वै: प्रमाणैर्निश्चयते यत् अस्य महाकवे: त्रयोदशशताब्द्या: उत्तरार्द्धमारभ्य चतुर्दशशताव्द्या: पूर्वार्द्धो भवितु मर्हति काल: ।

अयं महाकवि: केवलं संस्कृतभाषाया एव विद्वान् नासींदपितु अष्टादशभाषावारविलासिनींभुजङ्ग: स्वस्मै लिखित्वा स्वीयां अष्टादशसु भाषासुनिपुणतां सूचयति—साहित्यदर्पणे विश्वनाथ: उदाहरण रूपेणैकमेतादृशं पद्यमुद्‌गृतवान् स्वनिर्मितम्—यस्य वहवीसु भाषासु समान एव अर्थो भवति । तच्चपद्यरत्नमिदमास्ते—

'मञ्जुलमणिमञ्जीरे कलगम्भीरे विलासंसरसस्तीरे । विरसासिकेलिकीरे किमालि ! धीरे च गन्धसमीरे ।' पद्यमिदम्–संस्कृत–प्राकृत–सौरसेनी–प्राच्यावन्ती–नागराप्रभंशेषु–समानरूपमेव भवति यस्मात् कारणात् सन्धिविग्रहिक: प्रधानामत्य आसीत् तस्मादेवकारणादस्य ब्रह्मणवशावतंसता सूचिता भवति । भगवान् मनुरपि ब्रह्मणस्यैव सन्धिविग्रहितां प्रावोचत्–तथाहि—

'सर्वेषान्तु विशिष्टेन ब्राह्मणेन विशेषत: । मन्त्रयेत् परमं मन्त्रम् राजा षाड्गुण्यसंयुतम् ।'

विश्वनाथस्य ग्रन्था:—विश्वनाथस्य नवसंख्याका: ग्रन्था: अस्यनवनवोन्मेषशालिन्या प्रज्ञाया: परिचयम् ददति । ते च सन्ति निम्नांकिता ग्रन्था—(१) राघवविलास महाकाव्यम् । (२) चन्द्रकला (नाटिका) । (३) प्रभावतीपरिणयम् (नाटकम्) । (४) कुवलयाश्वचरितम् (प्राकृतं काव्यम्) । (५) प्रशस्तिरत्नावलि: । षोडशभाषासु निर्मितं करम्भकम् । (६) नरसिंहविजय: (खण्डकाव्यम्) । (७) कंसवधम् (काव्यम्) । (८) साहित्यदर्पण: । (९) काव्यप्रकाशदर्पण: (काव्यप्रकाशस्य व्याख्या) ।

विश्वनाथस्य साहित्यदर्पण:—यद्यपि सन्ति विश्वनाथप्रणीता: नवसंख्याका ग्रन्था: परञ्च तेषु समेषु उडुगणेषु चन्द्रो यथा विभाति साहित्यदर्पणो ग्रन्थ: । अस्मिन् ग्रन्थे दशसङ्ख्याका: परिच्छेदा: सन्ति । प्रथमे परिच्छेदे काव्यंलक्षयताऽनेन विदुषा महता संरम्भेण काव्यप्रकाशकृतं काव्यलक्षणं निराकृतम् । द्वितीये परिच्छेदे वाक्यं पदञ्च निरूप्य शब्दशक्तीनां विशदं विवेचनञ्चकार । तृतीये रसस्य व्याख्यां कृत्वा नायकनायिकादीनामपि विवेचनमकार्षीत् । नायकनायिकानां वर्णनम् काव्यप्रकाशापेक्षयानवीनो विषयो वर्तते । विश्वनाथ: चतुर्थे परिच्छेदे गुणीभूतव्यङ्ग्यकाव्यम् विशदीचकार । पञ्चमे परिच्छेदे व्यंजना विरोधिनी वादिनो निराचष्टे । षष्ठे काव्यभेदानां

कथां शानां व्यवच्छेदः आश्वास इति वध्यते ।
आर्यविक्त्रापवक्त्राणां छन्दसा येन केनचित् ॥
अन्यापदेशेनाश्वासमुखे भाव्यर्थसूचनम् ॥

कल्पनाप्रसूतत्वात्, सरसगद्यत्रावयविन्यासमयत्वात् कादम्वरी कथायामेवान्तर्भवति हर्षचरितश्च कविवंश वर्णनामयत्वात् आख्यायिकायामन्तर्भवति । सैषा कादम्वरी गद्यकाव्यस्योत्तमां कोटिं विभर्ति साहित्यदर्पणस्य षष्ठे परिच्छेदे विश्वनाथः गद्यस्य भेदचतुष्टयं विवृणोति । तथाहि—

वृत्तबन्धोज्झितं गद्यं मुक्तकं वृत्तगन्धि च ।
भवदुत्कलिकाप्रायं चूर्णकश्च चतुर्विधम् ॥
आद्यं समासरहितं वृत्तभागयुतं परम् ।
अन्यद् दीर्घसमासाढ्यं तुर्यंश्चाल्पसमासकम् ॥

एतेषां चतुर्णाम् गद्यानामुदाहरणानि कादम्वर्याम् समुपलभ्यन्ते । तद्यथा—

‘यश्च मनसि धर्मेण, कोपे यमेन, प्रमादे धनदेन, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्याः मुखे शशिना, वले मरुता, रूपे मनसिजेन तेजसि सवित्रा चेति···· ····’

द्वितीयम् यथा—अम्विकाकरतलमिव रुद्राक्षग्रहणनिपुणम् शिशिरसमयसूर्यमिव कृतोत्तरासंगम्, वडवानलमिव सततपयोभक्ष्यम्··· ···· ····जावालिकम् ।
(का० पूर्वार्द्धम्)

तृतीयम् यथा—उद्दामकेकारवानुमीयमानमरकत–कुट्टिमस्थितिशिखण्डिमण्डलम्, अतिशिशिरचन्दनविटपि–छायानिषण्णनिद्रायमाणगृहसारसम्,·········राजकुलम्········।
(का० पू०)

चतुर्थम् यथा—सप्तच्छदतरव इवकुसुमरजोविकारैः–रासन्नवर्त्तिनां शिरशूलमुत्पादयन्ति । आसन्नमृत्यवे इव वन्धुज़नमपि नाभिजानन्ति । उत्कुपितलोचना इव तेजस्विनो नेक्षन्ते । कालदष्ट इव महामन्त्रैरपि न प्रतिवुध्यन्ते । (का० पू०)

वाणभट्टस्य हर्षचरितमपि गद्यकाव्यदृष्टया महत्त्वपूर्णमास्ते । तत्र काव्ये वाणभट्टः स्ववशवृत्तवर्णनपुरस्सरम् राज्ञो हर्षवर्द्धनस्यापि वृत्तमवर्णयत् ।

वर्णनस्य श्रयिष्टया शैल्या शब्दार्थालङ्काराणामासर्वत्र स्थाने प्रयोगेण नवनवोन्मेपशालिन्या प्रज्ञया कल्पयित्वा उपमाया असम प्रयोगचातुर्येण, पाञ्चाल्या रीतेः प्रयोगे धुरंवहत्वेन’ कल्पनाप्रसूतया मनोहारिण्या वर्णनया कादम्वर्या अङ्गीभूतस्य रसराजस्य शृङ्गारस्योभयप्रकारस्य पूर्णसफलतया निर्वाहपुरस्सरम् तदङ्गभूतानाम् करुणवीरभयानकशान्तादिकानाम् कुशलनिर्वाहे चणपतया चायं महाकविर्वाणभट्ट अतिशेते स्वेतरान् समस्तान् महाकवीनः ।

कादम्बरीं प्रेक्षं-प्रेक्षं विद्वांसः वाणभट्टस्य कल्पनाभूमानमनुमिन्वन्ति। वाणभट्टः कादम्बर्याम् प्रायो नियमतः एकस्य दीर्घस्य वाक्यस्यानन्तरम् एकम् लघुवाक्यं लिखति। वाणभट्टस्यैव कल्पना वैभवमवेक्ष्य केचन प्राहुः—"गद्यं कवीनां निकषं वदन्ति।" इति

भारवेः परिचयः

(सं० सं० वि० वि० ८१, ७८)

सामान्यतः संस्कृतज्ञेषु विराजतेतममिदं वाक्यम—'भारवेरर्थँ गौरवम्' इति। अयम् महाकविर्भारविः कौशिकगोत्रज आसीत्। भारवे पितुर्नाम नारायणस्वाम्यासीत्। भारवेः पूर्वजाः आनन्दपुरनामक नगरमध्यवात्सुः। भारवेरपरं नाम दामोदरकविरप्यासीदित्यास्ते प्रथा।

(१) भारवेर्नाम चालुक्यवंशीयस्य पुलकेशीन् द्वितीयस्य समकालिके ऐहोलशिलालेखे कालिदासस्य नाम्ना साकं समुपलभ्यते। तथा हि—येनायोजि नवेऽश्मस्थिरमर्थंविधौ विवेकिना जिनवेश्म। स विजयतां रविकार्तिः कविताश्रितकालिदास–भारविकीर्तिः।

अस्य शिलालेखस्य कालः ५५६ शकाब्दो वर्तत इति—"पञ्चाशत्सु कलौं काले षट्सु पञ्चशतेषु च। समासु समतीतासु शकानामपि भूभुजाम्॥

(२) अवन्तिसुन्दरी कथायाम् दण्ड्यवर्णयद् यद् भारविः तस्य पितामह दामोदरस्य मित्रमासीद्।

भारवेरेकमेवमहाकाव्यम् किरातार्जुनीयमुपलभ्यते। स्वयमेवायं कविरभान्त्सीद्यद् तस्य 'प्रसन्नगम्भीरपदा सरस्वती' वर्तते। काव्यमिदं किरातार्जुनीयम् अर्थगाम्भीर्याय प्रख्याततममास्ते। साहित्यशास्त्रे कवयः ललितभावानां प्रकाशनाय माधुर्यगुणम्। उग्रभावानां प्रकाशनाय चौजगुणं निवेशयामासुः काव्ये। कविरयं भारवि अर्थगा- म्भीर्यस्य प्रकाशनाय प्रसादगुण गुम्फितस्य शब्दसमूहस्य काव्ये सन्निवेशमकार्षीद्। भारवेश्शैली समीक्षयता सूरिणा मल्लिनाथेन प्रोक्तम्—

नारिकेलफलसम्मितं वचो भारवेः सपदि तद्विभज्यते।
स्वादयन्तु रसगर्भनिर्भरं सारमस्य रसिका यथेप्सितम्॥

विषमाऽपि भारवेः पद्धति सरसा आसीदिति अस्य व्याख्यानमपि मल्लिनाथेन कृतम्! आह हि—

नाना निबन्ध विषमैकपदैर्नितान्तम्,
साशङ्कचंक्रमणखिन्नधियामशंकम् ।

कर्तुं प्रवेशमिह भारविकाव्यवन्धे,
घण्टापथं कमपिनूतनमातनिष्ये ॥

भारवेः गाम्भीर्यंक्वाप्यौद्धत्यं नह्युपलक्ष्यते; कीथः भारवेश्शान्तस्यैव गरिम्णः प्रशंसां करोवि–तथाहि–नूनं दुर्योधनेन युधिष्ठिरं प्रवञ्चयित्वा अखिलेयमिला स्ववशीकृता इति प्रणम्य निवेदयिष्यतो वनेचरस्यमनो न विव्यथे, यतो हितैषिणः मृषाप्रियं नहि प्रविवक्षन्ति ।

कृतप्रणामस्य महीं महाभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो नहि
प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥

किरातार्जुनीये महाकाव्ये दीर्घसमासानां सर्वथा अभावो दृश्यते । महाकवेरस्य काव्ये अलंकाराणामुचिताः प्रयोगा विराजतेतराम् । सर्गेषु महाकाव्यं निबन्धनता भारविणा चित्रकाव्यस्यापि सन्निवेश. कृतः यत्र एकाक्षरात्मकोऽपिश्लोकः दृष्टिपथमञ्चति । भारवेः कतिपये श्लोकाः अर्थगाम्भीर्याय प्रख्याततमास्सन्ति । तत्र—

सहसाविदधीत नक्रियामविवेकः परमापदां पदम्
वृणुते हि विमृश्य कारिण गुणलुब्धास्स्वयमेव सम्पदः ।

इति श्लोकः सुमनसा मनस्सु प्रप्रथमं पद निधत्ते । अनेनैव प्रकारेण—

‘व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ॥’
‘सदानुकूलेषु हि कुर्वते रतिं नृपेष्वमान्येषु’ च सर्वसम्पद. ।

इत्यादिकानि वाक्यानि सहृदयानां हृदयानि हरन्ति । यद्यप्यस्मिन् काव्ये वहूनां छन्दसां प्रयोगः कृतो महाकविना अथापि सर्वापेक्षया वंशस्थ वृत्तस्यैव प्रयोगो दृश्यते । क्षेमेन्द्रोऽपि वंशस्थमेववृत्तं राजनीतिवर्णनाऽनुगुण मनुते ।

किरातार्जुनीयस्य कथानकस्योपजीव्यम् महाभारतस्य वनपर्वणः कथा वर्तते । किरातार्जुनीये महाकाव्ये अर्जुनेनद्वारा शिवस्यौपासनं कृतं यतोऽतो कविरयं प्रकृत्या शैव आसीदिति नस्ति तिरोहितं विपश्चिदपश्चिमेभ्यः ।

माघस्य परिचयः

(सं० सं० वि० वि० ८०, ७७)

संस्कृतसाहित्यस्य वृहत् त्रय्यामन्यतमस्य शिशुपालवधस्य महाकाव्यस्य प्रणेता महाकविर्माघः प्रख्याततमोवर्तते । संस्कृतसाहित्यस्य महाकविषु । माघकविना स्वय-

मेव प्रणीतेन कविवंगपरिचयेन पंचश्लोकात्मकेन एतावन्मात्रं ज्ञायते यन्माघस्य महाकवेः पितुर्नाम दत्तकः आसीत् । दत्तकः परमोदारः वदान्यशूरश्चासीत् । सर्वेषामाश्रयदातृत्वादयम् 'सर्वाश्रयः' इति नाम्नापि परमां प्रथामगात् । महाकवेरस्य पितामहः 'श्रीसुप्रभदेवः' श्रीवर्मलस्य राज्ञः धर्मसचिवः आसीत् । राजा 'श्रीवर्मलः' श्रीसुप्रभदेवस्योपदेशान् सश्रद्धं श्रुत्वा तेषा मनुष्ठानमप्यकार्षीत् । इत्येतावन्मात्रं स्वपरिचयमलेखिष्ट महाकविर्माघः स्वीयः । अतएव माघस्य जन्मस्थानं समयादिकम् च सर्वथाऽजातमेवास्ते । अत्र माघस्य समयादिकम् कैश्चिदन्तरङ्गैर्वहिरङ्गैश्च साधनैः विरूप्यते ।

समयादिनिरूपणम्—'भोज प्रवन्ध' नाम्नि प्रबन्धकाव्ये बल्लाल पण्डितः, महाकवेर्माघस्य तस्य पत्न्याश्च वदान्यतायाः प्रभूतं वर्णनमकार्षीत् । मेरुतुङ्गाचार्योऽपि—'प्रबन्धचिन्तामणौ' माघकवेः पितुः परमोत्कृष्टमैश्वर्यं वणयन् सपत्निकस्य माघकवेः वदान्यत्वमवर्णयत् । इमे वर्णने प्रेक्ष्य केचनालोचकाः एकादशताब्दीं माघस्यकालम् प्रोचुः । परञ्च भोजप्रबन्धचिन्तामण्योः कल्पनाप्रधानत्वात् ऐतिह्यतत्त्वस्य तत्रानाकलनात् तयोरनुसारेण माघस्य एकादश शताब्दी एवस्थितिकाल इति निर्धारणम् नादरणीयम् । माघस्य कालनिर्णयार्थम् निम्नांकिता युक्तयोरत्रावधेयाः ।

(१) आनन्दवर्द्धनाचार्यः ध्वन्यालोकस्य 'अलङ्कारान्तरस्यापि···· ··· ····,' (२।२५७) कारिकायाः वृत्तौ शिशुपालवधस्य 'त्रासाकुलः परिपतन्···· ··· ····' (५।५३) (८।२६) इति श्लोकम् 'रम्या इति प्राप्तवतोः पताकाः···· ··· ····' (५।५३) इति श्लोकश्चोदाहरणरूपेणोदाजहार । (२) अष्टम शताब्द्या अन्तिमे भागे विद्यमानः वामनाचार्यः काव्यालङ्कार सूत्रवृत्तौ ग्रन्थे—'सम्भाव्यधर्मस्य तदुकर्षकल्पनातिशयोक्तिः' इति सूत्रस्योदाहरणरूपेण माघकविविनिर्मितम् 'उभौ यदि व्योम्नि पृथक् प्रवाहौ··· ···· ····' (३।८) इति श्लोकमुद्धृतवान् । एतेन सिद्धयति यत् माघः वामनाचार्यस्यावर्गिवाभूत् । (३) 'अनुत्सूत्रपदन्यासा सद्वृत्तिः सन्निवन्धना···· ··· ····' (२।११२) श्लोके स्वयं माघकविः काशिकायाः न्यासवृत्तोः श्लाघांचकार । एतेन ज्ञायते यत् सः काशिकाकारस्य पश्चाद्वभूव । (४) षष्ठशताब्द्या प्रथमे शतके विद्यमानः वाणभट्टोपि श्रीहर्षचरिते काशिकावृत्तेः चर्चां करोति । अतएव महाकवेर्माघस्य समयः सप्तम शताब्दी स्वीक्रियते । महाकवे र्माघस्य शिशुपालवधमहाकाव्यम् संस्कृतवृहत्त्रय्यामन्यतमं स्थानं विभर्ति । अस्य महाकाव्यस्य कृते सति निपुणेनिभालने प्रतीयते यन्माघकविः प्रकृतेरसूक्ष्मा वेक्षकः वेत्ता विश्वेषाम् तन्त्राणाम् व्याकरणशास्त्रे कृतिभूरिपरिश्रमः, मन्त्रायुर्वेदयोरसमोऽभिज्ञः, मन्वादिधर्मशास्त्राणाम् परमार्थपर्यालोचकः, काव्यनाटचालङ्काराणाम् मर्मज्ञशिरोमणिश्चासीत् ।

महाकविर्माघः स्वभावत एव वैष्णव आसीदिति—श्रियः प्रतिः श्रीमति शासितुं.... ... .' (१।१) इति शिशुपालवधमहाकाव्यस्य प्रथमेन श्लोकेन प्रतीयते। सम्पूर्णमिदं काव्यम् भगवतः श्रीकृष्णस्य चरित्राणां निवन्धनरूपेण विराजतेतराम्। किंवदन्त्यनुसारेण शैवमहाकवेः भारवेः किरातार्जुनीयमहाकाव्यस्य प्रत्यनीकतया—श्रीवैष्णवमहाकविर्माघः शिशुपालवधमहाकाव्यस्य निर्माणकृत्वा संस्कृतसाहित्याकाशे वियन्तुलितमध्यहंस इव नैजेनातुलितेन प्रज्ञाप्रतापेन विद्योततेतराम्। अस्य शिशुपालवधमहाकाव्यस्य काव्यनैपुण्यं दर्शं–दर्शं सहृदयाः केचन प्रोचुः—'मेघे माघे गतं वयः' इति। अस्य महाकाव्यस्य शब्दराशेः विपुलं भण्डारमवेक्ष्यप्रावोचन् केचन—नवसर्गगते माघे नवशब्दो न विद्यते' इति। महाकाव्यस्यास्य काव्यत्वश्रेष्ठ्यमेव दृष्ट्वा कैश्चिदस्य महाकाव्यस्य प्रशंसकैरुक्तम्—'काव्येषु माघः कविकालिदासः' इति। कालिदासीय काव्यानाम् उपमायाः सौन्दर्यम्, किरातार्जुनीयमहाकाव्यस्यार्थ—गौरवम्, पदलालित्य सम्राजानाम् दण्डिमहाकवे काव्यानाम् पदलालित्यञ्चैकत्रैव 'शिशुपालवव' नाम्नि महाकाव्ये सहृदयैः काव्यमिदं बहुधा विवेचयद्भिः प्रोक्तम् 'माघे सन्ति त्रयोगुणाः' इति।

भासस्य परिचयः

(सं० सं० वि० वि० ८०, ७९, ७७)

महाकविर्भासः कदाऽभूदिति नास्ति निश्चप्रचम्। भासस्य कालनिर्णये आभ्यन्तराणि वहिरङ्गानि च कानिचन सन्ति साधनानि तानि चाधो प्रस्तूयन्ते।

(१) महाकविः कालिदासः 'प्रथित यशसां भाससौमिल्लकविपुत्रादिनाम्' इत्यादिके वाक्ये भासम् महाकवि ससम्मानम् सस्मार; इति कालिदासात् पूर्ववर्ती आसीत् भासः इति निश्चीयते।

(२) अभिनवगुप्तपादाचार्यः अभिनवभारत्याम् 'त्रेतायुगं तदिह हन्त न मैथिली सा ....' इत्यादिकं श्लोकम् "महाकविना भासेनापि स्वप्रवन्धे उक्तम्" इति लिखित्वोदाहृतवान्।

(३) बाणभट्टः स्वकीये हर्षचरितनाम्नि ग्रन्थे भासस्य विषयेऽलेखीत् 'सूत्रधार कृतारम्भैः' इत्यादिकम् वाक्यम्।

(४) महाकविर्दण्डचपि—'सुविभक्तमुखाद्यङ्गैः' इत्यलेखीत्।

(५) महाकविर्भासः भरतकृतनियमानां ननुसरणं नहि करोति। अतएव ज्ञायते यत् भरतपूर्ववर्ती वर्तते भासः।

[क] उपर्युक्तानि साधनानि साक्षीकृत्य केचन भासस्य कालम् १०० ई० पू० मानयन्ति!

[ख] प्रोफेसर बर्नटः भासम् ईस्वीयस्य सप्तमशताब्द्याम् स्थितम् स्वीकरोति ।

[ग] स्टेनकेनो महोदयः विन्टरनिजश्च भासम् ईस्वीयस्य द्वितीय चतुर्थशताब्धोरन्तगले स्थितम् स्वीकुरुतः ।

भासस्य चतुर्दशरूपाणि इदानीं यावदन्वेषितानि वर्तन्ते । तानि च—

(१) प्रतिज्ञायौगन्धरायणम्, (२) अविमारकम्, (३) स्वप्नवासवदत्तम्, (४) प्रतिमानाटकम्, (५) अभिषेकनाटकम्, (६) मध्यमव्यायोगः, (७) पञ्चरात्रम्, (८) दूतवाक्यम्, (९) दूतघटोत्कचम्, (१०) कर्णभारः, (११) बालचरितम्, (१२) ऊरुभङ्गम्, (१३) दरिद्रचारुदत्तम्, (१४) यज्ञफलञ्च ।

इमानि सर्वाणि रूपकाणि समानरूपेण वाक्यविन्यासेन समन्वितानि सन्तीति नास्ति विसंवादः एतेषां सर्वेषाम् भासेनैव प्रणीतत्वे । परञ्च गणपतिस्त्री मनुते यद् भासः द्वेधा अवातरत भारतभूमौ ! प्राचीनो भासः यस्य कालिदास प्रभृतयोऽपि स्मरणं चक्रु सो नास्ति एतेषां चतुर्दश संख्याकानां रूपकाणां कर्ता अपितु एतेषां निबन्धनं तु कश्चित् इस्वीयस्य द्वादशशताब्द्यां समुद्भूतः केरलदेशीयो भासः अकार्षीत् । परञ्च कल्पनाश्रितेयं धारणा विचारकाणां मनसानामानुकूल्यं नो विभर्ति ।

भासस्य एतेषु समेषु रूपकेषु प्रतिज्ञायौगन्धरायणम्, प्रतिमा नाटकम्, स्वप्नवासवदत्तम् इति त्रीणि रूपकाणि सहृदयानां हृदयरञ्जने प्रख्याततमानि वर्तन्ते ।

एतेषां रूपकाणां अधिकतमानां उपजीव्य महाभारतम् वर्तते । प्रतिमानाटकस्योपजीव्यम् बाल्मीकीयम् रामायणं स्यादिति तर्कयितुं शक्यते । अथापि कविना तत्रापिस्वकल्पनाया बहुलः प्रयोगः कृतः ।

प्रतिज्ञायौगन्धरायणस्वप्नवासवदत्तयोः उदयनवासवदत्तयोः कथा वर्तते । 'स्वप्नवासवदत्तम्' नाम्नि रूपके भासः रूपकनिर्माण कलायाः काष्ठां चुचुम्ब ।

वासवदत्तायाः मातापितरौ ऐषीष्टाम् तस्या उद्वाहम् उदयनेन साकम् कर्तुम्; परञ्चेमं प्रस्ताव नैच्छताम् मातापितरौ राजकुमारस्योदयनस्य । एकदा आखेटप्रियः उदयनो मृगयाव्यासक्तः कदाचित् वने परिचरन्तमेकं हस्तिनः दृष्ट्वा तस्य वधं कामयमानः तत्सविधे जगाम । परन्तु सः काष्ठनिर्मितः स्वचालितः हस्त्यासीत् यस्याभ्यन्तरे अनेके वीराः गुप्ता आसन् । ते उदयन बद्ध्वा महासेनस्य नगर्यामानीतवन्तः । महासेनः वासवदत्तायै वीणावादनस्य शिक्षां दातुमादिशत् उदयनम् । वीणावादनम् शिक्षयन् उदयनः वासवदत्तायाः प्रेमपाशपरिबद्धः सन् कदाचिद्रात्रावेव तया सह स्वराज्ये पलायति स्म । तयैव साकम् कालम् यापयन् सः विलासस्य परां काष्ठामगात् । तदात्वे

कश्चन नरेशः तस्य राज्यस्यांश मपजहार। तदा उदयनस्य प्रधानामात्यः यौगन्धरायणः
वासवदत्ताया अनुमत्या प्रचारयामास वासवदत्ता अग्नौ दग्धाऽभूदिति। स्वयं तया
साकम् मगधनगरे गत्वा वासवदतां पदमावत्या हस्ते न्यासीकृत्य स्वयमकुत्रचिदगात्।
ततः मगधेशपुत्र्या साकम् उदयनस्य विवाहोऽभूत्। पुनः मगधसेना सहायेन दिजितं
राज्यं स्वकीयं चकार सः अपरस्यामात्यस्य रूमण्वतः सहायेन। तदनन्तरं सः प्रकटो
भूत्वा वासवदत्तां च पद्मावत्या साकं नित्रसन्तीम् साक्षात्कृत्य यौगन्धरायणः स्वमनो-
भिलाषस्य समागनाम् पूर्तिम् निवेदयामास राज्ञः समक्षम्। इयमेत्रकथा प्रकाग-
:तरेण—प्रतिज्ञायौगन्धरायणस्वप्नवासवदत्तयो रुभयोरेव रूपकयोः वर्तते। स्वप्न-
वासवदत्ते मनोवैज्ञानिकतायाः चूडान्तनिदर्शनम् वासवदत्तोदयनयोः स्वप्नजाग्रतवार्ता-
लापप्रयोगः साम्प्रतिकानाम् सर्वेषाम् मनोवैज्ञानिकानां कल्पनाभूमिमतिशेते।

श्रीहर्षस्य परिचयः

(सं० सं० वि० वि० ८०, ७८)

संस्कृतसाहित्याकाशस्यानुपेमेयो नक्षत्रः, कवितार्किकाग्रेसरः, श्रीहीरपाण्डिताव्
मामल्लदेव्यां लब्धतनुजन्मा, कान्यकुब्जेश्वराव् सप्तयोजनविस्तृतया वसुन्धरायाः
लब्धसाम्राज्यात् राज्ञोजयन्तचन्द्रस्य करादनुदिनं ससम्मानम् ताम्बुलद्वयस्य लब्धा
कर्ता महाकाव्य–वाद–प्रशस्त्यादिकग्रन्थानां, अनुष्ठाता चिन्तामणिमन्त्रस्य, साक्षात्कर्ता
भगवत्यास्त्रिपुरायाश्चरणयुगलस्य, पराजेता स्वपितुः प्रत्यर्थिनः, उदयनाचार्यस्य,
वेदवेदान्त–व्याकरण–न्यायवैशेषिकादिशास्त्राणामसपो ज्ञाता, काव्यनिर्माणकलाको-
विदः श्रीहर्षो स्वासाधारण या प्रज्ञया कस्य सचेतसः साहित्यसौहित्यसुधास्वादनपटोः
चेतः नालं जराहृषीनि ?

श्रीहर्षस्य विषये इयं प्रख्यातिः वर्तते यत्—कान्यकुब्जेश्वरस्य जयन्तचन्द्रस्य
राज्यसभापण्डितम् कवितार्किकचक्रकिरीटहीरकम् कवि हीरम् कदाचित् कश्चन
तर्कधनः पण्डितः वादप्रसङ्गे पराजयत। नेन दुखेनार्दितान्तः करणः श्रीहीरः मरण-
तल्पेविद्यमानोऽपि प्रावोचत नैजम् पुत्रम् श्रीहर्षम्–पुत्रक! अस्मिन् मृत्युकालेऽपि
नैजं वादपराजयं स्मारं–स्मारम्: नहि सुस्थितश्चावति ममान्तःकरणम् अतएव नैजेन
विद्याभूम्ना महिम्ना सः तार्किकः अवश्यम् पराजेयः; यद्यसित्वन् ममौरसः सुतः।'
श्रीहर्षोऽपि तथा कर्तुं स्वमूमूर्षोः पितुः पुरस्तात्प्रतिजज्ञे—नूनन् मया सो वादि-
प्रतिभटः पराजयिष्यते। तदनन्तरम्; जाले वयसि विद्यमान एव सः चिन्तामणि-
मन्त्रस्यानुष्ठानम् कृत्वा त्रिपुराम् भगवतीमपरोक्षयामास। लब्ध्वा च भगवत्याः
प्रसादेन तुळं वैँदुष्यम् पराजित्य च समयेन स्वपितुर्नादिभटम्, कान्यकुब्जेश्वरसभायाः
प्रधानपण्डितो भूत्वा, ससम्मानम् प्रतिदिनम् राज्ञो हस्तात् ताम्बूलद्वयं लभमानः
चकार प्रणयनम्–खण्डन–खण्डखाद्य–प्रभृतीनाञ्च दुर्दान्तवादग्रन्थानाम्। नैषधीयचरित-
महाकाव्यप्रभृतीनाञ्च।

श्रीहर्षस्य कालनिरूपणम्--श्रीहर्षः ख्रीष्टद्वादशशताब्द्या अन्तिमचरणे अवर्तिट इति प्रतिपादयता श्रीशिवदत्तशर्मणा नारायणकृतेन नैषधीयप्रकाशेन समन्वितस्य नैषधीयचरितस्य भूमिकायाम् युक्तिचतुष्टयीमुपान्यसत् प्रमाणोपोद्बलिताम्। ताश्च सन्तियुक्तयः—

(१) 'श्रीहर्षो वाराणस्यधिपतिजयन्तचन्द्रस्य परिषदोऽभिरूपोऽवर्तिष्ट। इति राजशेखरो वक्ति।

(२) अयं जयन्तचन्द्रोजयचन्द्रः एव; यः किल राठौरवंशीयानां कान्यकुब्जाधिपानामन्तिमोऽधिर्वाराणस्यां बभूव यश्च ख्रिष्टस्य पञ्चनवत्युत्तरैकादशशताब्द्यां ११९५ यवन राज्यात् प्रसह्य प्रभ्रंशयाञ्चक्रुः।

(३) कान्यकुब्जाधिपतिना स्वसत्कृतिं स्वमत्कृतिं स्मरत्यपि श्रीहर्षः—ताम्बूलद्वयमासनञ्च लभते यः कान्यकुब्जेश्वरात्।' इति श्लोके।

(४) राजशेखरोऽपि स्वग्रन्थैकखण्डे प्रसङ्गतोऽवर्णयत्–नैषधीयस्य प्रथमपुस्तकं हरिहरो गुजरातेति ख्यातदेशम्।

सोऽयम् खण्डनखण्डखाद्यग्रन्थस्य प्रणेता महाकविः श्रीहर्षः नैषधीयचरितनाम्नि महाकाव्ये समानरूपेण प्रस्तौति दर्शनशास्त्रीयाणां तर्काणां कार्कश्यम्। व्याकरणशास्त्रस्याप्रतिमं परिचयम् कोशग्रन्थानां समाभ्यधिकरहितमभ्यासम्, सहृदयहृद्यावर्जिकां काव्यकलाप्रौढिञ्च। श्रीहर्षस्य नैषधीयचरितमेव दर्शं–दर्शं विद्वांसोभारवेरर्थगौरवस्य व्यामोहम्, माघकाव्यस्य गुणत्रयावच्छिन्नतायाश्चावधारणामपाचक्रुः। अवादिषुश्च—'उदिते नैषधे काव्ये क्वमाघः क्व च भारविः।' इति

नैषधीयचरिते महाकाव्ये श्रीहर्षस्य दर्पोक्तिरप्यधिगम्यते। तथाहि—श्रद्धाराद्धगुरवः एवास्य ग्रन्थस्याध्ययने प्रवृत्ता भवेयुः। यतोह्यत्र ग्रन्थे तत्र–तत्र ग्रन्थग्रन्थिरपि निहिता वर्तते। तथा च—

ग्रन्थग्रन्थिरिह क्वचित्क्वचिदपि न्यासि प्रयत्नान् मया।
प्राज्ञं मन्यमनाहठेन पठितीं मास्मिन् खलः खेलतु।
श्रद्धाराद्धगुरुश्लथीकृतदृढग्रन्थिः समासादय,
त्वेतत् काव्यरसोर्मिमज्जनसुख व्यासज्जनं सज्जनः॥
(नै० च० २२·१५२)

पदवाक्यप्रमाणपारावारपारं वाञ्छतामेव जनानाम् हृदयाह्लादकमिदं काव्यमित्यर्थान्तरं न्यसता कविना प्रोक्तम्—

यथा यूनस्तद्वत् परमरमणीयाऽपि रमणी
कुमाराणामन्तः करणहरणं नैव कुरुते।
मदुक्तिश्चेदन्तर्मदयति सुधीभूय सुधियः,
किमस्या नामस्यादरसपुरुषानादरभरे॥
(नै० च० २२।१५०)

काव्यमिदं कवेः समेषु दर्शनेषु निष्णान्ततााया बुद्धेर्निदर्शनभूतमिति विदन्त्येवविद्वांसः नैषधीय चरितस्याध्ययनरसिकाः काव्येस्मिन् लालित्यवतानां पदानां प्राचूर्यमवेक्ष्यते। तथा च—'मुहूर्तमात्रं भवनिन्दयासखाः सखाय स्रवदस्रत्रो मम।' चलन्नलंकृत्य महारयं ह्यम्।' दिने दिनेत्वं तनुरेधि रेधिकम्।' प्राकृतानि पदे-पदे लालित्यवन्तिपद्यानि प्रेक्षै प्रेक्षम् कैश्चिदुक्तम् नैषधे पदलालित्यम्।' इति

इत्थम् महाकविः श्रीहर्षः कावचक्रचूडामणिरपि भवन् समकालमेवाभूत् दर्शनकाननकेसरी मतवादीभसिंहश्च।

भट्टेः परिचयः

(सं० सं० वि० वि० ७९)

भट्टिकाव्यस्य अथवा रावणवधस्य प्रणेता महाकविर्भट्टिः संस्कृते शास्त्रकाव्यस्य प्रणयनस्य परम्परां प्रारब्धवान्। महाकविर्भट्टिः मूलतोः वैयाकरणः अलङ्कारिकश्चासीत् अतएव व्याकरणस्य शुद्धप्रयोगशिक्षणायायं भट्टिकाव्यं प्रणषीत्। अस्मिन् प्रयासेऽयं सफलतमोऽभूदित्यत्र नास्ति कस्यचन विमतिः।

कालः—महाकवेर्भट्टेर्विषये ऐतिह्यं तथ्य बहुतरमुपलब्धं नास्ति। कविरयं भट्टिकाव्यस्यान्ते—काव्यमिदं विहितम् मया वलाभ्याः श्रीधरसेन नरेन्द्रपालितायाम्। कीर्तिरतो भवतान्नृपस्य तस्य क्षेमकरः क्षितिपो यतः प्रजानाम्॥ इति श्लोकमलेखिष्ट। अनेन श्लोकेन प्रतीयते यत् कविरयं वल्भ्यधीशस्य श्रीधरसेनस्य सभामलञ्चकार शिलालेखः निश्चितोभवति यत् चत्वारो वलभ्याः प्रशासकाः श्रीधरसेनेति संज्ञया प्रख्याता अभूवन् तेषु प्रथमस्य कालः ५०० ई० वर्षस्य सविधे अन्तिमस्य च काल ६५० ई० वर्षस्य सविधेऽस्ति। श्रीधरद्वितीयस्य शिलालेखे राज्ञा भट्टिनाम्ने विदुषे भूमिप्रदानस्य वर्णनमास्ते। अस्य शिलालेखस्य कालः ६१० ई० वर्षो विद्यते। एतेन निश्चीयते यत् भट्टिः सप्तशताब्द्याः प्रथमचरणे बभूव इति।

भट्टिकाब्यम्—भट्टिकाव्यस्यापरं नाम "रावणवध" महाकाव्यम् वर्तते। अस्मिन् महाकाव्ये द्वाविंशतिसर्गाः ३६२४ श्लोकाश्च सन्ति। अस्य सम्पूर्णस्य ग्रन्थस्य मल्लिनाथकृता जयमंगलानाम्नी व्याख्या वर्तते। काव्यस्यास्य चत्वारि काण्डानि सन्ति—तेषां च नाम—प्रकीर्णकाण्डम्, अधिकारकाण्डम, प्रसन्नकाण्डम्, तिङन्त काण्डञ्चेति वर्तते। अस्य काव्यस्य प्रणयनप्रयोजनम् लिखता कविना स्वयमेवोक्तम्—

दीपतुल्यः प्रबन्धोऽयं शब्दलक्षणचक्षुषाम्।
हस्तादर्श इवान्धानां भवेद व्याकरणादृते॥

अस्मिन् महाकाव्ये काव्योचितसरसतयैव सह व्याकरणसम्मतानां व्यावहारिकाणां रूपाणामपि समुचितं सङ्कलानमकार्षीत् अतएव कवित्व पाण्डत्ययो प्रभया भासुरं काव्यमिदं संस्कृतभाषामर्मविदां मनांसि प्रसभं हरति।

येन प्रकारेण रसगंगाधरे पण्डितराजस्य जगन्नाथस्य, नैषधीयचरितमहाकाव्ये श्रीहर्षस्य च दर्पोक्तिः समुपलभ्यते तेनैव प्रकारेण अस्मिन् महाकाव्ये महाकवेर्भट्टेरपि दर्पोक्तिः दृश्यते। तथाहि—व्याख्यागम्यमिदं काव्यमुत्सवः सुधियामलम् । हतादुर्मेधसश्चास्मिन् विद्वत्प्रियतया तथा । (२२।३४२) यद्यपि अस्य महाकाव्यस्य रचना व्याकरणपद्धत्या कृता वर्तते अथापि अत्र काव्यगुणानां सम्यक् सन्निवेशः कृतः ।

पात्राणां चरित्रचित्रणम्—विषये महाकवेः प्रतिभा वैशिष्टचं विभर्ति । विभीषणस्योक्तिभिः कवेः राजनीतितत्त्वानां परिचयः समुपलभ्यते। रावणस्य सभायां वदन्त्याः शूर्पणखायाः समुद्वोधनं भाषणस्य विशिष्टां कलां विभर्ति। द्वादशसर्गस्य प्रभातवर्णनम् संस्कृतज्ञानां मनांसि सहसा आकर्षति। दशमे सर्गे अनेकेषामलंकाराणां स्थाने सन्निवेशाः कवेः अलंकारप्रयोगस्य पाटवमभिव्यनक्ति ।

मयूरस्य परिचयः

(सं० सं० वि० वि० ८०)

काव्यप्रकाशदीपिकायामाचार्यो विश्वेश्वरो वक्ति यत् मयूरभट्टः १०७८ वैक्रमाब्दे धारानगर्याधिपतेः राज्ञो भोजस्य सभायाम् सभारत्नरूपेण बभूव । महाकविर्बाणभट्टो मयूरस्य भगिन्या पतिरासीदिति प्रथा वर्तते। उभाविमौ कवी आस्ताम् । अतएवानयोः कवित्वप्रयुक्तोऽपि सम्बन्ध आसीत्। उभाविमौ कवी धारानगर्यामेवात्सीष्टाम् ।

कस्याञ्चन विभावर्याम् महाकविर्बाणभट्टः स्वस्य मानवत्याः पत्न्या मानापनोदनप्रसङ्गे श्लोकस्यैकस्य पादत्रयं निर्मायाऽपि चतुर्थस्य पादस्य निर्माणार्थं बहुधा प्रयत्यापि साफल्यं नह्यध्यगात् । तच्च श्लोकस्य पादत्रयमेतदासीत्—

गतप्राया रात्रिः कृशतनुशशीशीर्यत इव,
प्रदीपोऽयं निद्रावशमुपगतो घुर्णत इव ॥
प्रणामान्तो मानस्त्यजसि न तथापि क्रुधमहो,

इदं वाणभट्टस्य मुखात् श्लोकपादत्रयं साम्रेडं श्रावं-श्रावं अविदूरस्थे एव प्रकोष्ठे सुप्तः महाकविर्मयूरः सद्यः प्रसंगानुकूलप्रातिभपद्यनिर्माणचणपः न शशाकात्मनि गूहितं सद्योमुखान्निस्सरन्तम् सहृदयहृदयोन्मादनकम् श्लोकपूर्तिरूपम् पादचतुर्थम् । अवोचच्च—'कुचप्रत्यासत्या हृदयमपि ते चण्डि कठिनम् ।'

स्वश्यालकस्य महाकवेर्मयूरस्य मुखाद्धठान्निस्सृतमिदं पद्यखण्डं श्रुत्वा वाणो नैजया भगिन्या अपि सम्बन्धमविचार्यायं मयूरः औद्धत्यकाष्ठां गतः तथाविधामश्लीला

वाचमवोचदिति मनसि आकलय्य सहसा 'यतस्त्वं स्वभगिन्या विषये इत्थं वाचमवोचस्तस्मात्त्वम् गलितेन कुष्ठेन रुजाऽक्रान्तो भव' इति ।

महाकवेर्वाणभट्टस्य शापेनाक्रान्तो मयूरो महारुजाऽक्रान्तोऽभूत् । तस्य रोगस्यापनुत्यै मयूरः सूर्यशतकस्य रचनां कृत्वा सूर्यमस्तौषीत् अध्यगाच्च मुक्तिं रुजः ।

काव्यप्रकाशकारो मम्मटः काव्यप्रकाशस्य प्रथमोल्लासे काव्यप्रयोजनप्रदर्शिकाया द्वितीयायाः कारिकाया वृत्तौ 'शिवेतरक्षतये' इति कारिकापदम् विवृण्वन्नलेखीत्— 'आदित्यादेर्मयूरादीनामिवानर्थनिवारणम् ।' इति । प्रायो व्याख्याकारणमत्राभिप्रायो वर्तते यत्काव्यप्रकाशकाराणाम् उपर्युक्तस्यैवोपाख्यानस्य निर्देशे तात्पर्यमास्त इति ।

इदानीमपि सूर्यशतकमिदं लभ्यते । अस्मिन् शतसंख्याकाः श्लोकास्सन्ति । मेरुतुङ्गाचार्यः प्रवन्धचिन्तामणौ उपर्युक्तस्याख्यानकस्य वर्णनामकरोत् । सूर्यशतकस्य टीकायाम् 'यज्ञेश्वरभट्टोऽप्युक्तमाख्यानमवर्णयत् । मयूरस्य कालस्य विषये इदम् विश्वेश्वरस्य मतमनुचितमसम्वद्धञ्चाभाति । यतः मयूरः वाणभट्टस्य सम्बन्धी समकालिकश्च वभूव; अतएव अस्य कालः ईस्व्याः षष्ठशतकमेव भवितुमर्हति न तु एकादशं शतकम् । मयूरस्य सूर्यशतकम् प्रौढशैल्यां प्रणीतं स्तोत्रमास्ते । अतएव ह्यानन्दवर्द्धनोऽपि ध्वन्यालोके सूर्यशतकमुद्धरति । सूर्यशतकस्य साम्प्रतं एकादश सङ्ख्याकाः टीकाः विचारचर्चापदमारोहन्ति । तासु समासु टीकासु 'वल्लभदेव' प्रणीता टीका 'सूर्यानुवादिनी' प्राचीनतमा वर्तते ।

भट्टनारायणस्य परिचयः

एकस्या किंवदत्या अनुसारेण त्वयम् भट्टनारायणः गौडदेशं प्रशासकेन आदिशूरेण ब्राह्मणधर्ममुन्नेतुं कान्यकुब्जाद्देशादानीय निवासितेषु ब्राह्मणेष्वेक आसीत् । आदिशूरः पालवंशोत्थानतः प्रागेवावर्तत । अतएव तस्य समयः सप्तमशत्या उत्तरार्द्धो भवितुमर्हति । दशमशतकस्य 'धनिकः' ध्वन्यालोकस्य कर्ताऽनन्दवर्द्धनः काव्यालङ्कारस्य प्रणेता वामनश्च भट्टनारायणकवेः वेणीसंहारनाटकस्य पद्यानि उद्धृतवन्तः ।

रूपावतारस्य नीवीटीकायाः हस्तलिखितप्रतेरनुसारेणायं भट्टनारायणो वाणतः प्रेरणामधिगम्य वौद्धोऽभूत् । भट्टनारायणस्य कान्यकुब्जत्वविषये कस्यापि विमतिर्नास्ति ।

भट्टनारायणस्य एक एव ग्रन्थो वर्तते—वेणीसंहारनामकम् नाटकम् । अस्य नाटकस्योपजीव्यं श्रीमन्महाभारतीयमितिवृत्तमेवास्ते । दुर्योधनेन साकम् अक्षक्रीडायां युधिष्ठिरो द्रौपद्यै अपि पणेन पराजितोऽभूत् । दुर्योधनं स्वानुजं दुःशासनमादिशत् द्रौपदीमानीय सभायां तां नग्नां कर्तुम् । द्रौपदीं दुःशासनः केशेषु चकर्ष । तदात्वे एव भीमः प्रतिज्ञामकार्षीत् नूनमहमस्य दुर्योधनस्योरुभङ्गं नैजया गुर्व्या गदया

करिष्यामि । दौपद्यपि प्रत्यजानात् अस्य मम प्रघर्षणा–कर्तुः दुशासनस्य रुधिरेण इमे मदियाः केशाः संयमिता भविष्यन्ति इति । इमामेव कथामधिकृत्य नाटकमिदं प्रवर्तते । नाटकस्य प्रारम्भः श्रीकृष्णस्य दौत्येन भवति । प्रथमं तु युधिष्ठिरः प्रायतत सन्ध्यै; किन्तु श्रीकृष्णस्य सन्धेः प्रयासस्य वैकल्यं गते सः युद्धभेरीमताडयत् । द्वितीये अङ्के दुर्योधनस्य तस्य पत्न्याश्च संवादो भवति । तृतीयेऽङ्के प्रवेशकेन ज्ञायते यत् धृष्टद्युम्नः द्रोणस्य वधमकार्षीत् । अनन्तरं पितृवधजन्येन क्रोधेन क्षुब्धस्याश्वथाम्नः कर्णेन साकं कलहोऽभूत् । चतुर्थेऽङ्के सुन्दरकः युद्धे दुशासनवधपर्यन्तां सम्पूर्णां कथां निवेदयति दुर्योधनस्य पुरस्तात् । पञ्चमेऽङ्के पुत्रवधदुःखितौ गान्धारीधृतराष्ट्रौ पाण्डवैस्सह सन्धि कर्तुं प्रार्थनामकुरुताम् परञ्च दुर्योधनस्तन्नानुमेने । षष्ठे चाङ्के चार्वाकमुनिवञ्चनया यावत् युधिष्ठिरः अग्नौ प्रवेशमभिलषति तावदेव दुर्योधनरुधिरैर्लिप्ताङ्गम् हर्षप्रकर्षोन्मत्तं भीममायान्तं परिचित्य च आनन्दभूमानमनुभवति द्रौपदी च केशानां संयमनम् दुर्योधनस्य रुधिरैः करोति । अनेनैव वेणीसंहाराख्येन नाटकेन भट्टनारायणः प्रसिद्धेः परां काष्ठामगात् । संस्कृतनाट्यशास्त्रानुसारेण नाटकमिदमादर्शभूतं वर्तते । अतएवात्र समेषां नाटकीयतत्त्वानां समावेशो वर्तते । अस्य नाटकस्यैकमेतदपि वैशिष्ट्यम् वर्तते यत्रैकमपि नारीपात्रम् दृष्टिपथं नाञ्चति । पुरुषैरेव पात्रैरारब्धमिदं नाटकम् पुरुषैरेव पात्रैस्साकम् समाप्तिमगात् ।

अस्मिन् नाटके पात्राणां चित्रणम् साधुकृतो वर्तते । सर्वत्र तेषां चरित्रं विशदीकृतं भवति । वीररसप्रधानेऽत्र नाटके ओजोगुणः प्रवहति । सर्वत्र पाञ्चालीरीतिप्रियनाटककाराः संस्कृतप्राकृतयोः दीर्घस्य समासस्य घटनामकार्षीत् । मङ्गलाचरणे राधाकृष्णयोः केलिवर्णनत्वादयं वैष्णव आसीदिति प्रतीयते । अस्य नाटकस्य श्लोका वीररसाय प्रसिद्धा वर्तन्ते ।

वेणीसंहारस्य नायकविषये एकः प्रश्न उदेति को वर्तते अस्य नाटकस्य नायकः ? इति । आदावन्ते मध्ये च सर्वत्र भीमस्यैव प्राधान्यदर्शनात् तस्यैव नायकत्वमाशंकन्ते केचन । परञ्च नायकविषये निर्विवादोऽयमास्ते विषयो यत् स एव भवति नायको यो हि फलमश्नुते । युद्धस्य फलभूतं राज्यं लभते युधिष्ठिरो यस्मात् तस्मात् स एवास्य नाटकस्य नायक इति निस्सन्दिग्धोऽयं विषयः भीमस्योपनायकत्वञ्चाक्षतम् ।

शूद्रकस्य परिचयः

(सं० सं० वि० वि० ८०)

संस्कृतसाहित्ये शूद्रकस्य नाम बहुधा श्रूयते । वेतालपंचविंशतिकायाम् कादम्बर्याम् , कथा–सरित्–सागरे, दशकुमारचरिते च ते ते कवयः शूद्रकस्य राज्ञो नाम

सस्मरुः। अयं राजाऽपि कविरभूत् सफलतमः इत्यास्ते संस्कृतवाङ्मयालोचकानां मनीषा।

अस्य कालविषये विचारा भिद्यन्ते। (क) विक्रमपूर्ववर्त्ययमास्त्व इति स्कन्दपुराणकाराः प्राहुः। (ख) केचंश्च—आन्ध्रभृत्यकुलोत्पनः शिमुक एवायं शूद्रको वर्तते, अतएवास्य कालः विक्रमस्य प्रथमशताब्दी वर्तत इति प्राहुः। (ग) दण्डी काव्यादर्शे शूद्रकस्य "लिम्पन्तीव तमोङ्गानी"ति पद्यमुद्धृतवानतएवायं सप्तमशताब्द्याः पूर्ववर्ती सिद्धयति। (घ) षष्ठशताब्द्या वराहमिहिरः मंगलबृहस्पत्योः मैत्रीं प्राह, परञ्च शूद्रकः मङ्गलबृहस्पत्योर्विरोधं प्राह मृच्छकटिके, अत एवायं वराहमिहिरात् पूर्ववर्ती प्रतीयते। (ङ) शूद्रकस्य मृच्छकटिके नाटके द्वितीयशताब्द्यां प्रणीतस्य मनुस्मृतेर्नियमा अनुसृता भवन्ति अत एवायं मनुस्मृतेः प्रणयनादनन्तरमेव बभूव इति निश्चप्रचम्।

शूद्रकस्य 'मृच्छकटिकम्' नाटकम् चारुदत्तवसन्तसेनयोः प्रणयवर्णनमयं सरसं रूपकमास्ते। मृच्छकटिके रूपके तत्कालीनस्य समाजस्य सुष्ठु चित्रणं कृतमास्ते। अस्य मृच्छकटिकस्य कथाया अंशद्वयमास्ते प्रथमांशे चारुदत्तवसन्तसेनयोः प्रणयः प्राधान्यमेधते। द्वितीयेंऽशे आर्यकस्य राज्यप्राप्तिःप्रवर्धते प्रथमां शस्योपजीव्यं भासकृतं दरिद्रचारुदत्तमाभाति। द्वितीयश्चांशः कविना सृष्टो वर्तते।

वदान्यशूरे चारुदत्ते वसन्तसेनाया गणिकायाः प्रेमभूमैधते। शकारः तस्यामनुरागवान् वर्तते परञ्च सा तं द्विषति। अतएव शकारः एकान्ते वसन्तसेनामानीय तस्या हत्यां करोति, जनेषु च प्रचारयति यत् वसन्तसेनां जघानायं चारुदत्तः। न्यायालये चारुदत्ताय वसन्तसेनाया हत्या प्रयुक्तः प्राणदण्डः श्राव्यते। परश्चादृष्टवशात् वसन्तसेना पुनः जीवनमेति आगत्य च सर्वजन–समक्षं शकारस्याखिलं कुकृत्यं वक्ति। भाग्यवशात् तदात्व एव आर्यको राजा भवति सम्पद्यते च सानन्दः चारुदत्त वसन्तसेनयोरुद्वाहः।

मृच्छकटिकस्याध्ययनेन प्रतीयते यत् शूद्रकस्य समये उज्जैयिनी भारतवर्षस्य समृद्धतमा नगर्यासीत्। तदात्वे चौर्यधूर्तयोः प्रचुरः प्रचार आसीत्। न्यायालये मनुस्मृतेः सम्मानमासीत्। वेश्यागमनादिरूपाया विलासितायाः अपि तदात्वे श्रेष्ठित्वेनाभिधानमभवत्। तस्मिन् काले दासप्रथा अपि व्यवहारे आसीत्।

शूद्रकस्य काव्यशैली सरलतमा मनोहरा च वर्तते। क्वापि दीर्घाः समासा नहि दृश्यन्ते। मृच्छकटिके वर्षावर्णनम् मनोरममास्ते। शूद्रकः राज्ञो न्यायभवनस्य हृद्यम् वर्णनमकार्षीत्। तथाहि—चिन्तासक्तनिमग्नमन्त्रिसलिलं दूतोर्मिशंकाकुलं पर्यन्तस्थितचारनक्रमकरं नागाश्वहिंस्राश्रयम्। नानावाशककङ्कपक्षरुचिरं कायस्थसर्पास्पदं नीतिक्षुण्णतटं च राजकिरणं हिंस्रैः समुद्रायते।

शूद्रकः मनसा क्रान्तिकारी कविराभाति। केन प्रकारेण धनिनो मदमत्ता भवन्ति। राजकुलसम्मानितस्य शकारस्य सर्वाः कुत्सिताः चेष्टाः सहृदयानां मनस्सु क्षोभमुद्वेलयन्ति। यद्यपि चारुदत्तः दरिद्र आस्ते परञ्च वेश्यापि वसन्तसेना तस्मिन् स्नेहप्रचुरा वर्तते। यद्यपि तस्या माता तां निगृह्णाति अथापि तस्या अनुरागः स्वाभाविकत्वात् चारुदत्ते वर्द्धत एव। वैश्यकुले संजाताया वसन्तसेनाया ब्राह्मणेन चारुदत्तेन साकम् विवाहः समाजे नवस्य विचारस्योदय एव।

अस्य मृच्छकटिकस्य रूपकस्य प्रधाननायिका वसन्तसेना वर्तते नायकश्च चारुदत्तो ब्राह्मणः। अत्राङ्गीरसो शृङ्गारो वर्तते। काले-काले हासकरुणयोरपि वृद्धिर्दृश्यते।

सुवन्धोः परिचयः

संस्कृतवाङ्मये गद्यकाव्यस्य गौरवातिशयमास्ते। वस्तुतः कवेः प्रतिभायाः पूर्णं प्रकाशनं गद्यस्यैव माध्यमेन भवति। गद्यकाव्ये कविः स्वकल्पनाप्रौढेः प्रकाशने सर्वथा स्वतन्त्रो भवति। तत्र छन्दसां नहि भवति वन्धनम्। तथाविधे गद्ये काव्ये समर्थः कविः स्वशब्दार्थयोः देशकालपात्रानुसारिण्या शक्तेः प्रकाशने सर्वथा समर्थां विधिमाश्रयति। येन छन्दोभिर्विनाऽपि गद्ये काव्ये गेयात्मकतायाः आभासो भवति। शब्दालंकाराणामर्थालंकाराणाञ्च कृतेन स्थाने प्रयागेण कविः सहृदयानां परमप्रेमास्पदताम् भजते। अतएव प्राहुः केचनालोचकाः "गद्यं कवीनां निकषं वदन्ति।" इति

तथाविधेषु संस्कृतसाहित्यस्य समर्थगद्यलेखकेषु कालदृष्टया सर्वप्रथमं कठिनी सुवन्धोरेव नामनि पतति। तस्य तस्य सुवन्धाः कालस्य विषये किञ्चिदपि वाह्यं प्रमाणं नोपलब्धम् भवति। अथापि कतिपयैरन्तरङ्गसाधनैः सुवन्धोः कालस्य निर्णयः क्रियते। तथाहि—(१) सुवन्धुः स्वयमेव—

"सारसवता विहता नवका विलसन्ति चरतिनीकङ्कः।"

सरसीवकीर्तिशेषं गतवति भुवि विक्रमादित्ये॥ इत्यस्मिन् पद्ये विक्रमादित्यस्य स्मरणमकार्षीत्। परञ्चास्य सुवन्धुना संस्मृतस्य विक्रमादित्यस्य विषये विवेचकानां विप्रतिपत्तिर्विद्यते। अधिकतराणामालोचकानां मतमास्ते यदय सुवन्धुना सस्मृता विक्रमादित्यः 'यशोवर्माऽपराभिधानः वालादित्यसख एव वर्तते। ऐतिह्यज्ञाः यशोवर्मणः कालम् षष्ठशतकस्य मध्यभागं स्वीकुर्वन्ति। अतएव सुवन्धोः कालः षष्ठशताब्द्या मध्यो भागो निश्चीयते। (२) वाणभट्टः 'धिया निवद्धेयमतिद्वयी कथा।' इति मंगलपद्यांशस्य माध्यमेन सुवन्धोः वासवदत्ता अस्मार्षीत्। अतएवाऽपि सुवन्धोः कालः वाणभट्टस्य कालादर्वाक् षष्ठशतकमेव निश्चीयते। (३) सुवन्धुर्वासवदत्तायाश्लेषद्वारा उद्योतकरं स्मरति—"न्यायस्थितिमिवोद्यतकरस्वरूपम्" इत्यस्मिन् वाक्ये।

उद्योतकरस्य च कालः षष्ठसप्तमशताब्दयोरन्तराले स्वीक्रियते । अतएवापि सुबन्धोः समयः षष्ठशताब्दी निश्चीयते ।

सुबन्धोरेक एव ग्रन्थः समुपलभ्यते वासवदत्ता नामकः । अनेनैव ग्रन्थेण सुबन्धुः गद्यलेखकेषु प्रसिद्धिमवाप । 'वासवदत्ता' कल्पनाप्रधानत्वात् कथाकोटावेवाटीकते गद्यकाव्यस्य । केचनास्या वासवदत्ताया आख्यायिकात्वमपि स्वीकुर्वन्ति । मन्येऽत्र कारणमास्ते उदयनकथाया प्रधाननायिकाया वासवदत्तायाः नामानुध्यानमेव । बाणभट्टः स्वयमेव वासवदत्तां सुबन्धोः सस्मार सस्नेहम् । तथाहि—

कवीनामगलद्दर्पो नूनं वासवदत्तया ।
शक्त्येव पाण्डुपुत्राणां नूनं वासवदत्तया ॥

यद्यपि वासवदत्ता गद्यकाव्येषु प्रप्रथमं पदं निधत्ते तथापि वहतीदं काव्यं शब्दार्थयोरलंकाराणां सौष्ठवातिशयम् । यमकानुप्रासोपमाविरोधाभाससंख्यादिका अलंकाराः तत्र-तत्र स्थाने लब्धप्रवेशाः सन्ति । अलंकाराणां प्रयोगाः कृताः वर्तन्ते कविना तत्र-तत्र सप्रयासम् यतस्तत एवायं ग्रन्थः काठिन्यमपि बिभर्ति-अतएवात्र सामान्यपाठकानां न भवति सुगमः प्रवेशः । वासवदत्तायां आख्यायिकोपयोगिन कतिचन श्लोकाः समुपलभ्यन्ते । परञ्चैतैः श्लोकैः सुबन्धोः कवितापाटवमेवाभिव्यज्यते । सन्ति च ते श्लोकाः—

"अविदिति गुणाऽपि सत्कविर्भणितिः कर्णेषु वमति मधुधाराम् ।
अनधिगतपरिमलाऽपि हि हरति दृशं मालतीमाला ।"
"विषधरतोऽप्यतिविषमः खल इति न मृषा वदन्ति विद्वांसः ।
यदयं नकुलद्वेषी सकुलद्वेषी पुनः पिशुनः ॥"

गुणाढ्यस्य परिचयः

बृहत्कथाया प्रणेता गुणाढ्यः संस्कृतवाङ्मये प्रख्याततमो वर्तते । दण्डी 'काव्यादर्शे' प्रावोचत्—'भूतभाषामयीं प्राहुरद्भुतार्थां बृहत्कथाम् ।' बृहत्कथायाः चर्चां कुर्वता सुबन्धुना प्रोक्तम् वासवदत्तायाम्—'बृहत्कथालम्बैरिव सालभञ्जिकानिवहैः ।'' त्रिविक्रमभट्टेन चोक्तम्—"धनुषेव गुणाढ्येन निःशेषो रञ्जितो जनः ।" एभिरुल्लेखैः सिद्धयति यत् दण्डिनः प्रागेवासीत गुणाढ्यः । अतएव तस्य कालः षष्ठशताब्द्ये निश्चीयते । केचिद्गुणाढ्यं सातवाहनकालिकं स्वीकुर्वन्ति । ततश्चास्य कालः प्रथमशताब्दी सिद्धयति ।

गुणाढ्यसातवाहनावधिकृत्य प्रवर्तते एका किंवदन्ती । तथा च—पत्नीभिः साकं जलक्रीडाव्यापृतं राजानं सातवाहनमवोचत् काचनैका राज्ञी—'मोदकैर्दीयताम् ।' इति । संस्कृतानभिज्ञो राजा मोदकशब्दं मिष्टान्नार्थकं मत्वा तस्यै मिष्टान्नं प्रेषयत् ।

तद्दृष्ट्वा, राज्ञस्संस्कृतानभिज्ञताञ्चालोच्य राज्ञी सा प्राहसत् तस्मै । तच्छ्रुत्वा राजा विलज्जमानः सन् संस्कृतमध्यापयितुं प्रार्थयामास स्वसभायाः श्रेष्ठतमं पण्डितम् गुणाढ्यम् । तच्छ्रुत्वा गुणाढ्यं प्रावोचत् —षड्भिर्वर्षैः व्याकरणमधीयते ।' तदात्वे एव कातन्त्रव्याकरणप्रणेता शर्ववर्मा प्रावोचत्—षड्भिरेव मासैस्संस्कृतमधीयते इति । तच्छ्रुत्वा गुणाढ्येनोक्तं यदि त्वया एतस्मिन्नेव स्वल्पे काले संस्कृतमध्याप्यते तदा नूनमहं राज्यमिदं त्यक्ष्यामि न च वक्ष्यामि संस्कृतभाषाम् जीवने ।

प्रत्यर्थिनमभिभवितुं शर्ववर्मा अत्यन्तसरलनियमान् शिक्षयित्वा षड्मासाभ्यन्तर एव राजानं संस्कृतभाषायां दक्षं चकार । तद्दृष्ट्वा गुणाढ्यः सातवाहनराज्यं परित्यज्य वनेष्वगात् । संस्कृतभाषामपि तत्याज । वने निवसता तेन भूतभाषामयी वृहत्कथा लिखिता । एकदा गुणाढ्यः अविचारयत् यत् क इमां मदियां भूतभाषामयीं कृतिं पठिष्यति ? अतएव अत्यन्तदुःखितः स इन्धनानि एकत्रीकृत्य चितां प्रज्वाल्य तत्समक्षमेवोपविश्य; स्वयमेव सुस्वरेण स्वकृतिं पठित्वा अग्नौ प्रत्येकस्य तालपत्रस्य आहुतिं प्रारब्धवान् यदृच्छया । तदात्वे एव सातवाहनः आखेटतः प्रत्यागच्छत् वने तस्य सुस्वरमयीं वाणी शुश्राव मध्येमार्गम् । सविधे गत्वा यदा सोऽद्राक्षीत् तथाविधमनर्थकर्मव्यापृतं गुणाढ्यं स्वयमपि मर्तुकामनयोपविष्टम् तदा सः तस्य पादयोरपतत् । आनयच्च स्वराज्ये कथंकथमप्यनुनीय गुणाढ्यं साकमवशिष्टेन वृहत्कथायाः अंशेन साकम् । वृहत्कथाया अनुवादः—बुद्धस्वामी वृहत्कथायाः सर्वप्रथमं श्लोकानुवादं चकार श्लोकसंग्रहरूपेण । श्लोकसंग्रहस्य एक एव भागो लभ्यते । अस्मिन् भागे २८ सर्गाः ४५३९ श्लोकाश्च सन्ति ।

क्षेमेन्द्रः ईस्वीतः १०६६ ईस्वीम् यावत् प्रयस्य यावत् प्रयस्य वृहत्कथायाः ७५०० श्लोकेषु वृहत्कथामञ्जरीरूपेणानुवादमकार्षीत् । सोमदेवः १०८२ ईस्वीये वर्षे कथासरित्सागरनाम्ना वृहत्कथाया अनुवादमकार्षीत् २१३८८ श्लोकेषु । कथासरित्सागरस्य शैली मनोज्ञा वर्तते । अयमेव वृहत्कथायाः वृहत्तम अनुवादः उपलभ्यमानेष्वनुवादग्रन्थेषूपलभ्यते । श्रूयते राज्ञोनन्तस्य काश्मीरप्रशासकस्य पत्न्या मनोविनोदायास्यानुवादस्य प्रणयनमकरोत् सोमदेवः । अस्मिन् अनुवादे क्षेमेद्रस्यानुवादापेक्षया अधिककवित्वमभिव्यज्यते । भाववैशद्यम् कवितायास्सारल्यम् प्रसादगुणस्य आसागरं व्यापकता, दीर्घसमासानां परिहारः अलंकाराणामनावश्यकानाञ्च परिहारः कथासरित्सागरमपि सर्वसुगमञ्चकार पठनपाठनदृष्टचा ।

रसनिष्पत्तिः

अथवा—विभावानुभावसञ्चारिसंयोगाद्रसनिष्पत्तिः ।

आचार्यो भरतःभरतनाटचशास्त्रे'विभावानुभावसंचारिसंयोगाद्रनिष्पत्तिः' रससूत्रं

श्रीशंकुकस्य व्याख्यायाः निम्नांकिताः विशेषताः ध्यातव्याः सन्ति ।

(१) श्रीशंकुकः रसमनुमेयं मन्यते । नटे रामबुद्धिः सामाजिकस्य चित्रतुरगन्यायेन भवति । यथा—चित्रमवलोच्यायमश्व इति व्यवहारो । किन्त्वियं प्रतीतिर्न तु सत्या भवति, न वा मिथ्या भवति, न वा संशयस्वरूपा भवति, न वा सादृश्यप्रतीतिस्वरूपा भवति । चित्रार्पिततुरगे जायमाना प्रतीतिः सम्यङ्मिथ्यासंशय–सादृश्यप्रतीतिभ्यो विलक्षणैव भवति । अनेनैव प्रकारेण नटे जायमाना रामबुद्धिः सम्यङ्मिथ्यासंशयप्रतीतिभ्यो विलक्षणैव भवति ।

(२) रसानुमितौ रामसीतादिकानाम् विभावानां प्रतीतिस्तु चित्रतुरगन्यायेन भवत्येव, किन्तु यैः अनुभावव्यभिचार्यादिभिः लिङ्गैः—इयं सीता रामविषयकरतिमती, तस्मिन् विलक्षणस्मितकटाक्षादिमत्त्वात् इत्यनुमानं क्रियते, ते अनुभावादिका अपि कृत्रिमा एव, यथार्थस्मितकटाक्षादिकैस्तु रामादिष्वेव भाव्यम् । नटस्तु स्वशिक्षाभ्यासादिवशादेव तेषामनुभावादिकानां प्रकाशनं करोति । तथाविधैः कृत्रिमैरेवानुभावादिलिङ्गैः इयं सीता रामविषयकरतिमती, अयं रामः सीताविषयकरतिमान्, इत्यादिकमनुमानं सामाजिकः करोति ।

इत्थमानुमानिकी रसस्य प्रतीतिर्भवति ।

(३) अस्यां व्याख्यायाम् संयोगात् पदस्य गम्यगमकभावरूपसम्वन्धाद् इत्यर्थो वर्त्तते ।

(४) आनुमानिकस्य रसस्य प्रतीतेराश्रयः सामाजिको नास्ति, सामाजिकस्तु कृत्रिमयो रामसीतयोर्विद्यमानायाः रतेरथवा रसस्यानुमानं करोति ।

(५) यद्यप्यनुमित्या सामान्यतयाऽपरोक्षमेव ज्ञानम् जायत, किन्त्वनयानुमित्या अपरोक्षैव रसानुमितिर्भवतीति वैशिष्ट्यमस्याः अनुमितेः ।

(६) सामाजिके रसास्वादस्य कारणम् सामाजिकस्य वासना, रसप्रतीतौ विलक्षणापरोक्षतायाः कल्पनाऽस्ति । अनुमितो रसो न तु सामाजिके भवति, न वा नटे, वासनावलादेव तथाभूतस्य रसस्यानुमानं करोति सामाजिकः ।

(७) श्रीशंकुकस्येयं रससूत्रव्याख्या न्यायमतानुसारिणी वर्त्तते ।

श्रीशंकुकमतस्य नैयून्यम्—श्रीशंकुकप्रक्रियया सामाजिकः कृत्रिमैः विभावानुभावव्यभिचारिणाम् कृत्रिमेन स्थायिभावेन सह नटे कृत्रिमरामसीतादिविषयकरतेः अनुमानं करोति । किन्तु सामाजिकः कैन कारणेन रसानुभवं करोतीति समस्यायाः समाधानं नहि भवति । अनुमानेन द्वारा रसस्य साक्षात्कारात्मकप्रतीतेरुपपादनं कर्तुं नहि शक्यते । अनुमानजन्यं ज्ञानं परोक्षमेव भवति न तु प्रत्यक्षम् । इत्थम् रसानुमितिवादानुसारेण रसास्वादनम् यथायथम् नह्युपपद्यते ।

भट्टनायकस्य मुक्तिवादः—रससूत्रस्य प्रख्यातस्तृतीयो व्याख्याकारः भट्ट-

नायको वर्त्तते । भट्टनायकप्रवर्तितम् मतम् मुक्तिवादस्य नाम्नाभिधीयते । एतन्मतानुसारेण रसनिष्पत्तिर्न तु अनुकार्ये रामादौ भवति, न वाऽनुकर्तरि नटादौ । अनुकार्यानुकर्त्तारावुभावेव तटस्थौ स्तः । रसानुभूतिस्तु सामाजिके भवति ।

भट्टनायकस्य रससूत्रव्याख्यां निम्नप्रकारेणोपस्थापितवान् काव्यप्रकाशकारः—

'न ताटस्थ्येन, नात्मगतत्वेन न रसः प्रतीयते, नोत्पद्यते, नाभिव्यज्यते; अपितु काव्ये नाटचे चाभिधातो द्वितीयेन विभावादिसाधारणीकरणात्मना, भावकत्वव्यापारेण भाव्यमानः स्थायी सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्तिसतत्त्वेन भोगेन युज्यते' इति भट्टनायकः ।

भट्टनायकमतस्य समीक्षा—भट्टलोल्लटः मुख्यरूपेण तटस्थे अनुकार्ये रामादौ, गौणरूपेण तटस्थे नटादौ रसस्य स्थितिं स्वीचकार, अस्य मतस्य खण्डनं कुर्वता भट्टनायकेनाभिहितम्—रसः न ताटस्थ्येन रसः उत्पद्यते । श्रीशंकुमतानुसारेण रसस्य प्रतीतिर्भवति, तस्य मतस्य खण्डने भट्टनायकेनाभिहितम्—'नात्मगतत्वेन रसः प्रतीयते । आचार्योऽभिनवगुप्तः रसस्याभिव्यक्तिं स्वीकरोति सामाजिके, तस्य मतस्य खण्डने भट्टनायकेनाभिहितम्, रसो नात्मगतत्वेनाभिव्यज्यते । यतो पूर्वतो विद्यमानस्यैव वस्तुनोऽभिव्यक्तिर्भवति किन्तु रसः अनुभूतेः प्राक् पश्चाद् वा भवत्येव नहि । अतएव रसस्याभिव्यक्तिरपि नहि स्वीकर्तुं शक्यते इति भट्टनायकस्याभिप्रायः । रसस्तु अनुभूतिस्वरूपोऽस्ति अतएव रसो भुज्यते ।

भट्टनायकः स्वकीयं भुक्तिवादं समर्थयितुम् शब्दे अभिधालक्षणाभ्यां व्यतिरिक्तम् भावकत्व–भोजकत्वनामकम् व्यापारद्वयं स्वीचकार । तन्मतानुसारेण अभिधया लक्षणया वा काव्यस्य योऽर्थः उपस्थाप्यते, शब्दस्य भावकत्वव्यापारः तमर्थं परिष्कृत्य, उपभोगयोग्यं करोति । भावकत्वव्यापारेणैव अनुकार्ययोः कथायाः परिष्कारेण द्वारा साधारणीकरणं क्रियते । साधारणीकरणानन्तरमेव तया कथया सामाजिकस्य सम्बन्धो भवति । स्वसंस्कारानुसारेण सामाजिकोऽपि तस्याः कथायाः पात्रविशेषतां भजते । साधारणीकरणानन्तरमेव भोजकत्वनामकेन शब्दव्यापारेण द्वारा सामाजिकः रसस्य साक्षात्कारात्मकं भोगं करोति ।

समीक्षकाणां मतानुसारेण भट्टनायककृता रससूत्रस्य व्याख्या सांख्यमतानुसारिणी वर्त्तते ।

भट्टनायकमतस्य दोषाः—(१) समीक्षकाणां मतानुसारेण भट्टनायकः शब्दस्य भावकत्वभोजकत्वनामकयोः द्वयोः नवीनयोः व्यापांरयोः कल्पनामकरोत् । परन्तु तौ शब्दव्यापारावनुभवसिद्धौ न स्तः ।

(२) भट्टनायकः यस्य स्थायिभावस्य भोगं प्रतिपादयति सः स्थायिभावः अनु-

इत्थम् विप्रलम्भस्यापि उदाहरणमूह्यम् ।

हास्यरसस्य स्वरूपमाचार्यो विश्वनाथो निम्नप्रकारेण निरूपयामास—

'विकृताकारवाग्वेषचेष्टादेः कुहकाद् भवेत् ।
हास्यो हासस्थायिभावः श्वेतः प्रमथदैवतः ॥
विकृताकारवाक्चेष्टम् 'यमालोक्य हसेज्जनः ।
तदत्राऽलम्बनं प्राहुस्तच्चेष्टोद्दीपनम् मतम् ॥

करुणरसस्य स्वरूपं निरूपयता साहित्यदर्पणकर्त्राभिहितम्—

'इष्टनाशादनिष्टाप्तेः करुणाख्यो रसो भवेत् ।
धीरैः कपोतवर्णोऽयं कथितो यमदैवतः ॥
शोकोऽत्र स्थायिभावः स्याच्छोच्यमालम्बनं मतम् ।
तस्य दाहादिकावस्था भवेदुद्दीपनं पुनः ॥'

रौद्ररसस्य विवेचनावसरे आचार्येण विश्वनाथेनाभिहितम्—

'रौद्रः क्रोधस्थायिभावो रक्तो रुद्राधिदैवतः ।
आलम्बनमरिस्तत्र तच्चेष्टोद्दीपनं मतम् ॥
मुष्टिप्रहारपातनविकृतच्छेदावदारणैश्चैव ।
सग्रामसंभ्रमाद्यैरस्योद्दीप्तिर्भवेत् प्रौढा ॥' इति ।

वीररसः काव्यप्रकाशे परिगणितेषु रसेषु अन्यतमं स्थानं विभर्ति । अस्य रसस्य स्वरूपनिरूपणे आचार्येण विश्वनाथेनाभिहितम्—

'उत्तमप्रकृतिर्वीरः उत्साहस्थायिभावकः ।
महेन्द्रदैवतो हेमवर्णोऽयं समुदाहृतः ॥
आलम्बनविभावास्तु विजेतव्यादयो मताः ।
विजेतव्यादि चेष्टाद्याः तस्योद्दीपनरूपिणः' ॥

भयानकरसस्य स्वरूपनिरूपणप्रसङ्गेन प्राह साहित्यदर्पणकारः—

'भयानको भयस्थायिभावः कालाधिदैवतः ।
स्त्रीनीचप्रकृतिः कृष्णो मतस्तत्त्वविशारदैः ॥
यस्मादुत्पद्यते भीतिः तदत्रालम्बनं मतम् ।
चेष्टाः घोरतरास्तस्य भवेदुद्दीपनं पुनः ॥'

वीभत्सस्य स्वरूपं निम्नांकितं कथितम् साहित्यदर्पणकारेण—

जुगुप्सा स्थायिभावस्तु वीभत्सः कथ्यते रसः ।
नीलवर्णो महाकालदैवतोऽयमुदाहृतः ॥

दुर्गन्धमांसरुधिरमेदांस्यालम्बनं मतम्।
तत्रैव क्रूमिपाताद्यमुद्दीपनमुदाहृतम् ॥'

नाट्येषु अष्टमरसरूपेणाद्भुतरसोऽस्ति स्वीकृतः। अस्य स्वरूपम् निम्नाङ्कितमस्ति—

'अद्भुतो विस्मयस्थायिभावो गन्धर्वदैवतः।
पीतवर्णो वस्तु लोकातिगमालम्बनं मतम् ॥
गुणानां तस्य महिमा भवेदुद्दीपनं पुनः।
स्तम्भः स्वेदोऽथ रोमाञ्चगद्गदस्वरसंभ्रमाः॥'

एतेभ्यः नाट्यशास्त्रे परिगणितेभ्यः भिन्नः नवमो रसः शान्तो वर्त्तते। अतएव काव्यप्रकाशकारः प्राह—'शान्तोऽपि नवमो रसः।' इति। शान्तरसस्य स्वरूपम् निम्नांकितं प्राह साहित्यदर्पणकारः—

'शान्तः शमस्थायिभावः उत्तमप्रकृतिर्मतः।
कुन्देन्दुसुन्दरच्छायः श्रीनारायणदैवतः॥
अनित्यत्वादिनाऽशेषवस्तुनिस्सारता तु या।
परमात्मस्वरूपं वा तस्यालम्बनामीहते॥'

यद्यपि आचार्यो भरतः अष्टानामेव रसानामुल्लेखमकार्षीत्, किन्तु—आनन्दवर्द्धन-अभिनवगुप्तादिका आचार्याः स्पष्टरूपेण शान्तरसस्याप्युल्लेखं कृत्वा रसानां नवसंख्यतां समर्थयामासुः। वडौदातः प्रकाशितस्य अभिनवभारत्या समलङ्कृतस्य नाट्यशास्त्रस्य सम्पादको रामस्वामी शास्त्री शिरोमणिः लिखति यत् सर्वप्रथमं शान्तरसस्य स्थापना आचार्यं उद्भटः काव्यालङ्कारसङ्ग्रहनामके ग्रन्थे अकार्षीत्।

प्राचीनाचार्येषु धनिकधनञ्जयावेव शान्तरसस्य प्रबलविरोधिनावाचार्यौ स्तः। दशरूपके तस्य टीकायाञ्च तस्य विरोधो प्रौढतया कृतो वर्त्तते। तन्मतानुसारेण नाट्ये अष्टावेव रसा भवन्ति। शान्तो रसो नाट्ये भवत्येव नहि। शान्तरसस्यानभिनेयतैव कारणमस्ति नाट्ये तस्य स्थानाप्रदानस्य। यतोऽभिनये प्रवृत्तेरेव प्राधान्यम् भवति, निवृत्तेरभिनयः कर्तुं नहि शक्यते।

दशरूपकस्य व्याख्याकारो निम्नप्रकारेण शान्तरसस्य विरोधमकार्षीत्—

'शममपि केचित् प्राहुः पुष्टिर्नाट्येषु नैतस्य।
निर्वेदादिरताद्रूप्यादस्थायी स्वदते कथम् ॥
वैरस्यायैव तत्पोषः तेनाष्टौ स्थायिनो मताः।'

इह शान्तरसं प्रति वादिनामनेकविधा विप्रतिपत्तयः। केचिदाहुः—नास्त्येव शान्तो रसः, तस्याचार्येण विभावाद्यप्रतिपादनात् लक्षणाकरणात्। अन्ये तु वस्तुतस्तस्याभावं वर्णयन्ति, अनादिकालप्रवाहायातरागद्वेषयोरुच्छेत्तुमशक्यत्वात्।

अन्ये तु वीरबीभत्सादावन्तर्भावं वर्णयन्ति । यथा तथा अस्तु । सर्वथा नाटककारावभिनयात्मनि स्थायित्वमस्माभिः निषिध्यते । तस्य समस्तव्यापारविलयरूपस्याभिनयायोगात् ।

यत्तु कैश्चिन्नागानन्दादौ शमस्य स्थायित्वमुपवर्णितम् तत्तु मलयवत्यनुरागेण आप्रबन्धप्रवृत्तेन विद्याधरचक्रवर्तित्वप्राप्तया च विरुद्धम् । नह्येकानुकार्यविभावावलम्बनौ विषयानुरागापरागावुपलब्धौ । अतो दयावीरोत्साहस्यैव स्थायित्वम् ।

विरुद्धाविरुद्धविच्छेदित्वस्य निर्वेदादीनामभावात् स्थायित्वम् । अतएव ते चिन्तादिस्वस्वव्यभिचार्यन्तरिता अपि परिपोषं नीयमाना वैरस्यमावहन्ति ।' इति ।

किन्तु दशरूपकस्यानेन विवेचनेनायमेवार्थः सिद्ध्यति यत् नाट्ये शान्तरसस्य स्थितिर्नहि भवति किन्त्वनेन शान्तरसस्याभावो नहि सिद्ध्यति । यतः आनन्दवर्धनाभिनवगुप्तौ विस्तरेण शान्तरसस्य प्रतिपादनं चक्रतुः । अतएव नवमः शान्तरसः स्वीकर्तव्य एव । इयमपरा वार्ता यत् नाट्ये अष्टौ रसः भवन्ति । किन्तु नाट्यव्यतिरिक्तेषु काव्येषु महाकाव्येषु च शान्तरसस्य स्थितिः स्वीकर्तव्यैव ।

काव्यप्रयोजनम्

काव्यप्रयोजनम् आलङ्कारिकाणामतीव महत्त्वपूर्णो विषयो वर्त्तते । अतएव प्रायेण सर्वे एवाचार्याः काव्यप्रयोजनस्य निरूपणमकार्षुः । आचार्यो वामनः काव्यप्रयोजनस्य संक्षेपेण निरूपणं कुर्वन्नाह—'काव्यं सद् दृष्टादृष्टार्थं प्रीतिकीर्तिहेतुत्वात् ।' इति । तत्र काव्यस्य दृष्टं प्रयोजनम् प्रीतिः=आनन्दानुभूतिर्वर्त्तते, अदृष्टं प्रयोजनं च कीर्तिः वर्त्तते । अत्र वामनेनाभिहितम्—

'प्रतिष्ठां काव्यबन्धस्य यशसः सरणिं विदुः ।
अकीर्तिवर्तिनीं त्वेवं कुकवित्वविडम्बनम् ॥
कीर्तिं स्वर्गफलामाहुरासंसारं विपश्चितः ।
अकीर्तिं तु निरालोकनरकोद्देशदूतिकाम् ॥
तस्मात् कीर्तिमुपादातुमकीर्तिं च व्यपोहितुम् ।
काव्यालङ्कारसूत्रार्थः प्रसाद्यः कविपुङ्गवैः ॥' इति ।

भामहस्य काव्यप्रयोजनं निरूपयन्नाह—

'धर्मार्थकाममोक्षेषु वैचक्षण्यं कलासु च ।
करोति कीर्तिं प्रीतिं च साधुकाव्यनिबन्धनम् ॥' इति ।

काव्यप्रयोजननिरूपणप्रसङ्गे वक्रोक्तिजीवितकारेण कुन्तकेनाप्यभिहितम्—

'धर्मादिसाधनोपायः सुकुमारक्रमोदितः ।
काव्यबन्धोऽभिजातानां हृदयाह्लादकारकः ॥'

व्यवहारपरिस्पन्दसौन्दर्यं व्यवहारिभिः ।
सत्काव्याधिगमादेव नूतनौचित्यमाप्यते ॥

चतुर्वर्गफलास्वादमप्यतिक्रम्य तद्विदाम् ।
काव्यामृतरसेनान्तश्चमत्कारो वितन्यते ॥' इति ।

इत्थम् पूर्ववर्तिभिराचार्यैः येषां काव्यप्रयोजनानां प्रतिपादनं कृतम्; तेषाम् समेषाम् सम्यक्तया परिमार्जनं कृत्वा काव्यप्रकाशकारः सर्वाधिकसुन्दरतया विस्तृतरूपेण काव्यप्रयोजनानां निरूपणमकार्षीत् । तेन स्पष्टतयाभिहितम्—

'काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये ।
सद्यः परनिर्वृत्तये कान्तासम्मिततयोपदेशयुजे ॥' इति ।

अस्याः कारिकायाः विवरणे काव्यप्रकाशकारेण स्वयमेवाभिहितम्—कालिदासादीनामिव यशः श्रीहर्षादेर्धावकादीनामिव धनम्, राजादिगतोचिताचारपरिज्ञानम्, आदित्यादेर्मयूरादीनामिवानर्थनिवारणम्, सकलप्रयोजनमौलिभूतं, समनन्तरमेव रसास्वादनसमुद्भूतं विगलितवेद्यान्तरमानन्दम् प्रभुसम्मितशब्दप्रधानवेदादिशास्त्रेभ्यः, सुहृत्सम्मितार्थतात्पर्यवत् पुराणादीतिहासेभ्यश्च, शब्दार्थयोर्गुणभावेन रसाङ्गभूतव्यापारप्रवणतया विलक्षणं यत्काव्यम् लोकोत्तरवर्णनानिपुणं कविकर्मतत्कान्तेव सरसतागादनेनाभिमुखीकृत्य रामादिवद्वर्तितव्यं न रावणादिवदित्युपदेशं च यथायोगं कवेः सहृदयस्य च सर्वथा यतनीयम् तत्र ।

एतेषु मम्मटप्रतिपादितेषु काव्यप्रयोजनेषु त्रीणि प्रयोजनानि कविनिष्ठानि, त्रीणि च पाठकनिष्ठानि सन्ति। तत्र—यशसेऽर्थकृते शिवेतरक्षतये इतीमानि त्रीणि प्रयोजनानि कविनिष्ठानि सन्ति, व्यवहारविदे, सद्यः परनिर्वृत्तये, कान्तासम्मिततयोपदेशयुगे इतीमानि त्रीणि प्रयोजनानि पाठकनिष्ठानि सन्ति ।

नाटचाचार्यो भरतमुनिरपि काव्यप्रयोजनस्य निरूपणमकार्षीत् नाटचशास्त्रे । तानि च प्रयोजनानि निम्नांकितानि सन्ति—

'उत्तमाधममध्यानां नराणां कर्मसंश्रयम् ।
हितोपदेशजननं धृति-क्रीडासुखादिकृत् ।

दुःखार्तानां श्रमार्तानां शोकार्तानां तपस्विनाम् ।
विश्रान्तिजननं काले नाटचमेतद् भविष्यति ।

धर्म्यं यशस्यमायुष्यं हितं बुद्धिविवर्द्धनम् ।
लोकोपदेशजननं नाटचमेतद् भविष्यति' ॥ इति ।

भरतमुनिनिर्दिष्टकाव्यप्रयोजनानामालोक एव उत्तरकालिका आचार्याः काव्यप्रयोजनानां निरूपणमकार्षुः ॥ इति ।

ऋग्वेदस्य परिचयः

चत्वारो वेदाः—ऋग्यजुस्सामाथर्वाख्यास्सन्तीति नास्ति तिरोहितं विपश्चिदपश्चिमेभ्यः। वेदानाम् रचनाकालविषये किमपि प्रकारकं प्रमाणं नोपलभ्यते। अतएव हि एकविद्वांसः वेदानपौरुषेयानाहुः। वेदाः कदा समजायन्त इति कोऽपि नहि जानाति! अनादिनिधनास्ते सन्तीति, भारतीया वैदिकाः विद्वांसः स्वीकुर्वन्ति। परमात्मापि सृष्टेरादौ पूर्वकल्पिकं वेदम् संस्मृत्य-संस्मृत्य ब्रह्मणे उपदिशति। तत एव प्रत्येकस्मिन् कल्पे वैदिकस्य विज्ञानस्य प्रचारः प्रसारश्च भवतीति वेदापौरुषेयवादिनः प्राहुः। 'तस्य निःश्वसितम् वेदाः' इति वाक्यानुसारेण परमात्मनिश्श्वासस्वरूपा वेदास्सन्ति। येन प्रकारेण पुरुषः स्वस्य निश्श्वासस्य कर्ता नास्ति, अपितु निःश्वसनम् जीवस्य नैसर्गिकं भवति तेनैव प्रकारेण परमात्मा वेदानाम् स्वनिःश्वासभूतानाम् कर्ता नास्ति।

'तस्माद्यज्ञात् सर्वहुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात्तस्माज्जाता अजावयः ॥'

अस्यापि मन्त्रस्य तथाविधस्या एव वेदोत्पत्तिः प्रतिपादने तात्पर्यमास्ते। 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्।' इति वैदिकं वाक्यं प्रतिपादयति यत् सृष्टेरादौ परमात्माऽपि वैदिकज्ञानस्यैवालोके पूर्वकल्पानुकूलानाम् सूर्यचन्द्रादिकानाम् निर्माणं करोति। अतएव वेदानामपौरुषेयत्वं कल्पयन्ति वैदिकाः विद्वांसः।

इत्थम् यद्यपि वेदानाम् रचनाकालविषये किमपि प्रमाणम् नास्ति, अथापि अर्वाचीनाः विद्वांसः स्व-स्वदृष्ट्या वेदानाम् रचनाकालविषये प्रमाणानि उपस्थापयन्ति। तेषाम् मतानुसारेण १२०० ई० पू० कालतः १५०० ई० पू० कालपर्यन्तम् वेदानाम् रचनाकालो भवितुमर्हति, इत्थमेव निश्चेतुम् मैकडॉनलकीथनामानौ द्वौ पाश्चात्यौ विद्वांसौ प्रयतेते स्म। योकोवीमहोदयः ऋग्वेदस्य रचनाकालम् ३००० ई० पू०, लोकमान्यतिलकमहोदयः ६००० ई० पू०, विण्टरनित्जमहोदयश्च २५०० ई० पू० स्वीकरोति।

वस्तुतो ऋग्वेदः विशालकायः ग्रन्थानाम् समूहो विद्यते। पाश्चात्याः विद्वांसः स्वीकुर्वन्ति यत् ऋग्वेदस्य परिवर्द्धनं काले काले समभवत् अतएव सः कस्यचनैकस्य कालस्य ग्रन्थो नास्ति।

भारतीया विद्वांसः स्वीकुर्वन्ति यत् गृत्समद–वसिष्ठादिकाः ऋषयः मन्त्रा-

णाम् द्रष्टारः सन्ति किन्तु पाश्चात्यानामनुसारेणेमे ऋषयः मन्त्राणाम् प्रणेतारः सन्ति।

साम्प्रतम् समुपलभ्यमानस्य ऋग्वेदस्य द्वेधा विभागः समुपलभ्यते—अष्टकेषु अष्टकेषु विभागः, मण्डलेषु च विभागः। सम्पूर्णः ऋग्वेदः अष्टसु अष्टकेषु विभक्तो वर्त्तते। प्रत्येकस्मिन्नष्टके अष्टौ अध्यायाः सन्ति। इत्थम् सम्पूर्णे ऋग्वेदे चतुष्षष्ठि अध्यायाः सन्ति। ऋग्वेदस्य द्वितीयो विभागः मण्डलेषु विद्यते। सम्पूर्णः ऋग्वेदः दशसु मण्डलेषु विभक्तो वर्त्तते। अयम् विभाग अधिको वैज्ञानिकः प्राचीनश्च आभाति। मण्डलानि सूक्तेषु विभक्तानि सन्ति। सम्पूर्णे ऋग्वेदे सूक्तानाम् संख्या १०२८ वर्त्तते मन्त्राणाञ्च संख्या १०,५८० वर्त्तते।

भारतीयानाम् विदुषां मतानुसारेण ऋषिशब्दस्यार्थः मन्त्रद्रष्टा भवति। तथा चोक्तमपि—'ऋषयो मन्त्रद्रष्टारः।' ऋष् गतौ धातोरेव ऋषिशब्दो व्युत्पद्यते। ऋग्वेदस्य द्रष्टारः ऋषयः विभिन्नानां वंशानाम् सन्ति। द्वितीयमण्डलस्य द्रष्टारः ऋषयः गृत्समदस्य कुलस्य सन्ति, तृतीयमण्डलस्य द्रष्टारः ऋषयः विश्वामित्रस्य वंशस्य, चतुर्थमण्डलस्य द्रष्टारः वामदेवस्य वंशस्य, पञ्चममण्डलस्य द्रष्टारः अत्रिवंशस्य ऋषयः, षष्ठमण्डलस्य द्रष्टारः भरद्वाजवंशस्य ऋषयः, सप्तमण्डलस्य च द्रष्टारः वसिष्ठवंशस्य ऋषयः सन्ति। अष्टममण्डलस्य मन्त्राणां द्रष्टारः ऋषयः कण्वाङ्गिरसगोत्रयोः सन्ति। नवमे मण्डले सोमविषयकाणाम् मन्त्राणां संग्रहो वर्त्तते। सोमस्यैकं नाम पवमानो वर्त्तते। अतएव नवमम् मण्डलम् पवमानमण्डलमित्यभिधीयते। दशमस्य मण्डस्य द्रष्टारः ऋषयः अनेकेषां कुलानां सन्ति।

ऋग्वेदस्य पञ्चशाखाः प्रसिद्धाः सन्ति—(१) शकलशाखा, (२) वाष्कल-
शाखा, (३) आश्वलायनशाखा, (४) सांख्यायनशाखा, (५) माण्डूकायनशाखा
न। एतासु पञ्चसु शाखासु केवलम् शाकलैव शाखा समुपलभ्यते। पं० भगवद्दत्त-
महोदयानुसारेण ऋग्वेदस्य निम्नांकिताः सप्तविंशतिसंख्याकाः सन्ति। तथाहि—

(१) मुद्गलशाखा, (२) गालवशाखा, (३) शालाशाखा, (४) वात्स्य-
शाखा, (५) शैशिरिशाखा, (६) बोध्यशाखा, (७) अग्निमाठरशाखा, (८)
पराशरशाखा, (९) जातूकर्ण्यशाखा, (१०) आश्वलायनशाखा, (११) शाखा-
यनशाखा, (१२) कौषितकीशाखा, (१३) महाकौषीतकीशाखा, (१४) शाम्व्य-
शाखा, (१५) माण्डूकेयशाखा, (१६) बह्वृचशाखा, (१७) पैङ्ग्यशाखा,
(१८) उद्दालकशाखा, (१९) शतबलाक्षशाखा, (२०) गजशाखा, (२१-
२२-२३) वाष्कलिभारद्वाजस्य तिस्रः शाखाः, (२४) ऐतरेयशाखा, (२५)
वासिष्ठशाखा, (२६) सुलभशाखा, (२७) शौनकशाखा च।

वेदानाम् शाखाविषये व्याकरणमहाभाष्ये एकम् वाक्यम् समुपलभ्यते। तच्च
"

वाक्यमस्ति—'सहस्रवर्त्मा सामवेदः, एकशतमध्वर्युशाखा, एकविंशतिधा बह्वृचः नवधा अथर्वणः।' अनेन वाक्येन प्रमाणितं भवति यत् व्याकरणमहाभाष्यकर्तुः पतञ्जलेः काले ऋग्वेदस्य एकविंशतिसंख्याका एव शाखा आसन् समुपलब्धाः। किन्तु पण्डितभगवद्दत्त उपाध्यायः कुतो सप्तविंशतिसंख्याकाः ऋग्वेदस्य शाखाः समुपलब्धवान् इति नहि ज्ञायते। इदं तु नूनम् यत् भगवद्दत्त उपाध्यायेन द्वारा परिगणितानां शाखानां संख्या नामानि च प्रामाणिकानि नहि सन्ति।

वर्तमाने काले ऋग्वेदेन सम्बद्धौ द्वौ ब्राह्मणग्रन्थौ समुपलभ्येते। (१) ऐतरेयब्राह्मणग्रन्थः, (२) कौषीतकिब्राह्मणग्रन्थश्च। अस्य वेदस्य द्वावारण्यकग्रन्थावपि समुपलभ्येते—(१) ऐतरेय आरण्यकग्रन्थः, (२) कौषीतकि आरण्यकग्रन्थश्च। द्वे उपनिषदावपि ऋग्वेदस्य उपलभ्येते। (१) ऐतरेयोपनिषद्, (२) कौषितक्युपनिषच्च।

यजुर्वेदस्य परिचयः

यजुर्वेदः चतुर्षु वेदेष्वन्यतमं स्थानं बिभर्ति। बलदेवउपाध्यायानुसारेणास्य यजुर्वेदस्य गद्यात्मको भागः यजुरित्यभिधीयते। अस्मिन् वेदे गद्यवाक्यानामपि समूहो वर्त्तते, यस्योपयोगम् अध्वर्युः यागेषु करोति। यज्ञानाम् क्रियात्मकमनुष्ठानम् अध्वर्युनामकः एव ऋत्विग्यागेषु सम्पादयति। अतएव सर्ववेदापेक्षया अस्यैव वेदस्य यज्ञेन साकम् घनिष्ठः सम्बन्धो विद्यते।

यजुर्वेदस्य द्वौ भेदौ स्तः—शुक्लयजुर्वेदः कृष्णयजुर्वेदश्च। अनयोः यजुर्वेदस्य नाम्नोः विषये एका पौराणिकी कथा समुपलभ्यते। तद्यथा—

वेदव्यासः स्वशिष्यम् वैशम्पायनम् यजुर्वेदमध्यापयामास। वैशम्पायनश्च तं वेदम् याज्ञवल्क्यनामकम् महर्षिः पाठयामास। केनचन कारणेन रुष्टः आचार्यः याज्ञवल्क्यमादिशत् स्वेन ग्राहिताम् शाखाम् परित्यक्तुम्। गुरोरादेशपालनपरायणो याज्ञवल्क्यः मुखेन सरुधिरमांसपिण्डरूपेण ताम् शाखाम् गुरोस्समक्षमेव छर्दितां चकार। अन्ये वैशम्पायनशिष्या तित्तिराणां रूपाणि कृत्वा सरुधिरोद्गारितां तां शाखां ग्राहयामासुः। यस्मात् कारणात् सा शाखा याज्ञवल्क्येन छर्दिता बभूव तस्मादेव सा शाखा कृष्णयजुर्वेदशब्देन ज्ञायते।

पुनः वेदविज्ञानविहीनो महर्षिः याज्ञवल्क्यः सूर्योपासनां कृत्वा वेदज्ञानमवाप। सा च सूर्येण प्राप्तशाखा शुक्लयजुर्वेदशब्देनाभिहिता बभूव। इयमेव शाखा वाजसनेयीशाखाशब्देनाभिधीयते। यतो भगवान् सूर्यः वाजिनो रूपं कृत्वा शाखामिमामुपदिदेश याज्ञवल्क्याय महर्षये। इयमेव वाजिसनेयी संहिता शब्देनाप्यभिहिता भवति। शुक्ल-

यजुर्वेदे केवलं मन्त्राणाम् संग्रहो वर्त्तते । कृष्णयजुर्वेदे तु छन्दोवद्धाः मन्त्राः, गद्यात्मका विनियोगाश्च सन्ति ।

शुक्लयजुर्वेदस्य द्वे शाखे स्तः—(१) माध्यन्दिनशाखा, (२) काण्वशाखा च । उभयोरेव शाखयोः चत्वारिंशत् संख्याका अध्यायाः सन्ति । तत्र माध्यन्दिनशाखायाः प्रचारः उत्तरे भारते वर्त्तते; किन्तु काण्वशाखायाः प्रचारः दक्षिणे भारते । काण्वशाखायाः एव चत्वारिंशत्तमोऽध्यायः ईशावास्योपनिषत्शब्देनाभिधीयते । यद्यपि माध्यन्दिनशाखाया अपि चत्वारिंशत्तमस्याध्यायस्य तथाविधा एव मन्त्राः सन्ति किन्तु अर्थैक्येऽपि उभयोः शाखयोरस्याध्यायस्य, काण्वशाखाया एवान्तिमोऽध्यायः ईशावास्योपनिषत्शब्देनाभिधीयते ।

शतपथब्राह्मणग्रन्थः एव यजुर्वेदस्यैकः ब्राह्मणग्रन्थस्समुपलभ्यते । वृहदारण्यकनामक एक आरण्यकग्रन्थोऽपि अस्य वेदस्य वर्त्तते । द्वे उपनिषदावस्य समुपलभ्येते—ईशावास्योपनिषद् वृहदारण्यकोपनिषच्च ।

आदौ कृष्णयजुर्वेदस्य बह्व्यः शाखा आसन् किन्तु साम्प्रतम् कृष्णयजुर्वेदस्य चतस्रः शाखाः समुपलभ्यन्ते । (१) तैत्तिरीयसंहिता, (२) मैत्रायणीसंहिता, (३) काठकसंहिता, (४) कपिष्ठलकठसंहिता च । एतासु चतुर्थी संहिता अर्द्धैव समुपलब्धा वर्त्तते । एतासु तैत्तिरीयसंहितायाः सप्तखण्डाः सन्ति । इमे खण्डाः अष्टका अथवा काण्डशब्देनाभिधीयन्ते । प्रत्येकेषु काण्डेषु केचन अध्यायाः सन्ति प्रपाठक अथवा प्रश्नशब्देनाभिहिताः भवन्ति । प्रतिप्रश्नम् अनेके अनुवादकाः सन्ति ।

मैत्रायणीकाठकसंहिते अपि तैत्तिरीयसंहितया बाहुल्येन संवदत । महर्षिः पतञ्जलिस्तु, व्याकरणमहाभाष्यस्य पश्पशाह्निके 'एकशतमध्वर्युशाखा ।' इति वाक्येन द्वारा यजुर्वेदस्य १०१ एकशतम् शाखाः प्राह किन्तु शौनको महर्षिः यजुर्वेदस्य षडशीति संख्याकाः शाखाः प्राह ।

कृष्णयजुर्वेदस्य तैत्तिरीयब्राह्मणनामको ब्राह्मणग्रन्थः, तैत्तिरीयारण्यनामक आरण्यकग्रन्थश्च समुपलभ्येते । यजुर्वेदस्य तिस्र उपनिषदः सन्ति—कठोपनिषद्, तैत्तिरीयोपनिषद्, मैत्रायिणी उपनिषच्च ।

अस्य 'वेदस्याष्टौ सूत्रग्रन्था अपि सन्ति । तद्यथा—(१) आपस्तम्बकल्पसूत्रम्, (२) बौधायनश्रौतसूत्रम्, (३) हिरण्यकेशीकल्पसूत्रम्, (४) भारद्वाजश्रौतसूत्रम्, (५) मानवश्रौतसूत्रम्, (६) मानवगृह्यसूत्रम्, (७) वाराहगृह्यसूत्रम्, (८) काठकगृह्यसूत्रञ्च ।

सामवेदस्य परिचयः

चतुर्षु वेदेषु सामवेदस्य स्थानमतिमहनीयमास्ते । प्राचीने काले वेदस्यास्य

महत् कलेवरमासीत् । अतएव महर्षिः पतञ्जलिः प्राह महाभाष्ये—‘सहस्रवर्त्मा सामवेदः ।’ किन्तु सुरक्षाया अभावात् अस्य वेदस्य कलेवरम् स्वेतरसमस्तवेदापेक्षया ह्रस्वं संजातम् । बलदेव उपाध्यायमहोदयानुसारेण सामवेदस्य संग्रह उद्गात्रे ऋत्वजे संजातः । वैदिकेषु यागेषु साम्नामेवोद्गानम् करोति । सामवेदः गेयात्मको वर्त्तते । प्राचीनेषु कालेषु वैदिका विद्वांसः अस्यैव वेदस्य गानम् स्वेष्टदेवताम् सन्तोषयितुमकार्षुः । अस्य वेदस्य गेयात्मकत्वादेव परमात्मनः प्रियतमो वेदोऽयमास्ते इति वैदिकानाम् विदुषामवधारणा ।

वैदिकेषु यज्ञेषु यस्यै देवतायै होमम्, क्रियतेस्म, उद्गाता तामेव देवतामुद्दिश्य सामगानमकार्षीत् । सामानि सर्वाणि ऋगाश्रितान्येव सन्ति । ऋच एव गीयन्तेस्म उद्गातृभिः यागेषु । सम्पूर्णे सामवेदे ऋच एव सन्ति । सामवेदस्य ऋचाः संख्या १५४९ वर्त्तते । सामवेदस्य सर्वेषु मन्त्रेषु पञ्चसप्ततिसंख्याका (७५) एव मन्त्राः तथाविधाः सन्ति ये ऋग्वेदे नहि समुपलभ्यन्ते । अवशिष्टाः सर्वे एव मन्त्राः ऋवेदादेव सामवेदे गृहीताः सन्ति ।

सामवेद संहितायाः द्वौ भागौ स्तः—(१) पूर्वार्चिकभागः, (२) उत्तरार्चिकभागश्च । तत्र पूर्वार्चिकभाग छान्दसिक इत्यभिधीयते । विषयानुसारेण पूर्वार्चिकः चतुर्षु पर्वेषु विभक्तो वर्त्तते—(१) आग्नेयः पर्वः—अत्राग्निदेवताकानाम् मन्त्राणां संग्रहो वर्त्तते । (२) ऐन्द्रः पर्वः—अत्रेन्द्रदेवताकानां ऋचाम् संकलनम् कृतम् वर्त्तते । (३) पवमान पर्वः—अस्मिन् पर्वे सोमविषयकाणाम् संग्रहो कृतो वर्त्तते । (४) आरण्यक पर्वः—अत्रारण्यकविषयकाणाम् साम्नाम् संग्रहः कृतो वर्त्तते ।

सामवेदस्य द्वितीयः खण्डः उत्तरार्चिकस्य नाम्ना प्रख्यातो वर्त्तते । अस्य खण्डस्य विषयानुसारेण सप्तसंख्याका उपखण्डाः सन्ति । तथाहि—(१) दशराजखण्डः, (२) सम्वत्सरखण्डः, (३) ऐकाहखण्डः, (४) अहीनखण्डः, (५) सत्रखण्डः, (६) प्रायश्चित्तखण्डः, (७) क्षुद्रखण्डश्च । एतेषु खण्डेषु तेषां तेषामनुष्ठानानां निर्देशः कृतो वर्त्तते ।

‘सहस्रवर्त्मा सामवेदः’ इति वाक्यानुसारेण यद्यपि प्राचीने काले सामवेदस्य सहस्रसंख्याकाः आसन् किन्तु सामवेदस्य तिस्र एव शाखाः समुपलभ्यन्ते—कौथुमशाखा, राणायणीयशाखा, जैमिनीयशाखा च । तत्र कौथुमशाखाया प्रचारः गुजर्रदेशीयब्राह्मणेषु वर्त्तते । राणायणीयशाखायाः प्रचारः महाराष्ट्रीयब्राह्मणेषु दृश्यते, जैमिनीयशाखायाश्च कर्नाटकीयेषु ब्राह्मणेषु साम्प्रतम् दृश्यते । इमास्तिस्रः शाखा एवाश्रित्य सामवेदस्य तिस्रः संहिता अपि समुपलभ्यन्ते । कुथुमीयसंहिता, राणायणीयसंहिता, जैमिनीयसंहिता च ।

सामवेदस्य चत्वारो ब्राह्मणग्रन्थाः समुपलभ्यन्ते । (१) ताण्ड्यब्राह्मणग्रन्थः, षड्विंशब्राह्मणग्रन्थः, सामविधानब्राह्मणग्रन्थः, जैमिनीयब्राह्मणग्रन्थश्च । अस्य वेदस्य

द्वावारण्यकग्रन्थावप्युपलभ्येते—छान्दोग्यारण्यकम्, जैमिनीयारण्यकञ्च । अस्य वेदस्य तिस्रः उपनिषदः सम्प्राप्यन्ते—छान्दोग्योपनिषत्, केनोपनिषत्, जैमिनीयोपनिषच्च ।

सामवेदस्य सप्त सूत्रग्रन्थाः समुपलभ्यन्ते निम्नांकिताः—[१] कौथुमसंहितायाः—सूत्रग्रन्थाश्चत्वारः । (१) मशककल्पसूत्रम्, (२) खदिरगृह्यसूत्रम्, (३) लाटयायनगृह्यसूत्रम्, (४) जैमिनीयश्रौतसूत्रम् च ।

[२] राणायणीयसंहितायाः द्वौ सूत्रग्रन्थौ—(१) गोभिलगृह्यसूत्रम्, (२) जैमिनीयगृह्यसूत्रम् ।

[३] जैमिनीयसंहितायाः सूत्रग्रन्थः—द्राह्यायणगृह्यसूत्रम ।

अथर्ववेदस्य परिचयः

'नवधा अथर्वाणः' इति प्राह महर्षिः जैमिनिः अथर्ववेदस्य शाखानां विषये । अथर्वाणम् ऋषिमाश्रित्य अथर्ववेदस्य 'अथर्वणा प्रवर्तितो वेदः' इति व्युत्पत्तिमाश्रित्य अथर्ववेदस्य नामकरणं कृतमिति समीक्षकाणाम् धारणा । गोपथनामके ब्राह्मणग्रन्थे वर्णितायाः कथायाः अनुशीलनेन ज्ञायते यत् पुराकाले सृष्टिं कर्तुं ब्रह्मा कठिनं तपश्चचार । तपःपूतात् ब्रह्मणः कायात् द्वे जलधारे निस्सृतेऽभूताम् । तत्र एकस्याः जलधारातः महर्षेः अथर्वणः उद्भवः संजातः, अन्यस्याः धारायाः आंगिरसः महर्षेः उत्पत्तिः संजाता । आभ्यामेवाथर्वाङ्गिरसामुत्पत्तिः संजाता । इमे भृगुवंशीयाः अङ्गिरोवंशीयाश्च ऋषयः येषाम् मन्त्राणां साक्षात्कारमकार्षुः त एव मन्त्रा अथर्ववेदे सगृहीताः संजाताः । अथर्ववेदस्य–भृग्वंगिरसवेदः, अथर्वाङ्गिरसवेदः, इत्यपरावपि द्वौ नामानौ प्रख्यातौ बभूवतुः ।

अथर्ववेदे संगृहीतानाम् मन्त्राणां सम्बन्धो यज्ञेन साकम् नास्ति । अथर्ववेदीयानाम् मन्त्राणामुपयोगः यागेषु समुत्पन्नानां विघ्नानां निवारणाय भवति । यज्ञस्य संरक्षको ब्रह्मा भवति । स एवैतेषामथर्ववेदस्य मन्त्राणां प्रयोगं करोति । अथर्ववेदे संगृहीतानाम् मन्त्राणाम् प्रयोगः–मारण-मोहनोच्चाटनादिकेषु अभिचारकर्मसु वैपुल्येन भवति । अथर्ववेद एव अखिलजगद्धितानुशासनकर्तृत्वरूपम् वेदसुरक्षितम् वर्त्तते । यतः सामान्या अधिकारिणस्तु, स्वाभ्युदयसिद्धये मारणमोहनोच्चाटनादिकम् शत्रूणाम् कामयन्ते । एतादृशानामेवाधिकारिणां लोके बाहुल्यं वर्त्तते । एतादृशावामेवाधिकारिणाम् कल्याणं कृत्वाऽथर्ववेदः तथाविधानपि अधिकारिण वेदेषु विश्वाससम्पन्नान् करोति । पुनस्त एवाधिकारिण लोकाभ्युदयमधिगम्य, अधीत्य च वेदम्, ज्ञात्वा एतेषा कर्मणां दुःखोदर्कत्वम् सन्मार्गे सन्निविष्टाः सन्तः सात्त्विका अधिकारिणो भवन्ति । अतएव अथर्ववेद एव स्वेतरेभ्यस्त्रिभ्यो वेदेभ्यः अधिकतरम् सामान्याना-

मधिकारिणामुपकारान् सम्पाद्य अखिलजगद्धितानुशासनकर्तृत्वरूपम् वेदस्याधारणं लक्षणं बिभर्ति ।

सम्पूर्णोऽथर्ववेदः विंशतिकाण्डेषु विभक्तो वर्त्तते । अत्र चतुस्त्रिंशत् (३४) संख्याकाः प्रपाठकाः सन्ति । एकादशोत्तरशतसंख्याका (१११) अनुवादकाः, एकत्रिंशदुत्तरसप्तशतानि (७३१) सूक्तानि ५८४८ संख्याकाः मन्त्राश्च सम्पूर्णेऽथर्ववेदे सन्ति । अस्मिन् वेदे ऋग्वेदतः द्वादशशतसंख्याकाः (१२००) मन्त्राः ऋग्वेदतः संगृहीताः सन्ति ।

अथर्ववेदस्यारम्भिकेषु त्रयोदशकाण्डेषु मारणमोहनादिकानाम् मन्त्राः समुपवर्णिताः सन्ति । चतुर्दशे काण्डे विवाहविषयकाः मन्त्राः सन्ति । अष्टादशः काण्डः श्राद्धविषयको वर्त्तते । अवशिष्टानां काण्डानाम् मन्त्राः सोमयज्ञविषयकाः सन्ति ।

अथर्ववेदस्य नवसंख्याकाः शाखाः निम्नांकिताः स्वीक्रियन्ते—(१) पैप्पलादशाखा, (२) शौनकीयशाखा, (३) दामोदशाखा, (४) तौत्तायनशाखा, (५) जामलशाखा, (६) ब्रह्मपलाशशाखा, (७) कुनखाशाखा, (८) देववर्षीशाखा, (९) मारणविद्याशाखा च । किन्तु साम्प्रतमेतासु शाखासु केवलम् द्वे शाखे समुपलभ्येते—पैप्पलादशाखा शौनकशाखा च । पिप्पलादशाखायाः केवलम् प्रश्नोपनिषदेवोपलभ्यते । अन्ये अस्याः शाखायाः ग्रन्थाः लुप्ताः संजाताः ।

अथर्ववेदस्य शौनकशाखा प्रख्याता वर्त्तते । अस्या एव शाखायाः अथर्ववेदसंहिताऽपि समुपलभ्यते । गोपथब्राह्मणनामकः एको ब्राह्मणग्रन्थोऽप्यस्याः शाखायाः समुपलब्धो वर्त्तते । अस्याः शाखायाः द्वे उपनिषदौ समुपलभ्येते— मुण्डकोपनिषद् माण्डूक्योपनिषच्च । द्वौ सूत्रग्रन्थावपि शाखाया अस्याः समुपलभ्येते—वैतानश्रौतसूत्रम्, कौशिकगृह्यसूत्रञ्च ।

अस्याथर्ववेदस्य काव्यात्मकमपि महत्त्वम् वर्त्तते । डॉ० रामजी उपाध्यायमहोदयानुसारेणाथर्ववेदस्य भाषा बलवती वर्त्तते । अस्याम् स्पष्टता विचाराणामभिव्यक्तिशक्तिश्च वर्त्तते । अथर्ववेदीयस्य काव्यस्य विशदं रूपम् पृथिवीसूक्ते वर्तमानं विद्यते । अथर्ववेदानुसारेण—पृथ्वी—विश्वम्भरा, वसुधानी, प्रतिष्ठा, हिरण्यवक्षा, जगतः आश्रयदात्री, वैश्वानरस्य भरणपोषणकर्त्री च वर्त्तते ।

भारतीया आर्या यद्यपि अनेकेषां देवानां पूजका आसन् किन्तु ते एकस्यैव परमात्मनः विश्वव्यापिनीं सत्तां स्वीचक्रुः । तथा च मन्त्रः—

एकं सद् विप्राः बहुधा वदन्ति ।
अग्निं यमं मातरिश्वानमाहुः ॥ इति ।

हर्षचरितपरिचयः

संस्कृतगद्यकाव्यलेखकेपु वाणभट्टस्य स्थानम् सर्वोपरि वर्त्तते । अलंकृतगद्यकाव्यशैल्याः परिष्कृतं च यद्रूपम्, सुवन्धुदण्ड्यादिकानां काव्येषु समुपलभ्यते तस्य चरमो विकासः महाकवेः वाणभट्टस्यैव रचनायां समुपलभ्यते । महाकवेर्वाणभट्टस्य द्वे एव प्रख्याततमे रचने अस्माकम् समक्षम् समुपलभ्येते श्रीहर्षचरितम् कादम्बरी च । तत्र वाणभट्टस्यानयोः रचनयोः हर्षचरितम् गद्यकाव्यस्याख्यायिकाकोटावाटीकते, कादम्बरी च गद्यकाव्यकथाकोटावाटीकते ।

प्रो० चन्द्रशेखरपाण्डेयमहोदयेनाभिहितम् 'सर्वप्रथमम् ऐतिहासिकस्य गद्यकाव्यस्य रचनायाः श्रेयः वाणभट्ट एवाश्नुते ।' इति वाणभट्टः ईस्व्याः सप्तमशताब्दस्य
पूर्वार्द्धे लिखितमभूव् । गद्यकाव्यमिदम् उच्छ्वासेषु विभक्तमास्ते । हर्षचरिते अष्टौ
उच्छ्वासाः सन्ति । अस्याः कथायाः आरम्भः कथावत् कृतो वर्त्तते । प्रथमस्यो-
च्छ्वासस्यारम्भः ब्रह्मलोके जायमानया विद्वद्गोष्ठ्या भवति । तस्यां गोष्ठ्यां महर्षेः
दुर्वाससो विरसं गानं श्रुत्वा सरस्वती अपजहास । तेन रुष्टो महर्षिः तस्यै मर्त्यलोके
आगत्य जन्मग्रहणं कर्तुं शापमसृजत् । ब्रह्मणा आश्वस्ताऽपि सरस्वती विषण्णा सर-
स्वती सावित्र्या सह मर्त्यलोकमागत्य पुत्रजन्मं यावत् निवसति । शोणनदस्य तटे
च्यवनाश्रमस्य सविधे सरस्वती स्वाश्रमं चकार । तत्र एकस्मिन्नहनि प्रातःकाले
अश्वारोहिभिः साकं दधीचनामकोऽष्टादशवर्षदेशीयो युवकः अगात् विनीतवेषेण च
प्रविवेश सरस्वतीसावित्र्योः आश्रमे । तस्यांगरक्षकः प्राह यत् युवकोऽयम् च्यवन-
सुकन्ययोः आत्मजो वर्त्तते । ततस्तौ परस्परमासक्तौ साकमेव निवसतः दधीच-
सरस्वत्योः संयोगेन सारस्वतनामकः पुत्रोऽजायत । दधीचस्य भ्रातुः पत्नी अक्षमाला
पालनमकार्षीत् । अक्षमालायाः पुत्रस्य नाम वत्स आसीत् । तावुभौ साकमेव विद्या-
ग्रहणमकार्षीष्टाम् । वात्स्यायनवंशे एव अर्थपतेः एकादशपुत्रेषु चित्रभानुरभूत्
यस्य पुत्रो वाणो वभूव ! तदनन्तरमस्मिन् उच्छ्वासे वाणस्य देशाटनादिकस्य वर्णनम्
कृतमास्ते ।

द्वितीये उच्छ्वासे हर्षदेवस्य भ्रातुः कृष्णदेवस्य सन्देशमवाप्य वाणभट्टः श्रीहर्ष-
देवस्य सभायामगादिति वर्णितमास्ते । तृतीये उच्छ्वासे वर्णितमास्ते यत् श्रीहर्षस्य
सभातः स्वग्रामे आगत्य वाणः स्वबन्धूनामाग्रहेण हर्षचरितस्य निवन्धनं करोति । वाणः
पुष्पभूतेः कथानन्तरम् शैवयोगिनः भैरवाचार्यस्य कथां वर्णयति पुष्पभूतिः श्रीकण्ठ-
नागस्य दर्शनं करोति । श्रीकण्ठनागस्याग्रहेण प्रकटिता लक्ष्मी पुष्पभूतये वरं ददाति
यत् सः तथाविधस्य राजवंशस्य स्थापनां करिष्यति यस्मिन् श्रीहर्षस्य जन्म
भविष्यति ।

चतुर्थे उच्छ्वासे वर्णितमास्ते यत् पुष्पभूतेरेव वंशीयजस्य राज्ञः प्रभाकरवर्धनस्य

हर्षवर्धन-राजवर्धननामानौ द्वौ पुत्रौ राज्यश्री नाम्नी पुत्री च वभूवुः। राज्यश्रियः पाणिग्रहणं मौखरिराजः ग्रहवर्माकार्षीत्।

पञ्चमे उच्छ्वासे युवको राजवर्धनः हूणान् पराजेतुम् प्रस्थानं करोति। मध्ये मार्गतः एव हर्षवर्धनः दुःस्वप्नं दृष्ट्वा स्वपितरं द्रष्टुमायाति। पुनः हर्षवर्धनः स्वशरीरं त्यजति। हर्षवर्धनः स्वपितुः संस्कारं करोति।

षष्ठे उच्छ्वासे हूणान् विजित्य राज्यवर्धनो यदा स्वराजधानीमायाति तदैव शृणोति यत् ग्रहवर्मा मौखरिराजेन हतः, राज्यश्रीश्च वन्दी वभूव। तच्छ्रुत्वा राजवर्धन अयुतैः अश्वारोहिभिः सह मौखरिराजोपर्याक्रमणं कृत्वा तं निहत्य आगच्छन् सन् मध्येमार्गं गौडदेशाधिपतिना निहतो वभूव। तच्छ्रुत्वा शोकसन्तप्तः हर्षवर्धनः गौडराजोपर्याक्रमणस्य घोषणां करोति।

सप्तमे उच्छ्वासे हर्षवर्धनः गौडदेशाधिपोपर्याक्रमणं कृत्वा तं जयति तस्य राज्यं च हस्तयति हर्षसेनापति भीण्डिः।

अष्टमे उच्छ्वासे हर्षवर्धनः राज्यश्रियम् प्राप्नोति स्वभगिनीम् प्राणोत्सर्गं कर्तुमुद्यताम्। पुनः हर्षवर्धनः दिग्विजयं करोति। अनेनैव साकमयं ग्रन्थोऽपि पूर्णतामेति।

हर्षचरितमैतिहासिकं गद्यकाव्यं वर्तते। अस्मिन् तत्कालीनभारतस्य सांस्कृतिक-बौद्धिकजीवनस्य सफलं चित्रणं समुपलभ्यते। तदात्वे काव्यकलां प्रति कीदृशी श्रद्धा आसीदिति तु प्रथमोच्छ्वासे वर्णितानां–पदगोष्ठी–काव्यगोष्ठी–गीतगोष्ठी–नृत्यगोष्ठी· वाद्यगोष्ठी-वीणागोष्ठ्यादिकानां वर्णनमेवावलोक्यानुमातुं शक्यते।

अस्य काव्यस्यानुशीलानेनाभाति यत् तत्कालीनाः सम्भ्रान्ताः जनाः सुसंस्कृताः धृतिमन्तः क्षमावन्तः, शान्तिप्रियाः, विविधकलाविशारदाः, काव्यानुरागिणश्चासन्। यद्यपि हर्षचरितम् पूर्णमेवोपलभ्यते किन्तु तस्मिन्नपि महाकवेर्वाणस्य अद्भुता कवित्वशक्तिः स्पष्टरूपेण अवलोकिता भवति।

वाणभट्टः हर्षचरितस्य पञ्चमे उच्छ्वासे दिवाकरमिश्रस्याश्रमे विद्यमानानाम् एकोनविंशति सम्प्रदायानाम् वर्णनमकरोत्। ते च सम्प्रदायाः निम्नांकिता आसन्—

(१) अर्हितसम्प्रदायः, (२) मस्करीसम्प्रदाय, (३) श्वेतसम्प्रदायः, (४) पाण्डुरिभिक्षुसम्प्रदायः, (५) भागवतसम्प्रदाय, (६) वर्णीसम्प्रदाय, (७) केशालुञ्चनसम्प्रदायः, (८) कपिलसम्प्रदाय, (९) जैनसम्प्रदायः, (१०) लोकायतिकसम्प्रदायः, (११) कणादसम्प्रदायः, (१२) औपनिषदसम्प्रदायः, (१३) ऐश्वरसम्प्रदायः, (१४) कारन्धमीसम्प्रदायः, (१५) धर्मशास्त्रीयसम्प्रदायः, (१६)

पौराणिकसम्प्रदायः, (१७) सात्ततन्तवसम्प्रदायः, (१८) शाब्दसम्प्रदायः, (१९) पाञ्चरात्रिकसम्प्रदायश्च ।

एतेषां धार्मिकाणां सम्प्रदायानां वर्णनेन तात्कालिकानाम् धार्मिकाणां दार्शनिकानां च विचाराणां स्पष्टः परिचयः समुपलभ्यते । बाणः सांख्य–न्याय–वैशेषिक–वेदान्तबौद्धादिकाना दर्शनानामपि भेदानां उल्लेखमकार्षीत् ।

हर्षचरिते बाणः तत्कालीनानां विद्याकेन्द्राणामपि वर्णनमकरोत् । तस्मिन् समये नालन्दा–काशी–अवन्ती–मथुरा–तक्षशिलाप्रभृतीनि विद्याकेन्द्राणि प्रतिष्ठितान्यासन् । मौलिकाः ग्रन्था अधीयन्ते स्म, यथावसरं तेषां प्रश्नानां समाधानमपि क्रियतेस्म । समाधानसमर्थ एव पुरुषः शास्त्रार्थाय योग्य स्वीक्रियते स्म ।

हर्षचरितस्याध्ययनेन ज्ञायते यत् हर्षचरितम् बाणस्य प्रथमा रचना आसीत् एतस्मादेव हेतोः तस्य भाषाशैली च कादम्बरीव सशक्ता नाभूत् । अथापि हर्ष- चरितस्यान्यासु गद्यकृतिषु महत्त्वपूर्णं स्थानमस्ति इति सम्यगवधारयन्ति सुधियः ।

कादम्बर्याः परिचयः

कादम्बरी बाणभट्टस्य सा रचना वर्त्तते यस्याः गद्यकाव्येषु प्रतिष्ठा काष्ठां चुम्बति । कादम्बर्यामेव गद्यकाव्यप्रणयनकलायाः चरमो विकासः सम्पन्न इति सर्वे साहित्य- शास्त्रसमीक्षकाः शुद्धेन मनसा स्वीकुर्वन्ति । महाकविर्बाणभट्टः अस्यामेव रचनायाम् नैजं गजकाव्यरचनाविषयकम् परमं नैपुण्यम् प्रदर्शयामास । इमामेव बाणभट्टप्रणीतां कादम्बरीमवलोक्य समीक्षकाः मुक्तेन कण्ठेन प्रशंसन्तः प्राहुः । ‘गद्यं कवीनां निकषं वदन्तीति ।

नव्याश्चमत्कारपूर्णा अर्थाः मनोरमाः स्वभावोक्तियुक्ताः सरलाः श्लेषाः, स्पष्ट- रूपेण प्रतीयमानाः रसा अक्षराणां दृढबन्धाश्च महाकवेः गद्यकाव्यस्य विशेषताः सन्ति । कादम्बर्या अस्याः रचना तु स्वयमेव बाणभट्टोऽतिसावधानतया चकार इति नास्ति तिरोहितं विपश्चिदपश्चिमेभ्यो विद्वद्भ्यः । अतएव सः कादम्बर्याः मङ्गलाचरणे स्वयमेव प्राह—

‘द्विजेन तेनाक्षतकण्ठकौठचया महामनो मोहमलीमसान्धया ।
अलब्धवैदग्ध्यविलासमुग्धया धिया निबद्धेयमतिद्वयीकथा ॥’ इति ।

अनेन श्लोकेनायमप्यर्थः स्पष्टः संजातो यत् कादम्बरीयम् गद्यकाव्यस्य कथा- कोटावाटीकते । कथायाः कल्पनाप्रधानत्वात् महाकविः बाणोऽपि अस्मिन् गद्यकाव्ये स्वकीयायाः कल्पनाया प्रचुरमुपयोगमकार्षीत् । एतस्मादेव हेतोः कादम्बर्याम्– दीर्घकायसमासबहुला भाषा, विकटाक्षबन्धः श्लेषः, उपमा–उत्प्रेक्षा–विरोधाभास–

यमक–अनुप्रास–परिसंख्यादिकाः अलङ्कारा: सर्वत्र समुपलभ्यन्ते । कादम्बर्या इयम् महती विशेषता वर्त्तते यत् अस्यां एकस्य दीर्घवाक्यस्यापरं लघुवाक्यम् वर्त्तते । यदि कादम्बर्याम् कानिचन दीर्घसमासयुक्तानि भावगहनानि च वाक्यानि सन्ति तदा अस्याम् कानिचन समसितपदरहितानि, सरलभावयुक्तान्यपि वाक्यानि समुपलभ्यन्ते । अतएव कादम्बर्याम् सर्वप्रकारकाणि गद्यवाक्यानि सन्ति । तथाहि—

निम्नांकिते वाक्ये वाणभट्टः कोमलकान्तपदावल्याः प्रयोगमतिनिपुणतया कार्षीत्—'उत्फुल्लकुमुदवलयकह्लारम्········ ····अनेकजलचरपतङ्गशतसंचालनचलितवाचालवीचिमालम्'···· ··· इत्यादि ।

किन्तु विन्ध्याटव्याः चण्डिकाशवरसेनापत्यादिकानाम् वर्णने वाणभट्टः कठोरवर्णानां प्रयोगेण शब्दयोजनां साधयति । तथाहि—

रुधिराहुतिभिरिव पारिभद्रद्रमस्तवकवृष्टिभिस्तपर्यन्तस्तारवान्विभावसून् ···· ····दावदहनपच्यमानचटकाण्डखण्डखचिततरुकोटरकीटपटलपुटपाकगन्धकटवः ।' इति ।

किन्तु शुकनासोपदेशे लक्ष्म्याः दोषवर्णने, कपिञ्जलप्रदत्तपुण्डरीकोपदेशसमये कादम्बरीमहाश्वेतयोः विरहवर्णने वाणभट्टः व्यस्तानाम्, अथवाल्पसमासयुक्तानामेव पदानाम् प्रयोगं करोति । सेनाप्रस्थानकालिकमेकं वाक्यं यथा—

'प्रसर तात । भाव, किं विलम्बसे ? त्वङ्गति तुरङ्गमः, भद्र ! मानचरण इव सञ्चरसि, यावदमी पुरस्सराः सरभसमुपरि पतन्ति । वाहयसि किमुष्ट्रम् ? न पश्यसि निर्दय ! निःशुकशिशुं शयानाम् ? वत्स ! राभिल ! रजसि यथा न नश्यसि तथा समीपे भव । किं न पश्यसि गलति सक्तुप्रसेवकः ?···· ····।'

किन्तु प्रकृतिचित्रणं सजीवं कर्तुं वाणभट्टः अनुप्रासस्य बहुलतया प्रयोगं करोति । यथा— शुकशतमुखनखशिखरशकलितफलस्फीतैः हारिहारितरुतिरमणीयैः ।' इत्यादि ।

महाकवेः वाणस्य उज्जयिन्याः वर्णनप्रसङ्गे एकमार्थीपरिसंख्यायाः उदाहरणीम् प्रेक्षणीयमास्ते । तद्यथा—

'यस्याश्चानिवृत्तिर्मणिदीपानाम्, तरलता हारलतानाम्, अस्थितिः सङ्गीतमुजध्वनीनाम् द्वन्द्ववियोगश्चक्रवाकानाम्, वर्णपरीक्षा कनकानाम्, अस्थिरत्वं ध्वजानाम्, मित्रद्वेषः कुमुदानाम्' ।

कादम्बर्याम् उपमोत्प्रेक्षाश्लेषार्थान्तरन्यासविरोधाभासार्थापत्तिप्रभृतीनामलङ्काराणां प्रचुरप्रयोगे समुपलभ्यमानेऽपि कादम्बर्याः रचनायाम् कश्चन दोषो नास्तीति वक्तुं नहि शक्यते । सत्यपि सर्वविधे गद्यसौन्दर्ये कादम्बर्याम् तथाविधाः दीर्घाः

समासा अपि समुपलभ्यते, यैः वाधितः पाठकः भावास्वादने वाधामप्यनुभवति। क्वचन-क्वचन तु सामान्यानां पाठकानाम् वुद्धौ कवेर्भाव आभात्येव नहि।

कादम्बर्याः कथा चन्द्रापीडपुण्डरीकयोः जन्मत्रयस्य कथा विद्यते। आदौ विदिशायाः राज्ञः शूद्रकस्य प्रभाववैभवयोः परिचयात्मकं वर्णनं वर्त्तते। राज्ञस्तस्य सभायामेका सुन्दरी चाण्डालकन्या वैशम्पायननामकं पञ्जरगतं शुकमादायाति। शुकः सः शास्त्रज्ञः सन् मनुष्यस्य भाषायाम् वार्तयतीति सः राज्ञः परममनोरञ्जनास्पदं भवति। स एव शुकः कादम्बर्याः कथां कथयति। अत्रैवान्तर्भवति महर्षेः जावालेः चन्द्रापीडयोः कथा।

दिग्विजययात्राप्रसङ्गेन राजा चन्द्रापीडः हिमालयं याति। तत्र किन्नरमिथुनमनुगच्छन् अच्छोदसरोवरं याति। तत्रैव तत् किन्नरमिथुनमन्तर्हितं भवति। राजा अच्छोदसरोवरस्य सविधे एवाश्वं वद्ध्वा, महाश्वेतायाः संगीतेनाकृष्टः सन् शिवालये गत्वा, तया कादम्बर्याः परिचयं प्राप्य, तस्याः दर्शनं करोति। चन्द्रापीडकादम्बर्यौ परस्परम् आकृष्टौ भवतः। किन्तु प्रणयस्य पूर्तेः प्रागेव राजाचन्द्रापीडः स्वराजधानीमुज्जयिनीमायाति। ताम्बूलवाहिनी पत्रलेखा तत्रैव कादम्बर्याः स्नेहात्मकं सन्देशम् नयति। अत्रैव पूर्वार्द्धा कादम्बरी पूर्यते।

उत्तरभागे चन्द्रापीडः महाश्वेतायाः सविधे आयाति। तत्रैव सः स्वमित्रस्य वैशम्पायनस्य विपत्तेः कथां जानाति। वैशम्पायनः महाश्वेताया एव कोपभाजनतां गतः सन् शुको भवति। चन्द्रापीडः स्वमित्रस्य विपत्तिं श्रुत्वा स्वशरीरं त्यजति। इदं श्रुत्वा समागत्य कादम्बरी विलपति। चन्द्रापीडस्य माता-पितरौ वृत्तान्तेनानेन दुःखितौ भवतः कर्पिजलः स्वमित्रम् शुकमन्वेष्टुम् जावाल्याश्रमे आयाति दृष्ट्वा च स्वमित्रस्य विपत्तिं दुःखितो भवति। शुकः उड्डीय चाण्डालकन्यायाः सविधे याति। सा तं शुकम् शूद्रकस्य सभायाम् नयति। सा चाण्डालकन्यैव पूर्वजन्मनि पुण्डरीकस्य माता लक्ष्मीरासीत्। पूर्वजन्मनः वैशम्पायन एव शुक आसीत्। शूद्रक एव तारापीडो वभूव। सः पूर्वजन्मनः शुक आसीत्। लक्ष्मीरन्तर्हिता भवति, शुकस्यापि शरीरपातो भवति येन पुण्डरीकस्य मृतं शरीरं पुनर्जीवितं भवति। पुण्डरीकोऽपि आकाशादवतरति। महाश्वेतापुण्डरीकौ कादम्बरीचन्द्रापीडौच संगतौ भवतः।

इत्थम् कादम्बर्याम् पुण्डरीकचन्द्रापीडयोः जन्मत्रयस्य कथा वर्णिता वर्त्तते।

विक्रमाङ्कदेवचरितस्य परिचयः

विक्रमांकदेवचरितमहाकाव्यस्य प्रणेतुर्विल्हणस्य जन्म कश्मीरप्रदेशस्य प्रवरपुरस्य सविधे ख्योनसुन्दव नामके ग्रामे, एकस्मिन् ब्राह्मणपरिवारेऽभूत्। विल्हणस्य पितुर्नाम ज्येष्ठकलशः मातुश्च नाम देव्यासीत्। विल्हणः स्वविद्याभ्यासं समाप्य, मथुरा-कान्यकुब्ज-प्रयाग-काशी-अह्लवाल्डा प्रभृतिषु विविधानि नगराणि पर्यटन्, दाक्षिणा-

त्यस्य कल्याणस्य चालुक्यवंशीयस्य राज्ञः षष्ठविक्रमादित्यस्य सभामगमत्। तत्र राजा षष्ठो विक्रमादित्यः विल्हणं स्वराजसभायाः पण्डितं कृत्वा, तम् विद्यापतेः विरुदेन व्यभूषयामास। तत्रैव विल्हणः विक्रमांकदेवचरितनामकस्य महाकाव्यस्य प्रणयनमकार्षीत्।

विक्रमांकदेवचरितनामकमिदं महाकाव्यम् अष्टादशसर्गात्मकमतिमनोज्ञम् ऐतिहासिकमहाकाव्येष्वन्यतमं स्थानं बिभर्ति। अस्मिन् काव्ये चालुक्यवंशीयस्य राज्ञो विक्रमादित्यस्य चरित्रम् वर्णितमास्ते। अस्य महाकाव्यस्य प्राथमिकेषु सप्तेषु सर्गेषु ऐतिहासिकस्य विषयस्य विस्तृतं वर्णनम् समुपलभ्यते। अष्टमे सर्गेषु राजकुमार्याः चन्दलदेव्याः नायकेन सह परिणयप्रबन्धः प्रारब्धो भवति। वसन्तर्तोः शृङ्गारिकं वर्णनम्, नायिकायाः सौन्दर्यवर्णनम् विवाहस्य कामक्रीडायाश्च एकादशसर्गं यावत् महाकविना विल्हणेन वैदुष्यमय्यायां मनोज्ञायां शैल्यां कृतमास्ते। द्वादशे त्रयोदशे, षोडशे च सर्गे जलक्रीडायाः, मृगयादिकस्य च वर्णनं कृतमास्ते। चतुर्दशपञ्चदशयोः सर्गयोः महाकविर्विल्हणः कौटुम्बिकस्य कलहस्य वर्णनमकरोत्। सप्तदशे सर्गे चोलानां पराजयस्य वृत्तान्तं वर्णितम्। अष्टादशे सर्गे महाकविर्विल्हणः स्वकुटुम्बस्य वर्णनं कृत्वा स्वेन कृतायाः भारतस्य यात्रायाः वर्णनमकार्षीत्।

महाकविर्विल्हण विक्रमांकदेवचरितमहाकाव्ये ऐतिहासिकानामेव तत्त्वानाम् संकलनेऽधिकप्रयासरतः प्रतीयते। अत्र महाकविः स्वकीयाया यात्रायाः रोचकं वर्णनमकरोत्। तेन तत्कालीनस्य भारतस्य सामाजिकी व्यवस्था पूर्णतया ज्ञायते। किन्तु पौराणिकानाम् अलौकिकानां च प्रसङ्गानामुल्लेखेन, काव्यस्यैतिहासिकं महत्त्वमपहीनं जातम्। किञ्चास्मिन् काव्ये घटनानां तिथयोऽपि नह्युल्लिखिताः सन्ति। ऐतिहासिकत्वाय तिथीनामुल्लेखोऽप्यावश्यको भवति। क्वचन–क्वचन चरितनायकस्यातिरञ्जितम् वर्णनमपि कृतमास्ते। किन्तु कवित्वस्य दृष्टचेदम् निस्सन्देहः रमणीयम् काव्यमास्ते।

सम्पूर्णेऽस्मिन् महाकाव्ये माधुर्यप्रसादयोः परिपूर्णं परिपोषोऽनुभूयते। अस्य काव्यस्यांगीरसो वीरो वर्त्तते। यद्यपि अथापि शृङ्गारकरुणयोरपि रसयोः सम्यक्तया निर्वाहः कृतोऽत्र वर्त्तते। विल्हणस्यास्मिन् काव्ये काचिदेतादृशा प्रौढिरस्ति यथा सहृदयहृदयम् तस्मिन् झटिति आकृष्टं भवति। सूक्तीनामप्यत्र समुच्चयो दृश्यते। तथाहि—

कर्णामृतं सूक्तिरसं विमुच्य दोषे प्रयत्नः सुमहान् खलानाम्।
निरीक्षते केलिवनं प्रविष्टः क्रमेलकः कण्टकजालमेव॥ इति।

राजतरंगिण्याः परिचयः

महाकविना कल्हणेन कृता राजतरंगिणी ऐतिहासिकेषु काव्येषु सर्वाधिकमुल्लेख-

नीया वर्त्तते । ११०० ईस्व्याः सविधे कल्हणः स्वजनुषा कश्मीरप्रदेशमलङ्कृतवान् । सः तत्कालीनस्य कश्मीरनरेशस्य विजयसिंहस्यामात्यस्य चम्पकस्य पुत्र आसीत् । सः राजतरंगिण्याम् आदिकालत आरभ्य ११५१ ईस्व्या आरम्भपर्यन्तानाम् समेषां कश्मीराधिपतीनां शासनकालीनघटनानां वर्णनमकरोत् । अतएव काव्यस्य माध्यमेन संस्कृतसाहित्ये ऐतिहासिकघटनानां क्रमबद्धेतिहासवर्णनस्य प्रप्रथमः प्रयास आसीदिति स्वीकुर्वन्ति समीक्षकाः ।

अत्रेदमपि ध्येयमास्ते यदस्मिन् काव्ये कल्हणः ऐतिहासिकानां सर्वासां घटनानां पक्षपातरहितेन मनसा वर्णनमकार्षीत् । यः श्लाघ्यः प्रशासकोऽभूत् तस्य तु सः प्रशंसामकार्षीत् अन्यथा स. तस्य प्रशासकस्य पतनस्य कारणानामपि वर्णनमरोत् । अस्मिन् काव्ये कल्हणः कश्मीरीसमाजे विद्यमानानां दुष्प्रवृत्तीनामपि वर्णनमकरोत् निष्पक्षपातत्या । कल्हणः कश्मीराधिपतीनां चरित्रसंग्रहे, नीलमतपुराणस्य, अधिकारपत्राणां शिलालेखानां, दानपत्राणां, प्रशस्तिपत्राणां हस्तलिखितग्रन्थानां च साहाय्यं स्वीकृतवान् । अस्मिन् काव्यनिर्माणे कल्हणः स्थानीयजनश्रुतिभ्यः परम्पराभ्यश्च लाभमाप्तवान् । इत्थम् राजतरंगिण्यां कश्मीरस्य सार्द्धैकसहस्रवर्षाणाम् राजनैतिकः सांस्कृतिकश्च इतिहासः सुरक्षितो वर्त्तते । अतएव समीक्षका राजतरंगिणीम् तत्कालीनस्य कश्मीरस्य विश्वकोशमभिदधति ।

राजतरंगिणी अष्टसु खण्डेषु विभक्ता वर्त्तते । तस्याम् ७८२६ श्लोकाः सन्ति । यद्यपि यद्यपीयमैतिहासिकी रचना वर्त्तते तथाप्यस्याम् काव्यगुणा नापहीयन्ते । यद्यपि विच्छित्तिविशेषस्य सन्निसहस्राब्दानां इतिहासस्यात्र निबद्धत्वा अत्र काव्योचित वेशायावकाशस्याभाव इवाभाति किन्तु यत्र–यत्र कविकल्पनायाः, रसानामलङ्काराणां भावानां च समावेशमकार्षीत् तत्र-तत्र तु सर्वे संवादाः मनोज्ञाःओजसा परिपूर्णाश्च सन्ति । राजतरंगिण्याः भाषा प्रभावशालिनी, सरला सुबोधा चास्ति । अस्य शैली महाभारतवदाभाति । कल्हणः राजतरंगिण्याः विषयान् सर्वजनसुलभान् कर्तुम् साधारणानां शब्दानामर्थानां च विन्यासमावश्यकमनुबभूव । अथापि कुत्रचित् मनोरमाणां विषयाणां वर्णनाय कल्हणः भारविमाघयोरपि शैल्या अनुगमनमकार्षीत् । सामाजिकानां हृदयं भावाविष्टं कर्तुम् कल्हणः भावुकतामयीं शैलीम् स्वीचकार । तत्र सः ऐतिहासिकीम् परिधिं सम्मुल्लंघ्य रसप्रावण्यम् काव्ये सृजति ।

कल्हणस्य महाकवेः निम्नांकितासूक्तिः भावगम्भीरा मार्मिकतापूर्णा च वर्तते—

सुत्क्षामस्तनयो वधूः परगृहप्रोष्याऽवसन्नः सुहृत्,
दुग्धा गौरशनाद्यभावविवशाहम्बरवो गारिणी ।
निष्पथ्यौ पितरावदूरमरणौ स्वामी द्विषन्निर्जितो,
दुष्टो येन परं न तस्य निरये प्राप्तव्यमस्याऽप्रियम् ॥

वासवदत्तायाः परिचयः

वासवदत्ता सुबन्धोः प्रख्याततमा रचना वर्त्तते । सुबन्धोः कालः इदानीमप्यनिर्णीतो वर्त्तते । केषांचन समीक्षकाणाम् मतानुसारेण सुबन्धोः वासवदत्तायां कादम्बर्याः अनेकविधः प्रभावो दृग्गोचरो भवति । भानुचन्द्रानुसारेण बाणभट्टः स्वकीयां कादम्बरीकथाम् अतिद्वयीकथामुक्त्वा वासवदत्ताबृहत्कथयोः निर्देशमकार्षीत् ।

म० म० काणे महोदयानुसारेण बाणकृतस्य हर्षचरितस्योपरिसुबन्धुकृतायाः वासवदत्तायाः प्रभावो वर्त्तते । किञ्च हर्षचरिते बाणभट्टः सुबन्धुकृतायाः वासवदत्ताया अप्युल्लेखमकार्षीत् अतएव सुबन्धुः बाणभट्टस्य पूर्ववर्त्त्यासीत् ।

वामनः काव्यालङ्कारसूत्रवृत्ती वासवदत्ताकादम्बर्योः यस्मादुल्लेखमकार्षीत् अतएवेमौ सुबन्धुबाणौ नूनम् ७५० ईस्वीतः पूर्ववर्तिनौ आस्ताम् ।

राघवपाण्डवीयकाव्यप्रणेता कविराजः (१२०० ई०) स्वकीये काव्ये सुबन्धुम् बाणमात्मानञ्च वक्रोक्तिनिबन्धनकुशलानाह । अत्रेदमप्यनुमीयते यत् इमानि त्रीणि नामानि तेन कालक्रमेणैवाभिहितान्यत एवापि सुबन्धुः बाणभट्टस्य पूर्ववर्त्यासीत् ।

वाक्पतिराजस्य प्राकृते 'गउडवहो' नामके काव्ये सुबन्धोस्तूल्लेखः समुपलभ्यते, किन्तु तत्र बाणस्योल्लेखो नास्ति । एतेन ज्ञायते यत् वाक्पतिराजस्य समये सुबन्धुः प्रख्यात आसीत्, किन्तु तदानीं यावत् बाणस्य कापि प्रसिद्धिः नासीदत एवापि सुबन्धुः बाणभट्टस्य पूर्ववर्ती प्रतीयते ।

इत्थं बहुधा विविच्य समीक्षकैः सुबन्धोः कालः ६०० ईस्वी स्वीकृतः ।

वासवदत्तायाः कथा, तस्याः गद्य शैली च—सुबन्धो एकमात्र रचना वासवदत्ता प्राप्यते । किन्तु अस्याः कथायाः सम्बन्धः वत्सराजेनोदयनेन साकम् नास्ति । वासवदत्तायाः कथा सुबन्धोः कल्पनाप्रसूता वर्त्तते । तथा च वासवदत्तायाः संक्षिप्ता कथा—

आसीत् चिन्तामणेर्नृपतेः कन्दर्पकेतुनामक आत्मजः अतीव सुन्दरः । एकदा सः स्वप्ने आत्मनोऽपि रमणीयमतीव सुन्दरीं काञ्चिद् बालाम् ददर्श । तेन स्वप्नेन सः विगतनीद्रो बभूव । स एकान्ते स्वमित्रम् मकरन्दम् तस्याः कन्यायाः विषये कथयामास याम् सः स्वप्ने विलोक्य विगतनीद्रो बभूव । कन्दर्पकेतुः स्वमित्रेण मकरन्देन साकम् ताम् कन्यामन्वेष्टुं पर्यटन् इतस्ततः यदा कस्यांचन रात्री विन्ध्यपर्वतस्य कस्यचन वृक्षस्याधस्तात् स्वमित्रेण मकरन्देन साकम् स्थित आसीत् तदा सः काञ्चित् सारिकाम् स्वप्रियेण साकम् कलहायमानामश्रौषीत् । शुकः स्वविलम्बेनागमनकारणं

निवेदयन् स्वप्रियामाह यत्—आस्ते श्रृङ्गारशेखरस्य राज्ञ अनन्यसुन्दरी वासवदत्ताभिधाना मनोरमात्मजा। या स्वप्ने कञ्चिदतीवसुन्दरम् राजकुमारमवलोक्य तस्यामासक्तमनाऽस्ते। तया च तमालिका नाम्नी विश्वस्ता दूती तस्य युवकस्य पार्श्वे स्वप्रगाढस्य विश्वासं दातुं प्रेषिता वर्त्तते। तच्छ्रुत्वा कन्दर्पकेतुः श्रृङ्गारशेखरस्य राजधानीं पाटलिपुत्रं याति। तत्र सः स्वप्रेयसीं वासवदत्तां विना काठिन्यं पश्यति। किन्तु कन्दर्पकेतुः तदा दुःखितो भवति यदा स जानाति यत् वासवदत्तायाः अविवाहितयावस्थया उद्विग्नो राजा विद्याधराणां राज्ञा पुष्पकेतुना साकं वासवदत्तायाः विवाहं कर्तुमुद्यतो वर्त्तत इति। अतएव वासवदत्ताकन्दर्पकेतू आश्चर्यमयेन अश्वेन द्वारा अलक्ष्यगत्या विन्ध्यवनं पलायितौ बभूवतुः। तत्र तौ नीद्रामग्नौ बभूवतुः। उत्थितः कन्दर्पकेतुर्ददर्श यत् तस्य सविधे वासवदत्ता नासीत्। तेन सः आत्महत्यां कर्तुं यदा उद्यत आसीत् तदाश्रौषीदाकाशवाणी यत् वासवदत्तां सः पुनर्लप्स्यते। वासवदत्तां बहुकालम् सो वने गवेषयति स्म। एकदा सः काञ्चित् शिलापुत्रिकामवलोकयामास। यदा सा शिलापुत्रिका तस्य यदा स्पृष्टा सञ्जाता तदा तस्यां जीवनस्य संचारः सम्बभूव। सा तस्य प्रियायाः वासवदत्तायाः रूपेण परिणता बभूव। पुनस्तौ साकमेव तौ स्वराजधानीमाजग्मतुः।

डॉ भोलाशंकरव्यासमहोदयानुसारेण वासवदत्तायाः कथायाम् निम्नांकितानाम् लोककथानकरूढीनाम् समावेशः कृतो वर्त्तते।

(१) नायकनायिकयोः स्वप्नदर्शनेन प्रणयोद्बोधो भवति।

(२) नायकनायिकयोः सांगत्ये शुकपक्षी सहायं करोति।

(३) अस्याः कथायाः कस्यचनांशस्य वक्ता शुकपक्षी वर्त्तते।

(४) मनोजववेगवता आश्चर्यमयेनाश्वेन द्वारा नायकनायिके पलायिते भवतः।

(५) शापस्य कल्पना। शापेन द्वारा नायिकायाः शिलारूपेण परिणामः।

(६) आत्महत्यां कर्तुम् उद्यतस्य नायकस्य आकाशवाण्या आत्महत्याकरणतो निषेधः।

यद्यपि वासवदत्तायाः कथातीव संक्षिप्ता, निर्जीवा च वर्त्तते तथापि सुबन्धुः सुन्दरवर्णनाभिः तस्यां प्राणस्य संचारमकार्षीत्। अस्मिन् गद्यकाव्ये सुबन्धो उद्देश्यम् वर्णनचातुर्यस्य प्रख्यापनमासीत्। अतएव वर्णनचातुर्यवैशिष्ट्येनैव साहित्यिके जगति प्रख्यातो बभूव। अस्याः वासवदत्तायाः अध्ययनेन इदमपि स्पष्टं भवति यत् सुबन्धुः व्याकरण-न्याय-मीमांसा-बौद्धसाहित्यादिकानां नानाविद्यानामद्भुतो विद्वानासीत्।

सुबन्धुः वासवदत्तायाम् श्लेषोपमयोरलङ्कारयोर्माध्यमेन रामायणमहाभारतहरिवंशादिकानामल्पप्रसिद्धानाम् वहूनां कथानां निर्देशं करोति।

सुबन्धोर्मतानुसारेण तु सत्काव्यम् तदेव भवति यस्मिन् श्लेषोपमावक्रोक्त्यादिकानामलङ्काराणां प्रचुरतया प्रयोगो भवति। तद्यथा—

'सुश्लेषवक्रघटनापटु सत्काव्यविरचनामिव।' इति।

इत्थं सुबन्धो गद्यशैली अतिशयोक्त्यनुप्रासादि अलङ्कारप्रचुरा समासबहुला मौगीरीतिमयी च वर्तते। एतस्मादेव हेतोः सुबन्धुः भावपक्षस्य चित्रणे साफल्यं नाधिगच्छति। वासवदत्तायाः विरहवर्णने सः आनुप्रासिकमेव चमत्कारमुद्भावयति।

तद्यथा—

'सुकान्तो! कान्तिमतिः! मन्दं भावमपनय वाष्पविन्दून्। यूथिकालङ्कृतयूथिके! सञ्चारय नलिनीदलतालवृन्तेनार्द्रवातान्। एहि भगवति नीद्रे! अनुगृहाण माम्। धिक् इन्द्रियैरपरैः। किमिति लोचनमयान्येव कृतान्यङ्गानि विधिना। भगवन्! कुसुमा- युध! तवायमञ्जलिः। अनुवशी भव भाववति मादृशे जने। मलयानिलसुरत- महोत्सवदीक्षागुरो वा यथेष्टम्। अपगता मम प्राणाः इति वहुविधं भाषमाना वास- वदत्ता सखीजनेन समं सम्मुमूर्च्छ।' इति।

सुबन्धुः वासवदत्तायाम् प्रत्यक्षरश्लेषप्रयोगस्याग्रही आभाति। अतएव वासवदत्तानामकं गद्यकाव्यमिदम् श्लेषविरोधाभासादिकानाम् अलङ्काराणाम् साग्रहप्रयोगेणाति दुरवगाहा संजाता। तेन हि पाठकः काव्यतात्पर्यान्वेषणे अक्षमतामप्यनुभवति। इत्थम् काव्यमिदम् काठिन्यायाप्यतीव प्रख्यातो वर्तते। प्रौढा एवात्र विद्वांसप्रवेशकरणे क्षमाः भवन्ति। विनेयानां सुकुमारमतीनामत्र प्रवेशस्तु सर्वथा असम्भव एवाभाति।

किन्तु वासवदत्ता सुबन्धुकृता सर्वथा दोषमय्येव वर्तते इति वक्तुं नहि शक्यते। वासवदत्तायाः प्रशंसायाम् आचार्यो वामनस्तु वक्ति—

'प्रतिकावभेदनबाणः कवितातरुविहरणमयूरः।
सहृदयलोकसुबन्धुः जयति श्रीभट्टबाणकविराजः॥' इति।

शिवराजविजयपरिचयः

शिवराजविजयः ऊनविंशतिशताब्दस्योल्लेखनीयम् गद्यकाव्यम् वर्तते। अस्य गद्यकाव्यस्य प्रणेता अम्बिकादत्तव्यासः वाराणस्याः विद्वत्स्वन्यतम आसीत्।

शिवराजविजयनामके गद्यकाव्ये छत्रपतिशिवाजीमहाराजस्य जीवनचरितमङ्कितमास्ते। भारतीयस्वतन्त्रतासंग्रामकाले लिखितमिदं काव्यम् राष्ट्रियजनजागरण-

कर्मण्यपि सहायकमभूत् । श्री अम्बिकादत्तव्यासो यथावसरं कल्पनायाः प्रचुरं प्रयोगम् कुर्वन्नप्यस्य काव्यस्यैतिहासिकतां संरक्षितामकार्षीत् ।

विषयवस्तुनो दृष्टया शिवराजविजये शिवाजी–औरङ्गजेवविषयिणीनामेव घटनानां निवन्धनमकार्षीत् ग्रन्थकारः, किन्तु अत्र तत्कालीना प्रख्याताः यशवन्तसिंह–अफजलखानप्रभृतयः पुरुषा अत्राङ्किता्सन्ति । लेखकः अस्य गद्यकाव्यस्य प्रत्येकपात्रस्य चित्रणे स्वकौशलं प्रदर्शितवान् । अस्मिन् गद्यकाव्ये शिवाजी महाराजः भारतीयादर्श–संस्कृति–सभ्यता–मातृशक्तीनां संरक्षकरूपेण चित्रितो वर्त्तते । अस्यां कृतौ शिवाजी-महाराजस्य ऐतिहासिकं व्यक्तित्वं पूर्णतया सुरक्षितमास्ते । तथाहि—

"महाराष्ट्रदेशरत्नम् यवनशोणितपिपासाकुलकृपाणः वीरतासीमन्तिनी-सीमन्त–सुन्दर–सान्द्र–सिन्दूरदान–देदीप्यमानदोर्दण्डः, मुकुटमणिः महाराष्ट्राणाम्, भूषणं भटानाम्, निधिर्नीतीनाम्, कुलभवनं कौशलानाम्, पारावारः परमोत्साहानाम् स्वधर्माऽऽग्रहग्रहितः शिव इव धृतावतारः………कार्यं वा साधयेयम् देहं वा पातयेयम् ।" इति अनेनानुच्छेदेन शिवाजीमहाराजस्य चरित्रस्य सम्पूर्णा विशेषताऽभिव्यक्ता भवति ।

अस्य ग्रन्थस्य चरितनायकस्य चरित्रचित्रणावसरे श्रीव्यासमहोदयेन स्पष्टीकृतम् यत् औरङ्गजेबः परदारापहर्त्ता आसीत् तदा शिवाजीमहाराजः यवनशासकस्य कन्यां सुरक्षितरूपेण ससम्मानम् तस्याः गृहं प्रेषयति ।

शिवराजविजयगद्यकाव्यस्याङ्गीरसो वीररसो विद्यते; परन्तु हास्य–शान्त–वीभत्साख्या अपि रसाः अस्य काव्यस्याङ्गभूताः रसाः अत्र यथावसरं सन्निवेशिताः सन्ति । यादृशं वीररसस्योदाहरणं शिवराजविजये समुपलभ्यते, तादृशमुदाहरणमन्यत्र दुर्लभमेव । तथा चाफजलखानवधप्रसङ्गे—

"तत्क्षणादेव च शिववीरध्वजिन्यां महाध्वजः एकः समुच्छ्रितः समकालमेव यवन-
शिविरस्य पृष्ठस्थिता शिववीरसेना शिविरमग्निसात्कृतवती, पुरःस्थितसेनासु च
अकस्मादेव महाराष्ट्रकेसरिणः समापतन् । तेषां हरहरमहादेवगर्जनपुरस्सरम् छिन्धि–
भिन्धि–मारय–विपोथय इति कोलाहलः प्रत्यर्थिनश्च—"खुदातोबा–अल्लादि'
पारस्य पदमयः कलकरो रोदसी समपूरयत् ।" इति

अनेनैव प्रकारेण वीभत्सरसस्य निम्नांकितम् शिवराजविजयस्थितमुदाहरणमवलोकनीयम् वर्त्तते ।

"अथ मुनिरपि दाडिमकुसुमास्तरणाच्छन्नायामिव गाढरुधिरदिग्धायां ज्वलद-
ङ्गारचितायां चितायामिव वसुधायां शयानम् वियुज्यमानभारतभुवमालिङ्गन्तमिव
निर्जीवीभवदङ्गबन्धचालनपरं शोणितसङ्घातव्याजेन अन्तःस्थितरजोराशिमिवो-
द्गिरन्तं कलितमाधन्तनघनाडम्बरविभ्रमं मततताम्रचूडभक्षणपातकेनेव ताम्रीकृतं
छिन्नकन्धरम्…… …।" इति ।

शिवराजविजयस्य वर्णनशैल्यपि प्रशंसनीया वर्त्तते । किन्तु श्री अम्बिकादत्तव्यासः अस्य वर्णनप्रधानकाव्यस्य घटनानां गतिशीलताया विषये पूर्णतया सावधानः प्रतीयते । एतस्मादेव हेतोः समीक्षकाः श्रीमन्तम् अम्बिकादत्तव्यासमभिनवबाणस्यापि उपाधिना विभूषितवन्तः । श्री अम्बिकादत्तव्यासस्य वर्णने प्रसादस्य प्रवाहः सर्वत्रावलोक्यते ।

श्री अम्बिकादत्तव्यासः शिवराजविजये प्राकृतिकानामपि वर्णनानाम् सन्निवेशमकरोत् । शिवराजविजयस्योपक्रम एव सूर्योदयवर्णनेन साकम् भवति । तद्यथा—

'एष भगवान् मणिराकाशमण्डलस्य चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य इनश्च दिनस्य । अयमेवाहोरात्रं जनयति । अयमेव वत्सरं द्वादशभागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम् ।' इति ।

अनेनैव प्रकारेण अम्बिकादत्तव्यासः एकत्र पर्वतखण्डसरोवरनिर्झरादिकानामतीव मनोज्ञं वर्णनमकरोत् । अनेन तस्य कवेः प्राकृतिकवर्णनस्य सूक्ष्मेक्षिकाभिव्यक्ता भवति । तद्यथा—

'कदलीदलकुञ्जायितस्य एतत् कुटीरस्य समन्तात् पुष्पवाटिका, पूर्वतः परमपवित्रयानीयं परस्सहस्रपुण्डरीकपटलपरिलसितं पतत्त्रिकुलपूकूजनजितं पयःपूरपूरितं सरः आसीत् । दक्षिणतश्चैको निर्झरझर्झर–ध्वनिध्वनितदिगन्तरः, फलपटलाऽऽस्वादचपलित चञ्चु–पतङ्गकुलाक्रमणाधिक–विनत–शाख–शाखिसमूह–व्याप्तः सुन्दरकन्दरः पर्वतखंडः आसीत् ।' इति ।

शिवराजविजयस्य भाषासौन्दर्यमपि संश्लाघ्यमास्ते । अस्मिन् गद्यकाव्ये भावानुरूपिणी भाषा प्रयुक्ता वर्त्तते । येन सा पाठकानाम् हृदयेषु स्वसंस्कारम् वितनोति ।

कौटिल्यमर्थशास्त्रम्

कौटिल्यमर्थशास्त्रम् वस्तुतो राजनीतेर्ग्रन्थो विद्यते । अत्रार्थशब्दस्यार्थः राजाप्रजयोरर्थो विद्यते इत्थमर्थशास्त्रस्याभिव्यक्तिः सा विद्या विद्यते, या राजा राष्ट्रं च समृद्धिसम्पन्नं करोति । अर्थशास्त्रे राज्ञः विश्वात्मिकायाः प्रगतेः अभ्युदयस्य च योजनाः प्रस्तूयन्ते । इत्थम् कौटिल्यमर्थशास्त्रम् तथाविधो ग्रन्थो विद्यते यत्र समेषां राजोचितानां कर्मणां समालोचना कृता वर्त्तते । कौटिल्यार्थशास्त्रस्य विषयाणां

विवरणमित्थं वर्त्तते। अस्मिन्नर्थशास्त्रे पञ्चदशसङ्ख्यकान्यधिकरणानि सन्ति। एतेषामधिकरणानाम् संक्षिप्तरूपेण विषयाणामत्र विवरणं प्रस्तूयते। तद्यथा—

[क] **विनयाधिकारिकाधिकरणम्**—अस्मिन्नधिकरणे अष्टादशसङ्ख्याकानि प्रकरणानि सन्ति। तथाहि—(१) विद्यासमुद्देशः, (२) वृद्धसंयोगः, (३) इन्द्रियजयः, (४) आमात्योत्पत्तिः, (५) मन्त्रिपुरोहितोत्पत्तिः, (६) उपधाभिः शौचाशौचज्ञानमामात्यानाम्, (७) गूढपुरुषोत्पत्तिः, (८) गूढपुरुषप्रणिधिः, (९) स्वविषये कृत्याकृत्यपक्षरक्षणम्, (१०) परविषये कृत्याकृत्यपक्षोपग्रहः, (११) मन्त्राधिकारः, (१२) दूतप्रणिधिः, (१३) राजपुत्ररक्षणम्, (१४) अवरुद्धवृत्तम्, (१५) अवरुद्धे च वृत्तिः, (१६) राजप्रणिधिः, (१७) निशान्तप्रणिधिः, (१८) आत्मरक्षितम्।

[ख] **अध्यक्षप्रचारः**—अस्मिन्नधिकरणे अष्टात्रिंशत् प्रकरणानि सन्ति। तथाहि—(१) जनपदविनिवेशः, (२) भूमिच्छिद्रविधानम्, (३) दुर्गविधानम्, (४) दुर्गविनिवेशः, (५) सन्निधातृनिचयकर्म, (६) समाहर्तृसमुदयप्रस्थापनम्, (७) अक्षपटले गाणनिक्याधिकारः, (८) समुदयस्य युक्तापहृतस्य प्रत्यानयनम्, (९) उपयुक्तपरीक्षा, (१०) शासनाधिकारः, (११) कोशप्रवेश्यरत्नपरीक्षा, (१२) आकरकर्मान्तप्रवर्तनम्, (१३) अक्षशालायां सुवर्णाध्यक्षः, (१४) विशिखाया सौवर्णिकप्रचारः, (१५) कोष्ठागाराध्यक्षः, (१६) पण्याध्यक्षः, (१७) कुप्याध्यक्ष, (१८) आयुधागाराध्यक्षः, (१९) तुलामानपौतवम्, (२०) देशकालमानम्, (२१) शुल्काध्यक्षः, (२२) सूत्राध्यक्षः, (२३) सीताध्यक्षः, (२४) सूराध्यक्षः, (२५) सूनाध्यक्षः, (२६) गणिकाध्यक्षः, (२७) नावध्यक्षः, (२८) गोध्यक्ष, (२९) अश्वाध्यक्षः, (३०) हस्त्यध्यक्षः, (३१) रथाध्यक्षः, (३२) पत्त्यध्यक्षः, (३३) सेनापतिप्रचारः, (३४) मुद्राध्यक्षः, (३५) विवीताध्यक्षः, (३६) समाहर्तृप्रचारः, (३७) गृहपतिकवैदेहकतापसव्यञ्जनाः प्रणिधयः, (३८) नागरिकप्रणिधिश्च।

[ग] **धर्मस्थायीमधिकरणम्**—अस्मिन्नधिकरणे निम्नांकितानि एकोनविंशति प्रकरणानि सन्ति। तद्यथा—(१) व्यवहारस्थापना, (२) विवादपदनिबन्धः, (३) विवाहसंयुक्तम्, (४) दायविभागः, (५) वास्तुकम्, (६) समयस्यानपाकर्म, (७) ऋणदानम्, (८) औपनिधिकम्, (९) दासकर्मकरकल्पः, (१०) सम्भूयसमुत्थानम्, (११) विक्रीतक्रीतानुशयः, (१२) दत्तस्यानपाकर्म, (१३) अस्वामिविक्रयः, (१४) स्वस्वामिसम्बन्धः, (१५) साहसम्, (१६) वाक्पारुष्यम्, (१७) दण्डपारुष्यम्, (१८) द्यूतसमाह्वयम्, (१९) प्रकीर्णकानि च।

[घ] कण्टकशोधनादिकरणम्—अस्मिन्नधिकरणे निम्नांकितानि त्रयोदशप्रकरणानि सन्ति—(१) कारुकरक्षणम्, (२) वैदेहकरक्षणम्, (३) उपनिषातप्रतीकारः, (४) गूढाजीविनां रक्षा, (५) सिद्धव्यञ्जननिर्माणवप्रकाशनम्, (६) शङ्कारूपकर्माभिग्रहः, (७) आशुमृतकपरीक्षा, (८) वाक्यकर्मानुयोगः, (९) सर्वाधिकरणक्षणम्, (१०) एकाङ्गवधनिष्क्रयः, (११) शुद्धश्चित्रश्चदण्डकल्पः, (१२) कन्याप्रकर्म, (१३) अतिचारदण्डश्च ।

[ङ] योगवृत्तमधिकरणम्—अस्मिन्नधिकरणे सप्तप्रकरणानि सन्ति । तानि यथा—(१) दाण्डकर्मिकम्, (२) कोशाभिसंहरणम्, (३) भृत्यभरणीयम्, (४) अनुजीविवृत्तम्, (५) सामयाचारिकम्, (६) राज्यप्रतिसन्धानम्, (७) एकैश्वर्यम् च ।

[च] मण्डलयोन्यधिकरणम्—अस्मिन् अधिकरणे द्वे प्रकरणे स्तः—(१) प्रकृतिसंवदः, (२) शमव्यायामिकम् च ।

[छ] षाड्गुण्याधिकरणम्—अस्मिन्नधिकरणे एकोनत्रिंशत् प्रकरणानि सन्ति । तद्यथा—(१) षाड्गुण्यसमुद्देशः, (२) क्षयस्थानवृद्धिनिश्चयः, (३) संश्रयवृत्तिः, (४) समहीनज्यायसां गुणाभिनिवेशः, (५) हीनसङ्घयः, (६) विगृह्यासनम्, (७) सन्धायासनम्, (८) विगृह्ययानम्, (९) सन्धाययानम्, (१०) सम्भूयप्रयाणम्, (११) यातव्यामित्रयोरभिग्रहाचिन्ता, (१२) क्षयलोभविरागहेतवः प्रकृतीनाम्, (१३) सामवायिकत्रिपरिमर्शः, (१४) संहितप्रयाणिकम्, (१५) परिपणिता-परिपणिपसृताश्च सन्धयः, (१६) द्वैधीभाविकाः सन्धिविक्रमाः, (१७) यातव्यवृत्तिः, (१८) अनुग्राह्यमित्रविशेषाः, (१९) मित्रहिरण्यभूमिकर्मसन्धयः, (२०) पाष्णिग्राहचिन्ता, (२१) हीनशतिपूरणम्, (२२) वलवताविगृह्योपरोधहेतवः, (२३) दण्डोपनतवृत्तम्, (२४) दण्डोपनायिवृत्तम्, (२५) सन्धिकर्म, (२६) सन्धिमोक्षः, (२७) मध्यमचरितम् (२८) उदासीनचरितम्, (२९) मण्डलचरितञ्च ।

[ज] व्यसनाधिकारिकमधिकरणम्—अस्मिन्नधिकरणे अष्टौ प्रकरणानि भवन्ति । तानि यथा—(१) प्रकृतिव्यसनवर्गः, (२) राजराज्ययोर्व्यसनचिन्ता, (३) पुरुषव्यसनचिन्ता, (४) पीडनवर्गः, (५) स्तम्भनवर्गः, (६) कोशसङ्गवर्गः, (७) वलव्यसनवर्गः, (८) मित्रव्यसनवर्गश्च ।

[झ] अभियास्यत्कर्माधिकरणम्—अस्मिन्नधिकरणे द्वादशप्रकरणानि सन्ति । तानि यथा—(१) शक्तिदेशकालवलावलज्ञानम्, (२) यात्राकालाः, (३) वलोपादानकालाः, (४) सन्नाहगुणाः, (५) प्रतिवलकर्म, (६) पश्चात्कोपचिन्ता, (७) वाह्याभ्यन्तरप्रकृतिकोपप्रतिकारः, (८) क्षयव्ययलाभविपरिमर्शः, (९)

बाह्याभ्यन्तराश्चापदः, (१०) दुष्यशत्रुसंयुक्ताः, (११) अर्थानर्थसंशययुक्ताः, (१२) तासामुपायविकल्पजाः सिद्धयश्च ।

[ञ] साङ्ग्रामिकमधिकरणम्—अस्मिन्नधिकरणे त्रयोदशाधिकरणानि सन्ति । तथाहि—(१) स्कन्धावारनिवेशः, (२) स्कन्धावारप्रयाणम्, (३) प्रलयव्यसनावस्कन्दकालरक्षणम्, (४) कूटयुद्धविकल्पाः, (५) स्वसैन्योत्साहनम्, (६) स्वबलान्यबलव्यायोगः, (७) युद्धभूमयः, (८) पत्यश्वरथहस्तिकर्माणि, (९) पक्षकक्षोरस्यानां बलाग्रतो व्यूहविभागः, (१०) सारफल्गुविभागः, (११) पत्त्यश्वरथहस्तियुद्धानि, (१२) दण्डभोगमण्डलासंहतव्यूहव्यूहनम्, (१३) तस्य प्रतिव्यूहसंस्थापनम् च ।

[ट] संघवृत्ताधिकरणम्—अस्मिन्नधिकरणे द्वे प्रकरणे स्तः—(१) भेदोपादानानि, (२) उपांशुदण्डश्च ।

[ठ] आबलीयसमधिकरणम्—अस्मिन्नधिकरणे नवप्रकरणानि सन्ति । तथाहि—(१) दूतकर्म, (२) मन्त्रयुद्धम्, (३) सेनामुख्यवधः, (४) मण्डलप्रोत्साहनम्, (५) शस्त्राग्निरसप्रणिधयः, (६) विविधासारप्रसारवधः, (७) योगातिसन्धानम्, (८) दण्डातिसन्धानम्, (९) एकविजयश्च ।

[ड] दुर्गलम्भोपायाधिकरणम्—अस्मिन्नधिकरणे षट्प्रकरणानि सन्ति । तद्यथा—(१) उपजापः, (२) योगवामनम्, (३) अपसर्पप्रणिधिः, (४) पर्युपासनकर्म, (५) अवमर्दः, (६) लब्धप्रशमनञ्च ।

[ढ] औपनिषदाधिकरणम्—अस्मिन्नधिकरणे त्रीणि प्रकरणानि सन्ति । तद्यथा—(१) परघातप्रयोगः, (२) प्रलम्भनम्, (३) स्वबलोपघातप्रतिकारः ।

[ण] तन्त्रयुक्तियाधिकरणम्—अस्याधिकरणस्यैकमेव प्रकरणम् तन्त्रयुक्तिनामकमस्ति ।

इत्थम् पञ्चदशावधिकरणेषु एतान्येव प्रकरणानि व्याख्यातानि सन्ति । इदमर्थशास्त्रं प्राचीनानां राजनीतिग्रन्थानाम् सारांश इवाभाति । तथा चोक्तम् कौटिल्येनादावेवास्य ग्रन्थस्य—

'पृथिव्या लाभे पालने च यावन्त्यर्थशास्त्राणि पूर्वाचार्यैः प्रस्तावितानि प्रायसस्तानि संहृत्य एकमर्थशास्त्रं कृतम् ।' इति । कौटिल्यार्थशास्त्रात् पूर्वम् वैदिकसाहित्ये महाभारते, स्मृतिग्रन्थेषु च राजनैतिकशासनव्यवस्थाया विषये गम्भीरतया विचारः कृत आसीत् । कौटिल्यार्थशास्त्रे तेषां समेषाम् अर्थशास्त्राणां प्रभावो वर्तते । अस्यार्थशास्त्रस्य प्रणयनम् स्वयमेव कौटिल्यः कृतवान् । स्वयम् ग्रन्थे एव

तथाविधाः श्लोकाः सन्ति येन प्रमाणितं भवति यदस्य ग्रन्थस्य प्रणयनं कौटिल्यः कृतवान्। तथा चास्य ग्रन्थस्य प्रमाणानि—

'सुखग्रहणविज्ञेयं तत्त्वार्थपदनिश्चितम्।
कौटिल्येन कृतं शास्त्रं विमुक्तग्रन्थविस्तरम्।'

इति प्रथमाध्यायस्यान्तिमः श्लोकः।

'सर्वशास्त्राण्यनुक्रम्य प्रयोगानुपलभ्य च।
कौटिल्येन नरेन्द्रार्थे शासनस्य विधिः स्मृतः॥'

इति द्वितीयाधिकरणदशमान्तिमश्लोकः।

'येन शास्त्रं च शस्त्रं च नन्दराजगता चमूः।
अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्॥
दृष्ट्वा विप्रतिपत्तिं बहुधा शास्त्रेषु भाष्यकाराणाम्।
स्वयमेव विष्णुगुप्तश्चकार सूत्रं च भाष्यं च॥'

इति ग्रन्थशेषश्लोकौ।

एभिः सर्वैः प्रमाणैः प्रमाणितं भवति यदस्य ग्रन्थस्य प्रणेता कौटिल्य एव। तस्यैवापरं नाम विष्णुगुप्त इति चाणक्य इति च।

किञ्च कामन्दकः स्वनीतिसारस्य प्रयोजनम् कौटिल्यार्थशास्त्रस्य संक्षेपकरणं निर्दिशति। चन्द्रगुप्तमौर्येणाऽपि साकं चाणक्यस्य सम्बन्धस्य पुष्टिरप्यनेकैः प्रमाणैः भवति। तानि च प्रमाणानि सन्ति—

[क] 'नवैव तान् नन्दान् कौटिल्यो ब्राह्मणः समुद्धरिष्यति। कौटिल्य एव चन्द्रगुप्तं राज्येऽभिषेक्ष्यति॥' इति विष्णुपुराणस्य वाक्यम्।

[ख] 'नवनन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति।
स एव चन्द्रगुप्तं वै द्विजो राज्येभिषेक्ष्यति॥' इतिश्रीमद्भागवतपुराणस्य वाक्यमपि अत्र प्रमाणम्।

अस्मिन् ग्रन्थे प्रायो द्विसप्ततिवारं प्रयुक्तम् 'इति चाणक्यः' इति वाक्यं विलोक्य केचन पाश्चात्याः कथयन्ति यत् रचनेयम् कस्यचनैकस्य पुरुषस्य नास्तीति, परञ्चैतत् कथनं तेषामज्ञानविलसितमेव। प्रायेण ग्रन्थकाराः स्वनिरहंकारत्वनिवेदनाय ग्रन्थे स्वनाम प्रथमपुरुषैकवचनान्तेन प्रयोजयन्ति।

पाश्चात्या विद्वांसः अस्य ग्रन्थस्य प्रणयनकालम् ३२१ ई० पू० कालतः २९६ ई० पू० कालम् स्वीकुर्वन्ते। केचन पाश्चात्याः अस्य रचना ई० पू० चतुर्थशताब्दे स्वीकुर्वन्ति च।

अयम् ग्रन्थोऽतीव महत्त्वपूर्णः ज्ञानविज्ञानोद्भासितस्वरूपश्च विद्यते। राजनीतौ-
साफल्याय कृतोऽयम् ग्रन्थः स्वप्रयोजनम् सम्यक्तया शिक्षयते। अतएवास्य ग्रन्थस्य
अत्यधिकं महत्त्वमास्ते संस्कृतसाहित्ये।

अस्मिन्नर्थशास्त्रे समाजकल्याणवैयक्तिकत्यागयोरेव विशिष्टं महत्त्वमस्तीति वक्ति
स्वयमेव कौटिल्यः। तथाहि—

'विद्याविनीतो राजा हि प्रजानां विनये रतः।
अनन्यां पृथिवीं भुङ्क्ते सर्वभूतहिते रतः॥' इति।

भरतनाटयशास्त्रपरिचयः

संस्कृतसाहित्यस्य प्रख्यातेन समीक्षकेण बलदेव उपाध्यायेनाभिहितम् यत् 'ऐति-
हासिकानुशीलनेन जानीमो वयम् यत् नाटचस्य शास्त्रीयम् निरूपणम् अलङ्कारस्य
शास्त्रीयनिरूपणापेक्षया प्राचीनमास्ते। वाचस्पति गैरोलामहोदयेनाप्यभिहितम्—
नाटचशास्त्रकाररूपेण भरतमुनेः व्यक्तित्वम् संस्कृतसाहित्याकाशे देदीप्यमानदिन-
मणिरिवास्ते। नाटचशास्त्रः नाटचविषयकः सर्वप्रथमः सर्वाङ्गीणः ग्रन्थो वर्त्तते।
नाटचशास्त्रकारेणाऽपि स्वकीयेऽस्मिन् नन्दिकेश्वरप्रणीतस्याभिनयदर्पणस्य, सुवर्णाभव
कुचुमारयोश्च नामानि उल्लिखितानि किन्तु साम्प्रतम् नाटचशास्त्रविषयकः प्राचीन-
तमो ग्रन्थः नाटचशास्त्रमेव समुपलभ्यते। एतस्मात् कश्चनापि नाटचशास्त्रीयो ग्रन्थः
प्राचीनः कश्चनापि नहि समुपलभ्यते।

नाटचशास्त्रस्य प्रणेतुर्विषये प्राचीनादेव कालात् समीक्षकाणां मतभेदः समुप-
लभ्यते। डॉ॰ एस॰ के॰ डे॰, डॉ॰ पी॰ वी॰ काणे प्रभृतयो विद्वांसः नाटचशास्त्र-
प्रणेतारम् भरतमुनिव्यतिरिक्तमेवाहुः। डॉ॰ बलदेव उपाध्यायोऽपि वक्ति यत् सांप्र-
तम् समुलभ्यमानम् नाटचशास्त्रं भरतस्य सिद्धान्तस्यैव सूचको ग्रन्थो वर्तते। अस्य
ग्रन्थस्य प्रणेता भरतमुनिर्नास्ति। किन्तु कन्हैयालाल पोद्दारमहोदयः प्रचुराणाम् प्रमा-
णानामालोके उपर्युक्तानाम् विदुषां मतस्य समालोचनां कुर्वन् साधयति यत् समुपलभ्य-
मानस्य नाटचशास्त्रस्य प्रणेता भरतमुनिरेवास्ति, न तु तद्व्यतिरिक्त अन्यः
कश्चन। न वाऽयम् ग्रन्थः भरतमुनेर्मतस्य संग्राहको मात्रम् विद्यते। अयम् भरत-
मुनिरेक ऐतिहासिकः पुरुषो वर्त्तते, यः अस्य नाटचस्य सर्वात्मना विवेचकस्य ग्रन्थस्य
प्रणयनमकरोत्।

नाटचशास्त्रस्य निर्माणकालस्यापि विषये एवम्प्रकारकः विवादो वर्त्तते। प्रो॰
मैकडॉनलः, प्रो॰ लेवी, महामहोपाध्याय हरप्रसादशास्त्री, डॉ॰ सुशीलकुमार डे, डॉ॰
पी॰ वी॰ काणे, कन्हैयालाल पोद्दारः प्रभृतयो विद्वांसः नाटचशास्त्रस्य प्रणयनकालम्
ईस्व्याः अष्टमं शताब्दं स्वीकुर्वन्ति, किन्तु सांप्रतिका अनेके विद्वांसः नाटचशास्त्रस्य

प्रणयनकालम् ई० पू० प्रथमशताब्दं स्वीकुर्वन्ति । डॉ० नागेन्द्रः, बलदेव उपाध्यायश्चेमौ विद्वांसौ अस्यैव मतस्य समर्थनम् कुरुतः ।

समीक्षका इदमपि कथयन्ति यत् समुपलभ्यमानस्य नाट्यशास्त्रस्य अवलोकनेनेदमपि ज्ञायते यत् मूलम् नाट्यशास्त्रमन्यदेवासीदिति । नाट्यशास्त्रस्य बह्वीः कारिकाः स्पष्टयितुम् कारिकाकारः अनुवंश्यानां श्लोकानां साहाय्यं स्वीकरोति । इमे अनुवंश्या श्लोकाः शिष्यपरम्परया समुपलब्धाः सन्ति । एतेनेदम् ज्ञायते यत् समुपलभ्यमानम् नाट्यशास्त्रस्य रूपम् अनेककालिकम् काले–काले परिष्कृतम् चाभाति । अनेकधा परिष्कृतमेव नाट्यशास्त्रस्येदम् रूपम् वर्त्तते ।

वस्तुतः उपलभ्यमानस्य नाट्यशास्त्रस्य त्रीणि रूपाणि सन्ति—[१] सूत्ररूपम्, [२] भाष्यरूपम्, [३] श्लोकरूपमथवा कारिकारूपम् च । एतेषां त्रयाणामपि रूपाणां उदाहरणानि तत्रैव ग्रन्थे उपभ्यमानानि सन्ति । भवितुमर्हति यत् भरतस्य मूलग्रन्थः सूत्रात्मक आसीत्, यस्य रूपम् साम्प्रतम् नाट्यशास्त्रस्य षष्ठसप्तमाध्याययोः समुपलभ्यते । तदनन्तरम् भाष्यस्य प्रणयनमभूत् यत्र भरतस्याभिप्रायः सोदाहरणः प्रकाशितो वर्त्तते । तृतीयम् रूपम् कारिकाणाम् वर्त्तते । अस्मिन् रूपे नाट्यविषयाणाम् विस्तृतं विवेचनं कृतमास्ते ।

नाट्यशास्त्रस्याध्यायसङ्ख्यायाः अपि विषये भेदः समुपलभ्यते । उत्तरभारतस्यपाठानुसारेण सप्तत्रिंशत् (३७) अध्यायाः नाट्यशास्त्रे सन्ति किन्तु दक्षिणभारतीयनाट्यशास्त्रस्य संस्करणानुसारेण नाटशास्त्रे षट्त्रिंशदध्यायाः सन्ति । अभिनवगुप्तपादाचार्यः यः नाट्यशास्त्रस्याभिनवभारतीनाम्नीं व्याख्यामकरोत्, सः नाट्यशास्त्रे षट्त्रिंशदध्यायानेव स्वीकरोति । तथा चोक्तमभिनवगुप्तपादाचार्येण—

षट्त्रिंशदात्मकजगद्गगनावभासः,
सवित्मरी चिचय चुम्बितविश्वशोभम् ।
षट्त्रिंशकं भरतसूत्रमिदं विवृण्वन्,
वन्दे शिवं तद्दृशंविवेकिधाम ॥' इति ।

आचार्यो बलदेव उपाध्यायोऽपि मनुते यत् नाट्यशास्त्रस्य विषयाणां विवेचनं विपुलं व्यापकं च विद्यते । नाट्यशास्त्रविषयः नाट्यविषयाणां विस्तृतम् विवेचनमास्ते किन्तु अस्मिन्नेव ग्रन्थे छन्दः शास्त्रस्यालङ्कारशास्त्रस्य संगीतशास्त्रस्यापि प्राथमिकं विवेचनं समुपलभ्यते । अतएव प्राचीनललितकलानाम विश्वकोशरूपेणास्य स्वीकरणमेव न्याय्यम् ।

नाट्यशास्त्रस्याध्यायानुसारेण विषयाणां क्रम इत्थमास्ते—[१] प्रथमाध्याये–नाटकस्योत्पत्ति, [२] द्वितीयाध्याये–नाट्यशास्त्रीयप्रेक्षागृहस्य विवरणम्, [३] तृतीयेऽध्याये रङ्गदेवतायाः पूजनम्, [४] चतुर्थेऽध्याये पूर्वरङ्गस्य पूर्वरङ्ग-

सम्बन्धिनाम अष्टोत्तरशतानाम् (१०८) कारणानाम्, पट्त्रिंशदङ्गहाराणां (३६) च विवेचनम्, [५] पञ्चमेऽध्याये पूर्वरङ्गस्य विस्तृतं विधानम्, [६] षष्ठेऽध्याये, रसानाम्, [७] सप्तमेऽध्याये–भावानाम् व्यापकं विवरणम्, [८] अष्टमेऽध्याये–अभिनयस्य विस्तृतवर्णनारम्भः, उपाङ्गैरभिनयवर्णनञ्च, [९] नवमेऽध्याये–हस्ताभिनयस्य वर्णनम्, [१०] दशमेऽध्याये–शरीराभिनयस्य वर्णनम्, [११] एकादशेऽध्याये चौर्यविधानम्, [१२] द्वादशेऽध्याये मण्डलविधानम्, [१३] त्रयोदशेऽध्याये रसानुकूलगतिप्रचारवर्णनम्, [१४] चतुर्दशेऽध्याये प्रवृत्तिधर्मस्य व्यञ्जना, [१५] पञ्चदशेऽध्याये छन्दोविभागस्य वर्णनम्. [१६] षोडशेऽध्याये वृत्तानाम् सोदाहरणं लक्षणम्, [१७] सप्तदशेऽध्याये वागभिनस्य लक्षणम्, अलङ्कारकाव्यगुण–काव्यदोषाणाञ्च वर्णनम्, [१८] अष्टादशेऽध्याये भाषाभेदस्य, अभिनयप्रयोगस्य च वर्णनम्, [१९] एकोनविंशतितमेऽध्याये काकुस्वरव्यञ्जना, [२०] विंशतितमेऽध्याये दशानां रूपकाणां लक्षणम्, [२१] एकविंशतितमेऽध्याये नाटकीयपञ्चसन्धीनां सन्ध्यङ्गानाञ्च विधानम्, [२२] द्वाविंशतितमेऽध्याये चतुर्विधानां वृत्तीनां विधानम्, [२३] त्रयोविंशतितमेऽध्याये आहार्याभिनयवर्णनम्, [२४] चतुर्विंशतितमेऽध्याये सामान्यस्य अभिनयस्य वर्णनम्, [२५] पञ्चविंशतितमेऽध्याये बाह्यस्योपचारस्य वर्णनम्, [२६] षड्विंशतितमेऽध्याये चित्राभिनयस्य वर्णनम्, [२७] सप्तविंशतितमेऽध्याये सिद्धव्यञ्जनायाश्च निर्देशः कृतो वर्त्तते ।

एतदनन्तरम् अष्टाविंशतितमादध्यायादारभ्य त्रयस्त्रिंशत्तमाध्यायं यावत् संगीतस्य विषयाणां वर्णनम् नाटयशास्त्रे वर्त्तते । तद्यथा—[२८] अष्टाविंशतितमेऽध्याये आतोद्यस्य वर्णनम्, [२९] एकोनत्रिंशत्तमेऽध्याये तातोद्यस्य वर्णनम्, [३०] त्रिंशत्तमेऽध्याये सुषिरातोद्यस्य विधानम्, [३१] एकत्रिंशत्तमे अध्याये तालस्य वर्णनम्, [३२] द्वात्रिंशत्तमेऽध्याये ध्रुवविधानम्, [३३] त्रयस्त्रिंशत्तमेऽध्याये वाद्यस्य विस्तृतं वर्णनम् कृतं वर्त्तते ।

नाटयशास्त्रस्यान्तिमेषु त्रिष्वध्यायेषु विविधानां विषयाणां वर्णनं कृतं वर्त्तते । तद्यथा—[३४] चतुस्त्रिंशत्तमेऽध्याये पात्रस्य विचारः कृतो वर्त्तते । [३५] पञ्चत्रिंशत्तमे अध्याये भूमिकायाः रचना कृता वर्त्तते । [३६] षट्त्रिंशत्तमेऽध्याये नाटयस्य भूतलेऽवतरणम् वर्णितमास्ते ।

संस्कृतभाषायाः चिकित्साशास्त्रम्

ऋग्यजुस्सामाथर्वाख्यानां चतुर्णामपि वेदानाम् चत्वार उपवेदाः वर्णितास्सन्ति—आयुर्वेदः, धनुर्वेदः, गान्धर्ववेदः, अर्थवेदश्च । [illegible] सम्बन्धः ऋग्वेदेन साक-[illegible] ख्यातो वर्त्तते [illegible] मास्ते । इत्थमायुर्वेदः भारतवर्षे प्राचीनत[illegible]

शास्त्ररूपेण भारते वर्षे। ऋग्वेदे आयुर्वेदस्य प्रवर्तकानाम् दिवोदासभारद्वाजाश्विनीकुमारैरेव साकम् जलचिकित्सायाः, सूर्यरश्मिचिकित्साया अपि उल्लेखः समुपलभ्यते । तथा च ऋग्वेदस्य मन्त्रः—

'अप्स्वन्तरामृतमप्सु भेषजमुत प्रशस्तये ।
आसु मे सोमो अब्रवीदन्तर्विवानि भेषजा ॥

अग्निं च विश्वसम्भवमापश्च विश्वभेषजीः ।
आपः प्रणीत भेषजं वरूथं तन्वे मम ॥'

ऋग्वेदकाले विविधानामोषधीनामपि ज्ञानम् विकसितमासीदिति ऋङ्मन्त्रैरेव ज्ञायते । तद्यथा—

'याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥'

परम्परानुसारेण ज्ञायते यदायुर्वेदस्य सर्वप्रथम उपदेष्टा ब्रह्मा आसीत् । पुनः आयुर्वेदस्य दीक्षामवाप्य ऋषयः तस्य प्रचारम् मर्त्यलोकेऽकार्षुः । भरद्वाजनामक एव ऋषि आयुर्वेदस्य प्रथमः प्रचारकोऽभूत् । अथर्ववेदेऽप्यनेकेषां रोगाणाम् लक्षणम् निदानं चिकित्सा चोपवर्णिता । कीथमहोदयानुसारेणाथर्ववेदे एवायुर्वेदस्याष्टौ अङ्गानि वर्णितानि सन्ति । तानि चाङ्गानि निम्नांकितानि सन्ति—

१—शल्य चिकित्सा (Major surgery)
२—शालक्यतन्त्रम् (Minor surgery)
३—कायचिकित्सा (Healing of disease)
४—भूतविद्या (Demonology)
५—कौमारभृत्यम् (Children desease)
६—अगदतन्त्रम् (Toxoology)
७—रसायनतन्त्रम् (Elixive)
८—वाजीकरणतन्त्रम् (Aphrodsias)

आयुर्वेदस्य प्राचीनाः संहिताः—(क) चरकसंहिता—आयुर्वेदसंहितासु चरकसंहिता प्राचीनतमा विद्यते । अस्याः संहितायाः प्रणेता चरकः अनुश्रुत्यनुसारेण कनिष्कस्य वैद्य आसीत् । चरकसंहिता अष्टसु भागेषु विभक्ता वर्त्तते । तस्याः संहितायाः—(१) प्रथमे सूत्रस्थाननामके भागे औषधादिरोगप्रतिकारस्य भोजनस्य, वैद्यानां कर्तव्यस्य च निरूपणं कृतमास्ते । (२) द्वितीयस्य निदानस्थानभागस्य सम्बन्धः अष्टाभिः रोगैः साकम् वर्त्तते । (३) तृतीये विमानस्थाने सामान्यरोगविज्ञानस्य आयुर्वेदिकाध्ययनस्य च वर्णनं कृतमास्ते । अस्मिन् नवोपनीतानाम् छात्राणां नियमाः वर्णिताः सन्ति । छात्रः स्वकीयां सम्पूर्णां शक्तिं अध्ययनकरणे एव

संयोजयेत् । जीवनमये समुपस्थितेऽपि रुग्णस्यापकारं नहि कुर्यात् । रुग्णस्य स्त्रियाः तस्य धनस्य चापहारं नहि कुर्यात् । छात्रः स्वाचारव्यवहारे संयतो भवेत् । सः रुग्णः चिकित्सायां मनसा वाचा कर्मणा च तत्परो भवेत् । रुग्णस्सविधे एतादृशीं कामपि वार्तां नहि कुर्यात् येन तस्य स्वास्थ्यलाभे हानिः स्यात् । (४) चतुर्थे शरीरस्थाने शरीररचनाविज्ञानस्य भ्रूणविज्ञानस्य च वर्णनं कृतं वर्नते । (५) पञ्चमे इन्द्रियस्थानभागे निदानस्य वर्णनपूर्वकम् साधनसाध्यविचारः कृतो वर्त्तते । (६) षष्ठे चिकित्सास्थाने विशिष्टायाः चिकित्सायाः वर्णनम् कृतं वर्त्तते । (७–८) सप्तमाष्टमयोः कल्पस्थानसिद्धिस्थानयोः सामान्यचिकित्सायाः निरूपणं कृतं वर्त्तिते ।

इयं चरकसंहिता ई० पू० प्रथमशताब्दस्य रचना वर्त्तते । वी० वरदाचार्यः स्वकीयसंस्कृतसाहित्यस्येतिहासे चरकम् गांधारवासिनमाह ।

(ख) सुश्रुतसंहिता—आचार्यः सुश्रुतः धन्वन्तरेः शिष्यः चरकस्य च परवर्ती आसीत् । इयं सुश्रुतसंहिता षट्षु भागेषु विभक्ता वर्त्तते । अस्याप्यारम्भः सूत्रस्थानेनैव साकं भवति । सूत्रस्थाने सामान्यानां नियमानां निरूपणं कृतं वर्त्तते । अस्य ग्रन्थस्याध्ययनेन ज्ञायते यत् सुश्रुतस्य गुरुः वाराणस्याः राजा दिवोदास आसीत् । दिवोदासः स्वयमेव धन्वन्तरेरवतार आसीत् । सुश्रुतसंहितायाः द्वितीयो भागः निदानस्थानम् , तृतीयो भागः शरीरस्थानम् , चतुर्थो भागः चिकित्सास्थानम्, पञ्चमो भागः कल्पस्थानम् षष्ठो भागश्च उत्तरस्थानम् वर्त्तते ।

(ग) भेलसंहिता—इयमपि संहिता अत्यन्ताव्यवस्थितरूपेण समुपलब्धा वर्त्तते । परन्तु विचारका इमां सहितां पूर्णतया प्रामाणिकीं नहि स्वीकुर्वन्ति । अस्यापि संहितायाः विभागः चरकसंहितेव वर्त्तते । अस्याः संहितायाः सुरक्षितोंऽश श्लोकेष्वेव वर्त्तते ।

(४) वाँवरहस्तलेखस्यायुर्वेदविषयका अंशाः—१८९० ईस्व्याम् इमाः लिखिताः प्रतयः समुपलब्धा अभूवन् । अनुसन्धानकर्तुरेव नामाश्रित्य अस्य हस्तलेखस्य वाँवरहस्तलेखनाम्ना प्रसिद्धिः संजाता । लिपिविज्ञानानुसारेणास्य हस्तलेखस्य कालः ४०० ईस्वी स्वीक्रियते । आभिः पाण्डुलिपिभिः आयुर्वेदविषयकं महत्त्वपूर्णं ज्ञानं जायते । एतेषाम् सप्तनिबन्धाः आयुर्वेदविषयका एव सन्ति । एतेष्वेको निबन्धः प्रतिपादयति यत् लशुनस्य प्रकारविशेषेण द्वारा मनुष्यः दीर्घायुष्ट्वं प्राप्तुं समर्थो भवति । अपरस्मिन् निबन्धे सहस्रवर्षाणामायुर्लब्धुम् रसायनविशेषस्य योगो वर्णितो वर्त्तते । विविधविद्यानां नेत्राञ्जनानामपि वर्णनमत्र वर्त्तते ।

अस्य संग्रहस्य सर्वे निबन्धाः पद्यात्मकाः वर्त्तन्ते । अनेकेषामायुर्वेदाचार्याणामप्यत्र वर्णनं वर्त्तते । अस्य संग्रहस्य संस्कृतभाषायाम् प्राकृतस्य प्रभावः समीक्षकैरनुभूयते ।

परवर्तिन्य आयुर्वेदसंहिताः—

(१) वाग्भटः—वाग्भटः सुश्रुतपरवर्ती वर्त्तते । आयुर्वेदस्याचार्येषु चरकसुश्रुतयोरनन्तरम् तृतीये स्थाने वाग्भटस्य नामायाति । वाग्भट्टनामकौद्वौ आयुर्वेदाचार्यौ सम्पलब्धी वर्त्तते । उभयोरपि पितुर्नाम एकैवास्ति । तत्र प्रथमो वाग्भट्टः सिंहगुप्तस्यात्मजः आसीत् । तस्य गुरोर्नाम बौद्धः अवलोकित आसीत् । अयमेव अष्टाङ्गसंग्रहग्रन्थस्य प्रणेता वर्त्तते । द्वितीयो वाग्भटः अष्टाङ्गहृदय संहिताग्रन्थस्य प्रणयनमकार्षीत् । समीक्षकाः प्रथमस्य वाग्भटस्य कालम् ईस्व्याः सप्तशताब्दीम् द्वितीयवाग्भटस्य कालम् अष्टमं शताब्दम् स्वीकुर्वन्ति ।

(२) माधवकरः—ईस्व्याः अष्टमनवमशताब्दयोः माधवकरः रुग्निश्चयनामकस्य ग्रन्थस्य प्रणयनमकरोत् । अयम् रोगनिदानविषयकः अतीवमहत्त्वपूर्णो ग्रन्थो विद्यते । अस्य ग्रन्थस्य परवर्तीनि आयुर्वेदे निर्णायकं महत्त्वम् स्वीक्रियते ।

(३) चक्रपाणिदत्तः—अयमायुर्वेदस्य प्रख्यातो विद्वान् चरकसंहितासुश्रुतसंहितयोः व्याख्यामकार्षीत् । अयम् चिकित्सासंग्रहनामकस्य कस्यचन ग्रन्थस्य प्रणयनमकरोत् ।

(४) मिल्हणः—अयम् १२२४ ईस्व्याः सविधे २५०० श्लोकात्मकस्य चिकित्सामृतनामकस्य ग्रन्थस्य प्रणयनमकरोत् ।

(५) नागार्जुनः—अयम् योगसार–योगशतक–रसरत्नाकरनामकानाम् चिकित्साग्रन्थानाम् प्रणयनमरोत् ।

(६) बोपदेवः—अयम् केशववैद्यस्यात्मजः हेमाद्रिनामकस्य च राज्ञः आश्रितः आसीत् । अयम् शार्ङ्गधरपद्धत्याः टीकामलिखत् ।

एतेभ्योऽपि भिन्नाः आयुर्वेदशास्त्रविषयका अनेके संस्कृतग्रन्थाः सन्ति । यथा तीसटस्य चिकित्साकलिका, भावमिश्रस्य भावप्रकाशः, लोलम्बिराजस्य वैद्यजीवनम् इत्यादिकाः ग्रन्थाः ।

एतद्व्यक्तिरिक्तम् धातुविषयकमायुर्वेदसाहित्यमपि समुपलभ्यते, यस्य चर्चाऽत्रावश्यकम् नास्ति ।

निरुक्तम्

वेदाङ्गेषु निरुक्तस्य स्थानमतीव महत्त्वपूर्णं वर्त्तते । निरुच्यते = निश्शेषेण उपदिश्यते तत्तदर्थावबोधनाय पदजातं यत्र तन्निरुक्तमिति निरुक्तशब्दस्य व्युत्पत्तिः । निघण्टौ ये वेदानाम् शब्दाः संगृहीताः तेषाम् अतीव महत्त्वपूर्णा व्याख्या या कृता यास्केनाचार्येण सैव निरुक्तमित्यभिध्यते । अस्मिन् ग्रन्थे सर्वेषाम् निघण्टौ संगृहीतानाम् शब्दानाम् व्याकरणसम्मता व्युत्पत्तिः प्रदर्शिता वर्त्तते । यद्यपि साम्प्रतम् वैदिको

निघण्टुग्रन्थः एक एव समुपलभ्यते किन्तु प्राचीनकाले निघण्टुग्रन्था अनेके आसन्निति समीक्षकाणामभिमतिः। महाभारतस्य मोक्षधर्मपर्वानुसारेणास्य निघण्टोः रचयिता प्रजापतिः कश्यपो वभूव। तथा महाभारतीयौ श्लोकौ—

वृषो हि धगवान् धर्मः ख्यातो लोकेषु भारत।
निघण्टुकपदाख्याने विद्धि मां वृषःमुत्तमम्॥
कपिर्वराहः श्रेष्ठश्च धर्मश्च वृष उच्यते।
तस्माद् वृषाकपिं प्राह कश्यपो मां प्रजापतिः॥ इति।
[महा० मो० ध० प० अ० ३४२ श्लोक ८६-८७]

वर्तमाने निघण्टुग्रन्थे वृषाकपिशब्दस्य संग्रहो दृश्यते; अतएव ज्ञायते यदस्य निघण्टु ग्रन्थस्य प्रणेता प्रजापतिः कश्यपः आस्त इति। वर्तमाने निघण्टौ पञ्च अध्यायाः सन्ति। अस्मिन्निघण्टौ १७६७ शब्दाः वैदिकाः संगृहीताः सन्ति। एतेपा- मेव सर्वेषां शब्दानां विस्तृतं विवेचनमकरोत् आचार्यो यास्कः निरुक्तग्रन्थे। अयम् निरुक्तग्रन्थ एवास्य निघण्टुग्रन्थस्य व्याख्यास्वरूपः समुपलभ्यते।

आचार्यस्य दुर्गस्यानुसारेण निरुक्तग्रन्थास्तु चतुर्दशसङ्ख्याका आसन्। तथा चाह आचार्यो दुर्गः—'निरुक्तम् चतुर्दशप्रभेदम्।' यास्कस्य निरुक्तानुसारेण त्रयोदशसङ्ख्या- कानाम् निरुक्तकाराणां नामानि समुपलभ्यन्ते किन्तु चतुर्दशः निरुक्तकारः कः आसीदिति तेनापि नहि ज्ञायते। निरुक्ते उल्लिखितानां निरुक्तकाराणां नामान्यधो- ङ्कितानि सन्ति। तथाहि—

१-अग्रायण, २-औपमन्यवः, ३-औदुम्बरायणः, ४-और्णवाभः, ५-काथक्यः, ६-क्रौष्टुकिः, ७-गार्ग्यः, ८-गालवः, ९-तैटिकिः, १०-वार्ष्यायणिः, ११-शाकपूणिः, १२-स्थौलष्ठिविः, १३-यास्कश्च।

यास्ककृते निरुक्ते द्वादश अध्यायाः सन्ति। अन्ते द्वौ अध्यायौ परिशिष्टस्वरूपौ स्तः। इत्थमस्मिन् ग्रन्थे चतुर्दश अध्यायाः सन्ति। सम्पूर्णमिदं निरुक्तम् त्रिषु काण्डेषु विभक्तमास्ते—१-नैघण्टुकं काण्डम्, २-नैगमं काण्डम्, ३-दैवतम् काण्डञ्च। निरुक्तम् महाभारतात् प्राचीनमस्ति। महाभारतस्य शान्तिपर्वणि निरुक्तकारस्यो- ल्लेखो वर्तते। तथाहि—

'शिपिविष्टेति चाख्यायां हीनरोमा च योऽभवत्।
तेनाविष्टं तु यत् किञ्चित् शिपिविष्टेति च स्मृतः॥
यास्को मामृषिरव्यग्रोनेकयज्ञेषु गीतवान्।
शिपिविष्ट इति ह्यस्माद् गुह्यनामपरो ह्यहम्॥
स्तुत्वा मां शिपिविष्टेति यास्कः ऋषिरुदारधीः।
मत्प्रसादादधो नष्टं निरुक्तमधिजग्मिवान्॥' इति।
(म० भा० शा० प०)

निरुक्तमिदम् वेदाङ्गेष्वन्यतमरूपेण स्वीक्रियते । निरुक्तस्य वैज्ञानिकताम् प्रत्यपीपदत् आचार्यो यास्कः । यास्कस्य समस्य वेदार्थानुशीलनपरा अनेके पक्षा आसन् । तेषां नामान्याह यास्कः—(१) अधिदैवतः, (२) अध्यात्मः, (३) आख्यातसमयः, (४) ऐतिहासिकाः, (५) नैदानाः, (६) नैरुक्ताः, (७) परिव्राजकाः, (८) याज्ञिकाश्च ।

यद्यपि निरुक्तम् नैघण्टुकानां शब्दानां भाष्यस्वरूपम् वर्त्तते किन्तु अस्मिन्नपि ग्रन्थे तथाविधं काठिन्यमास्ते यस्य विवेचने सामान्यानां पाठकानां सामर्थ्यम् नासीत् । अतएवास्यापि ग्रन्थस्य वैदुष्यपूर्णा व्याख्या अनिवार्या आसीत् ।

निरुक्तस्य व्याख्या—(क) निरुक्तस्य व्याख्याकारेषु दुर्गाचार्यस्य नामातीव प्रसिद्धमास्ते । दुर्गाचार्यप्रणीता दुर्गवृत्तिरतीव विस्तृता निरुक्तस्य सर्वप्रकारकभावबोधिका वैदुष्यपरिपूर्णा च विद्यते । अस्यां वृत्तौ आचार्यो दुर्गः स्थाने स्थाने दार्शनिकं विवेचनमप्युपस्थापयति । आचार्यो दुर्गः निरुक्तस्य प्रायेण सर्वेषां शब्दानाम् त्रिवेचनमकरोत् । यद्यपि दुर्गवृत्तेर्भाषातीव सरला वर्त्तते किन्तु दार्शनिकविवेचनावसरे आचार्यो दुर्गः स्वपाण्डित्यस्य प्रकर्षं प्रदर्शयामास । अस्याः व्याख्याया इदमपरं महत्त्वं वर्त्तते यत् येषां मन्त्राणामाचार्यो यास्को निरुक्ते अंशतो निर्दिष्टवान् तेषां समेषां मन्त्राणामयमाचार्यः सम्पूर्णतया उद्धरणं दत्त्वा समग्रतया च व्याख्यामकरोत् ।

दुर्गवृत्तेः पुष्पिकायां लिखितमास्ते—'ऋज्वर्थायाम् निरुक्तवृत्तौ जम्बूमार्गाश्रमनिवासिनः आचार्यभगवद्दुर्गसिंहस्य कृतौ ।' इति । इदमेव वाक्यमाश्रित्य समीक्षकाः साधयन्ति यत् दुर्गाचार्यः जम्मूप्रदेशस्य निवास्यासीत् । अयमाश्रमेण संन्यासी, वसिष्ठगोत्रीयः कपिष्ठलसंहिताया अध्येता चासीत् । यतः निरुक्त ४।१४ अङ्के निरुक्तेन उद्धृतस्य ऋग्वेदमन्त्रस्यायम् व्याख्यामकृत्वाऽह—'यस्मिन्निगमे एष शब्दः सा वसिष्ठद्वेषिणी ऋक् । अहं च कापिष्ठलो वासिष्ठः अतस्तां न निर्ब्रवीमि । तस्याः ऋचो व्याख्यायाम् लिखति—पुरा खलु विश्वामित्रशिष्यो सुदाः नाम राजर्षिरासीत् । स च केनचित् कारणेन वसिष्ठद्वेष्योऽभूत् । विश्वामित्रस्तु शिष्यस्य रक्षार्थम् आभिर्ऋग्भिः वसिष्ठमशपत् । ता ऋचो वासिष्ठाः न शृण्वन्ति ।' इति ।

दुर्गाचार्यस्य वृत्तेर्नाम ऋज्वर्थावृत्तिरासीत् ।

(ख) स्कन्दस्वामी—निरुक्तस्योपलब्धासु सर्वासु व्याख्यासु स्कन्दस्वामीप्रणीता प्राचीनतमा वर्त्तते । अयम् निरुक्तस्य द्वादशाध्यायानामतीव सरलां व्याख्यामकार्षीत् । स्कन्दस्वामी हरिस्वामिनो गुरुरासीत् । हरिस्वामी शतपथब्राह्मणस्य व्याख्यां लिलेख ।

(ग) महेश्वरः—अयमप्याचार्यः निरुक्तस्य व्याख्यामकार्षीत् । किन्तु महेश्वरकृता एव समुपलब्धा वर्त्तते न तु सम्पूर्णा ।

निरुक्तस्य महत्त्वम्—सायणाचार्यस्य 'अर्थावबोधे निरपेक्षतया पदगत्रं तद् निरुक्तम् ।' इति वाक्यस्य विषये आचार्यो दुर्गस्त्वाह—'प्रधाने चेदमितरेभ्योऽङ्गेभ्यश्च अर्थपरिज्ञानाभिनिवेशात् । अर्थो हि प्रधानः तद्गुणः शब्दः, स च इतरेषु व्याकरणादिषु चिन्त्यते । यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणाद् एव शब्दार्थनिबन्धनपरिज्ञानं निरुक्तात् ।' इति ।

निरुक्ताचार्यमतानुसारेण सर्वे शब्दाः धातुजाः व्युत्पन्नाश्च सन्ति । तथा चाह निरुक्तकारः—'तत्र नाना आख्यातजानीति शाकटायनो निरुक्तसमयश्च ।' इति ।
(निरु० १।१।२।२)

वेदाङ्गम्—छन्दःशास्त्रम्

छन्दो वेदस्य पञ्चममङ्गमास्ते । छन्दःशब्दस्य प्रवृत्तिनिमित्तम् निरूपयता यास्केन
निरुक्तस्य सप्तमेऽध्यायेऽभिहितम्—'छन्दां छादनात् ।' (नि० ७।३।१२) तथा च
ब्राह्मणग्रन्थवचनम्—'यदेभिरात्मानमाच्छादयन् देवाः मृत्योर्बिभ्यतः तच्छन्दसां
छन्दस्त्वम् ।' इति । वेदास्छन्दोबद्धाः सन्ति, अतस्तेषामुच्चारणाय छन्दोज्ञानमत्याव-
श्यकमास्ते । अतएव हि पौङ्गीरहस्यनाम्नि ब्राह्मणग्रन्थे वेदोक्तसमस्तफला-
वाप्तये छन्दोज्ञानस्यावश्यकताऽनिवार्यरूपेणापादिताभूत् । तथा चोक्तम् शौनकेन
सर्वानुक्रमणीग्रन्थे-—

'यो ह वा अविदितार्षेयच्छन्दो दैवतं ब्राह्मणेन मन्त्रेण याजयति वा अध्यापयति
वा स्थाणुं वर्च्छति, गर्तं वा पात्यते प्रमीयते वा पापीयान् भवति ।' इति ।
(सर्वानुक्रमणी १।१)

छन्दो नामकस्य वेदाङ्गस्य प्रतिनिधिग्रन्थो वर्त्तते पिङ्गलाचार्यकृतं 'छन्दः-
सूत्रम्' । अस्य ग्रन्थस्य प्रणयनम् कदाऽभूदिति नहि ज्ञातमस्ति । ग्रन्थोऽयं सम्पूर्णः
सूत्रात्मको वर्त्तते । अस्मिन् ग्रन्थे अष्टावध्यायाः सन्ति । प्रारम्भात् चतुर्थाध्या-
यस्य सप्तमसूत्रपर्यन्तं वैदिकानां छन्दसां विवेचनमास्ते । नाट्यशास्त्रेऽप्याह भरत-
मुनिः—

'छन्दहीनो न शब्दोऽस्ति न छन्दःशब्दवर्जितम् ।' इति ।
(ना० शा० १४।४५)

कात्यायनमुनेः प्रख्याते ऋग्यजुःपरिशिष्टेऽप्यभिहितम्—

छन्दोभूतमिदं सर्ववाङ्मयं स्याद्विजानतः ।
नाच्छन्दसि न चापृष्टे शब्दश्चरति कश्चन ॥' इति ।

ऋग्वेदस्य सामवेदस्य च सर्वे मन्त्राः छन्दोबद्धाः सन्ति । हार्दानां कोमलानां भावानामभिव्यक्तये सर्वाधिकमुपयुक्तं साधनम् छन्दो वर्त्तते ।

यद्यपि वैदिकानि--छन्दांसि नानाप्रकारकभेदोपभेदवन्ति सन्ति, अथापि तेषु प्रख्यातानां केषाञ्चन छन्दसामत्र गणना क्रियते अधस्तात् । गायत्री, उष्णिक्, अनुष्टुप्, प्रकृतिः, बृहती, पंक्तिः, त्रिष्टुप्, जगती, अतिजगती, शक्वरी, अतिशक्वरी, कृतिः, आकृतिः, विकृतिः, संस्कृतिः, अभिकृतिः, उत्कृतिश्च ।

वैदिकानाम् छन्दसाम् इदं वैशिष्ट्यं भवति यत् तानि वर्णप्रधानानि भवन्ति न तु मात्राप्रधानानि । अत एवात्र वर्णानामेव गणना क्रियते न तु मात्राणाम् । उक्तञ्चापि कात्यायनेन महर्षिणा—'यदक्षरपरिमाणं तच्छन्दः ।' इति ।

वैदिकछन्दस्सु अक्षराणां गौरवलाघवविषयकं विचारमकृत्वैव तेषां संख्यायाः विचारः क्रियते । एकद्वयोर्वाक्षरयोः आधिक्यम् नैयून्यं वा छन्दः परिवर्तनस्य कारणं भवति । परन्त्विदं परिवर्तनं नियमतः एव भवति न त्वनियमतः । यदि कस्यापि छन्दसः एकाक्षरः ऊनो भवति तदा तत् छन्दः निचृदिति कथ्यते । यदि कस्यापि छन्दसः एकोऽक्षरः अधिको भवति तदा भूरिगित्यभिधीयते । तथा चोक्तमपि—

'अनाधिकेनैकेन निचृद्भूरिजौ ।
द्वाभ्यां विराट्-स्वराजौ ॥ इति । (सर्वानुक्र०)

एकद्व्यूनाधिका सैव निचृद् अनाधिका भूरिगिति । (ऋक्० प्रा० १७।२)

वैदिकानां छन्दसां विभाजनम्—वेदे प्रयुक्तेषु छन्दस्सु केवलमक्षराणां गणना क्रियते । फलतः सर्वाण्येव वैदिकानि छन्दांसि अक्षरच्छन्दांसि भवन्ति । वैदिकानां छन्दसां प्रमुखौ द्वौ भेदौ भवतः—(१) केवलमक्षरानुसारीणि छन्दांसि, (२) पादाक्षरगणनानुसारीणि छन्दान्सि च । प्रथमप्रकारकेषु छन्दःसु छन्दसां पादविभाजनस्यावश्यकता नहि भवति सम्पूर्णस्य मन्त्रस्याक्षरगणना क्रियते । द्वितीयप्रकारकाणां छन्दसां तु प्रत्येकस्य पादस्य पृथक्-पृथक् अक्षराणां गणना क्रियते ।

सर्वेषां वैदिकानां छन्दसां संख्या षड्विंशतिः स्वीक्रियते, किन्तु तत्र तत्र प्रारम्भिकानां पञ्चप्रकारकानां छन्दसां वेदेषु प्रयोगो नोपलभ्यते । अवशिष्टानि एकविंशतिसङ्ख्याकानि तु त्रिसप्तकेषु विभज्यन्ते येषाम् छन्दसां प्रयोगो वेदेषु नोपलभ्यते तानि छन्दांसि गायत्रीपूर्वपञ्चकमिति नाम्नाभिधीयन्ते ।

गायत्री पूर्वपञ्चकस्य छन्दसां नामानि अक्षरसङ्ख्यानिर्देशपूर्वकम् इत्थमास्ते—(१) मा (अक्षरसंख्या ४) प्रमा० (अ० सं० ८) प्रतिमा (अ० सं० १२) उपमा (अ० सं० १६) समा (अ० सं० ३०)। एतेषां सर्वेषां छन्दसां नामानि १७।१-५ ऋक्प्रातिशाख्ये लिखितानि सन्ति ।

प्रथमसप्तकस्य छन्दसां विवरणम् निम्नांकितम् वर्त्तते—(१) गायत्री (अक्ष-

राणि २४) उष्णिक् (नक्षराणि २८) अनुष्टुप् (अक्षराणि ३२) बृहती (अक्षराणि ३६) पंक्तिः (अक्षराणि ४०) त्रिष्टुप् (अक्षराणि ४४) जगती (अक्षराणि ४८) च ।

द्वितीयसप्तकस्य छन्दसां सामूहिकं नाम अतिच्छन्दो वर्त्तते । एतेषां सामनां विवरणमित्थमास्ते—अतिजग्ती (५२ अक्षराणि), शक्वरी (अक्षराणि ५६), अतिशक्वरी (अक्षराणि ६०), अष्टिः (अक्षराणि ६४), अत्यष्टिः (अक्षराणि ६८), घृतिः, (अक्षराणि ७२) अतिघृतिश्च (अक्षराणि ७६) ।

तृतीयसप्तकस्य सप्तानां वैदिकानां छन्दसां विवरणं निम्नाङ्कितं वर्त्तते । तथाहि—कृतिः (अक्षराणि ८०) प्रकृतिः (अक्षराणि ८४) आकृतिः (अक्षराणि ८८) विकृतिः (अक्षराणि ९२) संस्कृतिः, (अक्षराणि ९६) अभिकृतिः (अक्षराणि १००) उत्कृतिश्च (अक्षराणि १०४) ।

एतेषां समेषाम् छन्दसामनेके भेदाः भवन्ति ।

वेदाङ्गम्—ज्यौतिषम्

वेदप्रतिपाद्यानां यज्ञानामायोजनम् कालसापेक्षम् भवति । तेषां यज्ञानाम् काल-
मधिकृत्य बह्वयः कोटयः सन्ति । केचन यज्ञाः संवत्सरसम्पाद्याः भवन्ति, केचन
माससंपाद्याः, केचनायनसम्पाद्याः, केचन ऋतुसम्पाद्याः, केचन पक्षसम्पाद्याः
केचनाहःसम्पाद्याश्च । तथाविधानां यज्ञानाम् सम्पादनाय कालशुद्धिरप्यत्यावश्यकीया
तथा चाह यज्ञकालमधिकृत्य तैत्तिरीयब्राह्मणग्रन्थः—
भवति । तथा चाह यज्ञकालमधिकृत्य तैत्तिरीयब्राह्मणग्रन्थः—
'वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्य आदधीत, शरदि वैश्य आदधीत ।'
(तै० ब्रा० १।१) यज्ञार्थदीक्षायां प्रवेशकालविषये ताण्ड्यब्राह्मणे अभिहितम्—
'एकाष्टकायां दीक्षेरन् फाल्गुनीपूर्णमासे दीक्षेरन् ।' प्रातःसायंकालयोः दुग्धेन अग्नौ
होमं कुर्यात् । तथाह तैत्तिरीयब्राह्मणम्—'प्रातर्जुहोति, सायं जुहोति ।।' इति (तै०
ब्रा० २।१।२) यज्ञानुष्ठाने येन प्रकारेण विधानस्य शुद्धिरावश्यकीया भवति तेनैव
प्रकारेण कालस्यापि शुद्धिरावश्यकीया भवति । तथा चाह श्रुतिः—

'ते असुरा अयज्ञा अदक्षिणा अनक्षत्राः ।
यच्च किञ्चाकुर्वत तां कृत्यामेवाकुर्वतः ॥' इति ।

तथाविधस्य यज्ञानुष्ठानाय कालस्य शुद्धेः ज्ञानम् अनिवार्यम् । तथा चोक्तमार्ष-
ज्योतिषे—

'वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः ।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषम् वेद स वेद यज्ञान् ॥' इति ।
(आर्षज्यौतिषम् ३६)

चतुर्णामपि वेदानाम् ज्योतिश्शास्त्रमपि पृथगास्ते । तद्यथा—

(१) ऋग्वेदस्य ज्यौतिषम्—षट्त्रिशत्पद्यात्मकमार्चज्यौतिषम् ।

(२) यजुर्वेदस्य ज्यौतिषम्—एकोनचत्वारिंशत् पद्यात्मकम् याजुषज्यौतिषम् ।

(३) अथर्ववेदस्य ज्यौतिषम्—द्विषष्टयुत्तरशतपद्यात्मकमाथर्वणज्यौतिषम् ।

सामवेदस्य ज्योतिषम् नेदानीमुपलब्धम् वर्त्तते । उपर्युक्तानाम् त्रयाणामपि ज्योतिःशास्त्रस्य ग्रन्थानाम् प्रणेता लगधो नामाचार्यो वर्त्तते । तत्र याजुषज्योतिषस्य प्रामाणिकम् भाष्यद्वयमपि समुपलभ्यते—(१) सोमाकरविरचितम् भाष्यम्, (२) सुधाकरद्विवेदिकृतम् भाष्यञ्च । एकस्यैव ज्यौतिश्शास्त्रस्य त्रीणि वर्त्मानि सन्ति । तथा चोक्तम् त्रिस्कन्धज्योतिषे—

सिद्धान्त-संहिता होरारूपं स्कन्धत्रयात्मकम् ।
वेदस्य निर्मलं चक्षुर्ज्योतिश्शास्त्रमनुत्तमम् ॥' इति ।

वेदाङ्गज्योतिषग्रन्थस्यावतारकालः ३४०० वत्सरेभ्योऽपि पूर्ववर्ती वर्त्तते । लोकमान्यतिलक–सुधाकरद्विवेदी–डॉ० थीवो प्रभृतयो विद्वांसः लगधप्रणीतस्य वेदाङ्गज्योतिषग्रन्थस्य आशयानाविष्कर्तुम् प्रायतन्त किन्तु तैरपि तस्य ग्रन्थस्याशयो यथायथम् प्रकाशितः इति वक्तुं नहि शक्यते ।

वेदाङ्गज्योतिष्ग्रन्थस्य प्रणेता आचार्यः लगध एवासीत् इत्यत्र नास्ति कस्यचन मतभेदः । तथा चोक्तमार्चज्योतिष्ग्रन्थे—

'प्रणम्य शिरसा कालमभिवाद्य सरस्वतीम् ।
कालज्ञानं प्रवक्ष्यामि लगधस्य महात्मनः ॥' इति ।
(आर्षज्यौतिषम्–४)

यज्ञानां विधानाय कालस्येत्थं प्रकारकं महत्त्वम् स्वीकुर्वता सिद्धान्तशिरोमणिकारेणाभिहितम् भास्कराचार्येण—

'वेदास्तावत् यज्ञकर्मप्रवृत्ता यज्ञाः प्रोक्तास्ते तु कालाश्रयेण ।
शास्त्रादस्मात् कालबोधो यतः स्यात् वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात् ॥'
इति ।

यज्ञानुष्ठानविषये वेदाङ्गज्योतिषनिर्दिष्टस्य कालस्यातीवमहत्त्वमास्ते इत्यभिहितम् तत्रैव चतुर्थे श्लोके । तथाहि—

"यथा शिखामयूराणां नागानां मणयो यथा ।
तद्वद्वेदाङ्गशास्त्राणाम् गणितं मूर्धनि स्थितम् ॥" इति ।

परवर्तिकाले ज्यौतिपशास्त्रस्य त्रयो विभागा अभूवन्—संहितागणितजातकाख्याः इति। परवर्तिनि काले आर्यभट्ट-वाराहमिहिर ब्रह्मगुप्त-भास्कराचार्यप्रभृतयो ज्योतिर्वेदविदो विद्वांसः अस्य वेदाङ्गस्य प्रवर्तनम् प्रवर्द्धनञ्च स्वकीयाभिः कृतिभिरकार्षुः। त्रैकालिकाणां विषयाणाम् करामलकवत् ज्ञानसम्पादनस्य साधनभूतमिदं शास्त्रं वर्तते। तथा चोक्तमपि—

'वेदस्य निर्मलं चक्षुः ज्योतिःशास्त्रमकल्मषम्।
विनैतदखिलं श्रौतं स्मार्तं कर्म न सिद्धयति॥' इति।

ज्योतिश्शास्त्रमतीव प्राचीनमास्ते। अस्य शास्त्रस्य बीजानि वेदवाक्येष्वपि दृष्टानि सन्ति। तथाहि—'एकाच मे तिस्रश्च मे पञ्च च मे सप्त च मे।' इत्यादिके मन्त्रे विषमसंख्याप्रदर्शकस्य गणितस्य बीजमुपलभ्यते। 'इयं वेदिः परो अन्तः पृथिव्या अयं यज्ञो भुवनस्य नाभिः।' इत्यस्मिन् मन्त्रे रेखागणितस्य बीजम् समुपलभ्यते।

ज्योतिश्शास्त्रस्य प्रवर्तकाः अष्टादशसंख्याकाः महर्षयः आसन्। तथाहि—

'सूर्यः पितामहः व्यासो वसिष्ठोऽत्रिः पराशरः।
कश्यपो नारदो गर्गो मरीचर्मनुरङ्गिराः॥
लोमशः पुलिशश्चैव च्यवनो यवनो भृगुः।
शौनकोऽष्टादशश्चैते ज्योतिःशास्त्रप्रवर्तकाः'॥ इति।

वेदाङ्गतां गतस्य ज्योतिश्शास्त्रस्य साहित्यम् विपुलमास्ते। तत्र सूर्यपितामहादिकैः कृताः सिद्धान्तग्रन्थाः गौरीकालजातकादयो दैवग्रन्थाः पराशरजैमिनिकृताः बृहज्जातकादयो ग्रन्थाः, ज्यौतिपसंहितादिकाश्च समुपलभ्यन्ते। वाराहमिहिर–आर्यभट्ट–ब्रह्मगुप्त–लल्लाचार्य–उत्पलाचार्य–श्रीपति–भोजदेव–भास्कराचार्य–केशव–गणेशदैवज्ञ–ज्ञानराज–कमलाकरादिका अनेके विश्वविश्रुता विद्वांसः अस्य ज्योतिषनामकस्य वेदाङ्गस्य प्रवर्त्तका अभूवन्।

वेदाङ्गम्–शिक्षाशास्त्रम्

व्याकरणमहाभाष्यकारेण महर्षिणा पतञ्जलिना पस्पशाह्निकेऽभिहितम्—'ब्राह्मणेन षडङ्गो वेदोऽध्येयो ज्ञेयश्च।' अतएव वेदस्य षडङ्गानि सन्तीति निश्चप्रचम्। तथा चोक्तम् पाणिनीयशिक्षायाम्—

'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसां चयः।
ज्योतिषामयनं चैव वेदाङ्गानि षडेव तु॥' इति।

× × × ×

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्यौतिषमयनं चक्षुः निरुक्तम् श्रोत्रमुच्यते॥

शिक्षाघ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥' इति ।
(पा० शि० ४१–४२)

अनेन प्रमाणेनायमर्थः सिद्धयति यत् शिक्षाशास्त्रः वेदाङ्गेषु षट्सु प्रथमं स्थानं विभर्तीति । येन शास्त्रेण वेदवर्णानाम् उच्चारणम् सम्यग्भवति तच्छास्त्रम् शिक्षेत्यभिधीयते । वेदमन्त्राः स्वरप्रधानाः सन्ति । स्वराणाम् उदात्तानुदात्तस्वरितादिकानाम् उच्चारणस्य सम्यग्ज्ञानम् विनाशिक्षाशास्त्राधिगमं नहि सम्पद्यते । तथा चोक्तम् तैत्तिरीयोपनिषदारम्भे । तद्यथा—

'अथ शीक्षां व्याख्यास्यामः—वर्णः; स्वरः, मात्रा, बलम्, साम, सन्तान इत्युक्तः शीक्षाध्यायः ।' इति ।

तत्र वर्णोऽकारादिः, स्वरः उदात्तादिः, मात्राः ह्रस्वादिः, वलम् स्थानप्रयत्नौ, साम = निषादादिः, सन्तानो = विकर्षणादिः इत्येतेषामववोधनमेव शिक्षाशास्त्रस्य प्रयोजनमास्ते । शिक्षाशास्त्रे एव वैदिकविधीनां अध्ययनाध्यापनविषयकाः निर्देशाः कृताः सन्ति । तथा चोक्तम् सायणभाष्यकारेण ऋग्वेदभाष्यस्य भूमिकायामपि—'स्वरवर्णाद्युच्चारणप्रकारो यत्र शिक्ष्यते = उपदिश्यते सा शिक्षेति ।

केषाञ्चन समीक्षकाणां मतानुसारेण जैगीषव्यशिष्यः बाभ्रव्यः शिक्षाशास्त्रं प्रणिनाय । महाभारतस्य शान्तिपर्वणि आचार्यगालवकृतस्य शिक्षाशास्त्रस्योल्लेखः समुपलभ्यते । पूनातः भारद्वाजशिक्षायाः प्रकाशनं जातम् । शिक्षासंग्रहनामके ग्रन्थे द्वात्रिंशत्सङ्ख्याकानां शिक्षाग्रन्थानाम् संग्रहः समुपलभ्यते । इदमपि अवधेयमास्ते यदिदानीम् शुक्लयजुर्वेदविषयिणी याज्ञवल्क्यशिक्षा, सामवेदविषयिणी नारदशिक्षा, अथर्ववेदविषयिणी माण्डूकी शिक्षा ऋग्वेदविषयिणी च पाणिनीयशिक्षा समुपलभ्यते ।

शिक्षासाहित्यम्—वैदिकानाम् मन्त्राणामुच्चारणविध्युपदेशको ग्रन्थ एव शिक्षाशब्देनाभिधीयते । शिक्षाशास्त्रस्य साहित्यमतीव विशालं वर्त्तते । तच्चात्र मनाङ् व्याक्रियते—

(१) व्यासशिक्षा—महामहोपाध्यायपण्डितवेङ्कटरामशर्ममहोदय अस्य तैजसाभिधानां व्याख्यामकरोत् ।

(२) भरद्वाजशिक्षा—अस्य ग्रन्थस्य सम्वन्धः तैत्तिरीय संहितया वर्त्तते अस्याः शिक्षायाः संहिताशिक्षेत्यपरं नाम । संहितापदानां शुद्धतैवास्य लक्ष्यमास्ते तदर्थमत्र विशिष्टा नियमा अभिहिताः सन्ति । तैत्तिरीयसंहितायां 'वृजिन' शब उपलभ्यते । परञ्चास्याः शिक्षायाः अनुसारेण 'वृजन' एवास्य पदस्योच्चारणं कर्त्तव्यम् । तथा चोक्तमपि—वृजिने 'ज' उदात्तश्चेत् अकारेण सहोच्यत ।

(३) **पाणिनीयशिक्षा**—इयम् शिक्षा प्रख्याता लोकप्रिया चास्ति । लौकिकानाम् वैदिकानाञ्चोभयविधानां पदानामुच्चारणकर्मणि शिक्षेयमतीव साहाय्यम् करोति। अस्मिन् शिक्षाग्रन्थे षष्टि श्लोकाः सन्ति । अस्य ग्रन्थस्य प्रणेता को वर्त्तते इति ज्ञानं इदानीं यावदपि नहि संजातम् । ग्रन्थस्यान्ते दाक्षीपुत्रनाम्ना पाणिनेरुल्लेखः कृतो वर्त्तते । तथा च श्लोकः—

> शङ्करः शाङ्करीं प्रादात् दाक्षीपुत्राय धीमते ।
> वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥ इति ।
> (पा० शि० ५६)

अस्य ग्रन्थस्य बह्व्यः व्याख्याः समुपलब्धाः सन्ति ।

(४) **याज्ञवल्क्यशिक्षा**—अस्या शिक्षाग्रन्थस्याकारो विपुलो वर्त्तते, अन्यशिक्षाग्रन्थापेक्षया । अस्मिन् ग्रन्थे द्वात्रिंशदुत्तरद्वेशते संख्या श्लोकानां वर्त्तते । अस्याः सम्बन्धः शुक्लयजुर्वेदीयवाजसनेयीयशाखया सह वर्त्तते । अस्मिन् ग्रन्थे वैदिकानां स्वराणाम् विवेचनम् कृतमास्ते । लोपागमविकारप्रकृतिभावाख्यानां चतुर्विधानां सन्धीनामपि विवेचनमास्ते ।

(५) **वासिष्ठी शिक्षा**—अस्या अपि शिक्षायाः सम्बन्धः वाजसनियीशाखयैव सह वर्त्तते । अस्यां शिक्षायाम् ऋग्यजुर्वेदयोः मन्त्राणां पार्थक्यमतिविस्तरेण विवेचितमास्ते । अस्याः शिक्षायाः अनुसारेण शुक्लयजुर्वेदीयसंहितायाम् १४६७ मन्त्राः ऋग्वेदीयाः मन्त्राः सन्ति । यजुषां च संख्या २८२३ वर्त्तते ।

(६) **कात्यायनी शिक्षा**—अस्यां शिक्षायाम् त्रयोदश श्लोकाः सन्ति । अस्याः व्याख्याम् जयन्तस्वामिनामको विद्वानकार्षीत् ।

(७) **पाराशरी शिक्षा**—अस्यां शिक्षायाम् १६० श्लोकाः सन्ति ।

(८) **माण्डव्यशिक्षा**—शुक्लयजुर्वेदेन सम्बद्धा, शुक्लयजुर्वेदाध्ययनोपयोगिनी शिक्षेयमास्ते । वाजसनेयीसंहितायां प्रयुक्तानाम् नामौष्ठ्यवर्णानां संग्रहोऽत्र वर्त्तते ।

(९) **अमोघानन्दिनी शिक्षा**—अस्मिन् ग्रन्थे १३० श्लोकाः सन्ति । अत्र स्वरवर्गस्य सूक्ष्मविचारः कृतो वर्त्तते ।

(१०) **माध्यन्दिनी शिक्षा**—अयं ग्रन्थो द्विप्रकारकः समुपलभ्यते—गद्यात्मकः पद्यात्मकश्च । गद्यात्मको ग्रन्थो बृहदाकारो वर्त्तते, पद्यात्मकश्च लघ्वाकारः ।

(११) **वर्णरत्नप्रदीपिका**—अस्य ग्रन्थस्य प्रणेता भारद्वाजगोत्रीयः अमरेशनामको विद्वान् वर्त्तते । अस्मिन् ग्रन्थे २२७ श्लोकाः सन्ति ।

(१२) केशवी शिक्षा—अस्याः प्रणेता आस्तिकमुनिवंशीयः गोकुलदैवज्ञात्मजः केशवदैवज्ञो वर्त्तते। द्विविधेयं शिक्षा समुपलभ्यते। प्रथमप्रकारायां माध्यन्दिनशाखायाः परिभाषाणां विस्तृतं विवेचनमास्ते। द्वितोया शिक्षा एकविंशतिपद्यात्मका वर्त्तते।

(१३) मल्लशर्मशिक्षा—अस्याः शिक्षायाः प्रणेता खगपतिमहोदयस्य पुत्रो मल्लशर्मा उपमन्युगोत्रीयो वर्त्तते। अस्यां शिक्षयां ६५ श्लोकाः सन्ति। अस्याः रचनाकालः १७८१ वैक्रमाव्दो वर्त्तते।

(१४) स्वराङ्कशशिक्षा—अस्याः रचयिता जयन्तस्वामिनामको विद्वान् वर्त्तते।

(१५) षोडशश्लोकी शिक्षा--अस्यां पोडश श्लोकाः सन्तिः। स्वरव्यञ्जनविचारात्मिकायामस्याः शिक्षायाः प्रणेता श्रीरामकृष्णनामको विद्वान् वर्त्तते।

(१६) अवसाननिर्णयशिक्षा--अस्याः प्रणेता अनन्तदेवनामको विद्वान् वर्त्तते।

(१७) स्वरभक्तिलक्षणशिक्षा--कात्यायनमहर्षिप्रणीतायामस्यां शिक्षायाम् स्वरभक्तिप्रयोगनियमाः विवेचिताः सन्ति।

(१८) प्रातिशाख्यप्रदीपशिक्षा--इयम् शिक्षा सदाशिवपुत्रेण बालकृष्णनाम्ना विदुषा प्रणीता वर्त्तते। शिक्षाशास्त्रस्य यथार्थज्ञानावाप्तयेऽस्य ग्रन्थस्याध्ययनमतीवोपयोगि वर्त्तते।

(१९) नारदीयशिक्षा--सामवेदविपयिणीयं शिक्षा वर्त्तते। इयं शिक्षातीव विस्तृता वर्त्तते। शोभाकरभट्टेनास्याः व्याख्यापि कृता वर्त्तते। सामवेदीयस्वराणां ज्ञाने शिक्षेयमतीवोपयोगिनी।

(२०) गौतमी शिक्षा—
(२१) लोभेंशी शिक्षा—
इमे द्वे अपि शिक्षे सामवेदसम्बन्धिनी स्तः।

(२२) माण्डूकी शिक्षा--अथर्ववेदस्येयं शिक्षा वर्त्तते। अस्याम् १७९ श्लोकाः सन्ति। इयमथर्ववेदस्य स्वराणाम् वर्णानाञ्च ज्ञानायातीवोपयोगिनी वर्त्तते।

(२३) क्रमसन्धान शिक्षा—
(२४) गलादृक् शिक्षा—
(२५) मनःस्वार शिक्षा—
एतेषां त्रयाणां शिक्षाग्रन्थानां प्रणेता याज्ञवल्क्यमुनिर्वर्त्तते।

एतेन ज्ञायते यत् प्राचीनाः महर्षयः भाषाशास्त्रविषये अतीव जागरूका आसनिति।

वेदाङ्गम्—कल्पः

कल्पः वेदाङ्गेषु द्वितीयम् स्थानम् बिभर्ति । कल्पशास्त्रे वेदविहितानाम् कर्मणाम् व्यवस्थापनं क्रमपूर्वकं कल्पयते । तथा चोक्तम्—

कल्पो वेदविहितानां कर्मणामानुपूर्व्येण कल्पनाशास्त्रम् ।' इति ।

कल्पसूत्राणि द्विप्रकारकाणि सन्ति—श्रौतसूत्राणि स्मार्तसूत्राणि च । वेदोक्तानां विविधप्रकारकाणां प्रकाशकानि सूत्राणि श्रौतसूत्राणीति कथ्यन्ते । स्मार्तसूत्राण्यपि द्विप्रकारकाणि सन्ति—गृह्यसूत्राणि धर्मसूत्राणि च । श्रौतसूत्राणां विषयाः सन्ति—(१) अग्निप्रयाधानाम्, (२) अग्निहोत्रम्, (३) दर्शपूर्णमासौ, (४) पशुयागः, (५) नानाप्रकारकाः सोमयागाश्च ।

मुख्यतया कल्पसूत्राणां चत्वारो भेदास्समुपलभ्यन्ते—(१) श्रौतसूत्रम्, (२) गृह्यसूत्रम्, (३) धर्मसूत्रम्, (४) शुल्वसूत्रञ्च । तत्र श्रौतसूत्रेषु ब्राह्मणग्रन्थवर्णितानां श्रौताग्नियागानाम् क्रमवद्धं वर्णनम् कृतमास्ते । गृह्यसूत्रेषु तेषाम् अनुष्ठानाचारयागानां वर्णनं समुपलभ्यते ये यागाः त्रैवर्णिकैरवश्यमनुष्ठेयाः भवन्ति । अत्र संस्काराणामपि वर्णनं समुपलभ्यते । धर्मसूत्रग्रन्थेषु राज्ञाम् प्रजानाञ्च कर्तव्याणि, चत्वारो वर्णा चत्वार आश्रमाः, तेषां धर्माश्च पूर्णतया निरूपिता भवन्ति । शुल्वसूत्रग्रन्थेषु तु यज्ञस्य वेदीनां निर्माणस्य प्रकारो विशेषतया वर्ण्यते । शुल्वसूत्राणां वैज्ञानिकम् महत्त्वमास्ते । इमानि शुल्वसूत्राणि रेखागणितस्यापि बीजभूतानि सन्ति ।

तेषां तेषा वेदानां कल्पसूत्राणि पृथक्-पृथक् सन्ति । तद्यथा—(१) ऋग्वेदस्य तावत् आश्वलायनम् शाङ्खायनञ्चेति द्वे कल्पसूत्रे स्तः । अनयोरुभयोः कल्पसूत्रयोः श्रौतसूत्राणि च पृथक्-पृथक् सन्ति । पारस्करगृह्यसूत्राणि

(२) शुक्लयजुर्वेदस्य कल्पसूत्रानि कात्यायनश्रौतसूत्राणि कात्यायनशुल्वसूत्रञ्चेति त्रीणि सन्ति । कृष्णयजुर्वेदस्य—बौधायनसूत्रम्, आपस्तम्बसूत्रञ्चेति द्वे सूत्रे स्तः ।

(३) सामवेदस्यापि द्वे कल्पसूत्रे स्तः—लाटचायनश्रौतसूत्रम् द्राह्यायणश्रौतसूत्रञ्चेति । जैमिनीयशाखायाः जैमिनिगृह्यसूत्रम् गोभिलगृह्यसूत्रम् खादिरगृह्यसूत्रञ्चेति त्रीणि गृह्यसूत्राणि समुपलभ्यन्ते । आर्षेयकल्प अथवा मशककल्पोऽपि सामवेदीय एवास्ति ।

(४) अथर्ववेदस्य द्वे कल्पसूत्रे स्तः—वैतानश्रौतसूत्रम्, कौशिकश्रौतसूत्रञ्च ।

शुक्लयजुर्वेदीयकल्पसूत्राणि—श्रौतसूत्राणां स्वरूपाववोधाय कात्यायनश्रौत-

सूत्रस्य ज्ञानमावश्यकरूपेण सम्पादनीयं वर्त्तते । अस्मिन् सूत्रग्रन्थे षड्विंशतिसंख्याका अध्यायाः सन्ति । अयम् ग्रन्थोऽतीव प्रौढः, सर्वेषां यज्ञयागानाञ्च निरूपकश्च वर्त्तते । तत्र प्रथमेऽध्याये दश कण्डिकाः सन्ति । अत्र यज्ञ विषयका अनेके विषयाः निरूपिताः सन्ति । द्वितीय–तृतीयाध्याययोः समग्रस्य दर्शपूर्णमासयागयोः वर्णनमास्ते । चतुर्थे चाध्याये–पिण्डपितृयज्ञ–दाक्षायण–आग्रायण–अग्न्याधान=पुनराधान–अग्न्युपस्थापन–अग्निहोत्रादिकानां च विस्तृतं वर्णनं समुपलभ्यते । पञ्चमेऽध्याये–चातुर्मास्ययागस्य वर्णनं कृतमास्ते । षष्ठेऽध्याये तु निरूढपशुबन्धस्य विस्तृत वर्णनमस्ति । सप्तमाऽध्यायात् दशमाऽध्यायं यावदग्निष्टोमस्य वर्णनम् कृतमस्ति । एकादशेऽध्याये ब्रह्मानामकस्य ऋत्विजः क्रियाकलापानां वर्णनं कृतम् । द्वादशेऽध्याये द्वादशाहयज्ञस्य त्रयोदशेऽध्याये गवामनयस्य, चतुर्दशेचाध्याये वाजपेयस्य, पञ्चदशेऽध्याये राजसूयस्य पोडश–सप्तदशाष्टादशसु चाध्यायेपु अग्निचयनस्य वर्णनम् कृतमास्ते । एकोनविंशतितमे अध्याये सोत्रामणियागस्य, विंशतितमेऽध्याये अश्वमेधयागस्य, एकविंशतितमे च सर्वमेध-पितृमेधादीनां सविधि वर्णनं कृतमास्ते। एवाहाहीनसमयोः साङ्गम् वर्णनम् द्वाविंशति-त्रयोविंशतिचतुर्विंशतितमेऽध्यायेपु कृतमस्ति ! अस्य ग्रन्थस्य पञ्चविंशतितमेऽध्याये प्रायश्चित्तस्य, पड्विंशतितमेऽध्याये च प्रवर्ग्यस्य विवरणमास्ते ।

पारस्करगृह्यसूत्रम् शुक्लयजुर्वेदस्य वर्त्तते। अस्य ग्रन्थस्य कर्क–जयराम–हरिहर–गदाधर–विश्वनाथाख्याः पञ्च प्रख्याताः व्याख्याकाराः सन्ति ।

वैजवापगृह्यसूत्रमपि शुक्लयजुर्वेदीयमास्ते ।

कृष्णयजुर्वेदस्य बौधायन–आपस्तम्ब–हिरण्यकेशी–वैखानस–भारद्वाज–मानवाख्यानि षट् श्रौतसूत्राणि समुपलभ्यन्ते ।

कृष्णयजुर्वेदीयानि नवसङ्ख्याकानि कल्पसूत्राणि सन्ति। तद्यथा—(१) बोधायनगृह्यसूत्रम्, (२) भारद्वाजगृह्यसूत्रम् , (३) आपस्तम्बगृह्यसूत्रम्, (४) हिरण्यकेशिगृह्यसूत्रम्, (५) वैखानसगृह्यसूत्रम्, (६) अग्निवेशगृह्यसूत्रम्, (७) मानवगृह्यसूत्रम्, (८) वाराहगृह्यसूत्रम्, (९) काठकगृह्यसूत्रञ्च ।

सामवेदीयानि कल्पसूत्राण्यपि अष्टौ सन्ति। तथा च—(१) आर्षेयकल्पसूत्रम्, (२) क्षुद्रकल्पसूत्रम्, (३) लाटचायनश्रौतसूत्रम्, (४) द्राह्यायणश्रौतसूत्रम्, (५) जैमिनीयश्रौतसूत्रम्, (६) गोभिलगृह्यसूत्रम्, (७) खादिरगृह्यसूत्रम्, (८) जैमिनीयगृह्यसूत्रञ्च ।

अथर्ववेदीयम् कल्पसूत्रम् त्वेकमेव वैतानश्रौतसूत्रनामकम् ।

एतेपां धर्मप्राणानां भारतीयानां आचारभूताः याः स्मृतयः मन्वादिकाः सन्ति, तेपामपि उपजीव्यानि धर्मसूत्राणि एव सन्ति । इमानि धर्मसूत्राणि शुल्वसूत्राण्यपि कल्पशास्त्रस्याङ्गभूतानि सन्ति । तान्यपि कानिचित् धर्मसूत्राणि अत्र गण्यन्ते ।

(१) गौतमधर्मसूत्रम्—धर्मसूत्रेषु प्राचीनतमोऽयं ग्रन्थो विद्यते । अस्य ग्रन्थस्योल्लेखम्, गोभिलः स्वकीये गृह्यसूत्रेऽकार्षीत् । अस्मिन् ग्रन्थे अष्टाविंशत्यध्यायाः सन्ति ।

(२) बौधायनधर्मसूत्रम्—अस्य ग्रन्थस्यांशमात्रमेवोपलभ्यते । अस्मिन् धर्मसूत्रे चत्वारः प्रश्नाः सन्ति ।

(३) आस्तम्बकल्पसूत्रम्—कल्पसूत्रमिदं अपस्तम्बधर्मसूत्रनाम्ना व्याख्यातं वर्त्तते । अस्य ग्रन्थस्य प्रणेताऽपस्तम्बः उत्तरभारतीयः आसीत् ।

(४) हिरण्यकेशीयसूत्रम्—आपस्तम्बसूत्रस्य संक्षिप्तम् संस्करणमिवाभातीदं धर्मसूत्रम् ।

(५) वसिष्ठधर्मसूत्रम्—आकारे ह्रस्वोऽपि ग्रन्थोऽयम् अतीवोपयोगो वर्त्तते । अस्मिन् ग्रन्थे स्त्रीधर्म–श्राद्ध–अशौच–विष्णुमूर्तिप्रतिष्ठा–विष्णुपूजनादिकानां विषयाणां विवेचनमास्ते ।

(६) वैखानसधर्मसूत्रम्—अस्मिन् धर्मसूत्रग्रन्थे वैखानसस्मृतिसूत्रस्य–अष्टम–नवम–दशमप्रश्नाः विवेचिताः सन्ति । अत्राश्रमाणां वर्णानाञ्च विशदं विवेचनं कृतं वर्त्तते ।

(७) विष्णुधर्मसूत्रम्—इदं धर्मसूत्रम् दिव्यमास्ते इति समीक्षकाणां अभिमतिः । कश्चनापि मानवोऽस्य प्रणेता नास्ति ।

अनेनैव प्रकारेण निम्नांकितानि कल्पशास्त्रस्याङ्गभूतानि निम्नांकितानि शुल्वसूत्राण्यपि सन्ति—

(१) आपस्तम्बशुल्वसूत्रम्—प्रख्याततमस्यास्य शुल्वसूत्रस्य प्रख्याताः चत्वारो व्याख्याकारास्सन्ति–कपर्दिस्वामी, करविन्दस्वामी, सुन्दरराजः गोपालाचार्यश्च ।

(२) कात्यायनशुल्वसूत्रम्—अस्य ग्रन्थस्य प्रसिद्धानाम् कात्यायनशुल्वसूत्रपरिशिष्टमास्ते । भागद्वये विभक्तस्यास्य ग्रन्थस्य प्रथमे भागे सप्तकण्डिकाः ९० सूत्राणि च सन्ति । श्लोकात्मके द्वितीये खण्डे ४८ श्लोकाः सन्ति । अस्य व्याख्यातारः प्रख्याताः त्रयो विद्वांसः सन्ति । (१) राम अथवा रामवाजपेयः, (२) महीधरः, (३) महामहोपाध्यायो विद्याधरगौडश्च ।

(३) मानवशुल्वसूत्रम्—लघुकायोऽयं ग्रन्थः गद्यपद्ययोरुभयोरेवास्ति ।

(४) मैत्रायणी शुल्वसूत्रम्—इदम् मानवशुल्वसूत्रस्य द्वितीयं संस्करणमिवाभाति ।

(५) वाराहशुल्वसूत्रम्—ग्रन्थोऽयम् शिवदासनामकेन विदुषा व्याख्यातं वर्त्तते ।

षोडश संस्काराः

अथवा—संस्काराः ।

संस्कारो हि नाम कार्यान्तिकरणयोग्यता । इत्याह संस्कारपदार्थं निरूपयता श्रीभाष्यकारेण । उत्पन्ने मनुष्ये संस्कारेण द्वारा किञ्चित्तथाविधं परिवर्तनम् भवति येन सः कार्यान्तरसम्पादनयोग्यो भवति । यथोपनयनेन द्वारा द्विजन्मा वेदाध्ययनस्य योग्यो भवति । तथा चाह श्रुतिः—'अष्टवर्षं ब्राह्मणमुपनयतमध्यापयेत् ।' (शतपथ-ब्राह्मणः) तथा चाह भगवान् मनुरपि मनुस्मृतौ—

'श्रावण्यां प्रौष्ठपद्यां वा उपाकृत्य यथाविधिः ।
युक्तश्छन्दांस्यधीयीत मासान् विप्रोऽर्धपञ्चमान् ॥' इति ।

अतएव संस्काराः मानवजीवनस्यातीवोपयोगीन्यङ्गानि सन्तीति प्राहुः महर्षयः ।

एतेषां संस्काराणां संख्यादिविषये धर्मशास्त्रकाराणां मतभेदो विद्यते । तथा चाह सुमन्तुः—

ब्राह्मणक्षत्रियविशां—वृत्तिः गर्भाधान–पुंसवन–सीमन्तोन्नयन–जातकर्म–नामकरण–निष्क्रमण–अन्नप्राशन–चौडोपनयन–व्रतचर्याध्ययन–समावर्तन–विवाह–सोष्यन्ती–यज्ञ–दानानि । इति । अत्र वृत्तिशब्देन संस्क्रिया, सोष्यन्ती सुखप्रसवार्थं कर्म च गृह्यते ।

महर्षेः गौतमस्यानुसारेण तु—'गर्भाधानं, पुंसवनम्, सीमन्तोन्नयन–जातकर्म–नामकरण–निष्क्रमणान्नप्राशन–चौडोपनयनं चत्वारि वेदव्रतानि स्नानं सहधर्मचारिणी संयोगः ।' अत्र सहधर्मचारिणीसंयोगशब्देन विवाह उच्यते ।

गौतमः अपरानपि चत्वारिंशत्संस्कारान् विवाहितस्य गृहस्थस्यातीव कल्याणकरानाह । तथाहि—'पञ्चानां यज्ञानामनुष्ठानमष्टकाः । पार्वणः श्राद्धम् श्रावण्यग्रहायणीचैत्र्याश्वयुजीति सप्तपाकयज्ञसंस्था, अग्न्याधेयमग्निहोत्रम्, दर्शपूर्णमासौ चातुर्मास्यान्याग्रयणेष्टिर्निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्था, अग्निष्टोमोऽत्यग्निष्टोमः उवथ्यः षोडशी वाजपेयोतिरात्रोऽप्तोर्याम इति सप्तसोमसंस्था इत्येते चत्वारिंशत् संस्काराः । यस्यैते चत्वारिंशत् संस्कारा अष्टावात्मगुणाश्च सब्राह्मणो ब्रह्मणः सायुज्यमाप्नोति । पार्वणः स्थालीपाकः । श्रावणी तत्र क्रियमाणं श्रवणा कर्म । आग्रहायणी तत्र क्रियमाणं प्रत्यवरोहणम् । मैत्री तत्र क्रियमाणः शूलगावः । आश्वयुजी तत्र क्रियमाणमाश्वयुजी कर्म । अष्टावात्मगुणाः—दया सर्वभूतेषु, क्षान्तिरनसूया शौचमनायसो माङ्गल्यमकार्पण्यमस्पृहा ।' इति ।

भगवान् मनुरपि स्वविचारान् निम्नप्रकारेण प्रकाशयामास संस्काराणां विषये—

'वैदिकैः कर्मभिः पुण्यैर्निषेकादिर्द्विजन्मनाम् ।
कार्यः शरीरसंस्कारः पावनः प्रेत्य चेह च ॥' इति ।

निषेकादिः = गर्भाधानादिः, प्रेत्य = परलोके, इह=अस्मिन् लोके । तथा च—

'गार्भैर्होमैः जातकर्मचौडमौञ्जीनिबन्धनैः ।
बैजिकं गार्भिकञ्चैनो द्विजानामपमृज्यते ॥'

गार्भैः = गर्भसंस्कारार्थैः । होमशब्दः कर्मविशेषोपलक्षकस्तेन गर्भाधानादेः परिग्रहः । बैजिकम् = शुक्रसंश्लेषजम्, गार्भिकं = गर्भाशयस्थशोणितसम्बन्धजम् । एनः = पापम् ।

अत्राभिहिताः सर्वे संस्काराः काम्याः सन्ति तेषाम् पापक्षयरूपफलदर्शनात् । तथाप्येतेषु संस्कारेषु केचन संस्काराः नित्याः सन्ति । तथाहि—

(१) चूडाकरणम्—नित्यम् सर्वेभ्यः आर्येभ्यः आवश्यकशिखाधारणार्थत्वात् । (२) नामकरणमपि नित्यम् आवश्यकानि वादनादिकर्मार्थत्वात् । अतएव आर्याः पुरुषाः यदि नामकरणचूडाकर्मणी यथोचिते काले नहि कृते भवतः तदा उपनयनाव्यवहितपूर्वकाले अवश्यमाचरन्ति । (३) उपनयनसंस्कारोऽपि शिष्टेभ्यो नित्यः संस्कारः यदि शास्त्रानुमोदितसर्वाधिककालं यावदपि द्विजन्मनामुपनयनसंस्कारः नहि सम्पद्यते तदा तु द्विजन्मानः पतिताः भवन्ति । तथा चोक्तमपि—'अत ऊर्ध्वं पतन्त्येते सर्वकर्मबहिष्कृताः ।' इति याज्ञवल्क्येन । (४) विवाहसंस्कारोऽपि नित्यो भवति, आवश्यकसत्प्रजोत्पादनार्थत्वात् । तथा चोक्तमपि—'तस्मात् सर्वप्रयत्नेन कर्तव्यो दारसंग्रहः ।' इति देवलेन । कश्यपेनाऽप्यभिहितम्—'दारान् सर्वप्रयत्नेन विशुद्धानुद्वहेत् ततः' । इति ।

एतेभ्यो भिन्नाः गर्भाधान–पुंसवन–सीमन्तोन्नयनादिकाः संस्काराः अनित्याः सन्ति । अतएव—एकस्याः पत्न्याः एकमेव बारमिमे संस्काराः क्रियन्ते न तु प्रतिगर्भम् । सकृत् कृता एवेमे संस्काराः आरम्भणीयन्यायेनावृत्ताः भवन्ति आजीवनम् । पत्नीभेदे संजाते तु इमे संस्काराः तस्याः पत्न्या अपि सकृत् क्रियन्ते । तथा चोक्तम् देवलेन—

'सकृच्च संस्कृता नारी सर्वगर्भेषु संस्कृता ।
यं यं गर्भं प्रसूयते स सर्वः संस्कृतो भवेत् ॥' इति ।

यद्यपि ब्राह्मणक्षत्रियवैश्यशूद्रा इति चत्वारो वर्णाः तथापि आद्यास्त्रय एव वर्णाः द्विजशब्देन वाच्याद्, तेषामेव मौञ्जीबन्धनसम्भवाद्, मौञ्जीबन्धनमेव द्विजत्वसम्पादकम् । द्विजानामेवैते समन्त्रकाः संस्काराः भवन्ति । तथा चाह याज्ञवल्क्यः—

ब्रह्मक्षत्रविशः शूद्राः वर्णाः त्वाद्यास्त्रयो द्विजाः ।
निषेकाद्याः श्मशानान्ताः तेषां वै मन्त्रतः क्रियाः ॥

मातुर्यदग्रे जायन्ते द्वितीयं मौञ्जिबन्धनात् ।
ब्राह्मणक्षत्रियविशस्तस्मादेते द्विजाः स्मृताः ॥ इति ।

यमस्मृत्यनुसारेण शूद्रस्य सर्वे संस्कारा अमन्त्रकाः भवन्ति । तथाहि—

'शूद्रोऽप्येवंविधाः कार्यो विना मन्त्रेण संस्कृतः ।
न केनचित् तमसृजत् छन्दसा तं प्रजापतिः ॥' इति ।

यतो ब्रह्मा अमन्त्रकानेव जनयामास शूद्रात् तत् एतेषाम् अमन्त्रका एव संस्काराः भवन्ति । यद्यपि शूद्रस्य उपनयनवेदारम्भसमावर्तनादिकाः संस्काराः नहि भवन्ति तथापि तेषामपि विवाहसंस्कारः सम्पाद्य एव ।

'विवाहमात्रसंस्कारं शूद्रोऽपि लभतां सदा ॥' इति ।

किन्तु स्त्रीणां विवाहसंस्कारः समन्त्रको भवति । तथा चोक्तमपि—

'तुष्णीमेताः क्रियाः स्त्रीणां विवाहस्तु समन्त्रकः ।' इति ।

अत्रैताः पदम् जातकर्मादीनां वाचकः ।

स्त्रीणां संस्काराणां विषये प्राह मनुरपि—

'आमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥

वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः ।
पतिसेवा गुरौ वासो गृहार्थोऽग्निपरिष्क्रिया' ॥ इति ।

औपनायनिकः = उपनयनकार्यकारी । स्त्रीणामुपनयनस्थानेविवाह एव, गुरुशुश्रूणस्थाने पतिसेवा, अग्निपरिचरणस्थाने गृहकार्यम् ॥

विवाहसंस्कारः

ये केचनापि संस्काराः वैदिकैस्समुपवर्णिताः तेषु विवाहाख्यसंस्कारः सर्वप्रधानो विद्यते, स्वेतराणां सर्वेषां संस्काराणामुपजीव्यत्वात्, स्त्रीशूद्रद्विजातिसाधारण्येन व्यापकत्वात्, पारस्करादिभिर्महर्षिभिः प्रथमाभिधानाच्च । तत्र विवाहो नाम ग्रहणविशेषः—

'अतः परं समावृत्तः कुर्याद्दारपरिग्रहम् ।'

इत्याद्युद्वाहाभिप्रायकग्रहणार्थकपदप्रयोगदर्शनात् ।

'दारान् सर्वत्र यत्नेन विशुद्धानुद्वहेत्ततः ।' इति वक्ष्यद्वचनाच्च ।

सोऽयं ग्रहणविशेषः स्वस्वत्वविशेषोत्पत्त्यनुकूलव्यवहाररूपः। अस्मिन् संस्कारे पुरुषः कन्यां स्वपत्नीरूपेण स्वीकरोति। स चायं स्वीकारो द्विप्रकारको भवति—(१) कन्यापित्रादिकर्तृकदानादिप्रयोज्य, ओमित्यादि प्रयोगादि प्रकाश्य प्रतिग्रहरूपः; (२) 'भगोऽर्यमा सविता पुरन्धिर्मह्यं त्वादु दुर्गार्हपत्याय देवाः।' इत्यादिमन्त्रं प्रकाश्यदेवकर्तृककन्यादानसम्पादकप्रतिग्रहस्वरूपश्च।

मनुरपि देवकर्तृकं दानमर्थयन्नाह—

'देवदत्तां पतिर्भार्यां विन्दते नेच्छयात्मनः।' इति।

तथा चाह नारदोऽपि स्वस्मृतौ—

'स्त्रीपुंसोस्तु सम्बन्धाद् वरणं प्राग्विधीयते।
वरणाद् ग्रहणं पाणेः ससम्बन्धो द्विलक्षणः॥' इति।

सोऽयं विवाहः अष्टप्रकारको भवति। तथा चोक्तं मनुना यमेन च—

'ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथाऽसुरः।
गान्धर्वो राक्षसश्च पैशाचश्चाष्टमोऽधमः॥

यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ।
तद्वत् सर्वं प्रवक्ष्यामि प्रसवे च गुणागुणान्॥

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान्।
विट्शूद्रयोश्च तानेव विद्याद्धर्म्यानराक्षसान्॥

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः।
राक्षस्यं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः।
पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह।
पैशाचश्चासुरश्चैव न कर्त्तव्यः कदाचन।
पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्वदेशितौ।
गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ॥' इति।

विवाहस्याष्टविधत्वं नारदोऽप्याह—

'अष्टौ विवाहा वर्णानां संस्कारार्थं प्रकीर्त्तिताः।
ब्राह्मस्तु प्रथमस्तेषां प्राजापत्यस्तथैव च।

आर्षस्तथैव दैवश्च गान्धर्वश्चासुरस्तथा।
राक्षसोऽनन्तरस्तस्मात् पैशाचश्चाष्टमोऽधमः॥'

एषां तु धर्म्याश्चत्वारो ब्राह्माद्याः समुदाहृताः।
साधारणः स्याद् गान्धर्वः त्रयो धर्म्यास्तथापरे॥' इति।

बौधायनोऽप्यत्राह—एषाश्चत्वारः पूर्वे ब्राह्मणस्य तेष्वपि पूर्वः पूर्वः श्रेयान्

इतरेषामुतरोत्तरः पापीयान् । तत्रापि षष्ठसप्तमौ क्षत्रधर्मानुगतौ पञ्चमाष्टमौ वैश्यशूद्रयोः । इतरेषाम् गान्धर्वादीनाम्, पापीयान् = मन्दतरः । षष्ठसप्तमौ = आसुरराक्षसौ, पञ्चमाष्टमौ, गान्धर्वपैशाचौ ।' इति ।

तत्र ब्राह्मं विवाहं निरूपयता याज्ञवल्क्येन महर्षिणाऽभिहितम्—

'ब्राह्मो विवाहो आहूय दीयते शक्त्यलङ्कृता ।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥' इति ।

अत्र मिताक्षरा—'स ब्राह्माभिधानो विवाहो यस्मिन्नुक्तलक्षणाय वरायाहूय यथाशक्त्यलङ्कृता कन्या दीयते ।' इति मिताक्षरा ।

आर्षस्य विवाहस्य लक्षणमाह मनुः—

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः ।
कन्याप्रदानं विधिवदार्षोऽयं धर्म उच्यते ।

धर्मतः इत्यस्य दक्षिणारूपेणार्थः ।

दैवस्य विवाहस्य लक्षणमप्याह मनुः—

'यज्ञे तु वितते सम्यक् ऋत्विजे कर्म कुर्वते ।
अलङ्कृत्य सुतादानं दैवं धर्मं प्रचक्षते ॥' इति ।

देवस्यायं दैवः । तत्सम्पादको धर्मोऽङ्गम् । इति ।

प्राजापत्यविवाहस्य लक्षणमाह मनुस्मृतिकारः—

सहितौ चरतां धर्ममिति वाचानुभाष्य च ।
कन्याप्रदानमभ्यर्च्य पाजापत्यो विधिः स्मृतः ॥ इति ।

कन्याप्रदानसमये अन्योन्याव्यभिचारणे धर्मेण, धर्मम् = चरतामिति वाक्यमुच्चार्य कन्यावरावभ्यर्च्य कन्याप्रदानं क्रियते तेन विवाहः प्राजापत्य इति व्याख्यातारः ।

अस्य विवाहस्य फलम् निरूपयन् महर्षिः याज्ञवल्क्यः प्राह—

'इत्युक्त्वा चरतां धर्मं सह या दीयतेऽर्थिने ।
सः कायः पावयेत्तज्जः षट् षट् वंश्यान् सहात्मना ॥' इति ।

अयमाशयो यत् सहधर्माचरणं कुरुतामित्युक्त्वा यत्कन्यायाः अर्थिने पुरुषाय प्रदानं क्रियते तेन कन्यादानेन षट् पूर्वे षट् पराः स्वयञ्च पुनाति कन्यायाः प्रदाता ।

आसुरस्य विवाहस्य स्वरूपं प्रतिबोधयन् प्राह भगवान् मनुः—

'ज्ञातिभ्यो द्रविणं दत्त्वा कन्यायै चैव शक्तितः ।
कन्याऽऽप्रदानं स्वाच्छन्द्याद् आसुरो धर्म उच्यते ॥' इति ।

यः कन्यादाता कन्यायै धनं गृह्णाति सः स्वसुतायाः विक्रयं करोति न तु विवाहं करोति। तथाविधा न तु दैवकार्ये उपयुक्ता भवति न वा सा पित्र्यकार्ये उपयुक्ता भवति। तथाविधा नारी महर्षिः कश्यपः दासीशब्देनाह। लोभमोहिताः ये जनाः शुल्केन स्वसुतां प्रयच्छन्ति ते नरकगामिनो भवन्ति। तथा चाह कश्यपः—

क्रीता द्रव्येण या नारी न सा पत्नी विधीयते।
न सा दैवेन सा पित्र्ये दासी तां कश्यपोऽब्रवीत्॥
शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः।
आत्मविक्रयिणः पापाः महाकिल्विषकारकाः॥
पतन्ति निरये घोरे घ्नन्ति चा सप्तमं कुलम्।
गमनागमने चैव सर्वः शुल्कोऽभिधीयते॥ इति।

गान्धर्वस्य विवाहस्य लक्षणे मनुनाऽभिहितम्—

'इच्छयाऽन्योऽन्यसंयोगः कन्यायाश्च वरस्य च।
गान्धर्वः स तु वै ज्ञेयः मैथुन्यः कामसम्भवः॥' इति।

राक्षसस्य विवाहस्य लक्षणे मनुना प्रोक्तम्—

'हत्वा छित्त्वा च भित्त्वा च क्रोशन्तीं रुदतीं गृहात्।
प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते॥' इति।

पैशाचस्य विवाहस्य लक्षणं प्राह मनुः—

'सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति।
स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः॥' इति।

अयं विवाहसंस्कारो नित्यः। अतएव मनुष्यः ब्रह्मचारिव्रतं पालयित्वा कन्यायाः पाणिग्रहणमवश्यं कुर्यात्। तथाहि—

'गुरुवासमनुज्ञाय प्रदाय गुरुदक्षिणाम्।
सदृशानाहरेद् दारान् मातापितृमते स्थितः॥' इति।

कीदृशी नहि स्वीकरणीया इत्यस्यापि

कीदृशी कन्या पत्नीरूपेण स्वीकरणीया

विस्तृतो विचारस्तेषु तेषु ग्रन्थेषु समुपलभ्यते। अत्र मनुस्मृतिकारस्य वचनानि उद्ध्रियन्ते—

'नोद्वहेत् कपिलां कन्यां नाधिकाङ्गीनरोगिणीम्।
ना लोमिकां नातिलोमां न वाचालां न पिङ्गलाम्॥
नर्क्षवृक्षनदीनाम्नीं नान्त्यपर्वतनामिकाम्।
नाहि पक्षिप्रेष्यनाम्नीं न च भीषणनामिकाम्।

यस्याश्च न भवेद् भ्राता न विज्ञायेत वा पिता ।
नोपयच्छेत तां कन्यां पुत्रिकाधर्मशङ्कया ॥' इति ।

तथा चाहाश्वलायनः—'वुद्धिरूपशीललक्षणसम्पन्नामरोगामुपयच्छेत्' इति । भविष्यपुराणे शुभलक्षणसम्पन्नायाः नार्याः विस्तृतं विवेचनं कृतं वर्त्तते । तत्र च तत्रैवावलोकनीयम् ।

न्यायदर्शनस्य स्वरूपनिरूपणम्

न्यायशब्दस्यार्थः—(१) नियमेन ईयते इति व्युत्पत्त्यनुसारेण नियमयुक्तो व्यव्हार एव न्यायशव्देनाभिधीयते । इममेवार्थमाश्रित्य न्यायालयः इत्यादिकाः प्रयोगाः भवन्ति । (२) प्रसिद्धेन दृष्टातेन साकं सदृशार्थेऽपि न्यायशव्दस्य प्रयोगो भवति । यथा—वीजाङ्कुरन्यायः, स्थालीपुलाकन्यायः इत्यादिकाः व्यवहाराः । (३) दार्शनिकानां निकाये तु न्यायशव्दस्यार्थः—'नीयतेः प्राप्यते विवक्षितार्थ-सिद्धिरनेन' इति न्यायः । यथा—प्रतिज्ञा–हेतु–दृष्टान्त–उपनय–निगमनैः साधनैः सिद्धिर्भवति । तथा चोक्तम् न्यायदर्शनस्य भाष्यकारेण वात्स्यायनेनापि—

'साधनीयस्यार्थं यावति शव्दसमूहे सिद्धिः
सः परिसमाप्यते पञ्चावयवोपेतवाक्यात्मको न्यायः ।' इति ।

न्यायवार्त्तिककर्त्राऽप्यभिहितम्—'समस्तप्रमाणव्यापारादर्थाधिगतिर्न्यायः ।

अनेन विवेचनेन द्वारायमर्थः सिद्धयति यत् यत्र क्वचन प्रमाणानां साहाय्येन अभिप्रेतस्यार्थस्य सिद्धिः क्रियते तत्र भवति न्यायशव्दस्य प्रयोगः । इममेवार्थमाश्रित्य न्यायदर्शनस्य कृते न्यायशास्त्रशव्दस्य भवति प्रयोगः ।

अस्य न्यायशास्त्रस्यानेकानि नामानि सन्ति । तथाहि–आदावस्य शास्त्रस्य आन्विक्षिकी विद्या नामासीत् । 'प्रत्यक्षागमाभ्यामीक्षितस्यान्वीक्षणमन्वीक्षा तया वर्त्तते या सा आन्विक्षीकी' । इति आन्विक्षिकीशव्दस्यार्थः ।

इयमान्विक्षिकी विद्यैव कालान्तरे न्यायशास्त्रनाम्ना अथवा तर्कशास्त्रनाम्ना प्रख्याताऽभवत् । यतोऽस्य शास्त्रस्याध्ययनेन वादस्य कलाधिगता भवति, अतः इदम् शास्त्रवादविद्याशव्देनाप्यभिधीयते । अस्मिन् शास्त्रे प्रमाणानाम् माहात्म्यम् अतिशयेन स्वीक्रियते अतएवेदम् प्रमाणशास्त्रमपि कथ्यते ।

न्यायशास्त्रस्य प्रवर्त्तको महर्षिः गौतमो विद्यते । स एवायम् मुनिः न्यायदर्शनसूत्राणि प्रणिनाय अतएवेदं शास्त्रम् गौतमीयशास्त्रमपि कथ्यते । सर्वदर्शन संग्रहनामके ग्रन्थे न्यायदर्शनकृते अक्षपादर्शन शव्दस्यापि प्रयोगो दृश्यते ।

न्यायशास्त्रस्योद्देश्यं प्रयोजनं च—प्रमाणेन द्वारा सत्यत्वासत्यत्वयोः परीक्षण-

मेव न्यायशास्त्रस्योद्देश्यमास्ते । अनएवेदं परीक्षाशास्त्रमप्यभिधीयते । यदा स्वार्थिभिः स्वार्थवशात् वेदोक्तनामर्थानाम् क्रियतेस्म तदा वेदस्य अर्थयाथात्म्यसंरक्षणाय तर्कप्रमाणाभ्यां सदर्थस्य समर्थनाय न्यायशास्त्रस्य अवतरणमभूत् । तथा चाह सर्वसिद्धान्तकारः न्यायदर्शनस्य प्रयोजननिरूपणावसरे––

"नैयायिकस्य पक्षोऽयं संक्षेपात् प्रतिपद्यते ।
यत्तर्करक्षितो वेदो ग्रस्तः पाषण्डदुर्जनैः ॥' इति ।

गौतमः वेदान् प्रामाणिकान् सत्यान् च स्वीकरोति ।

न्यायशास्त्रस्य महत्त्वम्––विदुषां गोष्ठयाम् न्यायशास्त्रस्यातीव समादरो वर्त्तते । विना न्यायाध्ययनं पाण्डित्यं न ह्यायाति इति परीक्षकाणामभिप्रायः । न्याये प्रवेशे सञ्जाते सर्वेषु शास्त्रेषु प्रवेशः सुलभो भवति । तथा चाभिधीयते–

'गौतमप्रार्थितं शास्त्रं सर्वशास्त्रोपकारकम् ।' इति ।

न्यायशास्त्रस्य तेन प्रकारेणान्यैः दर्शनैः साकम् सांगत्यम् जातम् येन प्रायेण सर्वेषु एवं शास्त्रेषु न्यायदर्शनस्य पारिभाषिकाणां शब्दानां प्रचुरः प्रयोगो दृश्यते । मन्वादिकानां महर्षिणामपि समये न्यायशास्त्रं समादृतमासीत् इति 'यस्तर्केणानुसंधत्ते स धर्मं वेद नेतरः' इति वाक्येन द्वारा ज्ञायते । चतुर्दशविद्यास्वपि न्यायशास्त्रमन्यतमं स्थानं बिभर्तीति निम्नांकितेन श्लोकेन ज्ञायते । तथा च श्लोकः––

'पुराणन्यायमीमांसा धर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥' इति ।
(याज्ञवल्क्यस्मृतिः १।६)

आन्विक्षिक्याः विद्यायाः विषये कौटिल्येनाभिहितम्–

'प्रदीपः सर्वविद्याना मुपायः सर्वकर्मणाम् ।
आश्रयः सर्वधर्माणाम् शश्वदान्विक्षिकी मता ॥' इति ।

न्यायकारः गौतमः––न्यायदर्शनस्याद्यप्रवर्त्तको गौतमो वर्त्तते । पुराणेषु, महाभारतस्य शान्तिपर्वणि, वाल्मीकीये रामायणे चापि गौतमस्य महर्षेः नामायाति । न्यायदर्शनसूत्राणां प्रणयनकर्तारूपेण तु गौतमः प्रसिद्ध एवास्ति । गौतमस्यैकं नामाक्षपाद अप्युपलभ्यते ।

गौतमाभिमताः षोडशपदार्थाः–न्यायदर्शनस्यादिमे एव सूत्रे महर्षिः गौतमः स्वाभिमतानां षोडशपदार्थानामुद्देशमकार्षीत् । 'प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-छल-जाति-निग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः' । इति । अस्मिन् सूत्रे परिगणिताः पदार्थाः निम्नांकिताः सन्ति ।

(१) प्रमाणम् (Means of knowledge), (२) प्रमेयः (Object of Knowlege), (३) संशयः (Doubk), (४) प्रयोजनम् (Purpose), (५) दृष्टान्तः (Example), (६) 'सिद्धान्तः (Conclusion), (७) अवयवः (Members of Iyllogism), (८) तर्कः (Hypothesis), (९) निर्णयः (Verification), (१०) वादः (Argument), (११) जल्पः (Wrangling), (१२) वितण्डा (Sophstry), (१३) हेत्वाभासः (Fallacy), (१४) छलः (Covalling), (१५) जातिः (Futile Refutalion), (१६) निग्रहस्थानम् च (Painls of Defeat) ।

न्यायदर्शनस्य विषयः—न्यायदर्शनस्य मूलग्रन्थः 'न्यायसूत्रम्' वर्त्तते । अस्मिन् ग्रन्थे पञ्च अध्यायाः सन्ति । प्रत्येकस्मिन्नध्याये द्वौ-द्वौ आह्निकौ स्तः । अस्मिन् ग्रन्थे पञ्चशतसङ्ख्याकानि (५००) सूत्राणि सन्ति । न्यायसूत्रस्य विषयाणामध्यायक्रमेणाधस्तात् उपस्थापनं क्रियते । तथाहि—

प्रथमोऽध्यायः—प्रथमाध्यायस्य प्रथमाह्निके पदार्थोद्देशान्तरप्रत्यक्षानुमानोपमानशब्दाख्यानाम् प्रमाणानाम् लक्षणं कृतमास्ते । ततः प्रमेयस्य लक्षणम् विभागश्च कृतो वर्त्तते । प्रमेयेषु-आत्म-शरीर-इन्द्रिय-अर्थ बुद्धि-मनः-प्रवृत्ति-दोष-प्रेत्यभाव-फल-दुःखापवर्गाणां निरूपणं कृतमास्ते । संशयप्रयोजनदृष्टान्तानां निरूपणानन्तरम् सिद्धान्तोऽस्ति निरूपितः । तत्र चतुर्विधाः सिद्धान्ता उक्ताः सन्ति—(१) सर्वतन्त्रसिद्धान्तः, (२) प्रतितन्त्रसिद्धान्तः, (३) अधिकरणसिद्धान्तः, (४) अभ्युपगमसिद्धान्तश्च । पुनरत्र—प्रतिज्ञाहेतूदाहरणोपनयाः निरूपिताः सन्ति । तदनन्तरम् तर्कनिर्णयोर्निरूपणं कृतमास्ते ।

द्वितीयेऽह्निके—वाद-जल्प-वितण्डानाम्, सभेदानाम् हेत्वाभासानाम्, त्रिविधस्य छलस्य, जातेः निग्रहस्थानस्य च निरूपणमास्ते ।

द्वितीयोऽध्यायः—अस्मिन्नध्याये सपूर्वपक्षस्य संशयस्य प्रमाणचतुष्टयविषययोः पूर्वोत्तरपक्षयोः, प्रत्यक्षानुमानोपमानशब्दप्रमाणविषयकाणामाक्षेपाणाम्, तेषां समाधानानां शब्दानित्यत्वसाधनस्य, जात्याकृतिव्यक्तीनां लक्षणस्य च वर्णनं कृतमास्ते ।

तृतीयोऽध्यायः—अस्मिन्नध्याये आत्मादिकानां द्वादश प्रमेयाणां परीक्षायाः, देहेन्द्रियात्मवादादिकानां नास्तिकमतानां खण्डनस्य, आत्मनित्यत्वप्रतिपादनस्य, इन्द्रियार्थयोः भौतिकत्वस्य बुद्धिमनसोः परीक्षायाश्च वर्णनमास्ते ।

चतुर्थोऽध्यायः—अत्र प्रवृत्तिदोषयोः व्याख्या, जन्मान्तरविषयकः सिद्धान्तः, दुःखापवर्गयोः समीक्षा, अवयवावयविनोः सम्बन्धः प्रभृतयो विषयाः वर्णिताः सन्ति ।

पञ्चमोऽध्यायः–अस्याध्यायस्य प्रथमाह्निके जातेः चत्वारिंशत् प्रभेदाः । द्वितीयाह्निके च द्वाविंशतिप्रकारकाणि निग्रहस्थानानि च सन्ति वर्णितानि ।

न्यायदर्शनसाहित्यम्—गौतमादारभ्य वर्तमानकालं यावद् न्यायदर्शनस्य महती समृद्धिस्संजाता । तच्चात्र संक्षेपतो निरूप्यते ।

गौतमकृतम् न्यायसूत्रम्, वात्स्यायनकृतम् न्यायभाष्यम्, उद्योतकरकृतम् न्यायवार्तिकम् वाचस्पतिमिश्रकृता न्यायवार्तिकतात्पर्यटीका, उदयनाचार्यकृता न्यायवार्त्तिकतात्पर्यपरिशुद्धिः वर्द्धमानकृतः न्यायनिबन्धप्रकाशः पद्मनाभकृता न्यायनिबन्धप्रकाशटीका चेति ग्रन्थाः न्यायदर्शनविषयकाः ग्रन्थाः सन्ति ।

विश्वनाथनागेशाभ्यां कृते न्यायसूत्रवृत्ती, जयन्तकृता न्यायमञ्जरी, महादेवभट्टकृता मितभाषिणी, राधामोहन-मुकुन्ददास-चन्द्रनारायणैः कृतानि न्यायसूत्रविवरणानि त्रीणि, अभयतिलककृता न्यायवृत्तिः, वाचस्पतिकृतः न्यायसूत्रोद्धारः—इतीमे ग्रन्थाः न्यायसूत्रस्य टीकास्वरूपाः सन्ति ।

उदयनाचार्यस्य न्यायकुसुमाञ्जल्याः सप्तसङ्ख्याकाः टीकाः सन्ति—प्रकाश-मकरन्दविवेक-विकास-विवरणाख्याः पञ्च वरदराजचन्द्रनारायणाभ्यां कृता टीकाश्च । आचार्यविश्वेश्वरकृताऽपि टीकास्य ग्रन्थस्य समुपलभ्यते ।

आत्मतत्त्वविवेकस्य उदयनलिखितस्य वर्द्धमान-मथुरानाथ-हरिदासमिश्रैः पृथक् पृथक् टीकाः कृताः सन्ति ।

वरदाराजाचार्यस्य तार्किकरक्षायाम्—प्रकाशिका-न्यायकौमुदी-निष्कण्टकाख्याः टीकाः सन्ति । गङ्गेशोपाध्यायस्य तत्त्वचिन्तामणेः-वासुदेवसार्वभौम-पक्षधरमिश्र-हनुमान्-तर्कचूडामणि-रघुनाथतर्कशिरोमणिभिः कृताः पृथक् पृथक् पञ्च व्याख्याः सन्ति । तत्त्वदीधितेरपि—जागदीशी-गादाधरी-मथुरानाथी-भवानन्दी-मयूखाभिधानाः पञ्च टीकाः सन्ति ।

तर्कभाषायाः एव रामलिङ्ग-माधवदेव-सिद्धचन्द्र-मुरारि-माधवभट्ट-चिन्नभट्ट-व्यङ्कटाचार्य-गोवर्द्धन-शुभविजय-गणेशदीक्षित-वागीश-गौरीकान्त-विश्वनाथ-न्यायप्रदीपकृत-कौण्डदण्डदीक्षित-गोपीनाथ-भास्कर-नागेशदिनकराख्यैः विद्वद्भिः विरचिताः पृथक् अष्टादशसंख्याकाः टीकाः समुपलभ्यन्ते ।

इत्थम् न्यायदर्शनस्य साहित्यमतीव विशालं वर्त्तते ।

न्यायदर्शनानुसारेण प्रमाणनिरूपणम्

'प्रमायाः करणम् प्रमाणम् ।' इति प्रमाणलक्षणमाह तर्कभाषाकारः । अत्रेयं शङ्का उदेति यत् का नाम प्रमा यस्याः करणम् भवति प्रमाणम् । अत एवास्य

लक्षणस्य द्वौ पदार्थौ विवेचनमापेक्षौ स्तः—प्रमा करणञ्च । तत्र सर्वप्रथमम् प्रमापदार्थः निरूप्यते ।

'तद्वति तत्प्रकारकानुभवः प्रमा ।' इति प्रमायाः लक्षणमाह तर्कसंग्रहकारः । यद्वस्तु यादृशं वर्त्तते तस्य वस्तुनः तादृशावबोध एव प्रमेत्यभिधीयत इति लक्षणस्यार्थः यद् वस्तु यत्र वर्त्तते तस्य तत्रैवावभासः प्रमेति यावत् । यद् वस्तु यत्र नास्ति तत्रापि तस्यावभासः अप्रमेत्यभिधीयते । रज्जौ सर्पाविभासः, मृगमरीचिकायाम् जलस्यावभासः, शुक्तौ रजतस्य चावभासः इतीमानि अप्रमाया उदाहरणानि सन्ति । तथा चाह तर्कसंग्रहकारः—

'तदभाववति तत्प्रकारकानुभवः अप्रम ।' इति ।

तथा चोक्तं न्यायदर्शनभाष्यकारेण वात्स्यायनेन—'यदर्थविज्ञानं सा प्रमा ।' इति । विषयस्य यथार्थप्रतीतिरेव प्रमेत्यभिधीयते । तर्ककौमुदीकारेण तु इत्थमभिहितम्—

'प्रमाणजन्यः यथार्थानुभवः प्रमा । प्रमाणाभासजन्यः अयथार्थानुभवः अप्रमा ।' इति ।

इत्थम् प्रमाप्रमयोः पदार्थयोः निरूपणानन्तरं करणपदार्थः प्रमाणलक्षणघटकीभूतः निरूपणीय आभाति । तत्राह व्याकरणसूत्रप्रणेता भगवान् पाणिनिः—

'साधकतमं करणम् ।'

यद्यपि एकस्यैव कार्यस्य साधकानि नैकानि कारणानि भवन्ति, किन्तु यस्य प्रयोगेण कार्यमविलम्बमुत्पद्यते, तत्साधनम् करणम् इत्यभिधीयते । एतस्मादेव हेतोः पाणिनिमहर्षिः करणम् साधकतमशब्देनाह । अतिशयेन साधकमेव साधकतममित्यभिधीयते । अतएव साधकतमस्य निरूपणावसरे लघुमञ्जूषाकारः प्राह—

'स्वनिष्ठव्यापारव्यवधानेन फलनिष्पादकमिदमेव साधकतममिति ।' यथा वाणेन हतो मृगः इत्यत्र वाण एव साधकतमः । सत्स्वपि—धनुष-प्रत्यञ्चादिकेषु मृगवधसहायकेषु वाण एव तथाविधम् साधनम् आस्ते यस्य संयोगे संजाते मृगवधरूपम् कार्यम् सम्पन्नम् । तस्यैव कार्यनिष्पत्तौ प्रकृष्टोपकारकत्वात् धनुरादिकानाञ्चारादुपकारकत्वमेव । अभिहितमपि—

'यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिः तत्प्रकृष्टं बोध्यम् । प्रकृष्टोपकारकं करणसंज्ञं स्यात् ।' इति ।

तत्र प्रमा अथवा यथार्थज्ञानम् वस्तुत्रयसापेक्षम् भवति—(१) प्रमाता, (२) प्रमेयम्, (३) प्रमाणञ्च । एतेषाम् त्रयाणामपि निरूपणमत्र क्रियते । तथाहि—

(१) प्रमाता (Subject of Cognition)—अवगतिरेव ज्ञानमित्यभिधीयते । अतएव ज्ञानस्यास्तित्वं ज्ञातृसापेक्षं भवति । ज्ञातारं विना ज्ञानं नहि भवति । अतएव ज्ञानविशेषस्याधारभूतो ज्ञातैव प्रमातेत्यभिहितो भवति ।

(२) प्रमेयम् (Object of Cognition)—कस्यचनापि विषयस्यैव ज्ञानं भवति । विषयं विना ज्ञानं नहि भवति निर्विषयकस्य ज्ञानस्यानुपलब्धेः । ज्ञानस्य व्यापारो यस्मिन् विषये फलितो भवति स एव प्रमेयशब्दवाच्यो भवति। घटपटादिकाः सर्वे विषयाः येषां ज्ञानं सम्पद्यते ते समे प्रमेयशब्देनाभिधीयन्ते ।

(३) प्रमाणम् (Means of Cogntion)—सत्यपि ज्ञातृज्ञेययोः ज्ञानसाधनस्याभावे ज्ञानक्रियायाः निष्पत्तिरसम्भाविनी । नेत्रं विना अन्धः पुरुषः घटादिकानां तत्र विद्यमानानामपि वस्तूनां ज्ञानस्य सम्पादनेऽसमर्थो भवति।

एतान्युपर्युक्तानि प्रमातृप्रमेयप्रमाणान्येव ज्ञानोत्पत्तिसाधनाभ्युररीकृत्याहाचार्यो वात्स्यायनो न्यायभाष्ये प्रमाणलक्षणम्—

'प्रमाता येनार्थं प्रमिणोति तत् प्रमाणम् ।' इति ।

न्यायकुसुमाञ्जलिकारेणोदयनाचार्येण तु प्रमाण लक्षणेकथितम् यत् ज्ञातृविषयज्ञानयोस्सम्बन्धस्थापकमेव साधनं प्रमाणमिति कथ्यते । तथाहि—

मितिः सम्यक् परिच्छित्तिः तद्वत्ता च प्रमातृता ।
तदयोगव्यवच्छेदः प्रामाण्यं गौतमे मते ॥' इति ।

न्यायवार्तिककर्त्रा उद्योतकरेण तु अभिहितम् यत् विषयज्ञानस्य हेतुरेव प्रमाणमिति कथ्यते । तद्यथा—

'अर्थोपलब्धिहेतुः प्रमाणमिति ।'

किन्तु अर्थोपलब्धिः कदाचित् भ्रमात्मिकाऽपि भवति, अतएव न्यायमञ्जर्याम् जयन्तभट्टः अर्थोपलब्धेः विशेषणद्वयमाह—अव्यभिचारिणी, असन्दिग्धा च । तार्किकरक्षायां तु इत्थमभिहितम्—

"अविसंवादि विज्ञानं प्रमाणमिति सौगताः ।
अनुभूतिः प्रमाणं साः स्मृतेरन्येति केचन ॥
अज्ञातचरतत्त्वार्थनिश्चायकमथापरे ।
प्रमेयव्याप्तमपरे प्रमाणामिति मन्वते ॥
प्रमानियतसामग्री प्रमाणम् केचिदूचिरे" ॥

प्रमाणस्य महत्त्वम्—प्रमाणमेव ज्ञानमापकं तुलादण्डमास्ते । ज्ञानस्य सत्यत्वासत्यत्वे प्रमाणेनैव निर्धार्यंते । अतएवाभिहितम्—'मानाधीना मेयसिद्धिरि'ति ।

न्यायशास्त्रे प्रमाणस्यैव सर्वाधिकमहत्त्वं स्वीकरणात् न्यायशास्त्रस्यैकं नाम प्रमाणशास्त्रमास्ते । न्यायकुसुमाञ्जलिकारस्तु प्रमाणम् ईश्वरसदृशमाह—

"साक्षात्कारिणि नित्ययोगिनि परद्वारानपेक्षस्थितौ
भूतार्थानुभवे निविष्टनिखिलप्रस्ताविवस्तुक्रमः ।
लेशादुष्टि निमित्तदुष्टि विगमप्रभष्टशङ्कातुषः
शङ्कोन्मेषकलङ्किभिः किमपरैः तन्मे प्रमाणं शिवः ॥" इति ।

प्रमाणानां संख्या—कियन्ति प्रमाणानि सन्तीति विषये तीर्थकाराणां विसंवादो विलोक्यते । भिन्नाः दार्शनिकाः प्रमाणानां संख्यां भिन्नां भिन्नां स्वीकुर्वन्ति । तत्र चार्वाकाः प्रत्यक्षमात्रमेकमेव प्रमाणं स्वीकुर्वन्ति । वैशिकाणामनुसारेण द्वे एव प्रमाणे—प्रत्यक्षानुमाने । सांख्याः विशिष्टाद्वैतिनस्तु—प्रत्यक्षानुमानशब्दाख्यानि त्रीणि प्रमाणानीति प्राहुः । नैयायिकाः चत्वारि प्रमाणानि स्वीचक्रुः—प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दश्च । प्राभाकरमीमांसकानुसारेण पञ्च प्रमाणानि सन्ति—प्रत्यक्षम्, अनुमानम्, उपमानम् ,शब्दः, अर्थापत्तिश्च । अद्वैतिनाम् भाट्टमीमांसकानाञ्च मतानुसारेण तु षट् प्रमाणानि—प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः, अर्थापत्तिः अनुपलब्धिश्च । पौराणिकानाम् अनुसारेण अष्टौ प्रमाणानि—प्रत्यक्षानुमानोपमान-शब्दार्थापत्त्यसम्भवैतिह्यसमवाख्यानि ।

तथा चोक्तम् वेदान्तकारिकाकारेण प्रमाणानां संख्याविषये—

प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः ।
अनुमानञ्च तच्चापि सांख्याः शब्दञ्च ते उभे ।
न्यायैकदेशिनोऽप्येवमुपमानञ्च केवलम् ।
अर्थापत्त्या सहैतानि चत्वार्याहुः प्रभाकराः ।
अभावषष्ठान्येतानि भट्टा वेदान्तिनस्तथा ।
सम्भवैतिह्ययुक्तानि इति पौराणिका जगुः ।

न्यायदर्शनानुसारेण प्रत्यक्षप्रमाणविवेचनम्

प्रति अक्षण इत्येव हि प्रत्यक्षशब्दस्य व्युत्पत्तिः अथवा 'अक्षमक्षं प्रतीत्योत्पद्यते इति प्रत्यक्षम्' इति प्रत्यक्षशब्दस्यार्थः । चक्षुरादिभिरिन्द्रियैः यज्ज्ञानमुत्पद्यते तत्प्रत्यक्षमित्यभिधीयते । प्रत्यक्षमेव सर्वेषु प्रमाणेषु प्रप्रथमं पदं धत्ते । प्रत्यक्षस्य स्वरूपम् निरूपयन् गंगेशोपाध्यायस्त्वाह—'प्रत्यक्षस्य साक्षात्कारित्वं लक्षणम् ।' इति । इदं लक्षणम् प्रत्यक्षव्यतिरिक्ते कस्मिंश्चिदपि प्रमाणे नहि व्याप्नोति । प्रत्यक्षं हि जिज्ञासान्तरविरहितमेव भवति ज्ञानम् । तथा चोक्तम् न्यायभाष्यकारेण वात्स्यायबेन—

'जिज्ञासितमर्थमाप्तोपदेशात् प्रतिपद्यमानो लिङ्गदर्शनेनापि बुभुत्सते । लिङ्गदर्शनानुमितं च प्रत्यक्षतो दिदृक्षते । उपलब्धेऽर्थे जिज्ञासा निवर्त्तते ।' इति ।

अतएव हि प्रत्यक्षम् निर्विवादं निरपेक्षं च भवति । तद्धि प्रमाणान्तरं नह्यपेक्षते । यस्मात् कारणात् प्रत्यक्षम् ज्ञानान्तरनिरपेक्षं भवति अतएव ह्युक्तम्—'ज्ञानाकरणकं ज्ञानं प्रत्यक्षम् ।' इति । प्रत्यक्षज्ञानस्य मूलत्वात् तस्य ज्ञानान्तरं हेतुर्नहि भवति । तत्र 'इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् ।' इति । इन्द्रियार्थयोः सन्निकर्षेण जन्यं ज्ञानं प्रत्यक्षं भवतीत्यर्थः ।

अस्य लक्षणस्य घटकीभूतानि त्रीणी पदानि सन्ति—(१) इन्द्रियाणि, (२) अर्थाः, (३) सन्निकर्षश्च ।' (१) तत्रेन्द्रियाणि द्विप्रकारकाणि सन्ति—ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च । शरीरस्य ये अवयवाः क्रियाणामनुष्ठाने साधकाः भवन्ति तानि कर्मेन्द्रियशब्देनाभिधीयन्ते । ये चावयवाः ज्ञानावाप्तौ साधकानि भवन्ति तानि ज्ञानेन्द्रियशब्देनाभिधीयन्ते । तत्र चक्षूरसनाश्रोत्रत्वक्घ्राणाख्यानि पञ्चज्ञानेन्द्रियाणि सन्ति । ज्ञानावाप्तौ साधकानि तत्र चक्षुषा रूपस्य, रसनया रसस्य, घ्राणेन गन्धस्य, त्वचा स्पर्शस्य श्रोत्रेण च शब्दस्य ज्ञानं जायते । एतेषामाधारभूतानि द्रव्याणि पञ्च सन्ति—पृथिव्यप्तेजोवाय्वाकाशाख्यानि । इमानि हि ज्ञानेन्द्रियाणि अतीन्द्रियाणि सन्ति, एतेषाम् साक्षात्कारो नहि भवितुमर्हति ।

ज्ञानेन्द्रियविषयकस्य सम्यज्ज्ञानायाधस्तात् चक्रमुपस्थाप्यते—

इन्द्रियाणि	इन्द्रियाणामधिष्ठानानि	इन्द्रियकारणभूतानि	इन्द्रियाणां विषयाः	इन्द्रियाणाम् आश्रयाः	ऐन्द्रियकज्ञाननामानि
१ घ्राणः	नासिका	पृथिवी	गन्धः	पृथ्वी	घ्राणजप्रत्यक्षम्
२ चक्षुः	नेत्रम्	तेजः	रूपम्	पृथ्वी, अग्निश्च	चाक्षुषप्रत्यक्षम्
३ रसना	जिह्वा	जलम्	रसः	पृथिव्यप्तेजांसि	रासनप्रत्यक्षम्
४ त्वक्	त्वचा	वायुः	स्पर्शः	पृथिव्यप्तेजोवायवः	त्वाचप्रत्यक्षम्
५ श्रोत्रम्	कर्णकुहरम्	आकाशः	शब्दः	पृथिव्यप्तेजोवाय्वाकाशाः	श्रावणप्रत्यक्षम्

अर्थाः—प्रत्यक्षज्ञानाय प्रत्यक्षविषयभूतानां वस्तूनामप्युपस्थितिरावश्यकीया भवति । प्रत्यक्षविषयम् विना प्रत्यक्षज्ञानस्यासम्भवात् । अतएव ज्ञानेन्द्रियाणि यान् विषयान् विषयीकुर्वन्ति तान्येवार्थशब्देनाभिधीयन्ते । ते च प्रत्यक्षस्य विषयाः सन्ति

पृथिव्यप्तेजोवाय्वाकाशाख्यानि पञ्चद्रव्याणि । मुख्यरूपेण तु एतेषां द्रव्याणामेव प्रत्यक्षम् भवति गौणरूपेण च तेषाम् गुणाम्—रूपरसगन्धशब्दस्पर्शाख्यानाम् ।

(३) प्रत्यक्षलक्षणघटकीभूतम् तृतीयम् पदम् सन्निकर्षो वर्त्तते । तत्र पदार्थानामिन्द्रियैस्साकं यो हि सम्बन्धो भवति स एव सन्निकर्ष इत्यभिधीयते । कस्यचन वस्तुनः प्रकाशे सर्वप्रथमम् आत्मनः मनसा सह संयोगो भवति । मनः इन्द्रियेण सह संयुज्यते । इन्द्रियञ्च स्वविषयेण सह संयुक्तम् सत् प्राप्यविषयम् प्रकाशयति तम् । अतएवेन्द्रियाणाम् प्राप्यप्रकाशकारित्वनियमो वर्त्तते । केचन नैयायिकाः चक्षुष एव प्राप्यप्रकाशकारित्वम् स्वीकुर्वन्ति, किन्तु जयन्तभट्टास्तु सर्वेषामेव ज्ञानेन्द्रियाणां प्राप्यप्रकाशकारित्वं स्वीकरोति । तन्मतानुसारेण सर्वेषामेव विषयाणाम् साक्षात्कारे—

'आत्मा मनसा संयुज्यते, मनः इन्द्रियेण, इन्द्रियम् अर्थेन ।' इति ।

सन्निकर्षस्य भेदाः—इन्द्रियार्थसंयोगरूपस्य सन्निकर्षस्य षड्भेदान् नैयायिकाः स्वीकुर्वन्तिः । ते च सन्निकर्षाः सन्ति—संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति । तत्र घटप्रत्यक्षे संयोगसन्निकर्षो भवति, यतः चक्षुरिन्द्रियस्य घटेन संयोगो भवति । घटगतरूपस्य ग्रहणे संयुक्तसमवायसम्बन्धो भवति । चक्षुषा संयुक्ते घटे रूपस्य रन्यस्य समवायसम्बन्धेन विद्यमानो भवति । घटगतरूपरूपत्वयोः ग्रहणे तु संयुक्तसमवेतसमवायसन्निकर्षो भवति, घटगतरूपे रूपत्वस्य समवायसम्बन्धेन विद्यमानत्वात् । शब्दस्य साक्षात्कारे समवाये सन्निकर्षो भवति श्रोत्रे शब्दस्य समवायसम्बन्धेन सत्त्वात् । शब्दे समवायसम्बन्धेन सतः शब्दत्वस्य साक्षात्कारे समवेतसमवायसन्निकर्षो भवति । घटाभाववतो भूतलस्य साक्षात्कारे विशेषणविशेष्यभावरूपः सन्निकर्षो भवति । घटाभावभूतलयोः विशेषणविशेष्यभावरूपस्य सन्निकर्षस्य सत्त्वात् ।

प्रत्यक्षज्ञानस्योत्पत्तिः—सत्यपि इन्द्रियार्थसन्निकर्षे कदाचित् विषयाणां प्रत्यक्षो नहि भवति । यथा अध्ययने संलग्नस्य पुरुषस्य समक्षतः एव किमपि वस्तु आयाति किन्तु तस्य वस्तुनः उपलब्धिर्नहि भवति । अतएव कस्यचनापि वस्तुनः उपलब्धिस्तदा भवति यदा त्रीणि कार्याणि भवन्ति—

(१) आत्मा मनसा संयुज्यते । (२) मनः इन्द्रियेण सयुज्यते । (३) इन्द्रियमर्थेन संयुज्यते । यदा अनया क्रियया इन्द्रियार्थयोः संयोगो भवति तदैव कस्यचनापि वस्तुनः साक्षात्कारो भवति ।

प्रत्यक्षस्य भेदाः—प्रत्यक्षस्य द्वौ भेदौ भवतः—निर्विकल्पकम् प्रत्यक्षम् , (२) सविकल्पकं प्रत्यक्षञ्च । अनयोः प्रत्यक्षयोर्द्वौ भेदौ अधस्ताद् व्याक्रियेते ।

निर्विकल्पकं प्रत्यक्षम्—यस्मिन् प्रत्यक्षे वस्तुमात्रं प्रतीयते तत् प्रत्यक्षम्

निर्विकल्पकमित्यभिधीयते। निर्विकल्पके प्रत्यक्षे वस्तुनः प्रकाराणां प्रतीतिः नहि भवति। अतएव हि तर्कसंग्रहकारेणाभिहितम्––'निष्प्रकारकं ज्ञानं निर्विकल्पकम्।' इति।

सविकल्पकम् प्रत्यक्षम्—यस्मिन् प्रत्यक्षे प्रत्यक्षविषयीभूतस्य वस्तुनः रूपपरिमाणगुणजात्यादिकानाम् अपि प्रतीतिर्भवति तत् प्रत्यक्षम् सविकल्पकम् भवति। तथा चोक्तमन्नम्भट्टेन—'सप्रकारकम् ज्ञानं सविकल्पकमि'ति।

निर्विकल्पकस्य ज्ञानस्य विषये सिद्धान्तमुक्तावलीकारेणाप्यभिहितम्—'प्रथमतो घटघटत्वयोर्वैशिष्टयानवगाहिज्ञानं जायते तदेव निर्विकल्पकम्।' इति। अस्यामवस्थायाम् यथार्थं ज्ञानं नहि भवति, यतः यथार्थे ज्ञाने विषयविषयिभावरूपसम्बन्धोऽवश्यं भवति।

अस्य निर्विकल्पकस्य ज्ञानस्य विषये दार्शनिकानाम् मतभेदो वर्त्तते। वैयाकरणः निर्विकल्पकस्य प्रत्यक्षस्य सत्तामेव नहि स्वीकुर्वन्ति। तेषां मतानुसारेण निस्संज्ञं ज्ञानं भवत्येव नहि। बौद्धा अपि निर्विकल्पकं ज्ञानं स्वीकुर्वन्ति। विशिष्टाद्वैतिनस्त्वाहुः—

सविकल्पकम् जात्याद्यनेकपदार्थविशिष्टविषयत्वादेव सविशेषविषयम्। निर्वि-
कल्पकमपि सविशेषविषयमेव, सविकल्पके स्वस्मिन् अनुभूतपदार्थविशिष्टप्रतिसन्धान-
हेतुत्वात्। निर्विकल्पकं नाम केनचिद् विशेषेण वियुक्तस्य ग्रहणं न सर्वविशेषरहितस्य;
तथाभूतस्य कदाचिदपि ग्रहणादर्शनात् अनुपपत्तेश्च। केनचिद् विशेषेण इदमित्थमिति
हि सर्वा प्रतीतिरुपजायते। त्रिकोणसास्नादिसंस्थानविशेषेण विना कस्यचिदपि
पदार्थस्य ग्रहणायोगात्। अतो निर्विकल्पकमेकजातीयद्रव्येषु प्रथमपिण्डग्रहणम्, द्विती-
यादिपिण्डग्रहणम् सविकल्पकमित्युच्यते। तत्र प्रथमपिण्डग्रहणे गोत्वादेरनुवृत्ताकारता
न प्रतीयते द्वितीयादिपिण्डग्रहणेष्वेवानुवृत्तिप्रतीतिः। प्रथमप्रतीत्यनुसंहितवस्तु-
संस्थानरूपगोत्वादेरनुवृत्तिधर्मविशिष्टत्वम् द्वितीयादिपिण्डग्रहणावसेयमिति द्वितीयादि-
ग्रहणस्य सविकल्पकत्वम्। सास्नादिवस्तुसंस्थानरूपगोत्वादेरनुवृत्तिर्न प्रथमपिण्डग्रहणे
गृह्यते—

'इति प्रथमपिण्डग्रहणस्य निर्विकल्पकत्वम्।' इति।

(श्रीभाष्यम् १।१।१)

नवीनाः नैयायिकाः लौकिकालौकिकभेदभिन्नम् प्रत्य-
लौकिकालौकिकप्रत्यक्षे—
क्षम् द्विप्रकारकम् स्वीकुर्वन्ति। उपर्युक्तौ प्रत्यक्षस्य द्वौ निर्विकल्पकसविकल्पकभेदौ
लौकिकप्रत्यक्षान्तर्गतौ स्तः।

अलौकिके प्रत्यक्षे तु इन्द्रियार्थयोः अलौकिकरूपेण सन्निकर्षो भवति।

गङ्गेशोपाध्यायः अलौकिकप्रत्यक्षस्य त्रीन् भेदान् स्वीकरोति—(१) सामा-

न्यलक्षणम् प्रत्यक्षम्, (२) ज्ञानलक्षणं प्रत्यक्षम्, (३) योगजं प्रत्यक्षञ्चेति। तद्यथा—

(१) सामन्यलक्षणम प्रत्यक्षम्—यत्र कस्यचनैकस्य वस्तुनो दर्शनेन तत्सजातीयानां वस्तूनां ज्ञानं सम्पद्यते तत्प्रत्यक्षम् सामान्यलक्षणमित्यभिधीयते। यथा वर्त्तमानकालिकमग्निं संस्पृश्य, सर्वकालिकोऽग्निः उष्णः इति ज्ञानम्।

(२) ज्ञानलक्षणम् प्रत्यक्षम्—यत्रेन्द्रियगाह्यविषयेण सह अन्यस्यापि विषयस्य ज्ञानम् सम्पद्यते तत्र ज्ञानलक्षणम् प्रत्यक्षम्। यथा चक्षुषः कमलरूपग्रहणसमकालमेव तस्य मार्दवस्यापि ज्ञानम् सम्पद्यते। चक्षुषा तु कमलरूपस्यैव ग्रहणं भवति किन्तु तस्य मार्दवस्य ज्ञानम् अलौकिकज्ञानलक्षणसन्निकर्षेण सम्पद्यते। अतएव तज्ज्ञानम् ज्ञानलक्षणप्रत्यक्षजन्यम् भवति।

योगजम् प्रत्यक्षम्—योगिनो यद् स्वयोगमहिम्नाव्यवहितातीन्द्रियाणां विषयाणामपि साक्षात्कारं कुर्वन्ति तद् योगजप्रत्यक्षम्॥

न्यायदर्शनेऽनुमानप्रमाणम्

अनु पश्चात् ज्ञानम् = अनुमानमित्यभिधीयते। एकस्य ज्ञानस्यानन्तरम् यदपरस्य वस्तुनो ज्ञानं सम्पद्यते तदनुमानमित्यभिधीयते। यथा पर्वतो धूमवानिति प्रत्यक्षज्ञानानन्तरम् धूमाग्न्योः साहचर्यनियमं स्मृत्वा, पर्वतो वह्निमान् इति यज्ज्ञानं भवति तदनुमानमित्यभिधीयते।

अस्यानुमानस्य मूलम् प्रत्यक्षमास्ते, यतोऽनुमानम् लक्षणेनैव क्रियते, लक्षणस्य च प्रत्यक्षम् भवति। एतस्मादेव महर्षिः गौतमः प्रत्यक्षम् तत्पूर्वकम् = अनुमानमूलकमिति प्राह।

यदि प्रत्यक्षेण द्वारा लिङ्गस्य ज्ञानम् नहि भवति अथापि तस्य लिङ्गस्य आगमेन सिद्धिर्भवति तदापि तेनानुमानं कर्तुं शक्यते। अतएव हि प्राह न्यायभाष्यकारः—'प्रत्यक्षणमाश्रितमेवानुमानम्। सा अन्विक्षा।' इति।

अनुमानेन यस्यार्थस्य सिद्धिः क्रियते सोऽर्थः साध्यमित्यभिधीयते। येन लक्षणेन द्वारा साध्यमनुमीयते तत् साधनमिति कथ्यते। यथा पर्वतो वह्निमान् धूमवत्वात्; यो यो धूमवान् स स वह्निमान्, पर्वतोऽपि धूमवान्, अतएव सोऽपि वह्निमान्। इत्यस्मिन् अनुमानवाक्ये। वह्निमत्वम् साध्यम्, धूमवत्वम् च साधनम्।

व्याप्तिः—पर्वते धूमं दृष्ट्वा कश्चनापि धूमाग्न्योः पूर्वदृष्टां अव्यभिचरितसाहचर्यनियमस्वरूपां व्याप्तिं स्मृत्वा तत्राग्नेस्सत्वं अनुमिनोति। यथा उपर्युक्ते अनुमानवाक्ये यत्र-यत्र धूमस्तत्र तत्र वह्निरिति वाक्यम् व्याप्तिवाक्यम् वर्त्तते। अत्र धूमाग्न्योः व्याप्यव्यापकभावरूपम् सम्बन्धम् स्मरति अनुमानकर्ता। अयम् साध्य-

साधनयोः व्याप्यव्यापकभावस्य स्मरणमेव व्याप्तिस्मरणमित्यभिधीयते। अतएव अनुमानक्रियायाम् व्याप्तेर्ज्ञानमनिवार्यम् भवति। विना व्याप्तिज्ञानमनुमानं कर्तुं नहि शक्यते।

पक्षधर्मता—व्याप्तिज्ञानेन साकम् पक्षधर्मताया अपि ज्ञानमत्यावश्यकं भवति। यतः 'यत्र-यत्र धूमस्तत्र तत्र वह्निरित्येव वक्तुं शक्यते व्याप्तिज्ञानेन। यावत् कालपर्यन्तम् 'पर्वतो वह्निव्याप्यधूमवान्।' इति पर्वतस्य पक्षधर्मताज्ञानम् नहि जायते तावत् कालपर्यन्तम् 'पर्वतो वह्निमान्' इत्यनुमानं कर्तुं नहि शक्यते। स्थानविशेषे रूपे पक्षे लिङ्गस्य विद्यमानताज्ञानमेव पक्षधर्मताज्ञानम् कथ्यते। इत्थम् सिद्ध्यत्ययमर्थो यत् अनुमानाय व्याप्त्या सह पक्षधर्मताया अपि ज्ञानमावश्यकं भवति।

लिङ्गपरामर्शः—धूमाग्न्योः व्याप्तिज्ञानं विना पर्वते धूमं दृष्ट्वाऽपि अनुमानमसम्भवम् भवति। व्याप्तिज्ञानानन्तरमेव धूमे लिङ्गत्वमायाति। व्याप्तिज्ञानसम्पन्न एव पुरुषो जानाति यत् पर्वतो वह्निव्याप्यधूमवान् वर्त्तत इति। पर्वते धूमस्य वह्निव्याप्यत्वज्ञानमेव लिङ्गपरामर्श इत्यभिधीयते। केचन इदम् ज्ञानम् तृतीयलिङ्गपरामर्शशब्देनाभिदधति। तथाहि—

(१) पर्वतो धूमवानिति प्रथमो लिङ्गपरामर्शः।
(२) धूमो वह्निव्याप्यो भवतीति द्वितीयो लिङ्गपरामर्शः।
(३) फ्वंतो वह्निव्याप्यधूमवानिति ज्ञानम् तृतीयलिङ्गपरामर्शः।

अत्र प्रथमे लिङ्गपरामर्शे लिङ्गस्य पक्षेण साकं सम्बन्धो दृश्यते। द्वितीये लिङ्गपरामर्शे लिङ्गस्य साध्येन साकं सम्बन्धो दृश्यते। तृतीये लिङ्गपरामर्शे साध्यविशिष्टलिङ्गस्य सम्बन्धः पक्षे दृश्यते।

इत्थम् वक्तुं शक्यते यत् पक्षधर्मताज्ञानव्याप्तिज्ञानयोः सांगत्येन यद्विशिष्टं ज्ञानं जायते तल्लिङ्गपरामर्श इत्यभिधीयते। तथा चाभिहितवान् तर्कसंग्रहकारः—

"व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः।" इति।

अतएव कारिकावल्यामप्यभिहितम्—

'व्याप्यस्य पक्षवृतित्वधीः परामर्शः।' इति।

अनुमितिः—अनुमानप्रमाणजन्यं ज्ञानमनुमितिरित्यभिधीयते। अनुमितिरियमनुमानस्य फलस्वरूपा भवति। अतएवान्नम्भट्टेनाभिहितम्—

'परामर्शजन्यं ज्ञानमनुमितिरि'ति।

अत्र वेदान्तिनो मीमांसकाश्चाभिदधति—व्याप्तिपक्षधर्मताज्ञानाभ्यामेवानुमितिर्जायते, अत्र लिङ्गपरामर्शोऽन्यथासिद्ध एव।

मीमांसकानामस्य कथनस्य खण्डनं कुर्वद्भिर्नैयायिकैरभिहितम् यत्—प्रत्येकस्य प्रमाणस्य कोटित्रयी भवति—करणम्, व्यापारः कालश्च। अनुमाने व्याप्तिज्ञानपक्षधर्मताज्ञाने करणस्वरूपे स्तः। करणेन द्वारा या क्रिया सम्पद्यते सा व्यापार इत्यभिधीयते। तस्य व्यापारस्यैव फलमनुमितिशब्दवाच्यम् भवति। यद्यप्यत्र व्याप्तिज्ञानम् कारणं भवति किन्तु तत् अव्यवहितपूर्वं कारणम् नहि भवति व्याप्तिज्ञानानुमित्योरन्तराले लिङ्गपरामर्शस्य सत्त्वात्। अस्य परामर्शस्यानन्तरमेवानुमितिर्भवति। इत्थमनुमितिः लिङ्गपरामर्शजन्यैव भवति।

अनुमानस्य पञ्चावयवाः—अनुमानवाक्यस्य पञ्चावयवाः भवन्ति। महर्षिः गौतमः अनुमानस्य पञ्चाङ्गानि निर्दिश्य तान् पर्यभाषीष्टाऽपि। ते चानुमानावयवाः निम्नाङ्किताः सन्ति—

(१) **प्रतिज्ञा**—'साध्यनिर्देशः प्रतिज्ञा' (गौ० सू० १।१।३३)। साध्यस्यार्थस्य निर्देश एव प्रतिज्ञेत्यभिधीयते। यथा—'पर्वतो वह्निमान्' इति वाक्यम्।

(२) **हेतुः**—उदाहरणसाधर्म्यात्। साध्यसाधनं हेतुः'। (गौ० सू० १।१/३४) पक्षे साध्यस्य सत्त्वं साधयितुं या युक्तिः स्वीक्रियते, तस्याः युक्तेः उपस्थापकं वाक्यं हेतुरित्यभिधीयते। धूमत्वादिति वाक्यम्।

(३) **उदाहरणम्**—'साध्यसाधर्म्यात् तद्भावो दृष्टान्त उदाहरणम्।' (गौ० सू० १।१/३६) स्वसाध्यसमर्थकस्य दृष्टान्तस्योपनम् वाक्यम् उदाहरणमित्यभिधीयते। दृष्टान्तमात्रमेवाश्रित्य अनुमानम् नहि भवति, तत्र व्याप्तेः सम्बधेनापि भाव्यम्। अतएवोदाहरणम् व्याप्तिसूचकदृष्टान्तस्वरूपम् भवति। तथा चोक्तम् तर्कसंग्रहदीपिकायाम्—'व्याप्तिप्रतिपादकमुदाहरणम्।' इति। यथा—'यो यो धूमवान् स स वह्निमान्, यथा—'महानसः।' इति वाक्यम्।

(४) **उपनयः**—उदाहरणापेक्षः तथेत्युपसंहारी (न तथेति वा)—साध्यस्योपनयः। (गौ० सू० १।१।३८) यथा पर्वतोऽपि तथा (वह्निव्याप्यधूमवानिति वाक्यम्)

(५) **निगमनम्**—हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनम् निगमनम्। यथा—'अतएव पर्वतो वह्निमान्।' इति वाक्यम्।

अनुमानस्य प्रभेदाः—महर्षिः गौतमः त्रिप्रकारकमनुमानं स्वीकरोति—(१) पूर्ववत्, (२) शेषवत्, (३) सामान्यतो दृष्टञ्च। तथा च न्यायदर्शन सूत्रम्—

'अथ तत्पूर्वकं त्रिविधमनुमानम् पूर्ववत् शेषवत् सामान्यतो दृष्टञ्च।' (गौ० सू० १।१।५) एतेषां त्रयाणां विवेचनमधस्तात् क्रियते।

(१) पूर्ववदनुमानम्—यत्र कार्यमनुमीयते। यथा—उन्नतं मेघसमूहमवलोक्य भाविन्याः वृष्टेरनुमानम्।

(२) शेषवदनुमानम्—यत्र कार्यमवलोक्य कारणमनुमीयते। यथा—प्रातःकाले आर्द्रां पृथिवीं दृष्ट्वा रात्रौ संजातायाः वृष्टेरनुमानम्।

(३) सामान्यतोदृष्टानुमानम्—यथा स्थानान्तरगतं सूर्यं विलोक्य तस्य गतेरनुमानम्। एतेषां त्रयाणामनुमानानां षड्दर्शनसमुच्चयेऽभिहितम्—

'कार्यात् कारणानुमानं यच्च तच्छेषवन्मतम्।
तथाविधनदीपूरान्मेघो वृष्टो यथोपरि॥
यच्च सामान्यतो दृष्टं तदेवं गतिपूर्विका।
पुंसि देशान्तरप्राप्तिर्यथा सूर्येऽपि सा तथा॥' इति।

प्रयोजनानुसारेणानुमानस्य द्वौ भेदौ स्वीक्रियेते—स्वार्थानुमानम् परार्थानुमानञ्च। तत्र—

'स्वीयसंशयनिवृत्तिप्रयोजनकमनुमानं स्वार्थानुमानम्।
परसंशयनिवृत्तिप्रयोजनकश्चानुमानम् परार्थानुमानम्॥'

नव्यन्यायानुसारेणानुमानस्य त्रयो भेदाः—(१) केवलान्वयी, (२) केवलव्यतिरेकी, (३) अन्वयव्यतिरेकी च।

(१) अन्वयव्यतिरेक्यनुमानम्—यत्रान्वयव्यतिरेकमुभयविधो दृष्टान्तमुपलभ्यते तत्रान्वयव्यतिरेक्यनुमानम् भवति। यथा—यत्र-यत्र धूमस्तत्र तत्र वह्निः, इत्यन्वयदृष्टान्तः। यत्र अग्न्यभावः तत्र धूमाभावः इति व्यतिरेक्यनुमाने हेतुः पञ्चरूपोपपन्नं भवति—(१) पक्षसत्त्वम्, (२) सपक्षसत्त्वम्, (३) विपक्षव्यावृत्तत्वम्, (४) अबाधितविषयत्वम्, (५) असत्प्रतिपक्षत्वम् चेति पञ्च रूपाणि सन्ति सद्हेतोः।

(२) केवलान्वय्यनुमानम्—अस्मिन्ननुमाने अन्वयदृष्टान्त एवोपलभ्यते। यथा—पटः प्रमेयः, अभिधेयत्वात्। यो यः अभिधेयो भवति सः सः प्रमेयो भवति। अस्यां व्याप्तौ अन्वयदृष्टान्तः।

(३) केवलव्यतिरेकी—अस्मिन्ननुमाने व्यतिरेकदृष्टान्त एवोपलभ्यते। यथा—यत्र यत्र आत्मत्वाभावः तत्र चैतन्यत्वाभावः। इति।

व्याप्तेर्निरूपणम्

साधनसाध्ययोः साहचर्यनियम एव व्याप्तिरित्यभिधीयते। यथा—'यत्र तत्र धूमस्तत्र तत्र वह्निः इति साहचर्यनियमो व्याप्तिः।'[1] इत्याह तर्कसंग्रहकारः। व्याप्तौ

साध्यसाधनेयोः व्यभिचारो नहि भवति। व्यभिचारो नाम एकत्राव्यवस्था। अतएव व्याप्तौ साध्यसाधनयोरव्यभिचरितः सम्वन्धो भवति। सहचरितसम्वन्ध एवैकान्तिकः सम्बन्ध इत्यभिधीयते। व्यभिचरितश्च सम्बन्धः अनैकान्तिकसम्वन्ध्यः कथ्यते। तथा चोक्तम् न्यायकोशे—

'एकस्य साध्यस्य तदभावस्य वा योऽन्तः सहचारः अव्यभिचरितसहचारः तस्यायमित्यैकान्तिकः।' इति। अतएव तर्ककौमुदीकारानुसारेण—

'अव्यभिचारज्ञानविरहसहकृतं हेतुसाध्यसहचारदर्शनं व्याप्तिग्राहकं भवति।'

व्यप्त्यस्थले व्यभिचाररहितः सम्वन्ध एव अविनाभावसम्वन्धः इति कथ्यते। सोऽयं सम्वन्धः अनौपाधिको भवति। अतएव वाचस्पतिमिश्रेणाभिहितम्—

'अनौपाधिकः सम्बन्धो व्याप्तिः।' इति।

यस्योपधेः व्याप्तौ अभाव अपेक्षितो भवति तस्योपाधेः स्वरूपम् किमास्ते? इति नैसर्गिकः प्रश्नः उदेति। तत्र-उप = समीपवर्तिनि आदधाति स्वकीयं रूपम् इति उपाधिशब्दस्य व्युत्पत्तिभ्य अर्थः। यथा—यत्र यत्राग्निः तत्र तत्र धूमः इत्यत्रार्द्रेन्धनत्वमुपाधिः। आन्द्रेन्धनसंयोगेपत्येव अग्नौ धूमो जायते ज्वलदङ्गारेवे धूमाभावदर्शनात्। अतएव हि उपाधिलक्षणेऽभिहितम्—

'साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः।' इति।

न्यायपरिशुद्धिकारेण तु उपाधिस्वरूपनिरूपणेऽभिहितम्—

'साधनाव्यापकत्वे सति साध्यसमव्याप्तः साधनधर्मव्यतिरिक्तो धर्म उपाधिः।' इति अस्यैव लक्षणस्य परीक्षायामभिहितम् वेदान्तदेशिकेन—सावयवत्वादनित्यत्वसाधने कृतकत्वस्य, कृतकत्वादनित्यत्वसाधने सावयवत्वस्य समव्याप्तहेतुप्रयोगे तत्स्वरूपस्य सोपाधित्वव्युदासाय विशेषणत्रयम्। पक्षेतरत्वादेरुपाधित्वव्युदासाय तु समशब्दः। इतरथा साध्यव्यापक इत्येतावता सावयवत्वादेरुपाधित्वव्युदासः शक्यः। सावयवमीश्वरविग्रहादिकं नित्यतया श्रुत्यादिसिद्धमनभ्युपगच्छताम् सावयवत्वाद्युदाहरणम् अभ्युपगच्छतां तु द्रव्यत्वाद् वाच्यत्वसाधने वस्तुत्वस्य वस्तुत्वाद् वाच्यत्वसाधने द्रव्यत्वस्य चोपाधित्वव्युदासाय विशेषणद्वयमित्युदाहर्तव्यम्। न चोपाधिव्याप्त्योर्निरूपणेऽन्योन्याश्रयता। यावत्साधनदेशमवर्तमानो यावत्साध्यदेशवर्तीत्युपाधिनिरूपणात्॥' इति।

उपाधेर्भेदः—अस्योपाधेर्भेदद्वयम् भवति—निश्चितोपाधिः शङ्कितोपाधिश्च। व्याप्यः पक्षेनास्तीत्यवधारितो निश्चितोपाधिः। यथा—विप्रतिपन्ना सेवा दुःखहेतुः सेवात्वात्, राजसेवावत्, इत्यनुमाने पापारब्धत्वमुपाधिः। अयं चेश्वरसेवायां नास्तीति शास्त्रतो निश्चितत्वादाप्तत्वाच्च निश्चितोपाधिः।

पक्षावृत्तिव्याप्त्योः अन्यतरस्यापि सन्देहे सन्दिग्धोपाधिः। यथा—विप्रतिपन्नो जीवः एतच्छरीरावसाने मुक्तिमान्, निष्पन्नसमाधित्वात्, शुकादिवत्। इत्यत्र कर्मात्यन्तपरिक्षय उपाधिः।

नव्यन्याये व्याप्तेर्लक्षणम्—नव्यन्यायस्य प्रवर्त्तको गङ्गेशोपाध्यायो बहुधा व्याप्तिं व्याचकार तत्त्वचिन्तामणिनामके स्वकीये ग्रन्थे। तत्र गङ्गेशोपाध्यायानुसारेण—'साध्याभाववदवृत्तित्वम्।' इति व्याप्तेः प्रथमं लक्षणम्। यत्र-यत्र साध्याभावस्तत्र तत्र साधनाभाव इति व्याप्तेर्लक्षणम् इत्यर्थः।

व्याप्तेः सिद्धान्तलक्षणम्—तत्त्वचिन्तामणिकारो गङ्गेशोपाध्यायः सिद्धान्तरूपेण व्याप्तेर्निम्नांकितम् लक्षणमाह—

'हेतुव्यापकसामानाधिकरण्यम् व्याप्तिः।' इति व्यापकसाध्यस्याभिप्रायोऽस्ति यत् हेतोः समानाधिकरणाभावप्रतियोगी नहि भवति। एतादृशमेव साध्यं हेतोर्व्यापकं भवति। एतादृशस्य साध्यस्य व्याप्यहेतौ विद्यमाना सहवर्तितैव व्याप्तिरित्यभिधीयते।

व्याप्तिग्रहोपायः—एतादृश्याः व्याप्तेर्ज्ञानम् भूयोदर्शनादेव भवतीति नैयायिकाः प्राहुः। अतएव भूयोदर्शनमेव व्याप्तिग्रहोपायः। अत्र–व्याप्तिज्ञाने सहचरज्ञानम् व्यभिचारज्ञानस्याभावश्चेतीमौ आवश्यकौ भवतः। अतएव ह्युक्तम्—

'व्यभिचारज्ञानविरहसहकृतं सहचारज्ञानम् व्याप्तिज्ञानस्य कारणम् भवति'।

शब्दप्रमाणनिरूपणम्

योऽर्थः श्रोत्रग्राह्यो भवति सः शब्दः। सोऽयं शब्दः। द्विप्रकारको भवति—ध्वन्यात्मको वर्णात्मकश्च। वर्णात्मकश्चापि शब्दो द्विप्रकारको भवति—सार्थको निरर्थकश्च।

तत्र सार्थकाः शब्दाः संज्ञा-सर्वनाम-क्रिया-विशेषणादिकानां भेदात् अनेकप्रकारको भवति। एतेषु सार्थकेषु शब्देषु अर्थविशेषस्य प्रकाशिका शक्तिर्भवति। यथा—अश्व इति शब्दोच्चारणेन पशुविशेषस्य ज्ञानम् भवति। गमनम् इति कथनेन क्रियाविशेषस्य च ज्ञानं भवति।

शब्देषु अर्थप्रकाशिका शक्तिः कुत आयाति? मीमांसकमतानुसारेण सेयं शब्दस्य शक्तिर्नैसर्गिकी नित्या च। किन्तु नैयायिकमतानुसारेण तु शब्दाः इच्छाकृतसंकेतमात्रास्सन्ति। सा चेच्छा ईश्वरस्याथवा मनुष्यस्य भवति।

संकेतस्य भेदद्वयम्—संकेतो हि द्विप्रकारको भवति—आजानिकः आधुनिकश्च। अज्ञातकालतः प्रवर्तमानः संकेतः आजानिक इत्यभिधीयते। यथा घटशब्दस्य

कम्बुग्रीवादिमति व्यक्तौ प्रयोगः कस्मात् कालात् प्रारब्धोऽभूदिति कश्चनापि नहि जानाति ।

कस्यचन पुरुषस्येच्छामात्रेण प्रवर्त्तमानः संकेतः आधुनिक इति कथ्यते । यथा रमेश इति पदस्य व्यक्तिविशेषे संकेतः ।

पदम्—नैयायिकमतानुसारेण शक्तिमान्शब्द एव पदमित्यभिधीयते । यस्मिन् शब्देऽर्थविशेषस्य द्योतनस्य शक्तिर्भवति स एव शब्दः पदमित्यभिधीयते । अत्रायं प्रश्नोदेति यत् पदम् कीदृशमर्थं बोधयति—(१) व्यक्तिविशेषम् ? (२) अथवा जातिविशेषम्, (३) अथवा आकृतिविशेषम् ?

न्यायदर्शनानुसारेण एतासां व्यक्त्याकृतिजातीनाम् स्वरूपम् निम्नप्रकारकमास्ते—

'व्यक्तिर्गुणविशेषाश्रयो मूर्तिः । (न्याय० सू० २।२।६४)

गुणाश्रयम् मूर्तिवद् द्रव्यमेव व्यक्तिरित्यभिहितं भवतीत्यर्थः ।

'समानप्रसवात्मिका जातिः ।' (न्या० सू० २।२।६६)

भिन्नासु व्यक्तिषु विद्यमानापि समानैव प्रतीयते सा जातिरिति कथ्यते इति भावः । यथा सर्वेषु घटेषु समानरूपेण विद्यमाना घटत्वजातिः ।

'आकृतिर्जातिलिङ्गाख्या ।' (न्या० सू० ३।३।६५)

गौतममतानुसारेण शब्दः जात्याकृतिविशिष्यं व्यक्तिं बोधयति । तथा च न्यायसूत्रम्—

'व्यक्त्याकृतियुक्तेऽप्यप्रसङ्गात् प्रोक्षणादीनां मृद्गवके जातिः ।' इति ।
(न्या० सू० २।२।६१)

अतएवाह गौतमः स्पष्टरूपेण—

'व्यक्त्याकृतिजातयस्तु पदार्थः ।' (न्या० सू० २।२।६३)

इत्ययमेव नैयायिकानां सिद्धान्तः ।

अवयवार्थसमुदायर्थयोः विवेचनम्—नैयायिकमतानुसारेण केचन शब्दास्तथाविधाः भवन्ति येषां व्युत्पत्तिलभ्योऽर्थो भवति । यथा पाचकः पाकस्य कर्तेत्यर्थः । अस्य शब्दस्य शक्तिः धात्ववयवयोरुभयोरधीना वर्त्तते । अतएवायमवयवार्थ इत्यभिधीयते ।

केचन शब्दास्तथाविधा भवन्ति येषामर्थाः व्युत्पत्तिलभ्या नहि स्वीक्रियन्ते । तेषां शब्दानाम् तु समुदायार्थं एव गृह्यते । गौरिति शब्दः । गम् धातोः डोस् प्रत्यये कृते सति यद्यपि गौ शब्दो व्युत्पद्यते गच्छतीति गौः इत्यस्मिन् अर्थे । अस्यामवस्थायां

गमनकर्तारः सर्वेऽपि जीवाः गौरिति शब्देनाभिधीयेरन् । गोरपि स्वयम् स्वापवेलायामगौः स्यादिति गौशब्दस्य व्युत्पत्तिलभ्योऽर्थो नहि स्वीक्रियते । अपि तु गौः इति वर्णसमुदायस्य गोत्वावच्छिन्ना व्यक्तिरूपोऽर्थः स्वीक्रियते ।

पदानां भेदाः—नैयायिकाः पदानां भेदत्रयम् स्वीकुर्वन्ति—(१) रूढपदम्, (२) यौगिकपदम्, (३) योगरूढपदञ्चेति ।

(१) रूढपदम्—यस्य पदस्य प्रवृत्तिः व्युत्पत्त्यनुकूला नहि भवति तत् रूढपदम् भवति । यथा—घट-पट-जलादिकाः शब्दाः ।

(२) यौगिकपदम्—यस्य पदस्य प्रवृत्तिः व्युत्पत्त्यनुकूला भवति तत् पदं यौगिकमित्यभिधीयते ! यथा—दाता । दा धातोः कर्तरि तृचि प्रत्यये कृते दातेति पदम् व्युत्पद्यते दानकर्तरि अर्थे ।

(३) योगरूढम् पदम्—यस्य पदस्य कस्यचनांशो व्युत्पत्तिलभ्य. कस्यचनांशश्च समुदायलभ्यः स्वीक्रियते तत् पदम् योगरूढमित्यभिधीयते । यथा पङ्कजम् । पङ्कात् = कर्दमात् जायते = उत्पद्यते इति पङ्कजम् इति व्युत्पत्तिलभ्यानुसारेणार्थो भवति । किन्तु पङ्काज्जायमानेषु—कमल-सैवाल-जलौकादिषु पङ्कजमितिपदम् कमले एव रूढमिति भवति पङ्कजपदस्य योगरूढत्वं सिद्धम् ।

आकांक्षायोग्यताऽऽसत्तियुक्तानाम् पदानां समूह एव वाक्यमित्यभिधी-
वाक्यम्—
यते । तथा चोक्तमपि—'वाक्यं पदसमूहः' इति । पदसमूहे वाक्यत्वाय त्रीणि
वस्तून्यपेक्षितानि भवन्ति—आकांक्षायोग्यतासत्तिनामानि । अधस्तादेतेषां स्वरूपम्
निरूप्यते—

वाक्ये कस्यचन पदस्यापरस्य पदस्यापेक्षा भवति । सैवा-
(१) आकांक्षा—
'गौश्चरति इति वाक्ये' गौरिति पदस्याकांक्षा वर्त्तते ।
पेक्षाकांक्षेत्यभिधीयते । यथा—
चरतीति पदेन भवति अतएवेदं वाक्यम् । आकांक्षायाः स्वरूपं
तस्या आकांक्षायाः पूर्तिः
निरूपयता तर्कसंग्रहकारेणाभिहितम्—
पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वम् आकांक्षा ।' इति ।
'पदस्य
तथा च भाषापरिच्छेदनामके ग्रन्थेऽभिहितम्—

'यत्पदेन विना यस्याननुभावकता भवेत् ।
आकांक्षा वक्तुरिच्छा तु तात्पर्यं प्रकीर्तितम् ॥' इति ।

वाक्यसमूहस्य वाक्यत्वाय पदानां योग्यता द्वितीया अपेक्षिता
(२) योग्यता—
अग्निना सिञ्चति । इति समूहः । अग्निस्तु दहनक्रिया-
विशेषता भवति । यथा—
करणतास्वीकाराभावात्, अस्मिन् पदसमूहे
कर्मण्येव क्षमः न तु सेचनक्रियायाम्

वाक्यताया अभावः । योग्यतायाः स्वरूपम्—'अर्थाबाधो योग्यता ।' इत्याह तर्कसंग्रहकारः ।

(३) आसत्तिः—वाक्यस्थानां पदानामासत्तिरप्यावश्यिका भवति । पदानामविलम्बेनोच्चारणमेव सन्निधिरित्यभिधीयते । पदानामुच्चारणे व्यवधानं माभूत् । इयम् पदानामव्यवहितासत्तिरेव शाब्दबोधस्य साधनम् । तथा चोक्तं सिद्धान्तमुक्तावल्याम्—'यत्पदार्थस्य यत्पदार्थेनान्वयोऽपेक्षितः तयोरव्यवधानेनोपस्थितिः कारणम् ।' इति ।

(४) तात्पर्यम्—नव्याः नैयायिकाः शाब्दबोधाय तात्पर्यबोधस्याप्यनिवार्यतां स्वीकुर्वन्ति । वक्ता केनाऽभिप्रायेण कस्य शब्दस्य प्रयोगं करोतीति ज्ञानमावश्यकं भवति । भोजनावसरे 'सैन्धवमानय' इति वाक्यस्य लवणमानय इति वस्तुरभिप्रायो भवितुमर्हति, किन्तु युद्धे गमनवेलायाम् तस्य वाक्यस्याश्वमानयेति अभिप्रायो भवितुमर्हति ।

शब्दस्य शक्तिः—नैयायिकाः शब्दस्य शक्तिद्वयीं स्वीकुर्वन्ति—अभिधाशक्तिम्, लक्षणाशक्तिञ्च । शब्दस्य यो हि मुख्योऽर्थो भवति सः शब्दस्याभिधया शक्त्या प्रकाश्यते । शक्तिज्ञानस्य साधनानां निर्देशं कुर्वद्भिराचार्यैरभिहितम्—

'शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद् व्यवहारतश्च ।
वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः' ॥ इति ।

शब्दस्य यया वृत्त्या मुख्यार्थानुपपत्तौ रूढेरथवा प्रयोजनवशात् मुख्यार्थेन सम्बद्धः मुख्यार्थव्यतिरिक्तश्चार्थो ज्ञायते सेऽयम् शब्दस्य लक्षणा अथवा गौणी शक्तिर्भवति । यथा—गङ्गायां घोषः, 'अग्निरयं माणवकः ।' इत्यादौ गङ्गापदम् गङ्गातटरूपम्, अग्निपदञ्च तेजस्वितासम्पन्नम् इत्यादिकं अर्थम् बोधयति ।

लक्षणेयम् द्विप्रकारवती भवति—जहल्लक्षणा अजहल्लक्षणा च । यत्र शब्दः स्वमुख्यार्थं जहाति तत्र जहल्लक्षणा भवति । यत्र च शब्दः मुख्यार्थं स्वम् अपरित्यज्य अन्यार्थमप्युपादत्ते तत्राजहल्लक्षणा भवति । तद्यथा—'कुन्ताः प्रविशन्ति' अस्य वाक्यस्य कुन्तशब्दः लक्षणयाशक्त्या वाक्येऽन्वयसिद्धये कुन्तधारिणं पुरुषमाक्षिपति ।

शब्दस्य प्रमाणता—नैयायिकाः शब्दनामकम् स्वतन्त्रं प्रमाणम् स्वीकुर्वन्ति । सर्वे शब्दाः यस्मात् प्रमाणं नहि भवितुमर्हन्ति अतएव शब्दप्रमाणं लक्षयन् महर्षिः गौतमः प्रावोचत्—'आप्तोपदेशः शब्दः' इति (न्या० सू० १।१।७) अस्य सूत्रस्य भाष्ये अभिहितम्—

'आप्तः खलु साक्षात्कृतधर्मा । यथा दृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्तः उपदेष्टा । साक्षात्करणमर्थस्याप्तिः तया प्रवर्त्तते इत्याप्तः । ऋष्यार्थम्लेच्छानां समानं लक्षणम् ।'

अन्नम्भट्टानुसारेण तु—

'आप्तस्तु यथार्थवक्ता।'

शब्दप्रमाणस्य भेदद्वयम्—शब्दप्रमाणं द्विविधम् भवति—दृष्टार्थमदृष्टार्थञ्च। यस्य शब्दस्योपलब्धिरस्मिन् लोके भवति तत् शब्दप्रमाणम् दृष्टार्थम् भवति।

यस्य च शब्दप्रमाणस्य सम्बन्धः पारलौकिकेन विषयेण सह सम्बन्धो भवति तत् शब्दप्रमाणम् पारलौकिकं भवति॥ वैदिकानाम् वाक्यनामर्थाः पारलौकिकाः सन्ति। अतएव वैदिकानि वाक्यानि अलौकिकशब्दप्रमाणानि सन्ति। गौतमेनाभिहितम् यत् येन प्रकारेण मन्त्रशास्त्रस्य आयुर्वेदशास्त्रस्य च वाक्यानि प्रामाणिकानि सन्ति तेनैव प्रकारेण वेदानामपि वाक्यानि प्रमाणभूतानि सन्तीति। तथा च सूत्रम्—

'मन्त्रायुर्वेदप्रामाण्यवच्च तत्प्रामाण्यमाप्तप्रामाण्यात्'। इति।

वैदिकवाक्यानि—वैदिकानि वाक्यानि त्रिप्रकारकाणि भवन्ति। (१) विधिवाक्यम्, (२) अर्थवादवाक्यम्, (३) अनुवादवाक्यञ्च।

(१) विधिवाक्यानि—वेदानाम् आज्ञासूचकानि वाक्यानि विधिवाक्यशब्देनाभिधीयन्ते। यथा—'स्वर्गकामोऽश्वमेधेन यजेत।'

(२) अर्थवादवाक्यानि—इमानि वाक्यानि वर्णनात्मकानि भवन्ति। अर्थवादवाक्यानां चत्वारो भेदाः भवन्ति—

(क) स्तुतिवाक्यानि—एतादृशानि वाक्यानि विहितानां कर्मणां फलानि बोधयित्वा तेषां कर्मणां प्रशंसां कुर्वन्ति।

(ख) निन्दावाक्यानि—वेदप्रतिषिद्धानां वाक्यानाम् दुष्परिणामं बोधयित्वेमानि वाक्यानि तेषां कर्मणाम् निन्दां कुर्वन्ति।

(ग) प्रकृतिवाक्यानि—मनुष्यकृतेषु कर्मसु विरोधं प्रदर्शयन्ति एतादृशानि वाक्यानि।

(घ) पुराकल्पवाक्यानि—एतादृशीनि वाक्यानि ऐतिहासिकमथवा परम्पराप्राप्तमर्थं बोधयन्ति।

(३) अनुवाद वाक्यानि—एतादृशानि वाक्यानि पूर्वं प्रोक्तस्यार्थस्य अनुवादं कुर्वन्ति। अनुवादवाक्यान्यपि द्वेधा भवन्ति अर्थानुवादवाक्यानि शब्दानुवादवाक्यानि।

(क) अर्थानुवादवाक्यानि—पूर्वमुक्तस्यार्थस्य अर्थतोऽनुवादं कुर्वन्ति।

(ख) अर्थानुवादवाक्यानि—पूर्वमुक्तस्य अर्थस्य शब्दशोऽनुवादकराणि वाक्यानि शब्दानुवाक्यानि कथ्यन्ते।

नैयायिकाः वैशेषिकाश्च सर्वे विद्वांसः वेदस्य सम्पूर्णस्य प्रामाणिकतां स्वीकुर्वन्ति ।

न्यांयदर्शनस्य द्वादशविधानि प्रमेयाणि

प्रमेयपदार्थः—प्रमाविषय एव प्रमेयशब्देनाभिधीयते । यथा घट-पटादिकाः पदार्थाः । तथा चाह वात्स्यायनोऽपि—'योऽर्थः तत्त्वतः प्रमीयते तत्प्रमेयम् ।' इति । तथा च द्वादशविधानि प्रमेयाणि—गौतमो निम्नाङ्कितानि द्वादशविधानि प्रनेयाणि स्वीकरोति । तथा च—'आत्म-शरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलफलदुःखापवर्गाः ।' इति (न्या० सू० १।१।९) इमे द्वादशसंख्याकाः प्रमाविषयाः सन्ति । एतेषाम् न्यायदर्शनानुसारेण संक्षिप्तम् विवरणमुपस्थाप्यते––

(१) शरीरम्––शीर्यते यदनुलक्षणम् तत् शरीरमित्यभिधीयते । शरीरमेव सर्वासां चेष्टानामाश्रयः, सर्वेषामिन्द्रियाणामाधारस्थलम्, सर्वेषां विषयभोगानां च केन्द्रविन्दुर्वर्त्तते । तथा ज गौतमसूत्रम्––

'चेष्टेन्द्रियार्थाश्रयः शरीरम् ।' इति । (न्या० सू० १।१।११)

अस्य सूत्रस्य भाष्ये वात्स्यायनोऽप्याह––आत्मनो भोगायतनम् शरीरमिति । भोगायतनपदार्थं निरूपयता तर्कदीपिकाकारेणाभिहितम्––'यदवच्छिन्नात्मनि भोगो जायते तदभोगायतनमित्यर्थः ।'

नैयायिकाः द्विप्रकारकं शरीरम् स्वीकुर्वन्ति–योनिजम् अयोनिजम् च । शुक्रशोणितयोः संयोगाज्जातम् शरीरम् योनिजमित्यभिधीयते । तद्भिन्नम् शरीरमयोनिजमिति कथ्यते । मनुष्यपशुपक्षिणाम् शरीराणि योनिजानि भवन्ति । तैजसानि वायव्यानि च शरीराणि अयोनिजानि भवन्ति ।

योगार्णवकारस्तु चतुर्विधम् शरीरम् स्वीकरोति । तथाहि—'देहश्चतुर्विधो जन्तोर्ज्ञेय उत्पत्तिभेदतः । उद्भिजः स्वेदजोऽण्डोत्थश्चतुर्थश्च जरायुजः ।

(२) इन्द्रियाणि—शरीरस्य यैरवयवैः विषयाणां ग्रहणं भवति ते अवयवा इन्द्रियशब्देनाभिधीयन्ते । तथा चोक्तम् तर्ककौमुद्याम्––

'शरीरसंयुक्तम् ज्ञानकरणमतीन्द्रियम् (इन्द्रियम्) इन्द्रियाणां प्राप्यप्रकाशकारित्वम् स्वाभाविकमास्ते । किन्तु स्वयम् तान्यतीन्द्रियाणि भवन्ति । यथा चक्षुरिन्द्रियम् रूपं तु प्रकाशयति, किन्तु स्वयमप्रकाशितं भवति । पदार्थचन्द्रिकायामिन्द्रियाणां लक्षणम् निम्नांकितमास्ते––

'साक्षात्कारमात्रवृत्ति धर्मावच्छिन्नकार्यतानिरूपितकारणताश्रयव्यापारवदतीन्द्रियम् ।' इति ।

इन्द्रियाणि प्रमुखतया द्विप्रकारकाणि सन्ति ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि । उभय-

प्रकारकाणीमानीन्द्रियाणि पञ्च पञ्च प्रकारकाणि सन्ति । तत्र ज्ञानप्रसरणशक्तानीन्द्रियाणि श्रोत्रचक्षुर्घ्राणरसनात्वङ्नामानि मनसा च स षट्संख्याकानि भवन्ति । कर्मेन्द्रियाण्यपि पञ्चवाक्पाणिपादपायूपस्थाख्यानि । इमानीद्रियाण्येव भोगसाधनानि सन्ति ।

(३) अर्थाः--इन्द्रियैर्येषां विषयाणां ग्रहणं भवति ते अर्थशब्देनाभिधीयन्ते । अर्था अपि पञ्च--रूप-रस-गन्ध-स्पर्श-शब्दाख्याः सन्ति । कस्य विषयस्य ग्रहणम् केनेन्द्रियेण भवतीति निम्नांकितेन चक्रेण प्रकाश्यते--

अर्थाः	रूपम्	रसः	गन्धः	स्पर्शः	शब्दः
अर्थग्राहकाणि	चक्षुरिन्द्रियम्	रसनेन्द्रियम्	घ्राणेन्द्रियम्	त्वगिन्द्रियम्	श्रोत्रेन्द्रियम्

अतएव वात्स्यायनभाष्येऽभिहितम्--'स्वस्वविषयग्रहणलक्षणानि इन्द्रियाणि । ते चेन्द्रियाणां प्रकाश्यभूता अर्थाः के सन्तीति जिज्ञासायामाह--'गन्धरसरूपस्पर्शाः पृथिव्यादिगुणास्तदर्थाः' । (न्या०. सू० १।१।१४)

(४) बुद्धिः--गौतमाभिमतम् चतुर्थं प्रयोजनमास्ते बुद्धिः । 'बुद्धयते अनया' इति हि बुद्धिशब्दस्य व्युत्पत्तिः । बुद्धिरियमात्मगुणस्वरूपा भवति । बुद्धिरेव सर्वेषां जायमानानां व्यवहाराणां हेतुस्वरूपा विद्यते । तथा चोक्तम् तर्कसंग्रहे--सर्वव्यवहारहेतुर्ज्ञानम् (बुद्धिः) इति । नैयायिकानां मतानुसारेण द्विप्रकारवती बुद्धिर्भवति--नित्या अनित्या च । तत्र नित्या बुद्धिः परमात्मनो भवति, अनित्या च जीवानाम् । जीवात्मनोऽनित्याऽपि बुद्धिर्द्विधा भवति--स्मृतिरनुभवश्च । पुनस्तयोर्द्वौ द्वौ भेदौ भवतः--यथार्थायथार्थोर्भेदात् । यथार्थयोऽनुभव एव प्रमाशब्देनाभिधीयते, अयथार्थानुभवश्चाप्रमाशब्देन । प्रमायाश्चत्वारो भेदाः भवन्ति--प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दबोधश्च । अप्रमाया अपि द्वौ भेदौ भवतः--संशयो विपर्ययश्च ।

निम्नांकितेन चक्रेण सम्पूर्णा बुद्धिभेदाः सुगमा भवन्ति--

बुद्धिभेदचक्रम्


बुद्धिः
नित्या
परमात्मगता
अनित्या
जीवात्मगता
स्मृतिः
अनुभवः
यथार्था
अयथार्था
यथार्थः
अयथार्थः
प्रत्यक्षम्
अनुमितिः
उपमितिः
शाब्दबोधश्च
संशयः
विपर्ययः

(४) प्रवृत्तिः—'चिकीर्षाजन्यो यत्नः प्रवृत्तिः।' इत्याह तर्ककौमुदीकारः। प्रवृत्तयः त्रिप्रकारवत्यो भवन्ति—शारीरिकी, मानसिकी, वाचिकी च। इमास्त्रि एव प्रवृत्तयः पुण्यपापयोर्भेदेन द्विधा भवन्ति। तथा च प्रवृत्तिचक्रम्—


प्रवृत्तिः
शारीरिकी
वाचिकी
मानसिकी
पुण्या
पापा
पुण्या
पापा
पुण्या
पापा

(६) दोषः—येन हेतुना कस्मिंश्चित्कार्ये प्रवृत्तिर्भवति तद्दोषः। तथा च सूत्रम्—'प्रवर्त्तना लक्षणाः दोषाः।' इति। (न्या० सू० १।१।१८) ते च त्रिधा भवन्ति—रागद्वेषमोहानां भेदात्। तत्रासक्तिलक्षणोदोषो रागः। काम-मत्सर-स्पृहा-तृष्णा-लोभ-माया-दम्भाः रागस्यैव भेदाः सन्ति।

अमर्षलक्षणो दोषो द्वेषः। क्रोधेर्ष्या-सूया दोहामर्षाभिमानाः द्वेपस्यैव प्रभेदाः। मिथ्याप्रतिपत्तिलक्षणो दोषो मोहः। विपर्यय-संशय-तर्क-मान प्रमाद-भय-शोकाः मोहस्यैव प्रभेदाः सन्ति।

(७) प्रेत्यभावः—प्रेत्य = मृत्वा भावो = जननं प्रेत्यभावः इति विश्वनाथवृत्तिः। मरणोत्तरं जन्म प्रेत्यभाव इति तर्कदीपिकाकारः। ‘पुनरुत्पत्तिः प्रेत्यभावः।’ इति न्यायसूत्रम्। अनेनायमर्थः सिद्धयति यत् मरणानन्तरमपि आत्मा न नश्यति इति नैयायिकानामभिमतिः।

(८) फलम्—कृतस्य कर्मणः परिणाम एव फलमित्यभिधीयते। तथा चाह गौतमः—‘प्रवृत्तिदोषजनितोऽर्थः फलम्।’ (न्या० सू० १।१।२०) न्यायमतानुसारेण फलम् द्विविधम् भवति—मुख्यं गौणञ्च। अतः—सुखदुःखयोः संवेदनरूपं फलमेव मुख्यम्। तद्व्यतिरिक्तम् गौणम्।

(९) दुःखम्—न्यायसूत्रेऽभिहितम् दुःखलक्षणम्—वाधनालक्षणं दुःखम्’। वात्स्यायनेन तु कथितम्—‘प्रतिकूलवेदनीयम् दुःखम्।

नैयायिकमतानुसारेण दुःखस्यैकविंशतिभेदाः भवन्ति—एकम् शारीरम् षडैन्द्रि-
यिकम्, षड्वैषयिकम्, षट् प्रात्यक्षम् सुखं दुःखञ्चेति। भोगायतनत्वादेव शरीरम्
दुःखमित्यभिधीयते।

(१०) अपवर्गः—सर्वेषां दुःखानामात्यन्तिकी ऐकान्तिकी च निवृत्तिः अप-
वर्ग। तथा च न्यायसूत्रम्—

‘दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः।’
(न्या० सू० १।१।२) तथा चोक्तम् वात्स्यायनभाष्ये—‘यदा तु तत्त्वज्ञानान्मिथ्या-
ज्ञानमपैति तदा मिथ्याज्ञानापाये दोषाः अपयान्ति। दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये
जन्मापैति, जन्मापाये दुःखमपैति। दुःखापाये च आत्यन्तिकोऽपवर्गो निःश्रेयसम्॥
अतएव तर्कभाषाकारेणाभिहितम्—

‘एकविंशतिभेदभिन्नस्य दुःखस्यान्तिकी निवृत्तिः मोक्षः’। इति।

(११) आत्मा—ज्ञानाधिकरणमात्मा इति आत्मलक्षणमाह तर्कसंग्रहकारः।
न्यायदर्शनानुसारेणात्मातीन्द्रियः, विभुः नित्यश्च वर्त्तते। न्यायसूत्र चाभिहितम्—
‘इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्’ इति। (न्या० सू० १।१।१०)

(१२) मनः—तर्कसंग्रहकारेणाभिहितम्—सुखाद्युपलब्धिसाधनमिन्द्रियं मनः
इति। मनसि प्रमाणमुपस्थापयन् महर्षिः गौतमः प्राह—

‘युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्।’ इति (१।१।१६)

देहात्मवादस्य समालोचनम्

चार्वाकाणामनेके सम्प्रदायाः सन्ति । तत्र केचन चार्वाकाः देहस्यैवात्मत्वं प्रतिपादयन्तः कथयन्ति--यत् देह एवात्मा, इत्ययमर्थः प्रत्यक्षतः प्रतिपद्यामहे । आत्मैव ज्ञाता वर्त्तते । 'अहम् जानामि' इति प्रतीतौ आत्मा ज्ञातारूपेण प्रतीयते । अतएवाहमर्थ एवात्मा प्रतीयते । 'स्थूलोऽहं' 'कृशोऽहम्' इत्यादि प्रतीतौ देह एवाहङ्कारगोचरः । स एव स्थौल्यादियुक्तः ।

किञ्च घटादिकाः पदार्थाः अचेतनाः सन्ति । तेषु ज्ञानाभावो विद्यते । अचेतनत्वादेव घटादिकाः स्वेच्छानुसारम् कार्याणि नहि कुर्वन्ति । तेषु इन्द्रियाणि अपि नहि सन्ति । शरीरञ्चाचेतनेभ्यो घटादिभ्यो व्यतिरिच्यते । तत् स्वेच्छानुसारेण कार्याणि करोति । इन्द्रियैरपि युक्तं तत् । एताभिः विशेषताभिः स्वीकर्तुम् शक्यते यत् शरीरमेवात्मा चेतनश्च । इति प्रत्यक्षेण प्रमाणेन शरीरस्यात्मत्वसिद्धिः ।

देहस्यात्मव्यतिरिक्तत्वसाधनानि अनुमानादिप्रमाणानिप्रत्यक्षेण वाधितानि भवन्ति । प्रत्यक्षवाधितत्वादेव तेषाम् प्रमाणत्वमपि सुतरां सिद्धम् । अतएवाचार्यो वृहस्पतिः--

'पृथिव्यापस्तेजो वायुरिति तत्त्वानि, तेभ्यश्चैतन्यम्, किण्वादिभ्यो मदशक्तिवत् ।' इति ।

अत्र देहव्यतिरिक्तात्मवादिनः प्राहुः--सर्वो हि मनुष्योऽहम् इत्येवरूपेणात्मानम् प्रतिपद्यते । आत्मव्यतिरिक्तानि सर्वाणि वस्तूनि इदमिदमिति रूपेणैव प्रतीयन्ते । अतएवेदमा प्रतीयमानेभ्यो वस्तुभ्यः अहमिति रूपेण प्रतीयमानो आत्मा नितरां भिद्यते । नह्येकमेव वस्तु इदमहञ्चोभयप्रकाराभ्यां प्रतीयते । शरीरस्य च 'इदम् शरीरमि'तिरूपेण भवति प्रतीतिः । आत्मा च सर्वदाहमिति रूपेणैव प्रतीयते । अतएव भिद्यते आत्मनो देहः । अतएव देहस्यात्मत्वं नहि सेद्धुमर्हति ।

अत्र देहात्मवादिभिः प्रतिविधीयते—देह एवात्मा । नहि भिद्यते आत्मनो देहः । देहे अनेके धर्माः सन्ति—ज्ञातृत्वादिकाः रूपादिकाश्च । ज्ञातृत्वविशिष्टो देह अहमिति रूपेण प्रतीयते । रूपादिगुणविशिष्टो देहः इदमिदमिति प्रतीयते । लोकेऽपि एकस्यैव वस्तुनः भिन्नानि रूपाण्याश्रित्य भिन्न-भिन्नप्रकारेण भवति प्रतीतिः ।

अत्र देहव्यतिरिक्तात्मवादिनः प्राहुः—यदि एकस्यैव वस्तुनो रूपभेदात् भवति इदममिदम्रूपेणाहमहम् रूपेण च प्रतीतिः तदा एक एव देवदत्तः स्वरूपविशिष्टाकारेणात्मानम् अहमिति प्रतीयेत, दण्डविशिष्टरूपेण चात्मानम् 'अयं दण्डवान्' इत्यवगच्छेत । न च तथा । सः दण्डरहितावस्थायाम् दण्डसहितायामप्यवस्थायाम् आत्मानम् 'अहमि'त्येव रूपेणावैति दण्डसहितावस्थायाम् दण्डविशिष्टोऽहम्, दण्ड-

रहितावस्थायाञ्च, दण्डरहितोऽहमित्येव रूपेणात्मानं जानाति । अनेन सिद्धयति यदहं पदार्थः इदम् पदार्थाद्भिन्नः इति भिद्यतेऽहमर्थं आत्मा इदमर्थात् शरीरात् ।

किञ्च चार्वाकाः स्थूलं शरीरमेवात्मा मन्यन्ते किन्तु यदा बाह्येन्द्रियाणि नियम्य मनश्चसावधानं कृत्वा, समाधावात्मानमहमिति रूपेणारोपयन् योगी करचरणादिकानाम् शरीरावयवानाम् प्रत्यक्षं नहि करोति । यदि स्थूलं शरीरमेवात्मा स्यात् तर्हि समाधौ तस्यावयवा अपि प्रतीयेरन् नहि प्रतीयन्ते यस्मात् तस्मात् शरीरस्यात्मात्वं भङ्गो भवति । न च सम्भवति यत् समाधौ स्थूलं शरीरं तु प्रतीयते किन्तु तदवयवाः नहि प्रतीयन्ते ।

किञ्च केचन चार्वाकाः अनुमानस्यापि प्रमाणत्वं अभ्युपगच्छन्ति । अतएव तान् प्रति वयं ब्रूमहे—'अहं जानामि' इति प्रतीतिः शरीरव्यतिरिक्तपदार्थविपयिणी भवति, यतः सा प्रतीतिः शरीरावयवान् प्रकाशयति । येन नहि प्रकारेणायं घटः इति प्रतीतिः शरीरव्यतिरिक्तपदार्थविषयिणी भवति, शरीरावयवानामप्रकाशिकात्वात् ।

किञ्च शरीरमहम् प्रत्ययविषयो नहि भवति, यतस्तदिदमिति रूपेण प्रकाशते, बाह्येन्द्रियैश्च गृह्यते । किञ्च तस्या इमा प्रतीतिरपि नहि भवति । अतएव इदम् प्रतीतेर्विषयत्वात्, बाह्येन्द्रियग्राह्यत्वात् च घटादिवदात्मनो भिद्यते ।

किञ्च रूपादिका शरीरस्य धर्माः सति इति चार्वाका अपि स्वीकुर्वन्ति । तच्च रूपादिगुणविशिष्टं शरीरम् कालादिगुणविशिष्टात् आत्मनो भिन्नमेव । किञ्च रूपादिकाः गुणाः तावत्कालपर्यन्तम् शरीरे तिष्ठन्ति यावत् कालपर्यन्तम् शरीरम् तिष्ठति । एतेषाम् रूपादिकानां गुणानां प्रत्यक्षतः साक्षात्कारोऽपि जायते । किन्तु ज्ञानादिकाः गुणाः सुदृढ़ एव शरीरे अनेकधा उत्पद्यन्ते नश्यन्ति च । मृतेऽपि शरीरे रूपादिकाः गुणाः अपरोक्ष्यन्ते किन्तु मृते शरीरे नोपलभ्यन्ते । यदि ज्ञानादिकाः गुणाः शरीरस्य भवेयुस्तदा ते यावच्छरीरकालीना भवेयुः, नो भवन्ति यस्मात् तस्मात् ज्ञायते यत् इमे ज्ञानादिकाः गुणाः शरीरव्यतिरिक्तस्यैवात्मनः सन्तीति ।

किञ्च रूपादिकाः गुणाः परसंवेद्याः सन्ति, किन्तु ज्ञानादिकानां गुणानामपरोक्षम् तु ज्ञानाश्रय एव करोति । परेभ्यस्तु ते अनुमेया एव ।

अथ स्यात् आत्मशरीरयोः भेदस्वीकारे सति 'स्थूलोऽहम् कृशोऽहम्' इत्यादिकानामनुभवानाम् निर्वाहः कथं स्यादिति वाच्यम् ? यदीमे अनुभवाः अनुमानैः बाधिताः भवन्ति तदा प्रत्यक्षसिद्धस्याग्नेरौष्ण्यस्यापि अनुमानेन बाधः स्वीक्रियते । तथा चाग्नेरौष्ण्यबाधकमनुमानम्—अग्निरनुष्णः, द्रव्यत्वात् जलवत् । अतएव प्रत्यक्षविरुद्धस्यानुमानस्यैव बाधः स्वीकरणीयः, न त्वनुमानस्य स्वीकर्तव्यम् । प्रत्यक्षेण च देह एवात्मा सिद्धयति, अतएव देहा[illegible]न्यनुमानान्य[illegible]नि इति ।

अत्रोच्यते—'इदम् मम शरीरम्' 'अयम् मम हस्तः' इत्यादि रूपेणापि प्रत्यक्षतोऽवयन्ति परीक्षकाः। एतेष्वनुभवेषु अहमिति शब्देनात्माभिधीयते, इदमिति शब्देन च शरीरम्। अतएव शरीरात्मनोर्भेदः सिद्धयति।

न च शरीरस्यावयवविशेष एव स्वेतरानवयवान् अयम् मम हस्तः, इदं मे शिरः, इत्यादिरूपेणानुभवतीति वाच्यम्, अवयवविशेषः अवयवान्तरमित्थम् अनुभवति इति कस्यापि नहि अनुभवगोचरः। किञ्च सर्वेषामयवानाम् विषये—'इदम् मे शिरः, इमौ मे हस्तौ, इदं मे उदरम्।' इत्यादिरूपेणानुभवो भवति। एतेनायमर्थः सिद्धयति यदेतादृशानुभवकर्ता, एतेभ्य अवयवेभ्यो भिन्नः अहमर्थं आत्मैव वर्त्तते।

न चावयवैरुत्पन्नमवयविद्रव्यमित्थमभिमानं करोति। शरीराख्यमेकमेवावयविद्रव्यम् सर्वेषामवयवानाम् विषये इत्थमनुभवेदिति न्याय्यमपि वर्त्तते इति वाच्यम्, अवयविनामकम् द्रव्यम् भवत्येव नहि, अनेके अवयवाः विलक्षणरूपेण मिलिताः विलक्षणावस्थां गताः भिन्नानि कार्याणि सम्पादयन्ति, विभिन्नैः शब्दैश्चाभिधीयन्ते। एतद्व्यतिरिक्तम् द्रव्यान्तरम् नह्युत्पद्यते। यथा—अनेके तन्तवः तन्तुवायप्रयत्नेन विलक्षणसंयोगं प्राप्ताः वस्त्रशब्देनाभिधीयन्ते आच्छादिकानि कार्याणि च सम्पादयन्ति। तत्र तन्तुभ्यो व्यतिरिक्तं वस्त्राभिधमवयविद्रव्यं नह्युत्पद्यते। अतएव शरीरस्यावयविद्रव्यवं नहि स्वीकर्तुं शक्यते। अपितु विलक्षणसंयोगेन विलक्षणावस्थां गतः अवयवसमूह एव शरीरम्। अतएव अहमर्थं एव शरीरादिकम् इदमितिरूपेणानुभवति। तथा चोक्तम् शरीरातिरिक्तत्वम् आत्मनः जडभरतेनापि—

पिण्डः पृथग्यतः पुंसः शिरः पाण्यादि लक्षणः।
ततोऽहमिति कुत्रैतां संज्ञां राजन् करोम्यहम्॥'

किञ्चावयवानाम् हस्तपादादिनाम् ह्रासविनाशादिसंजातेऽपि आत्मा स एवाहमिति अनुभवति। यदि आत्मा हस्तादिकानां समूहरूप एव स्यात् तदा हस्तादिकेषु च्छिन्नेषु पूर्वानुभूतमर्थं नहि स्मरेत्। यतस्स्मरति अतएव हस्तादि अवयवेभ्यः शरीराच्च भिद्यत एवात्मा।

किञ्च सूक्ष्मतया विचारे कृते यत् अहमिति बुद्धिः शरीरान्तःस्थितम्, अहमिति रूपेण भासमानमात्मानमेव बोधयति। यथा चक्षुरिन्द्रियेण द्वारा स्थौल्यकृशत्वादियोगि शरीरमेव गृह्णाति तथाहमिति प्रतीतिर्देहमात्रमेव विषयी नहि करोति।

किञ्च बाह्यविषयेषु परस्परविरुद्धरूपपरिमाणसंख्या सन्निवेशग्रहणेन व्यतिरेकस्य स्फुटत्वात् आत्मनि तादृशरूपान्तराग्रहणेन देहाभेदप्रतिभासभ्रमोऽविवेकिनाम्। इतश्च इच्छानुविधायिस्वव्यापारोऽयमात्मा। इच्छयैव सङ्कल्पयति स्मरत्यभ्यूहति च। शरीरमपि तदिच्छानुविधायि शयनासनोत्थनादि चेष्टमिति भवत्यभेदभ्रमः शुक्तिरजतादिवत्।

किञ्च प्रणिहितमनसस्तु ज्ञातृतया सिद्धयन्तमहमाकारमर्थंनमनवयवम्, इदमिति परिस्फुरतः स्थूलादवयविनः शरीरात् पृथगपरोक्षयन्ति एव ।

तथा च प्रयोगाः भवन्ति—जानामीति प्रत्ययः शरीरविषयो नहि भवति, अर्थान्तरविषयो वाऽयम्, अप्रकाशमान तदवयवप्रतिभासत्वात् । य एवं प्रकारः स तथा यथाऽयमिति प्रतिभासः । यत् शरीरविषयम् न तत् तथा यथोभयसम्मतम् शरीरज्ञानम् ।

किञ्च—

'उत्पत्तिमत्त्वात् पारार्थ्यात् सन्निवेशविशेषतः ।
रूपादिमत्त्वात् भूतत्वात् देहो नात्मा घटादिवत् ।
सच्छिद्रत्वाद् देहित्वात् देहत्वान्मृतदेहवत् ।
इत्यादि साधनैर्न्याय्यैः निषेध्या वर्ष्मणश्चितिः' ॥ इति ।

इन्द्रियात्मवादस्य समालोचना

अनेके चार्वाकाः इन्द्रियाणामेवात्मत्वं समर्थयन्ति । इदमिति रूपेण प्रतीयमानम् शरीरम् 'अहमि'ति रूपेण प्रतीयमानादर्थाद्भिद्यत एव । किन्त्विन्द्रियाणामिदमिति रूपेण नहि भवति प्रतीतिः अतएवेन्द्रियमेवात्मा । रूपादिगुणयुक्तस्य शरीरस्य सावयवस्यात्मत्वस्वीकारे अनेके दोषाः सन्ति । समाधावात्मानुभवकालेऽहमिति रूपेण न तु स्थूलं शरीरं प्रतीयते न वा तस्यावयवाः, किन्तु इन्द्रियाणि त्वतीन्द्रियाणि । तानि उद्भूतरूपगुणयुक्तानि सन्त्येव नहि । न वा स्थूलानि सन्ति । अतएवेन्द्रियाणामात्मत्वस्वीकारे नास्ति कश्चनापि दोषः ।

अत्रोच्यते–इन्द्रियाणामतीन्द्रियत्वादिन्द्रियैः ग्रहीतुमशक्यत्वात् तेषामहमिति रूपेण साक्षात्कारः केन प्रकारेण भवितुमर्हति ? चक्षुरादिभिरिन्द्रियैः जायमानस्य ज्ञानस्याश्रयभूतानीन्द्रियाण्येव सन्ति । सत्स्वेन्द्रियेषु चक्षुरादिषु ज्ञानं सम्भवति । तेष्वसत्सु च ज्ञानं नहि भवति । इत्थम् सर्वेषाम् रूपादिज्ञानानाम् इन्द्रियैरेव साकमन्वयव्यतिरेकः । अतएव तेषां ज्ञानानामाश्रयः चक्षुरादिकानीन्द्रियाण्येव सन्तीति स्वीकारे लाघवो वर्त्तते । इत्थम् ज्ञानाश्रयाणामिन्द्रियाणामतीन्द्रियत्वमपि नह्युपपद्यते । इन्द्रियाणामहमिति रूपेण भवत्येव प्रत्यक्षम् ।

अथ स्यात् यदीन्द्रियाणि ज्ञानाश्रयभूतानि स्युः तदा तथा प्रतीयेरन् । नहि प्रतीयन्ते तथा, अतएव ते तथा नहि सन्तीति सिद्धचति इति चेन्न; चक्षुः पश्यति, श्रोत्रम्. शृणोति इति जनानामनुभवेन चक्षुः पश्यति, न तु वक्ति, वाक् वक्ति सा नहि शृणोति इति सत्पतपावचोभिश्चेन्द्रियाणां ज्ञानाश्रयत्वं प्रतीयते । किञ्च वायुरयम् त्वगिन्द्रियम् सुखयति, शब्दोऽयं श्रोत्रेन्द्रियम् सुखयति इति जनानां व्यवहारेणापि

सुखादिकानामाश्रयः इन्द्रियाण्येव सिद्ध्यन्ति। इन्द्रियाण्येव सुखादिकानाम् भोक्तॄणि। अतएवेन्द्रियाण्येवात्मा। किञ्च यतः इन्द्रियेष्वात्मधर्माः प्रतीयन्ते ततोऽपि इन्द्रियाणामात्मत्वम्।

किञ्चेन्द्रियेषु विकलेषु सकलेषु च जनाः विकलोऽहम्, सकलोऽहमित्यनुभवन्ति अतएवापीन्द्रियाणामात्मत्वं सिद्ध्यति।

अत्रेन्द्रियव्यतिरिक्तात्मवादिनः प्राहुः—इन्द्रियात्मवादः समीचीनो नास्ति, तत् तत् इन्द्रियम् तस्य तस्यैव विषयस्य ग्रहणम् करोति। नह्येकस्येन्द्रियस्य विषयमन्यदिन्द्रियं ग्रहीतुं समर्थं भवति; किन्त्वात्मा तु इन्द्रियाणां विषयाणां ज्ञाता एकश्च भवति। अतएव ह्यनुभवो भवति योऽहमद्राक्षम् स एवाहम् स्पृशामि। एतेन सिद्ध्यति यदिन्द्रियाणि प्रतिनियतविषयग्राहकान्यनेकानि च सन्ति। आत्मा तु एकः सर्वेषां विषयाणां ज्ञाता च वर्त्तते। अतएवात्मेन्द्रिययोर्भेदो भवति।

अथ स्यात् यथा मनुष्यः घटविशेषं दृष्ट्वा अपरं घटं विलोक्य भ्रमवशात् द्वयोर्घटयोः अभेदमनुभवति तेनैव भ्रमादनुभवति मनुष्यः योऽहमद्राक्षम् स एवाहम् स्पृशामीति। अतएव भ्रमादेव दर्शनस्पर्शनकर्त्रोः भवत्यभेदप्रतीतिः। इति चेन्न; दृष्टान्तदार्ष्टान्तिकयोः वैशम्यात्। घटयोर्द्रष्टा भ्रमादेवाभेदमनुभवति। दार्ष्टान्तिके तु द्रष्टा आत्मा चक्षुरिन्द्रियम् भिन्नम्, स्प्रष्टाऽत्मात्वगिन्द्रियम् च भिन्नम्। तयोरभेदानुभवकर्ता यद्यन्यो वर्त्तते तदा भ्रमः कस्य भवति। इमे उभे इन्द्रिये तु भ्रमात् नहि अभेदमनुभवतः एकेनेन्द्रियेणापरस्येन्द्रियस्य ग्रहणाभावात्। इन्द्रियात्मवादे इन्द्रियव्यतिरिक्तस्यात्मत्वाभावावात्।

किञ्च लोके सर्वेऽनुभवन्ति यदेक एवाहमनेकैरिन्द्रियैः विषयाननुभवामि। अतएवापि इन्द्रियेभ्यो भिन्नः सिद्ध्यति।

किञ्च ममेदं चक्षुः ममेदम् श्रोत्रम् इत्यादि प्रतीतिभ्योऽपि आत्मा इन्द्रियेभ्यो भिन्नं सिद्ध्यति। अथ स्यात् चक्षुरादीन्द्रियेभ्योऽभिन्न एवात्मा, तदा चक्षुरादीन्द्रियेषु विनष्टेषु तैरनुभूतानाम् विषयाणाम् स्मरणं न स्यात्। यस्मात् स्मर्यन्ते विषयाः अनुभूताः रूपादिकाः तस्माज्ज्ञायते यत् चक्षुरादिव्यतिरिक्त एवात्मा वर्त्तते, यः स्मरति पूर्वानुभूतान् रूपादिकान्।

किञ्च यदि इन्द्रियाण्येवात्मा स्युः तर्हि 'अहम् चक्षुः' 'अहम् श्रोत्रम्' इत्यपि प्रतिपत्तिर्भवेत्। नो भवति यस्मात् तस्मादिन्द्रियात्मवाद अनुपपद्यते। अतएवेन्द्रियव्यतिरिक्त एवात्मा सिद्ध्यति।

मन-आत्मवादस्य समालोचनम्

चार्वाकाणां चतुर्विध्यम् प्रख्यातम्। तत्र एके देहस्यात्मत्वम् स्वीकुर्वन्ति, अन्ये

इन्द्रियाणामेवात्मत्वं स्वीकुर्वन्ति। नदपरे मनम एवात्मत्वम् स्वीकुर्वन्ति। तेभ्यो भिन्नाः चार्वाकाः प्राणानामेवात्मत्वम् स्वीकुर्वन्ति। तत्र मन आत्मवादिनश्चार्वाकाः मनसः एवात्मत्वं स्वीकुर्वन्तु; देहेन्द्रियाणामात्मत्वं स्वीकुर्वन्तश्चाहुः—देहस्य तु स्थूलत्वात्, जडत्वात्, उत्पत्तिमत्त्वात् ज्ञानादिगुणैरहितत्वात् आत्मत्वम् नहि स्वीकर्तुं शक्यते। चक्षुरादीन्द्रियाण्यपि अन्यान्यानि प्रतिनियतविपयाणि अनेकानि च सन्ति। ज्ञानानामाश्रयः आत्मा चैक एव एकस्मिन् शरीरो अनुभूयते, स एव सर्वेषां ज्ञानानामाश्रयः भोक्ता च सर्वेषां भोगानामित्यनुभूयते, अतएवानेकेषामिन्द्रियाणामप्यनात्मत्वम् सुतरामनुपपन्नम्। अतएव देहेन्द्रियाणामात्मत्वम् नहि सेद्धुमर्हति।

किन्तु मनसः आत्मत्वे स्वीकारे कश्चनापि दोषो नहि विद्यते। मनसः देहेन्द्रियेभ्यो भिन्नत्वात् एकत्वाच्च। अतएव मनसः आत्मत्वस्वीकारे देहेन्द्रियात्मवादयोः दोषाः नहि आयान्ति। मनः सर्वेन्द्रियाणामध्यक्षरूपेणाप्यनुभूयते। मनसः संयोगं विना कस्यापि विषयस्य ज्ञानम् नहि भवति। मनश्चेन्द्रियेभ्यो व्यतिरिक्तममेकम च। किञ्च इन्द्रियान्तरैः अनुभूते, विनष्टेषु चापि तेषु काप्यनुपपत्तिरपि नहि भवति। मनश्च नित्यम्। अतएव मन एवात्मा इति स्वीकर्तव्यम्।

अत्रोच्यते—मनः आत्मा भवितुम् नार्हति। मनसः करणविशेषत्वात्। येन प्रकारेण चक्षुरादिकानीन्द्रियाणि ज्ञानसाधनानि सन्ति, न तु ज्ञानाश्रयरूपाणि तानि तेनैव प्रकारेण मन अपि ज्ञानोपलब्धौ साधनविशेष एव। इदमपि करणविशेष एव। मनस इन्द्रियत्वम् च—'युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्।' (न्या० सू० १।१।१६) इति सूत्रेणैव सिद्धयति।

अस्य सूत्रस्याभिप्रायो विद्यते यत्—यथायथम् स्वस्वविषयैः संयुक्तेष्वपि चक्षुरादिकेषु ज्ञानसाधनभूतेषु समकालमेव रूपरसगन्धस्पर्शशब्दानाम् समकालमेव ज्ञानम् नह्युत्पद्यते इति लोके दृश्यते। कालविशेषे विषयविशेषस्यैव ज्ञानम् भवति। इत्थम् कस्मात् भवति? अत्र केनचित् साधनेनावश्यं भाव्यम् यस्य साध्येन विना ज्ञानोत्पत्तिर्नहि भवति। तत्साधनम् किमास्ते? इत्याशङ्कायाम् प्राह महर्षिः गौतमः—तद्धि मन एव। तच्च मन एकमेव। मनः येनेन्द्रियेण सह सहभागो भवति तदेवेन्द्रियम् ज्ञानम् जनयति। चक्षुषा सह सहयोगे संयाते चक्षुरिन्द्रियम् रूपम् गृह्णाति, घ्राणेन्द्रियेण सह सहयोगे मनसः संजाते घ्राणेन्द्रियम् गन्धं गृह्णाति। अतएव मनसः ज्ञानोपलब्धौ साधकतमत्वम् सिद्धयति। साधकतमम् आश्रयो नहि भवति। अतएव मनसो भिन्न एवात्मा स्वीकरणीयः।

अथ स्यात् मनसः सहयोगम् विना इन्द्रियैः ज्ञानं नहि जायते, इति भवताऽपि स्वीक्रियते। इत्थम्भूतस्य मनसः ज्ञानाश्रयत्वस्वीकारे कश्चनापि दोषं नहि विद्महे। यस्येन्द्रियस्य ज्ञानम् मनः आत्मा स्वीकरोति तस्यैव विषयस्यानुभवो भवति।

ज्ञानाश्रयस्य मन आत्मनः एकत्वात् एकस्मिन् काले एकविधमेव ज्ञानम् भवतीति स्वीकरणीयम् । अतएव मनः ज्ञानाश्रय एव न तु ज्ञानसाधकतममिति सिद्धयति ।

अत्र ब्रूमहे । मनः ज्ञानसाधनमेव, न तु ज्ञानाश्रयः आत्मा । यतः येन प्रकारेण वाह्येन्द्रियाणि चक्षुरादिरूपादिकानाम् वाह्यविषयाणामुपलब्धेः साधनानि सन्ति तेनैव प्रकारेण आभ्यन्तराणामपि विषयाणाम् सुखदुःखादिकानाम् विषयाणामपि उपलब्धेः साधनेन केनचन भाव्यम्, तच्च चक्षुरादिकेषु इन्द्रियेषु किमपि भवितुं नार्हति तेषाम् रूपादिकानामेव विषयाणाम् ग्रहणे प्रतिनियतत्वात् । अतएवैतेभ्यो भिन्नमेव तत्साधनम् स्यात् । तत् साधनम् मन एव । मनसैव सुखादिकानामाभ्यन्तराणाम् विषयाणामनुभूतिर्भवति। अतएव येन प्रकारेण ज्ञानसाधनत्वादिन्द्रियाणि ज्ञानसाधकतमान्येव तेनैव प्रकारेणाभ्यन्तर विषयज्ञानसाधकतमत्वान्मनः ज्ञानसाधकतममेव। साधकतममेव करणशब्देन व्यपदिश्यते । करणकर्त्रोः महान् भेदः । करणत्वम् च कर्त्रधीनप्रवृत्तिमत्त्वरूपम् भवति । कर्तृत्वम् च स्वाधीप्रवृत्तिमत्त्वरूपम् भवति । 'स्वतन्त्रः कर्ता' इति भगवान् पाणिनिरप्याह ।

मनसः इन्द्रियत्वम् भगवानपि प्रत्यपीपदत् गीतायाम्—'मनः षष्ठानीन्द्रियाणो'ति वाक्येन । मनसैव सुखदुःखादिकानामनुभवो भवतीति श्रुतिरप्याम्—'कामः संकल्पो विचिकित्साह्रीर्धीर्भीरित्येतत् सर्वं मन एव प्रमाणमि'ति ।

'मम मनः क्षुब्धं वर्त्तते ।' 'शान्तं मे मनः'—इत्यादि केनानुभवेन; 'अन्यत्रमनाभूवं नादर्शम्' 'सावधानेन मनसा शृणु' इत्यादिकेन श्रौतस्मार्तप्रयोगेण आत्मव्यतिरिक्तत्वम् मनसः सिद्धयति । 'त्रीण्यात्मनेऽनुकुरुत मनो वाचम् प्राणम् ।' इत्यादिकया श्रुत्याऽपि वागादिवदात्मनः उपकरणता आत्मनः सिद्धयति । स्मर्यते चापि भोक्तुरात्मनः प्रधानोपकरणत्वमात्मनः—

'मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मनः ॥' इति ।

अतो मन आत्मा भवितुम् नार्हति । एवमेव तत्त्वमुक्ताकलापकारेण वेदान्तदेशिकेनाभिहितम्—

'वाह्याक्षेभ्योऽन्य आत्मा तदखिलविषयप्रत्यभिज्ञातुरैक्यात् ।
कर्तुः स्मृत्यादिकार्ये करणमिति मनो मानसिद्धम् ततोऽन्यत् ॥' इति ।

प्राणात्मवादस्य समालोचनम्

चतुर्विधेषु चार्वाकेषु एके चार्वाकाः प्राणानामेवात्मत्वमभ्युपयन्ति । ते कथयन्ति यद् देहस्य स्थूलत्वात् जडत्वात् पाञ्चभौतिकत्वात्, इन्द्रियाणामनेकत्वात् रूपादि-

विषयग्रहणप्रतिनियतविषयत्वात्, मनसश्च आभ्यन्तरसुखदुःखाद्युपलब्धिसाधकत्वात् आत्मत्वं नहि स्वीकर्तुं शक्यते, किन्तु प्राणस्यात्म एव स्वीकारे कश्चनापि दोषो नास्ति। लोके दृश्यते यत् यावत्कालपर्यन्तं शरीरे प्राणाः भवन्ति तावत्कालपर्यन्तम् सात्मकमिदं शरीरम् इति भवति प्रतीतिः। प्राणे च शरीरान्निष्क्रान्ते अस्य प्राणाः निर्गताः, मृतकोऽयम्, इति भवति प्रतीतिः। अनेन प्राणस्यान्वयव्यतिरेकाभ्याम् प्राणानामेवात्मत्वम् सिद्ध्यति।

किञ्चात्मैव देहं तेषु तेषु कार्येषु प्रवर्त्तयति निरात्मकेषु शरीरेषु इन्द्रियमनआदीनाम् प्रवृत्तिरहितदर्शनात्। यावत्कालपर्यन्तम् देहे प्राणास्तिष्ठन्ति तावत्कालपर्यन्तमेव देहेन्द्रियमनसाम् तेषु तेषु कार्येषु प्रवृत्तिर्दृश्यते। अतएव स्वीकरणीयमिदं स्यात् यत् प्राण एवात्मा। स एव देहेन्द्रियमनसा तेषु तेषु कार्येषु प्रवर्त्तकः।

किञ्च क्रियाशीलानाम् प्राणानामेवास्मात् शरीरात् उत्क्रान्तिः, लोकान्तरगतिः लोकान्तराच्चागतिरुपपद्यते, अतएव प्राणात्मवाद एव उत्क्रान्तिगत्यागतीनाम् आत्मनः प्रतिपादकम् सूत्रमुपपद्यते शारीरकम् अतएवापि प्राणानामात्मत्वं स्वीकर्तव्यमिति।

अस्य प्राणात्मवादस्य प्रत्याख्यानं कुर्वन्तः तद्व्यतिरिक्तात्मवादिनः प्राहुः— प्राणस्यात्मत्वम् नहि सेद्धुमर्हति, प्राणस्य वायुविशेषत्वात्। यथा बाह्यो वायुः आत्मा नहि भवति तथैव शरीरान्तर्वर्ति वायुविशेषरूपो वायुः आत्मा भवितुं नार्हति।
चैतन्याश्रयत्वमेवात्मत्वं भवति। आत्मनः प्रधानो गुणः ज्ञानम् वर्त्तते। ज्ञानगुणकत्वादेवात्मा चेतन इत्यभिधीयते। ज्ञानरहितानि सर्वाणि वस्तूनि जडशब्दवाच्यानि,
अनात्मकानि सन्ति। अतएव यत्र-यत्र चैतन्याश्रयत्वम् तत्र तत्रात्मत्वमिति स्वीक-
सिद्धमिति।
रणीयम्। चैतन्यविरहत्वादेव प्राणस्यात्मत्वम् सुतराम् सुषुप्तौ आत्मावृत्तिविहीनो

किञ्च वृत्तिहीनेऽपि सुषुप्तौ प्राणस्य गतिमत्त्वात। प्राणस्यैव वृत्त्या सुप्तस्यापि पुरुषस्य अशित-
भवति इति सर्वलोकानुभवसिद्धम्। सुषुप्तिकाले प्राणवृत्त्यैव
पीतानाम् अन्नजलादिकानाम् सप्तधातुरूपेण परिणामो भवति। प्राणो हि नाम तनुतरतेजेऽन्नानुविद्धः
सुप्तस्य पुरुषस्य श्वासप्रश्वासावपि भवतः। रेचितः त्वचा स्पृश्यमानो स्फुट-
कौष्ठ्यमारुतः। स च कण्ठमुखनासाभ्यन्तरे बहिश्च इदम्–इदमिति
मनात्मतया 'अयं मम प्राणवायुः' इत्यादिरूपेणोपलभ्यते, अहमर्यादात्मनो भिद्यते।
रूपेणोपलभ्यते। इदमिदन्तयोपलभ्यमानत्वादेव प्राणः किञ्च प्राणाः
अतएव तस्य जडत्वात् ज्ञानाश्रयाभावाच्च, भवति अनात्मत्वसिद्धिः। प्राणापानस-
अनेके सन्ति किन्तु प्रतिशरीरम् आत्मा एक एक एवानुभूयते। प्राणानाम्
मानव्यानोदानाख्या पञ्च प्राणा इति हि शरीरस्थानाम् पञ्चानाम्
प्रसिद्धिः।

प्राणाः सावयवा अपि सन्ति, तेषां सावयवरूपेण भवत्युपलब्धिः, अतएव ते निरवयवत्वादात्मनो भिद्यन्ते । किञ्च प्रयत्नादृष्टप्रेरणानुगुण्येन प्राणानाम् तेनैव प्रकारेण उत्क्रान्तिगत्यागत्यादिकाः नो सम्भवन्ति यथा मनसः। अतएव प्राणा आत्मानो भवन्तीति सिद्धम् ।